इति स्मृतेः । यद्वा । चरणैः कलापादिभिर्गुरवो महान्तः । पङ्क्तिपावनाः पङ्क्तौ भोजनादिगोष्ठ्यां पावना अग्रभोजिनः पवित्रा वेत्यर्थः । यद्वा ।

यजुषां पारगो यस्तु साम्नां यश्चापि पारगः ।
अथर्वशिरसोध्येता ब्राह्मणः पङ्क्तिपावनः ॥

इति लक्षिताः । पञ्चाग्नयो दक्षिणाग्निर्गार्हपत्याहवनीयसभ्यावसथ्यरूपाग्निपञ्चकोपासकाः । धृतव्रताश्चान्द्रायणादिव्रतयोगिनः । सोमपीथिनः सौमो लताविशेषो हुतशेषो वा तत्पायिनः । अनेन सोमयागयाजित्वमुक्तम् । उम्बरनामानो उम्बरमुत्कर्षसूचकं कुलनाम येषां ते । यद्वा । उम्बरं प्रसिद्धं नाम येषां ते ॥ प्रसिद्धौ उम्बरं विदुरिति विश्वः ॥ ब्रह्मवादिनो वेदज्ञा इत्यर्थः ।

---

१२. ब्राह्मणाः after तत्र N.; तैत्तिरीयाः N. तैत्तिरेयिणः Kl.; यायावा [?]रा before पञ्चाग्नयो N.

१३. °पीतिनः Bh.; उम्बर A. औदुम्बर Bh. for उदुम्बरं; °पीथिनो ब्राह्मणा ब्रह्म° A.; प्रतिनिवसन्ति Kl.; A. B. C. D. add इम after प्रतिवसन्ति

ते श्रोत्रियास्तत्त्वविनिश्चयाय भूरि श्रुतं शाश्वतमाद्रियन्ते । ३९
इष्टाय पूर्ताय च कर्मणेर्थान्दारानपत्याय तपोर्थमायुः ॥
तदामुष्यायणस्य तत्रभवतः सुगृहीतनाम्नो भट्टगोपालस्य

३९–३६. त इत्यादि । ते कथितरूपाः । श्रोत्रियादछन्दोध्येतारः । जन्मादिसंपन्ना ब्राह्मणा वा । भूरि प्रचुरम् । शाश्वतं सार्वकालिकम् । श्रुतमध्ययनमाद्रियन्ते भट्टधति । यद्वा शाश्वतं नित्यागमं वेदाख्यमाद्रियन्ते । कीदृशम् । भूरि श्रुतं बहुभ्यो बहुधा बहुभिः सहाभ्यस्तम् । किमर्थम् । धर्मस्य कर्तव्याकर्तव्यरूपस्य विनिश्चयाय निर्णयाय । वैदिककर्मणि निर्णयादेव प्रवृत्तेरिति भावः ॥ श्रोत्रियंछन्दोधीत इति पाणिनिसूत्रम् ॥

जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥

इति स्मृतिः ॥ शाश्वतमित्यत्र कालाट्ठञं [ठञ्?] बाधित्वा शाश्वते प्रतिषेध इति भाष्यवचनादण् । तथा तेर्थान्धनान्याद्रियन्ते । इष्टाय कर्मणे यागादिकार्यार्थम् । पूर्ताय कर्मणे खातादिकार्यार्थम् । यागादीनां धनसाध्यतया तेषां तदादरो न तु भोगायेति भावः । दारान्पत्नीराद्रियन्ते । अपत्याय संतत्यर्थं न तु कामायेत्यर्थः । त आयुर्जीवनमाद्रियन्ते । तपोर्थं तपश्चरणार्थं न तु व्यसनार्थम् । क्लेशबहुलं धर्म्यं कर्म तपः । तदनेन तेषां सर्वगुणवत्त्वं दर्शितम् ॥ भूयिष्ठं [स्कारं?] भूयश्च भूरि चेत्यमरः । अथ क्रतुकर्मेष्टं पूर्तं खातादिकर्मणि । दाराः पुं भूम्नि च ॥ विनिश्चयायेत्यादौ तादर्थ्ये चतुर्थी ॥

३७–४१. अत्र कुले जात आमुष्यायणः । तत्रभवतः पूज्यस्य । सुगृहीतं शोभनोच्चारणं बलिकर्णादिवन्मङ्गल्यं नाम यस्य । भट्टश्रुतुःशाखाभिज्ञः । पवित्रा पुण्या कीर्तिर्यस्य । तस्यात्मसंभवः पुत्रः ।

३९. विनिर्णयाय B. विनिश्चयाय N.
४०. तथामुष्यायणस्य D.; N. om. सुगृहीतनाम्नो.

पौत्रः पवित्रकीर्तेर्नीलकण्ठस्यात्मसंभवो भट्टश्रीकण्ठपदलाञ्छनो भवभूतिनामा जातूकर्णीपुत्रः कविर्निसर्गसौहृदेन भरतेषु स्वकृतिमेवंप्रायगुणभूयसीमस्माकमर्पितवान्। यत्र खल्वियं वाचोयुक्तिः।

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान्प्रति नैष यत्नः।

श्रीः सरस्वती कण्ठे यस्य स श्रीकण्ठः। तद्वाचकं पदं लाञ्छनं चिह्नं यस्य सः। नाम्ना श्रीकण्ठः। प्रसिद्ध्या भवभूतिरित्यर्थः॥ [श्रीर्वेशरचनाशोभाभारतीसरलद्युष्विति मेदिनीकरः॥] जतूकर्णगोत्रप्रसूता जातूकर्णी तस्याः पुत्रः। निसर्गसौहृदेन साहजिकसौहार्देन॥ [ननु हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयवृद्ध्या सौहार्दामिति स्यात्। उच्यते। हृदित्यादौ प्रतिपदोक्तस्य महणाद्धृदयस्य हृल्लेखेति हृदादेशस्यादिवृद्धिः। यद्वा। संज्ञापूर्वको विधिरनित्य इति वचनादुभयपदवृद्धेरनित्यत्वम्। यद्वा। सुहृदुर्हृदौ मित्रामित्रयोरिति निपातस्य सुहृच्छब्दस्यावयवो हृच्छब्दस्तदन्तोत्तरपदवृद्धिर्भवति॥] एवंप्रायगुणभूयसीं भूम्ना रसानामित्यादिप्रायैर्गुणैरुपचितामर्पितवान्प्रयोगतोर्थतश्च संक्रामितवान्। खलु प्रसिद्धौ वाक्यभूषायां वा। वाचोयुक्तिर्वचनरचनम्॥ [वाग्दिक्पदयद्यद्यो युक्तिदण्डहरोष्विति षष्ठचलुक्॥]

४२–४९. संप्रति स्वकौशलबलेन सगर्वमाह। ये नामेत्यादि। इह तावत्त्रिविधाः पुरुषाः। केचिदज्ञा एव। केचिदद्वैतमतमग्नमनसः काव्यरसविरसाः। इतरे सहृदयहृदयामोदिकाव्यभव्यरसभररसिकाः। तत्राद्यान्प्रत्याह। ये केचिदज्ञा नोस्माकम्। इह प्रबन्धे। अवज्ञा-

---

१८. पवित्रकीर्तिर्नील° O.; आत्मजः for आत्मसंभवः N.; Bh. N. om. भट्ट; पदवाक्यप्रमाणज्ञो before भवभूति N.; भवभूतिर्नाम N. O.

१९. N. om. जातूकर्णीपुत्रः; सौहार्देन for सौहृदेन N.

४० वर्तमानः before स्वाकृतिम् K1. N. O.; प्रगुण for प्रायगुण N.; Bh. om. प्राय; तत्र for यत्र B.; तस्य कवेः for यत्र O.

उत्पत्स्यतेस्ति मम कोपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥ ४५

मवधीरणम् । प्रथयन्ति ख्यापयन्ति । नाम संभावनायाम् । संभाव्यत इदं न तु वास्तवमित्यर्थः । ते किमपि किंचिदल्पं जानन्ति । तान्प्रति ताँल्लक्षीकृत्य मम नैष यत्नः । नहि बधिरे गीयते । यद्वा । किं-शब्द आक्षेपे । ते किं जानन्ति किं तु न जानन्तीत्यर्थः । द्वितीया-न्प्रत्याह । ये नाम निश्चये वैषयिकसुखविमुखा मुमुक्षव इहावधी-रणामाचरन्ति ते किमपि वाङ्मनसागोचरं परं ब्रह्म जानन्ति । ते नमस्यास्तान्प्रति मम नैष यत्नः । न हि सम्राजमधिकृत्य कौपीनं सूत्र्यत इति भावः । अन्त्यान्प्रत्याह । मम समानधर्मा तुल्यगुणः कोपि जन उत्पत्स्यते जन्माप्स्यत्यस्ति विद्यते वा तं प्रत्येष यत्न इति भावः । इहाल्पज्ञत्वेन साधर्म्यमनौद्धत्याय । बहुज्ञत्वेन साधर्म्यं कदर्य-दुर्जनविवर्जनायेत्युभयत्र विवक्षा । अथेदानीमनुत्पन्नस्य कथमुत्पादो-त्रानुपलब्धस्य वा कथमुपलम्भ इत्युभययोग्यतामाह । काल इति । यतः कालोयं निरवधिर्विगतावसानः । विपुला महती च पृथ्वी भूमिः । तथा च तस्येदानीमनुत्पन्नस्य कालान्तर उत्पाद इहानुपलब्धस्य दे-शान्तर उपलम्भश्च स्यादिति भावः । इह प्रथमार्धे बहुत्वेन प्रयोगो द्वितीयार्ध एकत्वेन प्रयोगश्च न दोषः । भिन्नवाक्यार्थत्वात् । एकवाक्या-र्थत्वे तादृक्प्रयोगस्यायोग्यतया दोषत्वात् । तथैव व्युत्पत्तेरित्यवधे-यम् । [यद्वा । अवज्ञाप्रथमावसरेहंकारेणात्मनो गौरवाद्बहुत्वं निज-समतावसरे शान्त्यात्मन्येकत्वम् । यद्वा । जात्यभिप्रायमेकवचनम् ।]

४४. °न्स्यते मम च कोपि N.; समानजन्मा O.

४५. Between this stanza and the following, O. has कविवर्णनं च प्रति तेनैवमुक्तम्।
गुणैः सतां न मम को गुणः प्रख्यापितो भवेत् ।
यथार्थनामा भगवान्यस्य ज्ञाननिधिर्गुरुः ॥

N. also has this, but it reads प्रति तु for च प्रति, एव for एवं, and मम न for न मम. K1. has this with मम यथा कोऽपि for सतां न मम को. N. has also the following passage before कविवर्णनं &c.:—तदुच्यन्तां तत्प्रख्यापनाय सर्वे कुशलिनो यथा संगीतकप्रयोगे वर्णिकापरिग्रहे च वर्तन्तामिति ।

अपिच । यद्वेदाध्ययनं तथोपनिषदां सांख्यस्य योगस्य च
ज्ञानं तत्कथनेन किं न हि ततः कश्चिद्गुणो नाटके ।
यत्प्रौढत्वमुदारता च वचसां यच्चार्थतो गौरवं
तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्ध्ययोः ॥

४६–४९. अधुना निजगुणगरिमोपदर्शनेन निजमन्ये विदग्धादरमाह । यद्वेदेत्यादि यत्र खल्वियं वाचोयुक्तिरित्यत्राप्यनुषज्यते । अद्वैतप्रतिपादको वेदभाग उपनिषत्तज्ज्ञानम् । योगः पातञ्जलशास्त्रम् । तयोरध्ययनज्ञानयोः कथनेन किम् । अपि तु न किमपीत्यर्थः । यतस्ततो वेदाध्ययनादेर्नाटके कश्चिद्गुणो नास्ति । तेषां नाटकेऽनुपयोगात् ॥ तत इति ल्यब्लोपे पञ्चमी ॥ तान्याप्य नाटके न कश्चिद्गुण इत्यर्थः । वयं सर्वमेव विद्योनक्रतया पुनस्तदत्र न निबद्धमिति भावः । तर्ह्यत्र कवेर्वेदादिज्ञानज्ञापनं किमर्थमत आह । यदिति । वचसां यत्प्रौढत्वं वाक्यार्थे पदं पदार्थे वाक्यं तत्कृतिः । यथा न दैवीयं किं तु मानुषीत्यर्थे निमेषवती । चन्द्रवदित्यर्थे नयनसमुत्थं ज्योतिरत्रेरि[वे?]ति । यदाह दण्डी [वामनः?] ।

पदार्थे वाक्यवचनं वाक्यार्थे च पदाभिदा ।
प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य च ॥ इति ।

यच्च वचसामुदारता विकटत्वं यस्मिन्सति पदानि जनो नृत्यन्तीवेति मन्यते । यद्वा । उदारतालंकारादिदोषशून्यत्वम् । यद्वा । उदारता गुणभेदः । यदाह दण्डी ।

उत्कर्षवान्गुणः कश्चिदुक्ते यस्मिन्प्रतीयते ।
तदुदाराभयं तेन सनाथा काव्यपद्धतिः ॥ इति ।

यच्चार्थतो गौरवमनर्घ्यार्थता । यद्वा । स्वल्पं वचनमर्थसार्थप्रसरसमर्थमित्यर्थः । तच्चेदि नाटकेऽस्ति ततस्तदेव पाण्डित्यवैदग्ध्ययोर्गमकं

---

४६. N. om. अपिच.

अतो यदस्माकमर्पितं प्रियसुहृदात्रभवता भवभूतिनाम्ना ५०
प्रकरणं स्वकृतिर्मालतीमाधवं नाम तदेव तत्रभवतः काल-
प्रियनाथस्य पुरतः प्रयोगेण प्रख्यापयितुमुद्यताः । तत्सर्वे कुशी-
लवाः संगीतप्रयोगेण मत्समीहितसंपादनाय प्रवर्तन्ताम् ।

नटः । स्मृत्वा । एवं क्रियते युष्मदादेशः किं तु या यस्य
युज्यते भूमिका तां खलु तथैव भावेन सर्वे वर्ग्याः पाठिताः । ५५

बोधकम् । पण्डितो वेदाध्ययनादिकुशलस्तस्य भावः पाण्डित्यम् । वैदग्ध्यं रसादियोगिप्रबन्धबन्धनकौशलम् । अनेन ग्रन्थे सर्वगुण-वत्त्वमुक्तम् । तत्कर्तृत्वेनात्मनः सर्वपथीनमतिमत्त्वमप्युक्तम् । नाटक इति । ननु नाटक इत्ययुक्तम् । अस्य प्रकरणत्वात् । प्रकरणनाट-कयोर्भेदात् । मैवम् ॥ नट नृत्ताविति अस्य धात्वि स्वार्थे कनि नाटक-मिति ॥ तथा च नाटके नाटच इत्यर्थात् ।

५४–५६. भूमिका व्याजप्रवेशः । यदाह भरतः ।

अन्यरूपैर्यदन्यस्य प्रवेशः स तु भूमिका ॥ इति ।

वर्गे भवा वर्ग्याः । नटमेलकस्था इत्यर्थः । सौगतस्य बौद्धस्य जरत्प-रिव्राजिका वृद्धा भिक्षुकी । एतादृशी दौत्ये प्रशस्ता । यदाह भरतः ।

---

५०. ततो A. for अतो; यत्तदस्माक° Bh.; °दा तत्रभवता कात्र्यपेन भव० Bh. तत्रभवता भव° K1.

५३. ब्राह्मणेन before प्रकरणं Bh.; कृतं A. कृतं B. for कृतिः; तदेतदेव A. तदस्मिं-नेव Bh. for तदेव; भगवतः for तत्रभवतः Bh.

५२. कालप्रियनाथस्य सकलजगदेकचक्षुषो विधात्मनः सूर्यस्य पुरतो यथाप्रयोगेण Bh.; अहमुपतः Bh. K1.; सर्वेकुशी° A. Bh.

५१. संगीतक Bh. C. D. K1.; यथास्वं before संगीतक Bh.; °प्रयोगेन K1.; भूमिकाकरणेन च before मत् Bh.

५०—५१. N. O. om. this passage.

५४. प्रविश्य before नटः O.; सहर्षं after स्मृत्वा Bh.; एष K1. Bh. O. and स एष N. for एवं; तावद्भूमिकाः सर्वाः for किं तु—खलु. N.;

५५. तदेव for तथैव Bh. K1. O.; O. om. सर्वे; Bh. om. भावेन.

सौगतजरत्प्रव्राजिकायास्तु कामन्दक्याः प्रथमां भूमिकां भाव एवाधीते तदन्तेवासिन्यास्त्वहमवलोकितायाः ।

सूत्र० । ततः किम् ।

विधवेक्षणिका दासी भिक्षुकी शिल्पकारिका ।
प्रविदश्य चाशु-विश्वासं दूतीकार्यं च विन्दति ॥ इति ।

वृद्धत्वं चास्या रूपशून्यत्वसर्वदृश्यत्वप्रगल्भत्वसूचकम् । यदाह ।

लज्जितं नाथवन्तं वा रूपिणं वा तथातुरम् ।
दूतं वाप्यथ वा दूतीं न तु कुर्यात्कथंचन ॥

अन्तेवासिनी निकटशिष्या । अहं भूमिकामधीय इत्यन्वयः । ततः किमिति । एतावदुक्त्वा किमिति विरतोसीत्यर्थः । प्रकरणलक्षणं भरते ।

आत्मशक्त्या कविर्यत्र कथां नायकमेव च ।
औत्पत्तिकं प्रकुरुते तद्धि प्रकरणं विदुः ॥

इदं च शुद्धम् । यदाह भरतः ।

द्विधा प्रकरणं तत्तु शुद्धं संकीर्णमेव च ।
कुलस्त्रीरचितं शुद्धं संकीर्णं वेश्यया कृतम् ॥

अत्र नाटके यादृशो नियमस्तादृशः । नायकलक्षणं भरते ।

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥
धृत्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ॥

---

५६. प्रव्राजिकायाः for प्रव्राजिकायाः A. N.; च for तु N.; A. om. अस्तु; प्रथम-भूमिकां A. D.

५७. एको for एव Bh.; च for तु O.; इति at the end, Bh. K1. K2. O.

५८. Bh. om. the speech; ततः for किम् N.

नटः। ततः प्रकरणनायकस्य मालतीवल्लभस्य माधवस्य वर्णिकापरिग्रहः कथम्।

विनयः शीलसंपत्तिर्मधुरः प्रियदर्शनः।
त्यागः सर्वस्वदानं स्याद्दक्षः क्षिप्रकरो मतः॥
प्रियंवदोनुत्कटवाक्सस्नेहो लोकरञ्जकः।
मितप्रस्तुतवाग्वाग्मी नित्यकर्मरतः शुचिः॥
ख्यातवंशो रूढवंशः षोडशाब्दिशको युवा।
वाङ्मनःकर्मभिर्यश्च न चलः स स्थिरो मतः॥
धृतिः सर्वेषु या प्रीतिरुत्साहोग्लानिरेव च।
स्मृतिः कालान्तरज्ञानं प्रज्ञा तीक्ष्णमतिर्मता॥
कलाश्चात्र चतुःषष्टिर्मानश्चित्तसमुन्नतिः।
शूरः संग्रामनिपुणो रूपवान्दृश्य उच्यते॥
आर्तिप्रतापस्तेजस्वी शास्त्रचक्षुस्त्रयीपरः।
आत्मवत्सर्वभूतानि यः पश्यति स धार्मिकः॥ इति।

ननु मालतीवल्लभत्वं माधवस्य न योग्यं माधवेन वसन्तेन समं वर्षाकालीनाया मालत्या जातेः संबंधाभावात्। मैवम्। अपूर्वमेव हि पदार्थसार्थं योगिनीप्रभावात्संपन्नमासाद्य सहृदयहृदयचमत्कारकारिणीं वैदग्धीमेव कविरयमुल्लेक्षितवानित्यदोषः। माधव इति नाम्ना शृङ्गारमयतोक्ता। वसन्तस्य शृङ्गारमयत्वात्। शृङ्गारमयत्वेन च विष्णुदैवतत्वमपि कटाक्षितम्। यदाह भरतः।

शृङ्गारो विष्णुदैवतः। इति।

अत एवास्य श्यामत्वमपि वक्ष्यति कुवलयदलश्यामोयमित्यादिना।

श्यामो भवेत्तु शृङ्गारः। इत्यपि भरतः।

९९. K1, K2, B, C, O, om. माल—भस्य.
१०. ग्रहः for परिग्रहः O.

सूत्र० । कलहंसमकरन्दप्रवेशावसरे तत्सुविहितम् ।

अयममात्यत्वाद्धीरोदात्तो नायकः । यदाह भरतः ।

सेनापतिरमात्यश्च धीरोदात्तौ प्रकीर्तितौ ॥ इति ।

मालती नायिका । तल्लक्षणं भरते ।

स्वान्यसाधारणस्त्रीति तद्गुणा नायिका त्रिधा ।
स्वकीया तत्र वक्तव्या मुग्धा मध्या प्रगल्भिका ॥
शीलार्जवादिसंयुक्ताकुटिला च पतिव्रता ।
लज्जावती चापरुषा निपुणा च प्रियंवदा ॥
साधारणस्त्री गणिका कलाप्रागल्भ्यधैर्य्ययुक् ।
रूपकेषु च रक्तैव कर्तव्या प्रहसं विना ॥
अन्यस्त्री द्विविधा प्रोक्ता कन्यकोढा तथापरा ।
रसे प्रधाने कर्तव्या नान्योढा नाट्यवेदिभिः ॥
कन्यानुरागमिच्छतः कुर्यादङ्गाङ्गिसंश्रयम् ॥ इति ।

अन्यदपि प्रसङ्गादुच्यते । तथा हि ।

नाटके वृत्तयः प्रोक्ताश्चतस्रो नाट्यवेदिभिः ।
भारती कैशिकी चैव सात्वत्यारभटी तथा ॥

तत्र शृङ्गारी कामकलावच्छिन्नो व्यापारः कैशिकी ।

विशोका सात्वती सत्त्वशौर्य्यत्यागार्जवादिभिः ।
मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।
भवेदारभटी नाम नाट्ये तिस्रस्तु वृत्तयः ॥
भारती शब्दवृत्तिः स्याद्रसे रौद्रे च युज्यते ।
शृङ्गारे कैशिकी वीरे सात्वत्यारभटी पुनः ॥

६१. मकरन्दकलहंस A. कलहंसक for कलहंस K1.; प्रवेशानन्तरं O.; विहितम् after सुविहितम् K2.

CHARA C

नटः। तेन हि तत्प्रयोगादेवात्रभवतः सामाजिकानुपास्महे।

एवमङ्गानि कार्याणि प्रधानस्याविरोधतः।
आदौ विष्कम्भकं कुर्यादङ्कवाक्यार्थयुक्तितः॥
अपेक्षितं परित्यज्य नीरसं वस्तुविस्तरम्।
यदा संदर्शयेच्छेषं कुर्याद्विष्कम्भकं तदा॥
यदा तु सरसं वस्तु मूलादेव प्रवर्तते।
आदावेव तदाङ्कः स्यादामुखाक्षेपसंभवः॥
प्रत्यक्षनेतृचरितो विश्वव्यापिपुरःसरः।
अङ्को नानाप्रकारार्थसंविधानरसाश्रयः॥
अनुभावविभावाभ्यां स्थायिनो व्यभिचारिभिः।
गृहीतमुक्तैः कर्तव्यमङ्गिनः परिपोषणम्॥
न चातिरसतो वस्तु दूरविच्छित्ततां नयेत्।
रसं वा न तिरोदध्याद्वस्त्वलंकारलक्षणैः॥
एको रसोऽङ्गी कर्तव्यो वीरः शृङ्गार एव वा।
अङ्गमन्ये रसाः सर्वे कुर्युर्निर्वहणेऽद्भुतम्॥
शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्सोऽद्भुत इत्येवमष्टौ नाट्ये रसाः स्मृताः॥

यद्यपि

अविकारस्थितिः शान्तः शान्तस्तु नवमो रसः।

इत्यस्ति तथापि स न सर्वसंमतो न वा नाट्यविषयश्चेति न पृथगुक्तः। स्थायिभावाभावात्तस्य नाट्यविषयता न संभवतीति दिक्। नायिका च मालत्युदात्तनिभृता। कुलस्त्रीत्वात्। यदाह भरतः।

६२. K2. om. नटः; तदेहि for तेन हि K2.; तर्हि तत्प्रासिद्धप्रयोगादेव A. तर्हि तद्वृद्धप्रयोगादेव D.; प्रतिबन्ध (द्ध) Bh. प्रतिबद्धप्रबन्ध O. प्रबन्ध N. after तत्; °गादेव तत्रभवतः K1.

65946
THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE LIBRARY

सूत्र० । बाढम् । एषोस्मि कामन्दकी संवृत्तः ।

नट० । अहमप्यवलोकिता । इति परिक्रम्य निष्क्रान्तौ ।

६५ प्रस्तावना ।

ततः परिवृत्य रक्तपट्टिकानेपथ्ये कामन्दक्यवलोकिते प्रविशतः ।

काम० । वत्से अवलोकिते ।

उदात्तनिभृता चैव भवेत्तु कुलजाङ्गना ॥ इति ।

वर्णिका मषी ।

६३–६६. बाढं दृढम् । कामन्दकी संवृत्तः कामन्दकीरूपः । एतेन सूत्रेणैव काव्यार्थसूचनं कार्यमिति मतमनुमत्य कामन्दकीसूचनमपि सूत्रसूचनमेव वृत्तमिति दर्शितम् । यद्वा । अग्रे मकरन्देन मालतीरूपं कर्तव्यमिति पुंसः स्त्रीत्वापत्त्यात्र सूचितम् । कामन्दको नीतिग्रन्थभेदस्तं वेत्तीति कामन्दकी ॥ तदधीत इत्यण्डीष् च ॥ अनया नामव्युत्पत्त्या नीतिवेदितावोधनेन प्रकृतासिद्धिहेतुतोक्ता । तदन्तेवासिन्यवलोकिता दृष्टिरिति कार्यसिद्धिदृष्टेरपि कार्यसिद्धिहेतुतोक्ता तदुक्तेजनिकेति । निष्क्रान्तौ सूत्रधारनटाविति शेषः । प्रस्तावनेति निवृत्तेति शेषः । एतल्लक्षणं भरते ।

नटी विदूषको वापि पारिपार्श्विक एव वा ।

सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥

आमुखं नाम तत्स्यैव सैव प्रस्तावना मता ॥ इति ।

परिवृत्य पुनरावृत्य । रक्तपट्टिका लोहितपट्टिका नेपथ्यमलंकारो वक्ष्यते ।

---

६४. Bh. N. om. बाढम्; एव एषोस्मि Bh.

६५. K2. om. अपि; Bh. om. परिक्रम्य; निष्क्रान्तः A.; for इति—प्रविशतः N. has रक्तपटिकानेपथ्ये उपविष्टे प्रविशतः । प्रस्तावना । ततः प्रविशति कामन्दकी ।

६६. प्रविश्य रक्तपटेन कृतनेपथ्या कामन्दकयवलोकिता च B. ततः प्रविशति रक्तपटेनेपथ्या &c. as in B., C. K1. K2.; रक्तपटिकाकृतनेपथ्ये कामे प्रविशतः Bh.; प्रविशन्ति रक्तपटिककृतनेपथ्यावुभावुपविष्टौ O. for ततः—प्रविशतः.

अव० । आर्णविदु भअवदी । (क)

काम० । अपि नाम तयोः कल्याणिनोर्भूरिवसुदेवसुतापत्योर्मालतीमाधवयोरभिमतः पाणिग्रहः स्यात् । वामाक्षिस्पन्दनं सूचयित्वा सहर्षम् ।

विवृण्वतेव कल्याणमान्तरज्ञेन चक्षुषा ।
स्फुरता वामकेनापि दाक्षिण्यमवलम्ब्यते ॥

(क) आज्ञापयतु भगवती ।

६९–७१. अधुना कामन्दकी समस्तप्रकरणोपयुक्तमुपक्षेपमाह । अपीत्यादि । यदाह ।

काव्यार्थस्य समुत्पत्तिरुपक्षेपः स्मृतो बुधैः ।

इह तु मालतीमाधवयोर्विवाहनिर्वाहः काव्यार्थः । अपि नामेति । नाम संभावनायां तेन भवेदपीत्यर्थः । निश्चये वा नाम । तेन निश्चितमेव भवेदित्यर्थः । कल्याणिनोरित्यनेनाशंसनीयकुशलतयानुभाव्यत्वमुक्तम् । भूरिवसुर्मालतीपिता । महाधनिककन्याया आवश्यकी वराकाङ्क्षेति नामतात्पर्यम् । देवरातो माधवपिता देववद्भ्राति दत्ते ॥ रा दाने कर्तरि क्तः ॥ देवरातः । तथा च जनो दातरि विवाह्यत इति महाधनिकवद्वदान्यस्वप्रभुत्वादियोगिनोनुरूप एव प्रायः पुत्र इति वरे कन्याकाङ्क्षया सूचनं नामानुनयेन । एवं च योग्ययोर्योग्य एव संबन्ध इति भावः । पाणिग्रहो विवाहः ।

७२–७३. विवृण्वतेति । अपिरवधारणे । तेन वामकेनैव वामेनैव चक्षुषा दाक्षिण्यमवलम्ब्यते । कीदृशेन । स्फुरता स्पन्दवता ।

१८. भयवदी Q.

६९. N. O. om. तयोः and have कल्याणिनोरनयोर्भू°, Bh. has both.

७०–७१. स्पन्दं for स्पन्दनं K1. K2. Bh.; अभिनीय for सूचयित्वा D.; N. om. वामा—यित्वा; Bh. om. सहर्षम्.

अव० । महन्तो क्खु भअवदीए एसो चित्तविक्खेवो । अच्च-
७५ रीअं अच्चरीअं जं दाणिं चीरचीवरपरिच्छदं पिण्डवादमेत्तपा-
णअत्तं भअवदिं ईदिसे आआसे अमच्चभूरिवसू णिओएदि ।
तहिं अ उक्खण्डिदसंसारावग्गहो अप्पा तुम्हेहिं पि णिउ-
ज्जीअदि । (क)

(क) महान्खलु भगवत्या एष चित्तविक्षेपः । आश्चर्यमाश्चर्यं यदिदानीं चीरचीवरपरिच्छदां पिण्डपातमात्रप्राणयात्रां भगवतीमीदृशं आयासेमात्यभूरिवसुर्नियोजयति । तत्र चोत्खण्डितसंसारावग्रह आत्मा युष्माभिरपि नियुज्यते ।

अत्र एव कल्याणं विवृण्वता सूचयता । स्त्रीणां वामाङ्गस्फुरणस्य शुभसूचकत्वात् । आन्तरज्ञेनेव मदीयचित्तवृत्तिज्ञेनेव । इवोत्प्रेक्षायाम् ।

उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोपि तादृशः ॥

इति दण्डी । अथवापिर्विरोधे वामेनापि प्रतिकूलेनापि दाक्षिण्यमानुकूल्यमवलम्ब्यत इति विरुद्धमिदम् ॥ वामक इति स्वार्थे कन् ॥

७४–७८. अत्र खलु निश्चये । चित्तविक्षेपोसहिष्यताभिनिवेशः । चीरेण वस्त्रखण्डेन चीवरं सौगतपरिव्राजकवासस्तदेव

७४. महं खु N.; खु K1.; भयव० O.; B. om. भअ—एसो; एस K2.; °क्खेपो N.; अचरिअं K1. K2. अछरिअं Bh. O.

७५. अचरिअं K2.; अछरिअं Bh.; O. K1. om. अच्चरीअं; अ before जं K1.; B. om. दाणिं; चीअर K2.; मेत्त after चीवर Bh.N.; पाअ N. K2. प्याय O. for वाद.

७६. पाणअत्तीं A. प्राणवृत्तिं Bh.; प्राणवर्त्तिं D. प्राणवृत्तिं N. प्राणवृत्तिं O. भय० O. °वदीं all but Bh. K2. N.; ईरिसे Bh. C.; इदिसे O. आयासे Bh.आसे K1.; ईरिसेसु N.; णिउज्जेदि B. णिओजेदि N. णिओजेदि K1.

७७. क्खु B.खु O. च Bh. for अ; A. C. D. om. अ; उक्खण्डिद Bh. उक्खण्डिद K2. अक्खण्डिद K1. उक्खिखद O. for उक्खण्डिद; °वरीअहिं Bh. C. K1. K2. N. O.; वि after °ग्गहेहिं for पि Bh.; A. om. पि, णिउज्जीअदि N. O. णिउज्जीअदि K1. K2. पउज्जीयदे B.

काम० । वत्से मा मैवं ब्रूहि ।

यन्मां विधेयविषये सभवान्नियुङ्क्ते
स्नेहस्य तत्फलमसौ प्रणयस्य सारः ।
प्राणैस्तपोभिरथ वाभिमतं मदीयैः
कृत्यं घटेत सुहृदो यदि तत्कृतं स्यात् ॥

अथि किं न वेत्सि यदेकत्र नो विद्यापरिग्रहाय नानादि-

परिच्छदः परिकरो यस्यास्ताम् । पिण्डपातो नाम बौद्धानां भिक्षाभ्रमणेन भोजनं तन्मात्रेण प्राणयात्रा जीवनं यस्यास्ताम् । ईदृशी विवाहकार्ये । इह पुरन्ध्रीणामेवाधिकारो न तु भवादृशीनामिति भावः । उत्खण्डित उन्मूलितः संसाररूपोवग्रहो मोक्षप्रतिबन्धो यत्र सः । यद्वा । उन्मूलितः संसाररूपोपकृष्टो ग्रहो यत्र सः ।

७९–८३. मामेति वीप्सात्यन्तनिषेधे । यन्मामित्यादि । सभवान्पूज्यो भूरिवसुर्यन्मां विधेयविषये नियोज्यगोचरे नियुङ्क्ते नियोजयति तत्स्नेहस्य प्रीतेः फलं स ह्यस्माकं प्रेमपात्रमिति भावः । असौ नियोगः प्रणयस्य प्रश्रयस्य सार उत्कर्षो निर्यासो वा । यदि मदीयैः प्राणैरथ वा मदीयैस्तपोभिः सुहृदो मित्रस्याभिमतं वाञ्छितं कृत्यं कार्यं घटेत तदा तत्कार्यं कृतं स्यान्मत्प्राणादिभिरपि भवेदित्यर्थः । यद्वा । सुहृदोभिमतमिदं यदि घटेत निष्पद्येत तदा मदीयैः प्राणैस्तपोभिर्वा तत्कृत्यं कृतं स्यात् । अघटने तु सर्वमिदं व्यर्थमित्यर्थः । एतेनाव्रश्चकर्तव्यतोक्ता ॥ [प्रणयः प्रेम्णि विश्वासे याच्ञाप्रश्रययोरपीति विश्वः ॥]

८४–८९. भूरिवसोः स्वीकारबीजमेवंविधप्रश्रयोपपत्तिमाह । किं

---

७९. N. om. ब्रूहि.

८०. भगवान् for सभगवान् O.

८४. अपि for अथि; K1. K2. O.; Bh. N. om. अथि; यदेकत्र नो K1. K2. यदेकत्र नौ Bh. यदेव नो N. O.

८९ गन्तवासिनां साहचर्यमासीत् । तदैव चास्मत्सौदामिनीसमक्ष-
मनयोर्भूरिवसुदेवसतयोर्वृत्तेयं प्रतिज्ञावदयमावाभ्यामपत्यसं-
बन्धः कर्तव्य इति । तदिदानीं विदर्भराजमन्त्रिणा सता देव-
रातेन माधवं पुत्रमान्वीक्षिकीश्रवणाय कुण्डिनपुरादिमां पद्मा-
वतीं प्रहिण्वता सु विहितम् ।

९० अपत्यसंबन्धविधिप्रतिज्ञा प्रियस्य नीता सुहृदः स्मृतिं च ।
अलोकसामान्यगुणस्तनूजः प्रबोधनार्थं प्रकटीकृतश्च ॥

नेत्यादि । न इति बहुवचनेन स्वभूरिवसुदेवरातानामुपादानम् । अस्म-
दिति । अस्माकं सौदामिन्याश्च प्रत्यक्षमित्यर्थः । अपत्यसंबन्धो विवाहः ।
सौदामिनीसमक्षमित्यनेन तस्या देवरातबन्धुतया नवमाङ्के माधवप्रा-
णत्राणकारणत्वमस्या नाम च सूचितम् । युक्तं चेदम् ।

नासूचितं विशेत्पात्रम् ।

इति भरतः । एवमन्यत्रापि सूचितस्यैव प्रवेशः । आन्वीक्षिकी न्याय-
शास्त्रम् । तत्र तर्कचक्षुरादिनिष्टङ्कनेन तदभ्यासान्माधवस्य चोरिका-
विवाहे कौशलमुक्तम् । भवणं पाठः । कुण्डिनपुरं विदर्भनृपराज-
धानी । प्रहिण्वता प्रस्थापयता । सु विहितं शोभनं कृतम् ।

९०-९१. अपत्येत्यादि । देवरातेन पुत्रे प्रहिण्वतापत्यसंबन्ध-
विधिप्रतिज्ञा विवाहप्रतिज्ञा प्रियस्य सुहृदः प्रीतमित्रस्य भूरिवसोः ।
सुहृदः शोभनचित्तस्य वा । स्मृतिं स्मरणं नीता प्रापिता । अलोक-

---

८९. N. om. वासिनां, वासिनोः K1. वासिन्योः K2. वास्तव्य Bh. द्विगन्तावासानां O.; तदैवास्म° N. O. Bh. K1. K2.; °स्मदन्तेवासिनीसौदा° K2.

८९. प्रवृत्तेयं Bh.

८७. °राजस्य मंत्रिणा N.

८९. पुरीं after पद्मावतीं O.; तत्सु° O.; सुविहितं विहितं B. C. D. Bh. K1. K2.

९०. कृतः before अपत्य N.; चिरस्य नीता O.

९१. अनन्यसामान्य K2.

अव० । तदो किं त्ति मालदिं अमच्चो माहवस्स अप्पणा ण पडिवादेदि जेण चोरिआविवाहे भअवदिं तुवरावेदि । (क)

काम० । तां याचते नरपतेर्नर्मसुहृन्नन्दनो नृपमुखेन ।
तस्साक्षात्प्रतिषेधः कोपाय शिवस्त्वयमुपायः ॥ ९५

अव० । अच्चरिअं अच्चरिअं ण हु अमच्चो माहवस्स णामं पि जाणादि त्ति णिरवेक्खदाए लक्खीअदि । (ख)

(क) ततः किमिति मालतीममात्यो माधवस्यात्मना न प्रतिपादयति येन चोरिकाविवाहे भगवतीं त्वरयति ।

(ख) आश्चर्यमाश्चर्यं न खल्वमात्यो माधवस्य नामापि जानातीति निरपेक्षतया लक्ष्यते ।

सामान्यगुणो लोकाविलक्षणगुणः पुत्रः प्ररोचनार्थं प्रवृत्तिपाटवार्थं स्फुटीकृतश्च । प्ररोचनस्यैव सर्वकार्यसिद्धयङ्गत्वात्तत्करणम् ।

९२–९५. अत्रामात्यो भूरिवसुः । माधवस्य कृत इति शेषः । प्रतिपादयति ददाति । चोरिकेति । चोरिकया विवाहस्य धर्मशास्त्रे निषेधादिति भावः । तामित्यादि । नन्दननामा राज्ञोन्तःपुरसचिवो नृपद्वारा तां याचते । तत्र साक्षात्प्रतिषेधः कोपाय राज्ञः । अयं तु मद्वारा संयोजनात्मक उपायः शिवः परिणामसुरस इत्यर्थः । आर्याच्छन्दः ।

स्यान्नर्मसचिवः सोयं कुपितस्त्रीप्रसाधकः ।

नन्दयतीति नन्दनः । एतेनानन्दजनकत्वादन्तःपुरसचिवता युक्तेति नामतात्पर्यम् ।

---

९३. किं त्ति Bh.; C. N. om. त्ति, ति O.; मालदीं A. D. मालई O., K2. om. मालदी .

९४. विआहे A. विवाहेण O.; भअवदिं O. भअवदीं A. D.; आरोपदि Bh. आरोवदी C. त्वरावेदि K1. K2. तुरावेदि O.

९५. प्रतिषेधः B. D.

९६. अच्चरियं A. अच्छरियं २ Bh. अछरियं णहु O. क्खु A. ह्नु N. for हु; णामं पि माहवस्स O.

९७. णिरवेरक्खदाए O. णिरपेक्खदाए K1. K2. N.; लक्खीयदि O.

काम० । संवरणं हि तत् ।

विशेषतस्तु बालत्वात्तयोर्विवृतभावयोः ।
तेन माधवमालत्योः कार्यः स्वमतिनिह्नवः ॥

अपिच । अनुरागप्रवादस्तु वत्सयोः सार्वलौकिकः ।
श्रेयोप्यस्माकमेवं हि प्रतार्यौ राजनन्दनौ ॥

पश्य । बहिः सर्वाकारप्रगुणरमणीयं व्यवहर-
न्पराभ्यूहस्थानान्यपि तनुतराणि स्थगयति ।

९८–१००. संवरणं संगोपनम् । विशेषत इत्यादि । तेन भूरिवस्तुना तयोर्वत्सयोर्विशेषेण स्वमतिनिह्नवः कार्यो निजज्ञानगोपनं कर्तव्यम् । बालत्वाच्छिशुत्वेन प्रकाशिताभिप्राययोः । यथा तावपि प्रकृतं न जानीतस्तथा कृतं तेनेति भावः । युक्तं चादः ।

नादेशे नाकाले नापरिपक्वेन्द्रिये न गुणहीने ।
कथयति हि कथां स्वगतां न तथास्य कथा भवति वन्ध्या इति नीतेः ।

१०१–१०२. अनुरागेत्यादि । तयोरनुरागप्रवादः सर्वलोकविदितः सन्नस्माकं [श्रेयानस्मीति वा पाठः ।] श्रेयो श्रेयोलम्भी । यत एवं सति राजा नन्दनश्चोभौ वञ्चनीयौ । तयोरन्योन्यानुरागादेव परिणयो वृत्तो न मया कारित इति वक्तव्यमेवेति भावः ॥ [सार्वलौकिक इत्यत्र सर्वलोकाङ्कः ॥] अन्योन्यानुरागेण गान्धर्वविवाहोपि सूचितः ।

१०३–१०६. बहिरित्यादि । विद्वान्सुबुद्धिरेकः श्रेष्ठोद्वितीयो वा सकलं जनं कपटैरभिसंधाय वञ्चयित्वा स्वानर्थान्स्वप्रयोजनानि संपादयति । मौनमभाषणं भजते च । विधिनिषेधपरं वचो न वदतीत्यर्थः ।

---

९८. N. om. हि.
१०१. K1. K2. O. om. अपिच; °प्रवादश्च K2.
१०२. श्रेयानस्मा° D. N. श्रेयो ह्यस्मा° K1. K2. O. श्रेयोस्त्व Bh.
१०४. लघुतराणि A.

जनं विद्वानेकः सकलमभिसंधाय कपटै- १०५
स्तटस्थः स्वानर्थान्घटयति च मौनं च भजते ॥

अव० । मए वि तुह्मवअणादो तेण तेण वअणोवण्णासेण भूरिवसुमन्दिरासण्णराअमग्गेण माहवो संचारीअदि । (क)

काम० । कथितमेव नो मालतीधात्रेय्या लवङ्गिकया ।

(क) मयापि युष्मद्वचनान्तेन तेन वचनोपन्यासेन भूरिवसुमन्दिरासन्नराजमार्गेण माधवः संचार्यते ।

अत एव तटस्थ उदासीन इवानभिव्यक्तव्यापार इत्यर्थः । कथम् । सर्वाकारेणेङ्गितादिना स्वभावसुन्दरं यथा भवति तथा बहिः प्रकटं व्यवहरन्नतिसूक्ष्माण्यपि पराभ्यूहस्थानानि परस्य तर्कस्थानानि स्थगयति पिदधाति । आपूर्वभ्वक्रमः ॥ अभिसंधिर्वञ्चनार्थ इति धातुसंग्रहः । केवलश्चेष्टयोरेक इति धरणिः ॥

१०७–१०८. अत्रोपन्यासो व्याजेन कार्योद्भेदः । राजमार्गेणेत्यनेन सर्वसाधारण्यान्माधवस्यानौद्धत्यमद्वितीयवेद्यता च सूचिता । संचारणं च तद्दर्शनेन मालत्या अनुरागायेति भावः । अत्र कामन्दक्यावलोकितायामेवमनुक्त्वात्कथं तव वचनादिति घटत इति न देव्यम् । प्राणैस्तपोभिरित्यादिना तदभिधानात् ।

१०९–११३. धात्रेय्युपमातृसुता । एतेन बाल्यात्प्रभृति सकलचेष्टावेदित्वं ध्वनितम् । तथा च लवङ्गिका मालतीगतं यत्कथयति तत्प्रमाणमेवेत्येवकारव्यङ्ग्यम् । अनेनास्याः सखीत्वमप्युक्तम् । यदाह भरतः ।

कारुर्दासी च धात्रेयी प्रतिवेदयाथ शिल्पिका ।
बाला प्रव्रजिता चेति नायिकानां सखीजनः ॥ इति ।

१०५. °मतिसंधाय N.

१०७. भअवदि मए वि Bh. मए वि K2.; वअणादो O.; K2. om. one तेण; B. om. वअण वअणोव° O. वअणोव K2.

१०८. रायमग्गेण O.; संचारीयदि Bh.

१०९. कथितमिव K1. K2.

११० भूयो भूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था । 65946

न इति बहुवचनेनात्मनि लवङ्गिकाहृदयजागरूकबहुमानेन बन्धुक-तानिरासः सूचितः । भूय इत्यादि । मालत्यङ्गकैस्ताम्यति खिद्यत इति कथितमेव लवङ्गिकयेत्यन्वयः ॥ अङ्गकैरित्यत्राल्पार्थे कन् ॥ अल्पता मृदुत्वेन । बहुवचनात्सर्वाङ्गमुक्तम् । तथा च मृदुभिः सर्वाङ्गैरित्यर्थः । कीदृशैः । तं माधवं दृष्ट्वा दृष्ट्वा पुनः पुनरवलोक्य गाढोत्कण्ठया दृढकाङ्क्षया लुलितलुलितैरतिम्लानकान्तिभिः । ललितललितैरिति पाठे पूर्वं ललितै रम्यैरधुना लुलितैर्म्लानैरित्यर्थः । कीदृशम् । सविधनगरीरथ्यया मालतीगृहनिकटराजमार्गेण भूयो भूयः पुनः पुनः पर्यटन्तं बध्नन्तम् । इह राजमार्गोपन्यासेन माधवस्य निःशङ्कः संचारो मालत्याश्च तद्दर्शने परावितर्काभावः सूचितः । भ्रमणे पौनःपुन्येन दर्शनं प्रति दार्ढ्यमुक्तम् । दर्शने च पौनःपुन्येन तस्या उत्कण्ठातिशय उक्तः । यद्वा । प्रथमवीप्सया दर्शनं दृष्ट्वानुवृत्त्या प्रथमं रम्यवस्तुचमत्कारेण तत उन्निद्रमानानुरागनवाङ्कुरेण नेत्रप्रीतिर्युज्यते । द्वितीयवीप्सया सहचरीभिरप्यज्ञाता नयनप्रीतिरुक्ता । नगरीपदेन रथ्याया अनेककौतुकाधारतोक्ता । तथा चेतस्तत्तोनेककौतुकदर्शनतरलितत्वेन माधवस्य सम्यग्दर्शनसंपादकनिकटार्थकसविधपदनिवेश उक्तः । क्त्वाप्रत्ययेन चानन्तरभाविविह्वलतायां विषयान्तरसंचारेणापि व्यवधानस्यापादानादत्यन्तानुरागोद्रेकः सूचितः । कथमन्तःपुरस्था सा ददर्शेत्यत आह । भवनेति । भवनस्य प्रासादादेर्या वलभ्युपरिकुटी तस्यां तुङ्गमुच्चं यद्वातायनं गवाक्षस्तत्रस्था । तुङ्गतया यथाकाङ्क्षं दर्शनमुक्तम् । वातायनेत्यनेन वातस्यायनं गमनं यत्रेति व्युत्पत्त्या घर्मादितापवती गभीरसमीरपरिशीलनार्थं यातीति प्ररोहेण निरर्गलमस्या गमनं तत्रेति सूचितम् । यद्यपि सौधोपरिकुटीं वलभीं विदुरिति भवनपदमत्रगतार्थं तथाप्युक्तिपोषाल-

साक्षात्कामं नवमिव रतिर्मालती माधवं य-
न्नाढोत्कण्ठा ललितलुलितैरङ्गकैस्ताम्यतीति ॥

अव० । बाढं । ताए वि अत्तणो विणोदणिमित्तं माहवप-
डिच्छन्दअं आलिहिदं तं लवङ्गिआए अज्ज मन्दारिआए ११५
हत्थे णिहिदं दाव । (क)

(क) बाढम् । तयाप्यात्मनो विनोदनिमित्तं माधवप्रतिच्छन्दक-
मालिखितं तल्लवङ्गिकयाद्य मन्दारिकाया हस्ते निहितं तावत् ।

कारद्योतनार्थं भवनपदम् । यद्वा । भवनरूपा वलभी मालतीवसतिःसौ-
धोपरिकुटीत्यर्थः । एतेनास्या निजगृहाङ्गलभीगमनं किमर्थमित्यन्या-
शङ्कापरिहारो निरर्गलं च तद्दर्शनं भवतीति ध्वनितम् । यथा रतिः
कामकान्ता नवं दाहानन्तरमुत्पन्नं साक्षात्प्रत्यक्षं कामं दृष्ट्वाङ्गैस्ताम्य-
ति तथेत्यर्थः । मालती रतिर्माधवश्च काम इति तयोर्बहललोकसं-
कुलेपि पथि रागसागरोन्योन्यं ववृध इति भावः । यद्वा । कामोनङ्ग-
तयाप्रत्यक्षो वृद्धश्च । अत्रोत्प्रेक्षा विशिष्टस्यैव । साक्षात्प्रत्यक्षं नवं
काममिवेत्यर्थः । ताम्यतीत्यनेनोद्वेग उक्तः । यदाह भरतः ।

चिन्तानिःश्वासखेदेन दृष्ट्वाभिनयेन च ।
अथाङ्गोपाङ्गचेष्टाभिरुद्वेगाभिनयो भवेत् ॥ इति ।

११४-११६. बाढमतितरामनुरक्ता मालतीत्यर्थः । विनोदः क्रीडा

१११. ता for यत् N.

११२. तुलितलुलित° A. Bh. O. N. K2. (?)

११४. जदो D. जं A. तदो N. before बाढं; तए Bh. A. D.; बाढं अह य ताए O.; O. om. वि; वि for वि K2.; A. N. O. om. अत्तणो; A. B. N. add उक्कण्ठा O. उच्चेय before विणोद; विणोय O.; विणोदकालं N.; माहवस्स K1.; पडिच्छंदयं N. पडिछंदयं O.

११५. आलिहिदं D. N. लिहिदं O.; N. om. तं; जं for तं O.; हत्थे णिहिदं तए। वि before अज्ज Bh.; N. om. अज्ज. मन्दारिआ for मन्दारिआए K2. O. N.

११६. अत्थे for हत्थे. K1. K2.; णिखित्तं N.

काम० । विचिन्त्य । सु विहितं लवङ्गिकया यतो माधवानुचरः कलहंसकस्तां विहारदासीं मन्दारिकां कामयते । तदनेन तीर्थेन घटेत तत्प्रतिच्छन्दकमुपोद्घाताय माधवान्तिकमुपेया-
१२० दित्यभिप्रायः ।

अव० । माहवो वि कोदूहलमुप्पादिअ मए पउत्तमअणमहूसवं मअरन्दुज्जाणं पभादे अणुप्पेसिदो तत्थ किल मालदी गमिस्सदि तदो अण्णोण्णदंसणं भोदु त्ति । (ख)

(ख) माधवोपि कौतूहलमुत्पाद्य मया प्रवृत्तमदनमहोत्सवं मकरन्दोद्यानं प्रभातेनुप्रेषितस्तत्र किल मालती गमिष्यति ततोन्योन्यदर्शनं भवत्विति ।

हर्षो वा । प्रतिछन्दकं प्रतिरूपकम् । तावत्पदेन मन्दारिकाहस्तनिधानस्य प्रकृतकार्योपक्रमः सूचितः । अत एव कामन्दक्या सु विहितमित्युक्तम् ।

११७–१२०. विहारः सौगतप्रव्राजिकानामालयः । तत्र व्यापृता दासी विहारदासी । एतेन प्रकरणबाह्यत्वमुक्तम् । यदाह दण्डी ।

शकारः कुट्टिनी दासी धर्मशास्त्रबहिष्कृता ।
विटचेष्टादयो नित्यं बाह्याः प्रकरणे मताः ॥

तीर्थेन द्वारा । उपायेन वा ॥ तीर्थमुपायद्वारमन्त्रिष्विति विश्वः ॥ उपोद्घातेन प्रसङ्गेन । अभिप्रायस्तावदिति वादिन्यास्तवेति शेषः ।

११७. N. om. विचिन्त्य; सुविहितं हि K2.; N. om. यतो.
११८. °हंसस्तां N.; N. om. मन्दारिकां; इत्यनेन for तदनेन A. D.
११९. A. D. N. om. घटेत; घटते Bh.; यत् for तत् B.; A. D. om. उपोद्घाताय; उपोद्घातेन K2. Com.; C. om. माध°—प्रायः O. puts it in and scores it out.
१२१. वि for वि K2.; उप्पायिय O.; मयण O.; मधूसवं Bh. महोसवं N.
१२२. मअरन्दोज्जाणं K2. मअणुज्जाणं A. C. K1. मयणुज्जाणं O.; अज्ज before पभादे D. K1.; प्पभादे O. पहादे N.; प्पेसिदो K1. पेसिदो K2.; तहि for तत्थ A.; O. om. किल.
१२३. होदु B. O. होदि N.

काम° । साधु वत्से साधु । अनेन मत्प्रियाभियोगेन स्मारयसि मे पूर्वशिष्यां सौदामिनीम् । १२५

अव° । भअवदि सा सोदामिणी अहुणा समासादिदअच्चरिअमन्तसिद्धिप्पहावा सिरीपव्वदे कावालिअव्वदं धारेदि । (क)

काम° । कुतः पुनरियं वार्ता ।

अव° । अत्थि एत्थ णअरीए महामसाणप्पदेसे कराला णाम चामुण्डा । (ख) ११०

(क) भगवति सा सौदामिन्यधुना समासादिताश्चर्यमन्त्रसिद्धिप्रभावा श्रीपर्वते कापालिकव्रतं धारयति ।

(ख) अस्त्यत्र नगर्यां महाश्मशानप्रदेशे कराला नाम चामुण्डा ।

१२१–१२८ अत्र ॥ कौतुकं तु कुतूहलमित्यमरः ॥ मदनमहोत्सवेन वसन्तकालः सूचितः । तस्य च वैवाहिकत्वम् । यदाह ।

शरत्सङ्ग्रामविषये विवाहे ज्येष्ठमाधवौ । इति ।

किल प्रसिद्धौ । इति हेतौ । अनुप्रेषणे तत्र किलेत्यादेर्हेतुत्वम् । अन्योन्यदर्शनेनोभयानुरागे विवाहनिर्वाहः । प्रिये प्रीतिविषये कार्योभियोग आसङ्गः । अत्र कपालव्रतं महाव्रतम् । कुत इत्यादिना श्मशानाङ्गसूचनम् ।

---

१२४. वत्से साधु साधु B.

१२५. मत् for मे N.

१२६. D. adds क्खु, Bh. खु, O. दाणीं after सा; N. om. सोदामिणी अहुणा; सौदामिणी all but Bh. O.; णं for अहुणा O.; °सादिअच्चरि° N.; अच्छरीअ K1. K2. अच्छरिअ Bh. अचरीअ A. अचरिअ O.

१२७. B. om. सिद्धि; प्पभावा Bh. K1, K2.; सिरिअपव्वदे A. सिरिपव्वदे O. K1. K2. Bh.; कावलिय O. कावालिआ K2.; कावालिआवदं N.

१२९. णयरीए O. णअरे A. C. K2.; कलाला O. करालो C.

१३०. नाम K2.

काम° । अस्ति या किल विविधजीवोपहारप्रियेति साहसिकानां प्रवादः ।

अव° । तहिं क्खु सिरीपव्वदादो आअदस्स रत्तिविहारिणो णादिदूरारण्णवासिणो साहअस्स मुण्डधारिणो अघोरघण्टणा-
१३५ मधेअस्स अन्तेवासिणी महाप्पभावा कवालकुण्डला णाम अणुसंज्झं समाअच्छदि तदो इअं पउत्ती । (क)

(क) तत्र खलु श्रीपर्वतादागतस्य रात्रिविहारिणो*नातिदूरारण्यवासिनः साधकस्य मुण्डधारिणोघोरघण्टनामधेयस्यान्तेवासिनी महाप्रभावा कपालकुण्डला नामानुसंध्यं समागच्छति तत इयं प्रवृत्तिः ।

१३१–१३२ किल प्रसिद्धौ । विविधा नानारूपा जीवा मानुषादय उपहारा बलयः प्रिया यस्याः सा । अनेन मालत्युपहारः सूचितः । आत्मनिरपेक्षं कर्म साहसं तेन वर्तन्ते ते साहसिकाः । प्रवादः प्रसिद्धिः । इह प्रियेत्यस्यानन्तरमिति पदं देयमन्यथा पूर्वापरानन्वयात् । तथा च प्रियेत्यनेनाकारेण साहसिकानां प्रवाद इत्यर्थः । अत एव वाक्यार्थकर्मादावितरेध्याहारः ।

१३३–१४० इह खलु प्रसिद्धौ । तस्याश्चामुण्डाया नातिदूरेणात्यासन्ने वस्तुं शीलं यस्य तस्य । एतेन देवकुलस्य लोकसंकुलतया

१३१. सा for या B. Bh., C. om. या; साधकानां O.

१३३. तं B. O. तत्थ Bh. D. for तहिं; खु O. क्खु K1. K2. for क्खु, Bh. om. क्खु; सिरि A. Bh. C. D. K1. K2. O.; आगदस्स Bh. O.; रति for रत्ति K1.; अदो O. एत्थ N. for रत्तिविहारिणो; °रिणो तस्स K2.

१३४. साधअस्स B. Bh. C. साहकस्स K2. O. साहसिअस्स N. for साहअस्स; मुण्डमालाधारिणो O.

१३५. °धेयस्स O. देअस्स D. N. for धेअस्स; अन्देवासिनि N.; महप्प° Bh.; °प्पहावा B. Bh. D. N. महाणुभावा O.

१३६. °संझं Bh. D. O.; C. adds णअरे before समाअ°; समागच्छदि O. आअच्छइ N. for समाअच्छदि; इयं Bh. O.; प्पउत्ती O.

*Com. inserts तस्या before नातिदूर°.

का० । सर्वं सौदामिन्यां संभाव्यते ।

अव० । अलं दाव एदिणा । भअवदि सो वि सहअरो माहवस्स बालमित्तं मअरन्दो णन्दणस्स वहिणिं मदअन्तिअं जइ समुव्वहदि तं पि माहवस्स दुदीअं पिअं किदं भोदि ।(क) १४०

काम० । नियुक्तैव तत्र मया तत्प्रियसखी बुद्धरक्षिता ।

(क) अलं तावदेतेन । भगवति सोपि सहचरो माधवस्य बालमित्रं मकरन्दो नन्दनस्य भगिनीं मदयन्तिकां यदि समुद्वहति तदपि माधवस्य द्वितीयं प्रियं कृतं भवति ।

किंचिद्विमकृष्टं साधकसंस्थानमुक्तम् । साधकस्य योगिनः । मुण्डधारिणः कापालिकस्य । अघोरघण्टेति ।

कापालिकास्तु घण्टान्तनामानः समुदाहृताः ॥

इति भरतः । अघोरोविमृश्यकारीति नामव्युत्पत्तिः । अनुसंध्यं संध्यायाम् । प्रवृत्तिर्वार्त्ता । सर्वमघोरघण्टनाशानमाधवरक्षणादिकम् । अत्रैतेन कापालिकादेः कथनेनालं निष्फलमधुनानुपयोगात् । बालमिति भावप्रधानं तेन बाल्यान्मित्रमित्यर्थः । समुद्वहति विवहति ।

१४१–१४७ बुद्धरक्षितेत्यनेन भिक्षुकीत्वं सूचितम् । अत एव

---

१३७. सर्वं हि B. Bh. C. N. O.; तत्सौदा° सर्वं D.; °न्याः Bh. C. D.

१३८. भयवदि O.; एसो A. D. K1. N. O.; एसो वि K2.; सहयरो O.

१३९. बाल Bh.; मित्तो A. D. K1. K2.; महरन्दो K2. मयरन्दो O.; A. adds णाम after मअरन्दो; °नस्स K1.; वहिणिअं K2. वहिणिआं Bh.; K1. णंदणभइणिं N.; मदयन्तियं O. °अन्तिआं A. B. Bh. C. D. K1.

१४०. जयि O.; जदि समूवहेदि N. समुदाहदि K1.; तं वि N.; A. K1. K2. add णाम after पि; दुदियं O. दुदिअं B. C. अहिअं N. for दुदीअं; प्पियं O.; कदं Bh.; C. D. N. O. om. किदं; होदि N.

१४१. हि तत्र D. हि सा N.; K1. K2. read तत्र after °सखी; मह B. D. तस्याः N. for तद्; O. om. तत्र.

अव० । सु विहिदं भअवदीए । (क)

काम० । विचिन्त्य । तदुत्तिष्ठ माधवप्रवृत्तिमुपलभ्य मालतीमेव पश्यावः ।

१४५ उभे उत्तिष्ठतः ।

काम० । विचिन्त्य । अत्युदारप्रकृतिर्मालती । तन्निपुणं निसृष्टार्थदूतीकल्पः सूत्रयितव्यः । सर्वथा

शरज्ज्योत्स्ना कान्तं कुमुदमिव तं नन्दयतु सा
सुजातं कल्याणी भवतु कृतकृत्यः स च युवा ।

(क) सु विहितं भगवत्या ।

दौत्ये नियुक्ता ॥ उत्तिष्ठेत्यत्रोर्ध्वकर्मत्वान्न तङ् । अत्युदात्ता गभीरा प्रतिपन्नार्थसंवादिनी प्रकृतिर्यस्याः सा तथा । निसृष्टार्थेति । नायिकाया नायकस्य वा मनोरथं ज्ञात्वा स्वमत्या कार्यं साधयति सा निसृष्टार्था दूती तस्याः कल्पो व्यापारः प्रस्तावनीय इत्यर्थः । दूती च त्रिविधा । यदाह ।

निसृष्टार्था मितार्था च तथा शासनहारिका ।
सामर्थ्योत्पादिताहीना दूती तु त्रिविधा मता ॥ इति ।

१४८—१५२ शरदित्यादि । सा मालती तं माधवं नन्दयतु प्रीणातु । यथा शरज्ज्योत्स्ना कुमुदं नन्दयति । यथा चन्द्रिकाकुमु-

---

१४२. भयवदीए O.; A. B. Bh. add किदं, K1. K2. कदं after भअवदीए.

१४३. B. Bh. N. om. विचिन्त्य; Leaf 6 of K2. containing काम० । विचिन्त्य (l. 143) to वयस्य माधव (l. 187) wanting.

१४४. पश्यामः B.

१४५. A. D. K1. insert इति after उभे; इति for उभे N. O.

१४६. अत्युदात्त Com.; N. om. तद्. इति for तद् O.; B. om. निपुणं.

१४७. तन्त्रयितव्यः A. K1. N. कल्पयितव्यः D., सूचयितव्यः Bh.

१४८. नन्दयतु K1.

वरीयानन्योन्यप्रगुणगुणनिर्माणनिपुणो १५०
विधातुर्व्यापारः फलतु च मनोज्ञश्च भवतु ॥

इति निष्क्रान्ते विष्कम्भकः ।

दयोर्नित्यं प्रीतिस्तस्था तयोरप्यस्त्विति भावः । कीदृशम् । कान्तं रम्यम् । सुजातं शोभनजन्मानम् । शोभनता च गुणवत्त्वेन । यद्वा । कान्तमन्यस्त्रीभोगचिह्नशून्यम् । यदाह भरतः ।

अन्यस्त्रीभोगसंभूतं चिह्नं यस्य न विद्यते ।
देहे वाप्यधरे वापि स कान्त इति कीर्तितः ॥

सा कीदृशी । कल्याणी निरवद्या । स च युवा कल्याणी विवाहकल्याणयोगी संस्तां प्राप्य कृतकृत्यः कृतार्थो भवतु । युवेत्यनेन कन्यायां मदनमदोद्दीपकतायोगित्वमुक्तम् । एवं सति विधातुः प्रयत्नः सफलो भवतु मनोहरश्च भूपनन्दनाविरोधेन सर्वावर्जकोस्त्वित्यर्थः । कीदृशः । अन्योन्यं कामिनोः प्रगुणा अनुरूपा ये गुणास्तेषां निर्माणे कुशलोत एव वरीयाञ्श्रेष्ठः गरीयान्गुरुर्वा । यद्वा । अन्योन्यं प्रगुणा उत्कृष्टा ये गुणास्तेषां निर्माणे कुशलः । निष्क्रान्ते कामन्दक्यवलोकिते । विष्कम्भक इति ।

कुतोपि स्वेच्छया प्राप्तः सबन्धेनोभयोरपि ।
विष्कम्भकः स विज्ञेयो यस्तु [सम्यक्] काव्यार्थसूचकः ॥
विष्कम्भस्तु द्विधा सोयं शुद्धः संकीर्ण एव च ।
शुद्धो मध्यमपात्रेण संकीर्णो मध्यमाधमैः ॥

इति भरतः ।

---

१५०. गरीयान् N.; °गुणनिर्माण° K1.; निर्माणनविधौ B.
१५१. O. om. इति.; मिश्रविष्कम्भकः N.

ततः प्रविशति गृहीतचित्रोपकरणः कलहंसः ।

कल० । कहिं दाणिं तुलिदमअरद्धआवलेअरूअविब्भमाव-
१५५ क्खित्तमालदीहिअमाहप्पं णाहमाहवं पेक्खिस्सं । परिक्रम्य । प-
रिस्सन्तोह्मि जाव इमस्सिं उज्जाणे मुहुत्तं विस्समिअ मअरन्द-
णन्दणं णाहमाहवं पेक्खिस्सं । (क) इति प्रविश्योपविशति ।

(क) कुत्रेदानीं तुलितमकरध्वजावलेपरूपविभ्रमावक्षिप्तमाल-
तीहृदयमाहात्म्यं नाथमाधवं प्रेक्षिष्ये । परिश्रान्तोस्मि *यावदस्मिन्नु-
द्याने मुहूर्त्तं विश्रम्य मकरन्दनन्दनं नाथमाधवं प्रेक्षिष्ये ।

१५३-१५७ उपकरणमुपढौकनम् । अत्र तुलितो मकरध्व-
जस्य कामस्यावलेपो गर्वो येन रूपविभ्रमेण सौन्दर्यविलासेन तेना-
वक्षिप्तं तिरस्कृतं मालतीहृदयस्य माहात्म्यं गाम्भीर्यं येन तम् ॥ अव-
लेपः स्मृतो गर्व इति शाश्वतः ॥ मकरन्दस्य नन्दनं हर्षकम् । कल-
हंसो राजहंसः स च शरदि विराजमानोपि योगिनीप्रभावाद्वसन्ते
मिलित इति नामाभिप्रायः ।

---

१५३. O. om. ततः, °चित्रफलकहस्तः for गृहीत-णः O.; °चित्रफलकः C.; °हंसकः Bh.

१५४. कहं Bh.; तुलिअ D. तुलिय O.; K1. om. तुलिद in text but gives तुलित in छाया; मयरद्धु° O.; °द्धज B. O.; °द्धजावलेवं रूप° O.; °द्धअरूआव° A. B. D.; रूप Bh. रूव N.; C. om. रूअ; K1. om. अवलेअ in text but reads °ध्वजावलेपरूप in छाया; °आवलेअं B. C. °लेवि° A.; विभ्भमा° O.

१५५. आक्खित्त B. N. O. °भावक्षित्त A. D.; हिय्य O.; C. om. णाह; पेक्खि-स्सं O.

१५६. °सन्तोह्मि Bh. °स्संतह्मि C.; जइव (छाया यावत्) K1.; ता for जाव O.; इह for इमस्सिं A. D. K1. N. O.; खणं N. मुहुत्तअं B. मुहुत्तयं O.; वेसमिअ K1. वीसुह्रिय O. वीसमिअ Bh. विसमिअ B. C.; मकरन्द Bh. मयरन्द O.

१५७. सहयरं O. °सहअरं A. N. सहाअं K1. नन्दनं Bh. for णन्दणं; B. Bh. C. K1. O. om. णाह, N. om. णाहमाहवं; पेक्खि° N. प्योक्खिस्सं O.; Bh. O. om. इति; N. om. इति-शाति; परिक्रम्य for प्रविश्य B. Bh. D. O.

*तावद् Com.

ततः प्रविशति मकरन्दः ।

मक० । कथितमवलोकितया मदनोद्यानं गतो माधव इति । भवतु तत्रैव गच्छामि । परिक्रम्यावलोक्य च । दिष्ट्यायं वयस्य[१६०] इत एवाभिवर्त्तते । निरूप्य । अस्य तु

१६०—१६५ दिष्ट्येत्यव्ययं हर्षे । माधवस्य वसन्तस्य मकरन्दः पुष्परसः सहचरो युज्यत एव । इत एवान्नैव । इह शृङ्गारो द्विविधः । यदाह भरतः ।

संभोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः ।

संभोगोपि विप्रलम्भपूर्वक एव स्वदते । यदाह ।

न विना विप्रलम्भेन संभोगः पुष्टिमर्हति ।
कषायिते हि वस्त्रादौ भूयान्रागोभिजायते ॥

स च दशारम्भः । यदाह भरतः ।

अप्राप्तिरतिभोगस्य नवस्त्रीरागजन्मनः ।
दश स्थानानि कामस्य काममन्तर्विसर्पतः ॥
अभिलाषोत्र प्रथमे द्वितीये चिन्तनं तथा ।
अनुस्मृतिस्तृतीये च चतुर्थे गुणकीर्तनम् ॥
उद्वेगः पञ्चमे ज्ञेयो विलापः षष्ठ उच्यते ।
उन्मादः सप्तमे प्रोक्तो भवेद्व्याधिस्तथाष्टमे ॥
नवमे जडता प्रोक्ता दशमे मरणं भवेत् ॥ इति ।

---

१५९. कथितमेवाव° K1. N. कथितं मेव° C. Bh.; B. Bh. C. D. K1. insert यथा before मदनो°.

१६०. N. om. तत्रैव, B. om. एव; इति परि° N.; हृष्ट्वा for अवलोक्य A. K1.; A. K1. om. दिष्ट्या; D. om. अयं.

१६१. इति निरूप्य N.

गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं
श्वसितमधिकं किं न्वेतत्स्यात्किमन्यदितोथ वा ।

तदिहानुस्मृत्यवस्थो माधवो मकरन्देन कथ्यते । गमनमिति । अस्य गमनमलसं मन्दं न तु शरीरं हस्तादेराकुञ्चनप्रसारणात् । अन्तरान्तरा विलम्बस्यात्यन्तासक्तिवशाज्जायमानत्वाच्च । इदमनुस्मृतिचिह्नम् । यदाह

मुहुर्मुहुर्निःश्वसितैरधोमुखविचिन्तनैः ।
प्रद्वेषादन्यकार्याणां कथितानुस्मृतिर्यथा ॥

तथा यतो मामपि न पश्यति ततोन्तःकरणं क्वापि लग्नम् । तथा च चिन्तासंततिपरतया ध्यानावधानेन शून्या बाह्यार्थग्राहिणी दृष्टिरस्य । यदाह ।

शून्या दृष्टिः स्मृता चिन्तासंमोहप्रणयादिषु ।

शून्यदृष्टिलक्षणमप्याह ।

निश्चला समतारा च ध्यानाङ्गाद्यमगृह्णती ।
तथा समपुटोपेता शून्या दृष्टिरुदाहृता ॥

तथा मनस्तापवतो ग्लानिः । सा च क्षीणकपोलतादिनोन्नीयते । अतः उक्तं शरीरमसौष्ठवं विकलम् । इष्टजनालाभभावनार्थमाह श्वसितमधिकम् । एतत्किं नु स्यात् । एतदलसगमनत्वादिकं रोगजं कामकृतं वेति वितर्क इत्यर्थः । रोगलिङ्गाभावादनङ्गलिङ्गसङ्गाच्च निश्चयमाह किमन्यदिति । अथ वा पक्षान्तरे । इतः कामात्किमन्यन्नान्यदित्यर्थः । किंशब्दो निषेधे । अत्र पांशुक्रीडनात्प्रभृत्यनुभूतमाधवशरीरे तत्तद्विकारदर्शनात्तर्कविद्यावित्त्वं मकरन्दस्य परिच्छेदो युज्यत एवेति ।

---

१६१. किं ते A. B, Bh. C. D, K1.; °न्यदतोथ O.

भ्रमति भुवने कन्दर्पाज्ञा विकारि च यौवनं
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम् ॥ १६५

ततः प्रविशति यथानिर्दिष्टो माधवः ।

मा० । स्वगतम् । तामिन्दुसुन्दरमुखीं सुचिरं विभाव्य
चेतः कथं कथमपि व्यपवर्तते मे ।

निश्चयलिङ्गमाह । भुवने कन्दर्पाज्ञा भ्रमति सर्वं जनमाक्रन्दति । विकर्तुं शीलमस्येति विकारि । पूर्वदशात्यागेन दशान्तरयोगो विकारस्तद्योगि यौवनम् । अयं तु युवेत्यर्थः । अत्र भ्रमतिपदेनानवच्छिन्नक्रियता तद्द्वारा सर्वकालता । भुवनपदेन सर्वदेशता । आज्ञापदेन युक्तिजिज्ञासां विना स्वीकारः । विकारिपदेन माधवाङ्गीकारहेतौ च ध्वनिता । ललिताः सुन्दरा मधुराः परिभाव्यमानास्ते ते प्रसिद्धा भावा रमणीवदनविभ्रमादयो धीरतां धैर्यं क्षिपन्त्यपनयन्ति । तदनेनकामकृतमेतदुच्चीयत इति भावः । प्रकृतिमधुरा इत्यपि पाठः । तत्र प्रकृत्या स्वभावत एव मधुरा मनोहराः ।

१६६–१७० माधवप्रवेश इह द्विपदिकया । यदाह ।

शोकविभ्रमयुक्ते तु व्या [आ] धिचिन्तासमाश्रिते ।
भुतवार्तादिवैरूप्ये योज्या द्विपदिका बुधैः । इति ।

स्वगतमिति ।

यत्तु भाव्यं न सर्वस्य स्वगतं तदिहोच्यते ॥

इति भरतः । अनुस्मृतिमाह । तामित्यादि । तां नायिकामाचिरमधुनैव विचिन्त्य कथं मम चेतः ॥ कर्तृ ॥ कथमपि महता कष्टेन व्यपवर्तते व्यावर्तते नागच्छति वा । तस्यां लग्नं तामेव धावतीत्यर्थः । किं कृत्वा ।

---

१६५. प्रकृतिमधुराः noticed by Com.
१६६. प्रविश्य माधवः for ततः—मा० । O. ; N. om. यथानिर्दिष्टो.
१६७. N. O. om. माधवः स्वगतम्.

लज्जां विजित्य विनयं विनिवार्य धैर्य-
मुन्मथ्य मन्थरविवेकमकाण्ड एव ॥ १७०
आश्चर्यम् । यद्विस्मयस्तिमितमस्तमितान्यभाव-
मानन्दमन्दममृतप्लवनादिवाभूत् ।

बालत्वेन कुलीनत्वेन च या लज्जा तामकाण्ड एवाप्रस्ताव एव विजित्य । रभसकाल एव हि लज्जाद्यभावप्रस्ताव इति भावः । विनयं मनोमलक्ष्मलनोपदेशं दूरीकृत्य । महानायकतया साहजिकं धीरत्वमुन्मूल्य । कीदृशम् । मन्थरो मन्दो विवेक इतिकर्त्तव्यता यत्र तत् । क्रियाविशेषणं वा । कीदृशीम् । इन्दोश्चन्द्रात्सुन्दरं मुखं यस्यास्ताम् ॥ वैयधिकरण्येपि गमकत्वात्समासः ॥ इह तामित्यनुस्मृतिरिन्दुसुन्दरेति गुणकीर्तनं विभाव्येति चक्षुःप्रीतिः कथमपीत्युद्वेगो लज्जां विजित्येत्युन्मादो मन्थरविवेकमिति जडतेत्येवकावस्थोक्ता ।

१७१–१७४ यदित्यादि । तत्संनिधौ यन्मदीयं हृदयं विस्मयेनाद्भुतरसेन स्तिमितं निश्चलम् । एतेन स्तम्भ उक्तः । अत एवास्तमितो नाशं प्रापितोन्यो भावो विस्मयातिरिक्तो धर्मो यत्र तत् । अनेन जडतोक्ता । यदाह ।

इष्टं वानिष्टं वा सुखदुःखे वा न वेत्ति यो मोहात् ।
तूष्णीकः परवशगः स भवति जडसंज्ञकः पुरुषः ॥

आनन्देन निरन्तरसुखेन मन्दं मन्थरं चाभूत् । अमृतप्लवनादिव सुधासेकादिव । अथ च योगाभ्यासेन कुण्डलिन्याचरणेनामृतसेकादिवेत्यर्थः । तत्रापि परमानन्दसंदोहो भवत्येव । एतेनाद्भुतनायिकादर्शनजातभावभरमन्थरता दर्शिता । तद्धृदयमधुना तद्वियोगंकारचुल्लितमिवाङ्गारावस्पृष्टमिव व्यथमानं पीडायुक्तमास्त इत्याश्चर्यम् । न च

---

१७१. आश्चर्यं thrice N.
१७२. आनन्दतान्द्र B. D. ; °मृतास्रव K1. N. ; °दिवासीत् N.

तत्संनिधौ तदधुना हृदयं मदीय-
मङ्गारचुम्बितमिव व्यथमाचमास्ते ॥

मक° । सखे माधव इत इतः । १७५

माध° । परिक्रम्य । कथं प्रियवयस्यो मम मकरन्दः ।

मक° । उपसृत्य । सखे ललाटंतपस्तपति घर्मांशुः । तदस्मिन्नुद्यानेमुहूर्तमुपविशावः ।

माध° । यदभिरुचितं वयस्याय । इत्युभावुपविशतः ।

कल° । दृष्ट्वा । कधं मअरन्दसहअरो इदं जेव्व बालवउलु- १८०
ज्जाणं अलंकरेदि माहवो । ता देसेमि से मअणवेअणावि-

प्रियासङ्गे सुखं तद्वियोगे दुःखमिति दृष्टचरमेव तत्कथमाश्चर्यमिति वाच्यम् । अननुभूतरसस्य तस्य शिशुत्वेन किमिदं यदकाण्ड एव व्ययेति तत्संभवात् ।

१७५–१८३ इत इत इहागच्छेत्यर्थः ॥ आद्यादित्वात्तसिः ॥ एतेन माधवस्य बाह्यार्थामहान्मित्रादर्शनं सूचितम् । ललाटं तपति ललाट-तपः ॥ [असूर्यललाटयोरिति खश् प्रत्ययः । खित्त्वान्मुम् ॥] माधवीय-मन्मथोन्मादमपह्नोतुकामस्येदं वचनम् ॥ वयस्यायेति रूप्यर्थानां प्री-

---

१७५. K1. om. इत; N. om. मक° ।—मम मकरन्दः । (l. 176).

१७६. B. Bh. O. add दृष्ट्वा, K1. दृष्ट्वा च after परिक्रम्य; Bh. O. om. प्रिय; मे for मम Bh. K1. O.

१७७. C. om. उपसृत्य; B. Bh. C. add माधव after सखे; भास्वान् O; तपनः B. Bh. C. for घर्मांशुः; B. Bh. add इयं च ते शरीरावस्था.

१७९. यथा प्रियवयस्याय रोचते A.; N. O. om. माध-°शतः ; Bh. om. इति.

१८०. N. om. दृष्ट्वा; कहं Bh. कहं णु N.; मयरन्द O. मअलंद N.; सहयरो O.; इमं B. Bh. C.; इदो D. for इदं; N. om. इदं जेव्व; जेव्व Bh. जेव O.; Bh. om. बाल; बालबालुज्जाणं O ; N. B. om. बउल; बालज्जाणं K1.

१८१. B. D. N. prefix णाहु to माहवो; C. D. K1. insert किं after ता; A. D. K1. have this से after अवणो, N. om. से; मयण° O. ; वाणवेअणा O.

उज्झुरन्तमालदीलोअणसुहावहं अत्तणो पडिच्छन्दअं । अहवा विस्सामसोक्खं दाव अणुभोदु । (क)

मक० । तदस्यैव तावदुच्छ्वसितकुसुमकेसरकषायशीतलामोदवासितोद्यानस्य काञ्चनारपादपस्याधस्तादुपविशावः । तथा कुरुतः ।

१८५

मक० । वयस्य माधव । अद्य किल सकलनगराङ्गनाजनप्र-

(क) कथं मकरन्दसहचर इदमेव बालबकुलोद्यानमलंकरोति माधवः । तद्दर्शयाम्यस्य मदनवेदनाखिद्यमानमालतीलोचनसुखावहमात्मनः प्रतिच्छन्दकम् । अथवा* विश्रामसौख्यं तावदनुभवतु ।

यमाण इति संप्रदानता ॥ अत्र मकरन्देन पुष्परसेन सहचरो माधवो वसन्तो बालबकुलमलंकरोतीति ध्वनिरप्युन्मिषति । मुहूर्तं चेत्यत्र सुस्थिते चित्ते वक्तुं युक्तमिति भावः ।

१८४–१८५ उत्फुल्लपुष्पाणां ये केसराः किञ्जल्कास्तैः कषायो लोहितः शीतलश्च य आमोदस्तेन वासितं सुगन्धीकृतमुद्यानं येन तस्य ॥ कषायः सुरभौ लोहितेन्यवादिति मेदिनीकरः ॥ कषायादिसंबन्धेन सौरभस्यातिगंभीरतोक्ता । आमुद्यतेनेनेत्यामोद इति । कषायादिपदे काञ्चनारेत्युक्तम् ।

१८७–१९० प्रवर्तितः कृतः । अभिरामेति यात्रान्वयि । इह मकरन्दवचनेन नर्मरूपा प्रतिमुखसंधिरुक्ता । यदाह ।

१८२. विधुर N. खिदमाण A. D. विधूरन्त Bh. विधुरन्त C. for विज्झुरन्त.

१८३. B. Bh. C. N. insert माहवो and A. D मुहुत्तं after अहवा; वीसाम Bh. K1. O.; सोक्खं O.; दावद् O.; °होदु B. Bh. N. O.

१८४. N. om. एवं.

१८५. काञ्चन for काञ्चनार A. C. N.; तावद् before उपविशावः K1.

१८७. N om. माधव; अद्यैव तावत् A. D. K1. अद्यैतावत् K2. for अद्य किल; N. O. om. किल; नराङ्गना K1. ; N. om. जन.

* Com. adds मुहूर्तं खेद after अथवा.

वर्तितमहोत्सवाभिरामकामदेवोत्थानयात्राप्रतिनिवृत्तमन्यादृशं भवन्तमवधारयामि । अपि नाम मनागवर्तीर्णोसि रतिरमणबाणगोचरम् । १९०

माधवः सलज्जमधोमुखस्तिष्ठति ।

मक० । विहस्य । तत्किमवनतमुग्धमुखपुण्डरीकः स्थितोसि । पश्य

अन्येषु जन्तुषु रजस्तमसावृतेषु
विश्वस्य धातरि समः परमेश्वरे च । १९५

शृङ्गारार्थं त्रपाकारि वाक्यं गोष्ठीषु नर्म तत् । इति ।

अपिः समुच्चये । नाम संभावनायाम् । इदं संभाव्येतापीत्यर्थः । मनागल्पम् । रतिरमणः कामः ।

१९२–१९७ मुग्धं किंकर्तव्यताशून्यम् । पुण्डरीकं सितपद्मम् । विरहधूसरत्वेन मुखस्य पुण्डरीकसाम्यम् । तस्य लज्जयाकथनमाशङ्क्याहान्येष्वित्यादि । माधव तवापह्नुतिर्लज्जया कथंचिदपि मा भूत् । लज्जयापह्नवं मा कृथाः । एवमप्रतीकारः स्यादिति भावः । खलु यतः सोयं चित्तजन्मा कामः प्रख्यातपौरुषः । चित्तोन्मादविषय इति भावः । कीदृशः । विश्वस्य धातरि जगत्स्रष्टरि परमेश्वरे हरेन्येषु

---

१८८. महामहोत्सव° Bh. ; मदनोत्थान A. D. K1. K2.; यात्रातः O. ; अभिमिवृत्त for प्रतिनिवृत्त A. D. K1. K2.; °दृशमिव Bh. K2. N. O.

१८९. अपि न त्वमवतीर्णोसि O. ; अपि त्वमवतीर्णो° N.

१९०. गोचरताम् N.

१९१. माधव नहि नहि for माधव-°ष्ठति N.; लज्जया for सलज्जम् A. D. K1, K2.

१९२. N. om. विहस्य; तत्किमिति नम्रमुख O. तत्किमिव नम्रमुग्ध N. तत्किमिव नम्रमुख° K2.; K1. om. मुग्ध; रीकं Bh. O. ; तिष्ठसि for स्थितोसि A. D. K1. K2.

१९३. Bh. N. O. om. पश्य.

१९४. बाहिस्तमसा B. च यस्तमसा° N.

१९५. परमेश्वरेपि B. N.

सोयं प्रसिद्धविभवः खलु चित्तजन्मा
मा लज्जया तव कथंचिदपक्रुतिर्भूत् ॥

माध० । वयस्य किं न कथयामि श्रूयताम् । गतोहमवलोकिताज्जनितकौतुकः कामदेवायतनम् । तत्रेतस्ततः परिक्रम्याबलोक्य च परिश्रमादुल्लसितमदिरामोदमधुरपरिमलाकृष्टसकलमिलदलिपटलसंकुलाकुलितमुकुलावलीमनोहराभरणरमणीयस्याङ्गनभुवो बालबकुलस्यालवालपरिसरे स्थितः ।

जन्तुषु मानुषादिषु च रजस्तमोगुणप्रधानेषु समस्तुल्यव्यापारः । यद्वा । अन्येषु मानुषादिषु रजस्तमसावृतेषु च तिर्यग्योनिषु विश्वस्य धातरि ब्रह्मणि परमेश्वरे हरे च सम इति भिन्नमेव योज्यम् । अतो लज्जां त्यक्त्वा कथयेति भावः ।

२००–२०७ परिश्रमात्स्थित इत्यन्वयः । परिश्रमात्स्थितोहं न तु साकाङ्क्षत्वादिति भावः । मदिरामोदवन्मनोहरो यः परिमलः शुभगन्धः ॥ स्याच्छुभगन्धे परिमल इति विश्वः ॥ मिलन्मिलितम् । संकुलेन व्याप्ताकुलिता या बकुलमुकुलावली विकासाभिमुखकलिकाराजिः सैव मनोहरमाभरणं तेन रमणीयस्य । यद्वा । मदिरामोदेन मधुर इति समासः । तेन मदिरामोदस्य बकुलपुष्पोद्गमं प्रति दोहदत्वमाह । अङ्गनभुवोङ्गनस्थस्य । अनेन निकटवर्तिनः सेक्ता-

१९९. किल for खलु A.

१९८. N. om. श्रूयताम्; ते after कथयामि N.; अथ गतो O.

१९९ कौतूहलः for कौतुकः B.; इतस्ततश्च for तत्रेतस्ततः N.; तत्र चे० A. D. K1. K2. परिभ्रम्य O.

२००. K2, N. om. अवलोक्य च; परिक्रमाद् K1 भ्रमाद् B. for परिश्रमाद्; मधुरमदिरामोदपरिमल C. N.; मधुर K2. परम O. मनोहर B. for मधुर; कृष्टसकल K2. आकृष्टमिलिन्दपटलसंकुल B.

२०१. सकलकलमिलद० N.; A. D. add बकुल before मुकुल; K2 बकुल for मुकुल.

२०२. °भरणस्य रमणीयाङ्गन° N.; °स्याङ्गन Bh. O.; K2 om. बालबकुलमुकुलस्यालवाल° K2.

तस्य च यदृच्छया निरन्तरनिपतितानि कुसुमान्यादाय विदग्ध-
रचनामनोहरां स्रजमभिनिर्मातुमारब्धवानस्मि । अनन्तरं च सं- २०९
चारिणीव देवस्य मकरकेतनस्य जगद्विजयवैजयन्तिकानिर्गत्य
गर्भभवनादुज्ज्वलविदग्धमुग्धनेपथ्यविरचनाविभावितकुमारी-
भावा महानुभावप्रकृतिरस्युदारपरिजना कापि तत एवागतवती ।

दिना मनोज्ञता दर्शिता । इहाङ्गणपदेषुविधायकाभावाण्णत्वं भुतिरयु-
क्ता ॥ पृषोदरादित्वाण्णत्वमित्यपि वचोमूलकमेव । प्रस्युताङ्गनं प्राङ्गणे
जाले कामिन्यामङ्गना मतेति विश्वादिकोषान्तवर्गपञ्चमोपान्तमङ्गनं के-
वलमिति शब्दप्रकाशाच्च नान्तत्वमेवेत्यवधेयम् । आलवालं खल इति
[अळें इति पालेवि-पाठान्त०] ख्यातम् ॥ स्यादालवालमावालमम्भसां
यत्र धारणमित्यमरः ॥ विदग्धेति । मालानिर्माणं कामशास्त्रवैदग्ध्य-
द्योतनाय । उक्तं च मालाग्रथनविकल्पा इत्यादिनेति भावः । अतिसु-
कुमारतया कामिनोर्मनोहरतया सुगन्धितया सुन्दरतया चान्यपुष्पाणि
त्यक्त्वा बकुलपुष्पैर्मालाग्रथनमिह । अत एव दमयन्तीस्वयंवरादा-
वपि बकुलमालासममधूकमालापरिग्रहः । संचारणी गमनशीला
मकरकेतोः कामस्य वैजयन्तिका पताका । गर्भभवनान्मध्यावासादु-
ज्ज्वलया निर्मलयाभाम्यया च शिशुप्रसाधनविरचनयोन्नीतः कुमारी-
भावः कुमारीत्वं यस्याः । कुमारीत्वेनावगुण्ठनपटाद्यभावात्तदुन्नयनमिति
भावः । महानुभावप्रकृतिरतिप्रभावस्वभावा । अस्युदारो महान्दक्षिणो

२०६. O. om. निरन्तरनिपतितानि; निरन्तरविकसितानि; B. विकसितनिरन्तराणि C. °तानि विकासितान्यादाय कुसुमानि Bh.; विकसितान्यादायादाय कुसुमानि O.

२०४. विदग्धविरचना Bh. K1. K2.; विदग्धाविरचनया स्रजं ग्रथितुमारब्धं° O.; N. O. om. अस्मि; तु for च Bh.

२०५. मकरकेतोर्जे° A. D. K1. K2.

२०६. K1. om. गर्भ; B. Bh. N. O. insert बाल after मुग्ध; रचना O.; कौ-मारभावा K1. K2.

२०७. इत for तत N.

सा रामणीयकनिधेरधिदेवता वा
सौन्दर्यसारसमुदायनिकेतनं वा ।
२१० तस्याः सखे नियतमिन्दुसुधामृणाल-
ज्योत्स्नादि कारणमभून्मदनश्च वेधाः ॥

वा । उदारो महति दक्षिण इति शाश्वतः ॥ परिजनदाक्षिण्यं सांनिध्यानयनेन ज्ञेयम् । तत एव तत्रैव ।

२०८-२११ तद्गुणकीर्तनमाह । सेत्यादि । सा स्त्री रामणीयकस्य मनोहरताया निधेराधारस्याधिदेवताधिष्ठात्री देवता । यद्वा । रामणीयकमेव निधिस्तस्याधिष्ठात्री रक्षिका देवता । सौन्दर्यसारसमुदायस्य कान्तिनिर्यासपूरस्य निकेतनं गृहं वा । निकेतनस्याजहल्लिङ्गतया सामानाधिकरण्यम् । मनोहरत्वं कान्तिमत्त्वं च तत्रैव दृष्टमिति भावः । वा समुच्चये । यद्वा । वा विकल्पे तत्र निर्णेतुं न शक्यत इति विकल्पार्थः ॥ यद्वा । वेवार्थे रामणीयकनिधेर्देवतेवेत्यर्थः ॥ वा स्याद्विकल्पोपमयोरिवार्थेपि समुच्चय इति विश्वः ॥ यद्वा । रामणीयकं रूपादिरूपसम्पत्तिस्तन्निधेरधिदेवता । अनेन शोभोक्ता । यदाह ।

रूपयौवनलावण्यैरुपभोगोपबृंहितैः ।
अलंकरणमङ्गानां शोभेति परिकीर्तिता ॥

सौन्दर्येत्यादिना कान्तिरुक्ता । यदाह ।

शोभैव कुसुमाद्येण पूरिता कान्तिरुच्यते ।

अतोनयोर्भेदः । अत्यन्तविलक्षणां तामालोक्योत्प्रेक्षते । नियतं तस्याः कारणं समवायिकारणमिन्दुसुधामृणालज्योत्स्नादिकमभूत् । चन्द्रो मुखस्य सुधाधरस्य मृणालं भुजयोर्ज्योत्स्ना लावण्यादीनामिति भावः । आदिपदेन पद्मौ पादयोः किसलयौ चरणयोरिति ज्ञेयम् ।

---

२१०. कला for सुधा N. O. सुधा margin of O.

अथ सा प्रणयिनीभिरनुचरीभिरविरलकुसुमसंचयावचयलीलादोहदिनीभिरभ्यर्थ्यमाना तमेव बकुलपादपोद्देशमागतवती। तस्याश्च कस्मिन्नपि महाभागधेयजन्मनि बहुदिवसोपचीयमानमिव मन्मथव्यथाविकारमुपलक्षितवानस्मि । २१५

यतोस्याः । परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः
कथमपि परिवारप्रार्थनाभिः क्रियासु ।

सर्वोपमाद्रव्यघटितेयमिति भावः । एवं मदन एवास्या वेधाः स्रष्टाभूत् । चकारोवधारणे । वेदजडस्य पुराणस्य ब्रह्मणो नात्र निर्माणकौशलमिति भावः । अत्र कामस्य स्रष्टृत्वेनाश्रुतत्वात्कथमिदमिति न देहयम् । अस्या मोहनीत्वेन मोहनपटुकामजन्यत्वोत्प्रेक्षणात् । अदृष्टचरत्वस्योत्प्रेक्षायामनुकूलत्वात् । असदारोपणस्योत्प्रेक्षात्वात् । नियतपदमुत्प्रेक्षाव्यञ्जकम् । नूनमित्येवमादिभिरिति वचनात् ।

२१२-२१५ प्रणयिनी स्निग्धा । अनुचरी दासी । संचयः समूहः । अवचयस्त्रोटनम् । दोहदोभिलाषः । सहर्षमाह तमेवेति । स्वोद्देशेनाह कस्मिन्नपीति ॥ भागधेयं भाग्यमित्यमरः ॥ इहानुमानरूपो गर्भसंधिः कस्मिंश्चिदित्यनेनोक्तः । यदाह ।

व्याप्येन व्यापकज्ञानमनुमानमुदीरितम् । इति ।

२१६-२२२ विकारचिह्नमाह । परिमृदितेति । यथास्या अङ्गं प-

---

२१२. N. O. om. सा; B. om. अनुचरीभिः; अनुचरीभिः before अभ्यर्थ्य° O.; N. om. अविरल—°दिनीभिः; अनवरत for अविरल O.

२१३. कुतूहलिनीभिः for दोहदिनीभिः O.; तमेव च Bh.; बालबकुल A. D. K1. K2.; आगता B.

२१४. तद्वा before तस्याः N.; N. om. च; कार्स्मांश्चिदपि A. D. K1. K2.; महाभागजन्मनि K1. K2. O.

२१५. °मानमिवात्मन्यन्यथाविकार° Bh.; C. om. व्यथा; अविभाविनम् before उपलक्षि° O.; उपलब्धवानस्मि A. D. K1.

२१६. यतः for यतोस्याः A. B. Bh. C. N. K1. K2; मृणाल N.

२१७. कथमिव Bh.

कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी-
मभिनवकरिदन्तच्छेदपाण्डुः कपोलः ॥

२२० सा पुनर्मम प्रथमदर्शनात्प्रभृत्यमृतवर्तिरिव चक्षुषोर्निरतिशयमानन्दमुत्पादयन्त्ययस्कान्तमणिशलाकेव लोहधातुमन्तःकरणमाकृष्टवती सर्वथा । किं बहुना ।

रिमृदिता मर्दनविषयीकृता या मृणाली बिसलता तद्वन्म्लानम् । क्रियासु ताम्बूलभक्षणादिषु परिजनयाचनाभिरस्याः कथमपि प्रवृत्तिः । इह मृणालीपदेन तनुता म्लान्या निद्राच्छेदः कथमपीत्यादिना विषयनिवृत्तिः कथिता । तनुत्वम्लानत्वमान्द्यैर्ग्लानिरुक्ता । यदाह ।

ग्लानौ तनुत्ववैवर्ण्यमन्दतादिनिदर्शनम् ।

ननु तनुत्वादिना व्यभिचारिणा कथं कामविकारोन्नयनमत आह । कलयतीति । तस्याः कपोलो हिमांशोः शोभां कलयति तुलयति । अनेन पाण्डुता दर्शिता । कीदृशः । नूतनदन्तिदन्तखण्डगौरः । छिद्यत इति च्छेदः खण्डः । इहाभिनवपदेन सपुलकत्वं ध्वनितम् । तथा च कपोलपाण्डुत्वसपुलकत्वादिना कामविकारव्याप्तेन तदुन्नयनमिति भावः । विरहे पाण्डुतापि । यदाह ।

अङ्गस्यासौष्ठवं तापः पाण्डुता कृशता रतिः ।

वर्तिर्नेत्राम्ननलेखा । अयस्कान्तो लोहाकर्षको मणिः । लोहधातुर्लोहरूपं द्रव्यम् । अन्तःकरणं मनः । ममान्तःकरणमाकृष्टवतीत्यर्थः । किं बहुनेत्यनेन सखेदनिःश्वाससूचनम् ।

---

२१९. दान्त C. कान्त B. for दन्त ; °च्छेदकान्तः Bh.

२२०. A. N. O. om पुनर् ; N. om. प्रथम ; प्रथमदर्शनक्षणात्प्रभृति A. Bh. D. K1. K2,.O.; नयनयोः for चक्षुषोः C.; अतिशयानन्दं A. D. K1. K2. निरन्तमानन्दं C.

२२१. °शयानन्दं O.

२२२. °रणमुपसंहृतवती N., °रणमभिचुम्बितवती Bh: °रणमाक्षिप्तवती B. C.; A. D. K1, K2. om. सर्वथा, सर्वथा after बहुना N.

संतापसंततिमहाव्यसनाय तस्या-
मासक्तमेतदनपेक्षितहेतु चेतः ।
प्रायः शुभं च विदधात्यशुभं च जन्तोः २२५
सर्वंकषा भगवती भवितव्यतैव ॥

मक० । वयस्य माधव । स्नेहश्च निमित्तसव्यपेक्षश्चेति विप्रतिषिद्धमेतत् । पश्य ।

२२३–२२६ संतापेत्यादि । ममैतच्चेतस्तस्यां विषय आसक्तं समन्ताल्लग्नमस्तीत्यर्थः । संतापपरंपरैव महाव्यसनं तदर्थम् ॥ तादर्थ्ये चतुर्थी ॥ संततिपदेन मालतीलाभमन्तरेण यावज्जीवमविच्छेदस्तल्लाभे प्राणहानिश्चोक्ता । कीदृशम् । अनपेक्षितनिमित्तम् । एतेन विषयालाभेऽप्यस्य स्वाभाविकी प्रीतिरुक्ता । यदाह ।

अभ्यासादभिमानाच्च तथा संप्रत्ययादपि ।
विषयेभ्यश्च तत्त्वज्ञा विदुः प्रीतिं चतुर्विधाम् ॥

अनेन निजमुच्छृङ्खलत्वमपि निरस्तम् । अत एवाह प्राय इति । बाहुल्येन भगवती भवितव्यतावश्यंभावि प्राक्तनकर्म जीवानां शुभमशुभं च विदधाति । अत एव सा सर्वंकषा सर्वहरा । तथा च ममावश्यकं दुःखं त्वं तु यथोचितं कुर्या इति भावः ॥ आसक्तेत्यादुपूर्वात् षच् समवाये क्तः । सर्वंकषेति खच्प्रत्यये खित्वान्मुम् ॥

२२७–२३२ माधवोक्तप्रीतेरनिमित्तकत्वमुपपादयति । स्नेह इति । निमित्तमिह द्वयं बाह्यमाभ्यन्तरं च । तदिह बाह्यहेत्वपेक्षः स्नेहोस्थिर एव । निमित्तनिवृत्तौ तन्निवृत्तेरावश्यकत्वात् । अत आन्तरनिमित्तापेक्षैव स्नेहस्येति भावः । विप्रतिषिद्धं विरुद्धं बाह्यनिमित्तापेक्षया विरोध

---

२२७. N. om. माधव ; A. B. C. D. O. om. च before इति.
२२८. प्रतिषिद्धमेतत् C.

व्यतिषजति पदार्थानान्तरः कोपि हेतु-
२१० र्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥

ततस्ततः ।

इति भावः । स्वोक्ते युक्तिमाह । व्यतिषजतीत्यादि । आन्तरो हेतुः कोप्यनिर्वचनीयः पदार्थान्नरनारीप्रभृतीन्व्यतिषजति विशेषतो मेलयति । यतः प्रीतयो बहिरुपाधीन्बाह्यहेतून्सौन्दर्यादीन्न संश्रयन्ते प्रकर्षेणावलम्बन्ते । अत्र कोपीत्यनेन जन्मान्तरानुभवजनितसंस्कारताध्वनिः । न खल्वित्यनेन दृष्टश्रुतानुमितसकलैहिकोपाधिनिषेधात्तथावसायः । अत एव विशेषप्रकर्षद्योतकाभ्यामुपसर्गाभ्यामासङ्गस्य जीवितावधित्वमुक्तम् । उक्तं द्रढयति । यतः पतङ्गस्य सूर्यस्योदये पुण्डरीकं विकसति चन्द्रे उद्गत उदिते सति चन्द्रकान्तो द्रवति क्षरति च । तथा च तीक्ष्णकरोदये कोमलकमलदलविकासादमृतकरोदये पाषाणदारणाच्च सहजसिद्ध एव हेतुः । इह किं बाह्यं कारणं दृश्यते । तद्वत्प्रकृतेपि स्वाभाविक एव स्नेह इति भावः ॥ [पतङ्गः शलभे रवाविति धरणिः ॥] पुण्डरीकपद्मिह पद्ममात्रपरम् । अर्थान्तरन्यासोयम् ।

२३३–२३९ ततस्तत इति कथोपक्रमरीतिः । तत्र स्थाने । सभ्रूविलासमित्यादि । अथ तस्याः सखीजनेन तदा सोयमित्युक्ता सप्रत्यभिज्ञमिव पूर्वदृष्टमिव मामवलोक्य सभ्रूविलासं सभ्रूभङ्गं यथातथा कटाक्षाः क्षिप्ताः । एतेन कटाक्षाणां पूर्वदृष्टप्रत्यभिज्ञाकारार्पणत्वमुक्तम् ।

---

२२९. °नन्तरः B. °वान्तरः D.
२३२. °श्मावुद्यते N.
२३३. N. om. one ततः.

माध० । ततश्च तत्र ।

सभ्रूविलासमथ सोयमितीरयित्वा २३९
सप्रत्यभिज्ञमिव मामवलोक्य तस्याः ।
अन्योन्यभावचतुरेण सखीजनेन
मुक्तास्तदा स्मितसुधामधुराः कटाक्षाः ॥

मक० । स्वगतम् । कथं प्रत्यभिज्ञापि नाम ।

माध० । अथ ताः सलीलमुत्तालकरकमलतालिकातरलवलया- २४०

कीदृशेन । अन्योन्याशयविज्ञेन । अनेन नायिकाव्युत्पत्त्यतिशय उक्तः । कीदृशाः । स्मितमीषद्धसितमेवामृतं तेन मनोज्ञाः ।

ईषत्प्रफुल्लितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अदृष्टदन्तकुसुमैरुत्तमानां स्मितं मतम् ॥

इति भरतः । स्वस्यादृष्टचरत्वेन संभावनायामिहेवशब्दः । अवलोक्येति ललिता दृष्टिरियम् । यदाह ।

मधुराकुञ्चितारा च सभ्रूक्षेपा च सस्मिता ।
समन्मथविकारा च दृष्टिः सा ललिता मता ॥

इह तु हर्षादियमुचिता । यदाह । धृतौ हर्षे च ललिता । भ्रूविलासेत्यनेन मोट्टायितमपि कटाक्षितम् । प्रत्यभिज्ञैकस्य तत्तेदन्तावैशिष्ट्यम् । तस्या एवाकारः सोयमिति । नाम संभावनायाम् । अदृष्टचरत्वेन माधवप्रत्यभिज्ञाया असंभवादिति भावः ।

२४०–२४६ तामेव स्फोटयति । अथेति । अनन्तरं ताः सख्यो हे भर्तृदारिके स्वामिपुत्रि हर्षेण वयं वर्धामहे यतोत्रैव स्थाने

---

२३४. Bh. om. ततश्च तत्र.
२३५. °मितीव नाम N. O.
२३७. अन्योन्यमेव चतुरेण N., (with भा in margin as a substitute for मे) O.
२३८. मुक्तास्सदा C.
२३९. Bh. N. om. स्वगतम्; O. om. कथं: ततस्ततः after नाम N.
२४०. दत्तउत्तालकर° B. Bh.; A. inserts ललित after कमल.

वलीकमुच्चस्तमत्तकलहंसीविभ्रमाभिरामचरणसंचरणझणझणा-
यमानमञ्जीरमञ्जुरसितानुविद्धमेखलाकलापकलकिङ्किणीरण-
त्कारमुखरं परिवृत्य भर्तृदारिके दिष्ट्या वर्धामहे यदत्रैव कोपि
कस्यापि तिष्ठतीति मामङ्गुलीदलविलासेनाख्यातवत्यः ।

कस्यापि कोपि तिष्ठतीत्युक्त्वा मामङ्गुलीखण्डलीलया कथितवत्यः । किं कृत्वा । सलीलं सविलासचेष्टितं यथा तथा प्रतिनिवृत्य । स्त्रीणां विलासचेष्टितं लीलेति भरतः । उत्तालमुद्भटम् । विभ्रमो विलासो विशिष्टभ्रमणं वा । मञ्जुर्मनोज्ञः । मञ्जीरो नूपुरः । रसितानुविद्धः शब्दानुगतः । मेखलायाः कलापो गुच्छः । यद्वा । मेखला च कलापश्च तयोः किङ्किणी क्षुद्रघण्टिका ।

मेखला च कलापश्च भवेच्छ्रोणिविभूषणम् ।
एकयष्टिर्भवेत्काञ्ची मेखला त्वष्टयष्टिका ॥
रशना षोडश ज्ञेया कलापः पञ्चविंशतिः ॥

इति भरतः । इदं सर्वं निवर्तनक्रियाविशेषणम् । गतिरियं विकला । यदाह ।

आवेगे चैव हर्षे च कार्ये च त्वरयान्विते ।
एतेषु च गतिं प्राज्ञो विकलां संप्रयोजयेत् ॥ इति ।
राजा भट्टारको देवस्तत्सुता भर्तृदारिका ॥

---

२४१. °कं समुच्चस्त Bh. समुच्चस्त B. C. °लीसमुच्चस्त O.; भवन for मत्त O.; रणरणायमान for झणझणायमान N. O.

२४२. मञ्जुमञ्जीर B. Bh. C. सिञ्जित O. शिञ्जित A. K1. K2. for रसित; A. D. N. O. om. कल; रणरणत्कार N.; झणत्कार O.

२४३. प्रतिनिवृत्य for परिवृत्य A. K1. K2. N. O.; वर्धामहे for वर्धामहे B.

२४४. कस्या अपि Bh. C. N.; वल्लभः before तिष्ठति B. Bh. N.; तिष्ठतें इति K2.; O. om. दल; विन्यासेन for विलासेन O.; दर्शितवत्यः for आख्यातवत्यः O.

मक० । स्वगतम् । हन्त महतः प्रागनुरागस्योद्भेदः । २४९

कल० । आकर्ण्य । कथं सरसरमणीआणुबन्धिणी इत्थी-अणकधा । (क)

मक० । ततस्ततः ।

माध० । अत्रान्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुल्लसितविभ्रममुत्पलाक्ष्याः । २५०

(क) कथं सरसरमणीयानुबन्धा स्त्रीजनकथा ।

राजपदमीश्वरमात्रपरम् । तेनामात्यकन्यापि भर्तृदारिकेत्युच्यत इत्यवधेयम् । कोपि कस्यापीत्यनेनानुद्भटोद्भावनेन तासां चातुर्यमुक्तम् । अत एव कस्यापीति सामान्यनिर्देशात्क्लीबत्वम् । अन्यथा स्त्रीलिङ्गनिर्देशः स्यात् । कोपीति पुंलिङ्गनिर्देशस्तु स्पष्टार्थः । अन्यथा किमपीति निर्देशे पुष्पादिप्रतिपत्त्या संशयः स्यादिति भावः । अङ्गुलीदलपदेन सविलासाख्यानमुक्तं संगुप्तमाख्यानं वा ध्वनितम् । इदमाख्यानं नर्मवाक्यम् । यदाह ।

सहास्यवचनप्रायं नर्मेच्छन्ति मनीषिणः ॥

हन्त हर्षे । उद्भेदः प्रकाशः । अनुबन्धिनी प्रतीयमाना ।

२४९–२५२ अत्रान्तरेत्यादि । सखीनां दर्शनावसर एव पद्माक्ष्याः संबन्धि तन्मान्मथं कामजमाचार्यकमुपदेशकर्मावितासीत्प्रकटीभूतम् ।

२४९. N. om. स्वगतम्; सूचितो before महतः B.; महतः खलु Bh.; प्रियानुरागस्य for प्रागनुरागस्य N.; सूचितः after उद्भेदः Bh.

२४८. K1. K2. N. O. om. आकर्ण्य; कथं A. K1. एदाणं N. for कथं; रमणीया K2. O. रमणिज्जा N. for रमणीआ; °त्तीअण° K2.

२४७. इत्थीआअण B. इत्थिआकहा N. इत्थीकहा O. इत्थिआकथा वहइ Bh.

२४८. B. om. one ततः

२४९. विभवातिवृत्ति O. विभवातिवर्ति N.

२५०. आयताक्ष्याः for उत्पलाक्ष्याः B. N.

तद्भूरिसात्त्विकविकारमपास्तधैर्य-
माचार्यकं विजयि मान्मथमाविरासीत् ।

ततश्च । स्तिमितविकसितानामुल्लसद्भूलतानां

कीदृशम् । किमप्यनिर्वचनीयम् । अत एव वाग्विभवाद्वचनप्रपञ्चाद-तिवृत्तमतिशयितं वैचित्र्यं यस्य तत् । उल्लसित उत्थितो विभ्रमो भावभेदो यत्र तत् ।

यच्चित्तवृत्तेरनवस्थितत्वं शृङ्गारजो विभ्रम उच्यतेसौ ।
भेदास्त्रयस्तस्य मदानुबन्धकार्कश्यसंज्ञाः कथिता विदग्धैः ॥

इति भरतः । भूरि प्रचुरः सात्त्विकविकारो यत्र तत् । सत्त्वं मानसं किमपि तेन निर्वृत्तः सात्त्विको भावः । यदाह ।

सत्त्वोत्कटे मनसि ये प्रभवन्ति भावा-
स्ते सात्त्विका निगदिताः कविभिः पुराणैः ।

ते च ।

स्वेदः स्तम्भोथ रोमाञ्चः स्वरभङ्गोथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः ॥ इति ।

अपास्तं क्षिप्तं धीरत्वं येन तत् । महाभिजनत्वाद्यनपेक्षित्वादिति भावः । विजयि सर्वत्राप्रतिहतं कुमार्या अपि शिशुत्वाद्विजय इति भावः । उत्पलाक्ष्या इत्यनेन बहुविधे नेत्रविकारे प्रीतिगो हाव ईर्ष्याज इहोक्तः । यदाह ।

भ्रूनेत्रादिविकाराद्यः शृङ्गाराकारसूचकः ।
स्थायिभावः स्थितो हाव ईर्ष्याजः प्रीतिगोपि च ॥

इह श्लोके विलास उक्तः । यदाह ।

दयितावलोकनादौ विशेषोद्भक्रियाद्य यः ।
शृङ्गारचेष्टासहितो विलासः समुदीरितः ॥

---

२५२. मनसि for विजयि B.

मसृणमुकुलितानां प्रान्तविस्तारभाजाम् ।
प्रतिनयननिपाते किंचिदाकुञ्चितानां २५५

२५३–२५६ संप्रति हेला हावात्समुत्थितेति भरतानुसारेण हावानन्तरं हेलामाह । स्तिमितेत्यादि ।

नारीणां प्रियसंभोगलज्जासाध्वसकौतुकैः ।
स्वभावाविष्कृतो वेगो हेलेति परिकीर्तितः ॥

इति भरतः । श्लोकार्थस्तु तस्या आलोकितानां सहसा दर्शनानां पात्रं योग्योहमभूवं वृत्तोस्मि ।

सहसा दर्शनं यस्यात्तदालोकितमुच्यते ॥

इति भरतः । कीदृशानाम् । मदीयरूपनिरूपणाश्चर्येण स्तिमितानि निश्चलानि हर्षेण विकसितानि प्रफुल्लानि च तेषाम् । दृष्टिरियमद्भुता । यदाह ।

समाकुञ्चितपक्ष्माग्रा विस्मयोद्भूततारका ।
सौम्या विकसितान्ता च दृष्टिः स्यादद्भुताभिधा ॥

यद्वा । स्तिमितं मन्दं यथा तथा विकसितानां प्रकाशितानां प्रथमं नायकदर्शनेन शनैः शनैः प्रसारणमिति भावः । अनेनोत्तरोत्तरदर्शनाभिलाषः सूचितः । लक्ष्यन्ती चपला भ्रूर्लतेव येषु तेषाम् । दीर्घत्वेन भ्रूलतयो रूपकम् । अनेन कान्ता दृष्टिरुक्ता । यदाह ।

हर्षप्रसादजनिता कान्तात्यर्थं समन्मथा ।
सभ्रूक्षेपकटाक्षा च शृङ्गारे दृष्टिरिष्यते ॥

मसृणानि चिक्कणानि लज्जया मुकुलितानि च तेषाम् । दृष्टिरियं मुकुलिता ।

२५४. प्रीति for प्रान्त C.

विविधमहमभूवं पात्रमालोकितानाम् ।
तथैव । अलसवलितमुग्धस्निग्धनिष्पन्दमन्दै-

मुग्धा निमीलितान्ता च मुकुला दृष्टिरिष्यते ॥

इति भरतः । यद्वा । सुखभावनया मसृणं मन्दं यथा भवति तथा मुकुलितानाम् । एतेन दर्शनजनितानन्दसंपत्पर्यवसानं सूचितम् । पुनः पुनर्दर्शनाकाङ्क्षया तिर्यगायतत्वेन प्रान्ते निकटे च विस्तारवताम् । शङ्किता दृष्टिरियम् । यदाह ।

किंचिच्चलस्थिरा किंचिन्नमिता तिर्यगायता ।
गूढा चकिततारा च शङ्किता दृष्टिरुच्यते ॥

अनेन कटाक्षपर्यवसानमुक्तम् । प्रतीपदिगायतमक्षेत्रपाते सति लज्जया दर्शनोत्सुकतया च किंचिदाकुञ्चितानां मुद्रितानाम् । आकुञ्चितेयं दृष्टिः । यदाह ।

अनाकुञ्चितपक्ष्माग्रा पुटैराकुञ्चितैस्तथा ।
संनिकुञ्चिततारा च कुञ्चिता दृष्टिरुच्यते ॥

न च

कुञ्चिता सूचिता नष्टदुष्प्रेक्षाक्षिव्यथासु या ॥

इति भरते नियमादिह कुञ्चितदृष्टिकथनमयुक्तमिति वाच्यम् । लज्जया माधवे दुष्प्रेक्षत्वसंभवात् । पात्रं कीदृशम् । विविधं नानाप्रकारम् । स्तिमितदृष्टिप्रयोगेपि मयापि तथैव दृष्टिप्रयोगः कृत इत्यर्थः । योग्यभाजनयोः पात्रमित्यमरः ॥ अभूवमिति भुवो लुङि सिचि रूपम् ॥

२५७–२६० अलसेत्यादि । पक्ष्मलाक्ष्याः प्रशस्तपक्ष्मयुक्तायास्तैरवलोकितैः कटाक्षतापन्नैर्मम हृदयमपहृतं स्ववशीकृतम् । इह रक्षकबाहुल्येन गमनत्वरया शङ्कया वावलोकितानामेव कटाक्षत्वमुक्तम् । कटाक्षस्तिर्यग्विलोकनात्मकः कर्णाभ्यर्णसंचारितारकः सर्वानङ्गरङ्ग-

---

२५७. किंच for तथैव N.; चलित for वलित B.; निष्पन्द for निष्पन्द Kl.

रधिकविकसदन्तर्विस्मयस्मेरतारैः।
हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षै-
रपहृतमपविद्धं पीतमुन्मूलितं च ॥ २६०

जनक इति भावः। तथा निश्चलत्वेनापविद्धं मथितम्। मथ्यमानतया द्रवरूपत्वेन पीतम्। अत एवोन्मूलितम्। तदा किमपि मया न ज्ञातमित्यर्थः। अत एवाशरणं रक्षकशून्यं जातम्। ततो यथार्हं कुर्विति भावः। कीदृशैः। लज्जयालसैर्मन्दैः। कौतुकेन वलितैश्चलितैः। अथ मुकुलनेन मुग्धै रम्यैः। प्रीत्या स्निग्धैः। रूपदर्शनाद्भुतचिन्ताभ्यां निष्पन्दैरनिमेषैः। पुनः कोयं द्रष्टव्य इति विषादान्मन्दैरित्यर्थः। इयं विषादिनी दृष्टिः। यदाह।

विषादविस्तीर्णपुटा पर्यस्तान्तानिमेषणी।
किंचिन्निष्टब्धतारा च नार्या दृष्टिर्विषादिनी ॥

यद्वा। अलसं मन्दं यथा तथा वलितैः। इयं निर्विकारा दृष्टिः। यदाह।

ललिताकुञ्चिता या च या च धीरावलोकिनी।
निर्विकारा दृगिष्टा सा साध्व्येवाकारगुप्तिषु ॥

तथा प्रथमदर्शनापेक्षयाधुना विशेषदर्शनादधिकं विकसतान्तर्विस्मयेन स्मेरा मुग्धा तारा येषां तैः। इयं दृष्टिः स्निग्धा। यदाह।

किंचित्सहासेव सविस्मयेव सभ्रूसमुत्क्षेपकटाक्षयुक्ता।
स्निग्धा निकामं प्रमदैवनिष्ठा शृङ्गारजा दृष्टिरिह प्रदिष्टा।

यद्वा। कटाक्षैर्मम हृदयमपहृतमित्यनेन प्रीतिरुक्ता। अन्यस्यापि चक्षुष्प्रीतिहेतोर्मनोहरत्वं भवत्येव। अपविद्धमित्यनेन चित्तासङ्ग उक्तः।

२६०. अपि विद्धं for अपविद्धं B.; नु for च B. (?). After उन्मूलितं च Bh. reads:

तद्वक्त्रं नयने च ते स्मितसुधासिक्तं च तद्वाचिकं
सा वेणी स भुजक्रमोऽतिसरलो लीलालसा सा गतिः।
तन्वी सेति च सेति सेति सततं तद्ध्यानबद्धात्मनो
नो निद्रा न रतिर्न चापि विरतिः शून्यं मनो वर्तते ॥

एवमहं तु तस्याः सर्वाकारहृदयंगमायाः संभाव्यमानस्नेहरसेनाभिसंधिना विधेयीकृतोपि पारिप्लवत्वमात्मनोपनिह्नोतुकामः प्राक्प्रस्तुतस्य बकुलदाम्नो यथाकथंचिदवशेषं ग्रथितवानेव ।

अपव्यधेरत्यन्तासङ्गवाचित्वादिति भावः । पीतमात्मायत्ततां नीतम् । अनेन संकल्प उक्तः । मानसव्यापारस्यात्मवशत्वादिति भावः । उन्मूलितमित्यनेन विषयनिवृत्तिः सूचिता । अशरणमित्यनेन चित्तापहरणादिनिवारकाभाव उक्तः । नायिकाया निरवद्यरूपता च सूचिता । अलसेत्यनेन निद्रोद्भेदः । वलित इत्यनेन त्रपानाशः । मुग्धत्वेन मधुरता । स्निग्धत्वेन साभिलाषत्वम् । अभिलषणीयस्य स्नेहविषयत्वात् । निष्पन्दतया निकोचवैमुख्यम् । मन्दत्वेन सहर्षत्वम् । अधिकेत्यादिनान्तर्विकासिनी स्मेरतारा चेत्युक्तम् । एवं चालसवलितैरपहृतम् । योपि हि चौरादिः किंचिदपहरति स मन्दं मन्दं वलत इति भावः । मुग्धैः सहजरूपदर्शनातिमोहवद्भिः स्निग्धैर्मद्विषयस्नेहसूचकचेष्टावद्भिरपविद्धं क्षिप्तं पराभूतमिति यावत् ॥ विद्धक्षिप्तेरिताः समा इत्यमरः ॥ अनेन चेतसोनायत्तिर्दर्शिता । ननु चित्तावक्षेपनिवारकं तदनु[तदन्य?]ध्यानादिकं किमिति न कृतमत आह । निष्पन्दैर्विमुखैर्मन्दैर्मदेकविश्रान्तैश्च पीतं तदितरानुसंधानशून्यं कृतम् । तथा च नान्यविषयपरिशीलनकथेति भावः । अधिकेत्यादिनोन्मूलितम् । अनेन मनोनिग्रहाभावो मित्रोपदेशानवसरश्च सूचितः । इह पूर्वश्लोकेन नार्थपौनरुक्त्यम् । आलोकितावस्थाकटाक्षावस्थयोर्भेदात् । नायकस्य रसाक्षिप्तचित्तत्वाद्वा ।

२६१–२६५ तथाविधभावदर्शनेन हृदयंगमत्वम् । संभाव्यते ।

२६१. Bh. N. O. om. एवं; च for तु O.; संभाव्यमाण for संभाव्यमान B.

२६२. संभिधिना for अभिसंधिना Bh. N. O.; विधीकृतोपि C. विषयीकृतोपि D. for विधेयीकृतोपि; पारिप्लवम् for पारिप्लवत्वम् N.; अपह्नोतु for अपनिह्नोतु Bh. N. O.

२६३. O. om. प्राक्; प्रस्तुत for प्रस्तुतस्य O.; च before बकुल° K2.; बकुलपुष्पदाम्नो B. Bh. K2. N. O.; अमुष्य दाम्नो C. for बकुलदाम्नो; धाम्नो for दाम्नो K1.; कथं कथंचिद् for यथाकथंचिद् O.

ततो मिलितवेत्रशस्त्रपाणिवर्षवरप्रायपुरुषपरिवारा गजवधूमा-
रुह्य नगरगामिनं मार्गमिन्दुवदनालंकृतवती । २६५

तदा च । यान्त्या मुहुर्वलितकन्धरमाननं त-
दावृत्तवृन्तशतपत्रनिभं वहन्त्या ।
दिग्धोमृतेन च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः ॥

अपदेपि प्रेम्णोनिष्टाशङ्कित्वादिति भावः । अभिसंधिरभिप्रायः । यथाकथंचिदिति । चेतसस्तदपहृतत्वादिति भावः । वर्षवराः क्लीबास्तत्प्रायास्तत्प्रधानाः । यद्वा ।

विनीताः सर्वसत्त्वाश्च क्लीबाश्चैव स्वभावतः ।
जात्या न दोषिणश्चैव ते वै वर्षवरा मताः ॥

इति परिभाषिता वर्षवराः । हस्तिनीसमारोहणादिना महावंशजत्वेन मालत्या उत्तमस्त्रीत्वं सूचितम् । यद्वा । हस्तिनीसमारोहणेनात्युच्चयानतया दूरदर्शित्वं सूचितम् । तत्रापि मन्थरगतिसूचनाय हस्तिनीग्रहणम् । हस्तिज्ञातावपि स्त्रिया मन्थरगतिमत्त्वात् । एतदुभयं चिरं माधवावलोकनायेति भावः ।

२६६–२६९ यान्त्येत्यादि । तया पक्ष्मलाक्ष्या यान्त्या मम हृदये गाढं यथा तथा कटाक्षो निखात इव दत्त इव । तदा तदवलोकनं मम हृदये लग्नमिवेत्यर्थः । निखात इत्यनेन कटाक्षस्य

---

२६४. N. om. मिलित° ; °वेषधरवर्षवर° N.; वर्षधर for वर्षवर B. C. D.; N. om. पुरुष; परिवृतां B. Bh. C. परिवारां O. for परिवारा; करेणुकाम् for गजवधूम् O.

२६५. नगरमार्गं for नगरगामिनं मार्गम् B.

२६६. N. om. तदा च. तथा for तदा Bh.; हि for च B. C. O.

२७० ततः प्रभृति ।

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोप्यन्तर्जडयति च तापं च कुरुते ॥

दुःसहत्वमुक्तम् । कीदृश्या । तदाननं वहन्त्या । कीदृशम् । मुहुर्वेलिता वक्रिता कन्धरा घाटा यत्र तत् । क्षणं क्षणं व्यावर्तमानम् । पश्यन्त्येत्यर्थः । आवृत्तवृन्तमावर्जितनालं यच्छतपत्रं पद्मं ततो निरतिशया भा दीप्तिर्यस्य तत् । तद्विभं तत्तुल्यमिति वा । वृन्तादारभ्यावर्तनेन पद्मविवर्तनसिद्धिः । कीदृशः । प्रथममानन्दहेतुतयामृतेन दिग्ध उपचितः पश्चाद्दर्शनानन्दविच्छेदाद्विषेण दिग्धः ।

२७०–२७४ ततः प्रभृति तस्मादारभ्य । परिच्छेदेत्यादि । विकारः कामजो भावोन्तर्जडयति मोहयति तापं च कुरुते व्यथयति । यदा तत्प्राप्तिचिन्ता तदा जडतेतरकार्यापतिपत्तिः । यदा च तद्व्यतिरेकचिन्ता तदा ताप इति कालभेदेन जाड्यतापयोर्न विरोधः । तदुभयजनकवस्तुनोभावमाशङ्क्याह । कोपि विशिष्यानिर्वचनीयः परिच्छेदमियत्तामतीतोतिक्रान्तो निर्वक्तुमशक्यश्च । यः पुनरस्मिञ्जन्मन्यनुभवपथं न गतवान् । अत एव परिच्छेत्तुं निर्वक्तुं चाशक्य इति भावः । सांप्रतं तदनुभवेन तद्वयं किमिति न क्रियत इत्याशङ्क्याह । विवेकप्रध्वंसात्प्रशस्तज्ञानाभावादुपचितमहामोहेन गहनः संकटः । तदानीं विवेकाभाव इति भावः । अनेन जडता दर्शिता ।

---

२७१. °विषयाणाम् K2. करणानाम् N. for वचनानाम्.
२७२. °पदे for पथं O.
२७४. संतापयति (च) for तापं च कुरुते Bh.

अपि च । परिच्छेदव्यक्तिर्भवति न पुरःस्थेपि विषये २७९
भवत्यभ्यस्तेपि स्मरणमतथाभावविरसम् ।
न संतापच्छेदो हिमसरसि वा चन्द्रमसि वा
मनो निष्ठाशून्यं भ्रमति च किमप्यालिखति च ॥

कल° । दिढं क्खु एसो कए वि अवहरिदो । अवि णाम मालदिज्जेव्व सा भवे । (क) २८०

(क) दृढं खल्वेष कयाप्यपहृतः । अपि नाम मालत्येव सा भवेत् ।

२७९–२७८ परिच्छेदेत्यादि । संनिकृष्टेपि घटादौ परिच्छेदव्यक्तिर्निर्णयाभिव्यक्तिर्न भवति । घटादिकमपि निर्णेतुं न शक्नोमीत्यर्थः । अनेन बाह्येन्द्रियाणां विषयव्यावृत्तिरुक्ता । अभ्यस्तेपि वारं वारमनुभूतेपि स्मरणमतथाभावेन खण्डस्फुटिततया विरसं वैरस्यवत् । एतेन मनसोपटुत्वमुक्तम् । इयमनुस्मृत्यवस्था । विषयनिवृत्त्या संतापः शीतलसेवनादपि नापैतीत्याह । हिमसरसि शीतलसरोवरे चन्द्रमस्यमृतकरकिरणे वा मनःसंतापहानिः । चन्द्रमःपदं लक्षणया स्वकिरणमाह । इयमुद्वेगावस्था यदाह ।

आसने शयने वापि न तिष्ठति न तुष्यति ।
औत्सुक्यं च भवेन्नित्यमुद्वेगस्थान एव च ॥

निष्ठाशून्यं धैर्यरहितं मनो भ्रमति च स्वल्पत्वात् । किमपि मनोरथपथमालिखत्यालिङ्गति । अनेनोन्मादावस्थोक्ता ।

२७९–२८२ अपहृतो वशीकृतः । अपिः संभावनायाम् । नाम प्राकाश्ये । स्वगतमिति ।

२७९. °मयथा for °मतथा C. D. K. 2 O.; भावि for भाव K. 1.
२७९. दृढं for दिढं Bh.; खु for क्खु Bh. K 1. K2. Or; कए विएसो O. अवहदो for अवहरिदो C. K1. K2.
२८०. मालदी A.O.; जेव A. ज्जेव Bh. O. जेव्व K1. K2. एव्व N. for ज्जेव्व; हवे for भवे N.

मक० । स्वगतम् । अहो अभिष्वङ्गः । तर्किं निषेधयामि सुहृदम् ।

अथवा । मा मूमुहत्खलु भवन्तमनन्यजन्मा
मा ते मलीमसविकारघना मतिर्भूत् ।
२८६ इत्यादि नन्विह निरर्थकमेव यस्मा-
त्कामश्च जृम्भितगुणो नवयौवनं च ॥

प्रकाशम् । अपि वयस्येन विदिते तदन्वयनामनी ।

माध० । सखे श्रूयताम् । अथ तस्याः करेणुकारोहणसमय

यत्तु भाव्यं न सर्वस्य स्वगतं तदिहोच्यते ॥

इति भरतः । अभिष्वङ्ग आसक्तिरूपो मनःपराभवः ॥ आक्रोश-शापाभिभवेष्वभिष्वङ्गपदं विदुरिति शाश्वतः ॥

२८३–२८७ मा मूमुहदिति । अनन्यजन्मा कामः खल्वत्यर्थं मा मूमुहत्स चित्तविप्लवसहितमजीजनदेवं च ते मतिर्मलीमसविकारेण कामजेन घना निबिडा मा भूदित्यादि निषेधवाक्यमिहानर्थकमेव । नन्वुपदमनन्वये । यतः कामो जृम्भितो वलयितो गुणो ज्या यस्य सः । जृम्भितगुण उपचितव्यापारो वा कामः । नवयौवनं च जृम्भितगुणम् । प्रकाशितरूपादिकमस्तीत्यर्थः । अतस्तत्पराधीनोयं न निषेद्धुं शक्य इत्यर्थः । प्रकाशमिति ।

यत्तु सर्वजनभाव्यं प्रकाशं तदिहेष्यते ॥

इति भरतः । अन्वयो वंशः ।

२८८–२९५ करेणुका हस्तिनी । अन्यतमान्या ॥ स्वार्थे तमप् ॥

---

२८१. महान् before अभिष्वङ्गः B. Bh.; अभिषङ्गः for अभिष्वङ्गः N. O.
२८५. यस्मिन् for यस्मात् C. N. O.
२८७. °नाम्नी K1.
२८८. ततः for अथ Bh. O.; करणकरेणुका Bh.

एव महतः सखीकदम्बकादन्यतमा वारयोषिद्विलम्ब्य बालबकुलकुसुमावचयक्रमेण नेदीयसी भूत्वा प्रणम्य कुसुमापीडव्याजेन मामेवमुक्तवती। महाभाग सुश्लिष्टगुणतया रमणीय एष वः सुमनसां संनिवेशः कुतूहलिनी च नो भर्तृदारिका २९०

यद्वा। एकपर्यायोयमव्युत्पन्न एवान्यतमशब्दः। वारयोषिद्गणिका। तस्या ईदृक्त्वादुपादानमिह। विलम्ब्यैकाकिनी भूत्वा। नेदीयसी निकटस्था च भूत्वा। उभयत्र पुष्पत्रोटनक्रमेणेति योज्यम्। कुसुमापीडव्याजेन पुष्पदामच्छलेन। अभ्यर्थनाभङ्गभयेन च्छलेन मामाहेति भावः। अथ च कुसुमेनापीडयति कुसुमापीडः कामः। तद्व्याजेन मां प्रणम्येत्यर्थः। महाभाग महाभाग्य॥ भागो भाग्यार्धयोरपीति विश्वः॥ सुश्लिष्टगुणतया सुलग्नसूत्रत्वेन। संनिवेशो रचनाभेदः। कुतूहलिनी पुष्पदाम्नि कौतुकवती। भर्तृदारिकेत्यनेन कन्यात्वाद्दर्शनौत्सुक्यमुक्तम्। यद्वा। भरतेन कन्याया विलम्भपात्रत्वस्वीकारादिह कन्यात्वेन तत्सूचनम्। अभिनवो लोकोत्तरो विचित्रो बहुप्रकारः। कुसुमेषु पुष्पेषु व्यापारो रचनाप्रबन्धः। एतेन माल्यग्रथनकुशलाद्भुतकौशलकुतूहलिनी सेत्युक्तम्। वैदग्ध्यस्य ग्रथनचातुर्यस्य। कृतार्थना कृतप्रयोजनता। विदग्धप्रेयसीप्रशंसयेति भावः। फलतु सफलास्तु। विदग्धजनाय दानात्। सरस एवाम्लान एव श्लक्ष्णसंनिवेशः। महार्घतां बहुमूल्यताम्। पक्षे। वो युष्माकं संनि-

---

२८९. ततः before महतः Bh.; काचिच्चत् N. ततः O. for महतः; स्त्री for सखी B. Bh. C.; कदम्बादू for कदम्बकादू B. C. O.; अन्या for अन्यतमा N.; C. K1. K2. N. om. बाल.

२९०. K1. K2. om. कुसुमावचयं° —प्रणम्य; °भावचोय° O.

२९१. अभिहितवती for उक्तवती O.; महानुभाव for महाभाग C. O.

२९२. N. om. वः सुमनसां; संनिवेशः सुमनसां O.

वर्तते । तस्यामभिनवो विचित्रःकुसुमेषुव्यापारः । तद्भवतु कृतार्थता वैदग्ध्यस्य । फलतु निर्माणरमणीयता विधातुः । समासादयतु सरस एष भर्तृदारिकायाः कण्ठावलम्बनमहार्घतामिति ।

मक० । अहो वैदग्ध्यम् ।

माध० । तया च मदनुयुक्तया समाख्यातमियममात्यभू-

वेशः संयोगः परस्परानुरूपादिना रमणीयः क्रीडार्होऽहणीय एव । इह व इति युष्मदो गुरावेकेषामिति गौरवे बहुवचनम् । कुतूहलिनी दूतसमाजे साकाङ्क्षा । अभिनवोभूतपूर्वः । त्वदेकासक्तत्वात् । विचित्रः साधुः । विविधविकारकारित्वेनाश्चर्यजनको वा । कुसुमेषोः कामस्य व्यापारो मोहनम् । वैदग्ध्यस्य सकलकलाभिज्ञतायाः सार्थकत्वम् । विदग्धप्रीतिजनकत्वात् । निर्माणरमणीयता घटनसौन्दर्यम् । फलतु । अनुरूपजनसंसर्गात् । नो चेदिदं सर्वं व्यर्थमिति भावः । सरसः शृङ्गारोनुरागो वा । कण्ठावलम्बनमालिङ्गनं महार्घता दुर्लभत्वम् । तदिह श्लिष्टपदेन नायकव्युत्पत्तिमभिप्रायं च ज्ञात्वा दूतीव्यापारः प्रसरतीति ध्वनितम् ।

२९६–९९ वैदग्ध्यं श्लिष्टपदप्रयोगादिति भावः । अनुयुक्तया

---

२९३. B. om. वर्तते ; च after वर्तते O.; तस्याः for तस्याम् B. C.

२९४. अस्य after कृतार्थता N.; B. Bh. C. insert च after फलतु; गुणनिर्माणं रमणीयतायाः B. निर्माणं रमणीयतायाः N. सरसनिर्माणरमणीयता O. for निर्माणरमणीयता; B. N, om. विधातुः अस्याः for विधातुः O.; आसादयतु for समासादयतु A. D. K1. K2.

२९५. O. om. सरस एष; एव for एष Com.; नो after एष N.; दारिकायाः A.; कण्ठालम्बन° for कण्ठावलम्बन K1. K2.; °महार्घ्यतामिति A.; अर्हति दातुं भवान् after इति O.

२९७. अभियुक्तया for अनुयुक्तया Bh. °युक्तयाख्यातं for °युक्तया समाख्यातं Bh. N. O.

रिवसोः प्रसूतिर्मालती नामाहं च प्रसादभूमिर्भर्तृदारिकाया धात्रेयिका लवङ्गिका नामेति ।

कल० । सहर्षम् । किं णाम मालदि त्ति । दिट्ठिआ विलसिदं ३००
क्खु भअवदा देवेण कुसुमाउहेण । जिदं अम्हेहिं । (क)

मक० । अमात्यभूरिवसोरात्मजेत्यपर्याप्तिर्बहुमानस्य । अपि च । मालती मालतीति मोदते भगवती कामन्दकी । स्वगतम् । तां च किल राजा नन्दनाय प्रार्थयत इति किंवदन्ती श्रूयते ।

(क) किं नाम मालतीति । दिष्ट्या विलसितं खलु भगवता देवेन कुसुमायुधेन । जितमस्माभिः ।

पृष्टया । प्रसूतिरपत्यम् । प्रसादभूमिर्विश्वासस्थानं तस्याः । तव च प्रसादभूमिरनुकम्पापात्रं मालादानात् ।

३००–३०२ अत्र विलसितं विजृम्भितम् । अनयोरन्योन्यानुरागादिति भावः । बहुमानस्य गौरवस्यापर्याप्तिरनवधिकत्वम् । अनभियोज्यत्ववरक्षणत्वादियोगादिति भावः ।

---

२९८. एकापत्यरत्नं for प्रसूतिः N.; नाम मालती for मालती नाम K2.; इति after नाम N.; भर्तृदारिकायाः प्रसादभूमिः Bh. O.

२९९. धात्रेयी for धात्रेयिका N.; Bh. om. इति.

३००. N. om. सहर्षम्; नाम for णाम O.; मालदी A.; दिठिआ K1. दिट्ठिअं N. दिट्ठिया O. for दिट्ठिआ; जिदं for विलसिदं N.

३०१. N. O. om. क्खु; K1. om. क्खु भअवदा; खु for क्खु Bh. K2.; भयवदा for भअवदा O.; देवेन for देवेण K2. O; देवेण भअवदा N.; ता before जिदं A. D. K2.; इति नृत्यति after अम्हेहिं C.

३०३. C. D. om. one मालती; हि after मोदते O.; A. B. Bh. C. D. K1. K2. O. om. स्वगतम्.

३०४. याचते for प्रार्थयत N. प्रकाशम् । ततस्ततः after श्रूयते N.

माध० । तया चाहमनुरुध्यमानस्तां बकुलमालामात्मनः कण्ठावदतार्यं दत्तवान् । असौ पुनरभिनिविष्टया दृशा मालतीमुखावलोकनविहस्ततया विषमविरचितैकभागान्तामेव बहु मन्यमाना महानयं प्रसाद इति गृहीतवती । अनन्तरं च यात्राभङ्गप्रचलितस्य महतः पौरजनस्य संकुलेन विघटितायां तस्यामागतोस्मि ।

मक० । वयस्य मालत्या अपि स्नेहदर्शनात्सुश्लिष्टमेतत् । योपि हि कपोलपाण्डुतादिचिह्नसूचितः प्राक्प्रवृद्धस्तस्याः का-

---

३०५-३०८ अनुरुध्यमानो मुहुर्याच्यमानः । असौ लवङ्गिका । अभिनिविष्टयातियत्ननिवेशितया । विहस्ततया व्याकुलतया । महानयं प्रसाद इति । यतो न वस्तुनि प्रेम किं तु गुणेष्विति भावः ।

३११-३१८ सुश्लिष्टं निश्चितम् । दृष्टपूर्वः पूर्वं दृष्टः । तादृग्यो महाकलजाः । चक्षूरागानुरागयोरेकविषयत्वं भरतमतम् । अन्यदप्य-

---

३०५. तथा for तया K1. P.; अभ्यर्थ्यमानः A. Bh. C. K1. अनुयाच्यमानः N. अनुबध्यमानः O. for अनुरुध्यमानः.

३०६. अवतार्यं for अवतार्यं N.

३०७. °विहस्ततयाविषमरचितैकभागामपि for °विहस्त—°मेव N.; °भागां तामेव for भागान्तामेव K2.

३०८. महाप्रसादः for महानयं प्रसादः B.; व्याहृत्य after इति A. Bh.; तां before गृहीतवती B.; प्रति before गृहीतवती B. C.

३०९. प्रसङ्ग for भङ्ग N. O.; चलितस्य for प्रचलितस्य O.; महा- for महत N.; पौरनैगमजनस्य K2. पौराङ्गनाजनस्य Bh. C. for पौरजनस्य; संकुलाकुलेन B. Bh. C.; संकुले N. संकुल O. for संकुलेन; विघट्टितायाम् for विघटितायाम् O.

३१०. अहम् after तस्याम् O.

३११. मालत्यामपि for मालत्या अपि K1. K2.

३१२. K1. om. अपि; N. om. हि; B. om. कपोल; A. om. चिह्न; °चिह्नः for °चिह्न Bh.; प्राक्प्रबन्धः B. Bh. N. प्राक्प्रवृत्तः K2. for प्राक्प्रवृद्धः.

माभिष्वङ्गः सोपि त्वन्निबन्धन इति व्यक्तमेतत्। एतत्तु न ज्ञायते क दृष्टपूर्वस्तया वयस्य इति। न खलु तादृश्यो महाभागधेयाः कुमार्योन्यत्रासक्तचेतसो भूत्वापरत्र चक्षूरागिण्यो भवन्ति। अपि च।

अन्योन्यसंभिन्नदृशां सखीनां तस्यास्त्वयि प्रागनुरागचिह्नम्।
कस्यापि कोपीति निवेदितं च धात्रेयिकायाश्चतुरं वचश्च॥

कल०। उपसृत्य। एदं च। (क) इति चित्रफलकं दर्शयति। उभौ पश्यतः।

मक०। कलहंसक केनैतन्माधवस्य प्रतिच्छन्दकमभिलिखितम्।

(क) इदं च।

नुरागचिह्नमाह। अन्योन्येत्यादि। त्वयि तस्याः प्रागनुरागचिह्नं व्यक्तमेवास्ति। कथम्। सखीनामन्योन्यसंगतदृशां कस्यापि कोपीति निवेदनमेकम्। कथमन्यथा सखीजनस्त्वां वीक्ष्य कटाक्षयति तां कथं वा सखीजनो वदत्येवमिति भावः। अपरं लवङ्गिकाया व्युत्पन्नं वचनम्। कथमन्यथा कुतूहलिनीत्यादि वदतीयमिति भावः॥ संगते दारिते भिन्न इति विश्वः॥

३१३. °भिषङ्गः for °भिष्वङ्गः N.; अभिव्यक्तम् for व्यक्तम् A.; एव before एतत् A. D. K1.

३१४. दृष्ट: for दृष्टपूर्वः Bh. C.; हि for खलु C.

३१५. N. om. कुमार्यः; मनसो for चेतसो A. D. K1. K2; C. om. भूत्वा; अन्यत्र for अपरत्र A. D. K1. K2; चानुरागिण्यो for चक्षूरागिण्यो O.

३१७ लिङ्गम् for चिह्नम् A. D. K1.

३१८. कोप्येष इतीहितं च for कोपीति निवेदितं च N.

३१९. इदं for एदं O.; चित्तफलअं A. C. चित्तं B. D. अ N. चित्तफलयं O. for च; Bh. K1. K2. om. इति; O. om. इति चित्रफलकम्; चित्रं for चित्रफलकं B. N.; प्रदर्शयति for दर्शयति K1. K2.

३२१. कलहंस for कलहंसक K1. K2. N.; बिम्बमभिलिखितं माधवस्य for माध० खितम् O.; माधव for माधवस्य B.; प्रतिबिम्बम् A. K1. K2. रूपम् N. for प्रतिच्छन्दकम्.

कल० । जेण जेव्व से हिअअं अवहरिदं । (क)

मक० । अपि मालत्या ।

३२५ कल० । अध इं । (ख)

माध० । वयस्य मकरन्द प्रसन्नप्रायस्ते वितर्कः ।

मक० । कलहंसक कुतोस्याधिगमः ।

कल० । मम दाव मन्दारिआहत्थादो ताए वि लवङ्गि-आसआसादो । (ग)

३३० मक० । अथ किमाह मन्दारिका माधवालिख्यप्रयोजनं मालत्याः ।

(क) येनैवास्य हृदयमपहृतम् ।

(ख) अथ किम् ।

(ग) मम तावन्मन्दारिकाहस्तात्तस्या अपि लवङ्गिकासकाशात् ।

३२३–३२७ अत्र येन जनेनापहृतं यन्निबन्धनोस्य कामविकार इति भावः । मालत्या लिखितमित्यर्थः । अथ किं स्वीकारे । वितर्क ऊहः । अधिगमः प्राप्तिः ।

---

३२३. जेण for जेण Bh.; एव्व N. ज्जेव O. for जेव्व; जेणेव्व for जेण जेव्व K2.; हिययं for हिअअं O.; अवहिदं for अवहरिदं Bh.

३२५ अथ K2. अह N. O. for अध.

३२६. तर्कः for वितर्कः B. N.

३२७. B. N. om. कलहंसक; कलहंस for कलहंसक K2.; सत्यं before कुतो B. O.

३२८. मह N. मए A. B. Bh. C. D. K1. K2. for मम; B. Bh. C. om. दाव; मन्दारिआए for मन्दारिआ A. C. D. K1. K2.; इच्छातो for हत्थादो K1.; तए for ताए Bh.; B. N. O. om. वि.

३२९. लवङ्गिआए for लवङ्गिआ° K2.

३३०. °वालेख्येन for °वालेख्य N.

कल० । उक्कण्ठाविणोदो त्ति । (ख)

मक० । वयस्य माधव सर्वथा समाश्वसिहि ।

या कौमुदी नयनयोर्भवतः सुजन्मा
तस्या भवानपि मनोरथबन्धबन्धुः । ३३९
तत्संगमं प्रति सखे न हि संशयोस्ति
यस्मिन्विधिश्च मदनश्च कृताभियोगः ॥

द्रष्टव्यस्वरूपा च भवतो विकारहेतुस्तदलमेव लिख्यतां मालती ।

माध० । यदभिरुचितं वयस्याय । तदुपनय चित्रफलकं ३४० चित्रवर्तिकाश्च । मकरन्द उपनयति ।

(ख) उत्कण्ठाविनोद इति ।

३३२-३४० उत्कण्ठाविनोद इति । माधवानुरक्ता मालती तमननुप्राप्नवती चित्रलिखितालोकनेनापि रमत इति भावः । येत्यादि । हे सखे तत्संगमं प्रति नैव संशयोस्ति । भवतो नयनयोर्या कौमुदी ज्योत्स्ना । आनन्दकारित्वात् । तस्या मनोरथबन्धुरभिलाषनिबन्धनाय प्रियः शोभनजन्मा भवानपि । ननु परस्परानुरागेपि विधिकामवैमुख्यान्न सिद्धिरत आह । यस्मिन्संगमे विधिमदनौ कृतप्रयत्नौ चक्षुष्प्रीत्या काम एतद्देशानयनाद्विधिः कृताभियोग इत्यर्थः । अभियोगाच्च कन्यालाभः । यदाह ।

३३२. उत्कण्ठा° for उक्कण्ठा° K2; बिणोअणं for विणोदो N.

३३३. N. om. माधव.

३३५. लब्ध for बन्ध noticed in marg. of O.

३३७. धृताभियोगः K1. K2. कृताभियोगौ B.

३३८. इष्टव्य for द्रष्टव्य K1.; °रूपा for °स्वरूपा Bh. K1. K2. N. O.; O. om. च; तत्रभवतो B. अत्रभवतो O. for भवतो; अभिलिख्यताम् for लिख्यताम् O.

३३९. N. om. मालती.

३४०. अभिमतं for अभिरुचितं B.; कलहंसक after वयस्याय D.; Bh. C. N. O. om. तदु°—°नयति; उपनमय for उपनय K2.

३४१. °र्तिश्च for °र्तिकाश्च B.; उपनमयति for उपनयति K2.

माध० । लिखन् । सखे मकरन्द

वारं वारं तिरयति दृशोरुद्गमं वाष्पपूर-
स्तत्संकल्पोपहितजडिम स्तम्भमभ्येति गात्रम् ।
३४५ सद्यः स्विद्यन्नयमविरतोत्कम्पलोलाङ्गुलीकः
पाणिर्लेखाविधिषु नितरां वर्तते किं करोमि ॥

अभियोगादि कन्यायां लाभो निश्चित एव च ॥

चित्रेण माधवचित्तानुरागमुद्दीपयति । द्रष्टव्येति ॥ वयस्यायेत्यत्र रुच्यर्थानां प्रीयमाण इति संप्रदानता ॥

३४३-३४६ अधुना मनःसङ्गे हर्षात्सात्त्विकभावमाह । वारं वारमित्यादि । अयं ममपाणिर्लेखाविधिषु चित्रनिर्माणेषु नितरामत्यर्थं वर्तत एव न तु लिखति । अत्र किं करोमि । यथा तथा लिखामीत्यर्थः । न तरामिति पाठे नैव वर्तत इत्यर्थः । यतो बाष्पपूरस्तदनुध्यानादानन्दाश्रुप्रवाहो वारं वारं दृशोरुद्गमं प्रत्वारं तिरयति च्छादयति । तस्याः संकल्पेन चिन्तनेनोपहितो जडिमा सर्वकार्याप्रतिपत्तिर्यस्य तत्तात्त्रं शरीरं स्तम्भे निश्चलत्वमभ्येति ।

हर्षभयरोगविस्मयविषादमददोषसंभवः स्तम्भः ॥

इति भरतः । कीदृशः । सद्यो लिखनोपक्रमकाल एव स्विद्यन्नार्द्रीभवन् । अविरतोत्कम्पेनाधिकचलनेन लोलाङ्गुली यत्र सः । अङ्गुल्या लिखनहेतुतया तद्व्यापल्यादलिखनं सूचितम् । तदिहाश्रुस्तम्भस्वेदकम्पा उक्ताः । रोमाञ्चादिकं च नोक्तम् । तेषां लिखनाप्रतिकूलत्वात् । सर्वमिदं सात्त्विकं हर्षात् । यदाह ।

---

३४२. Bh. om. माध० ।; इति विलिखन् for लिखन् Bh.
३४३. दृशावुद्गतो for दृशोरुद्गमं D. N. O.
३४४. उपनत for उपहित N.
३४५. अविरलो° for अविरतो° C. D. K1. K2.
३४६. °लिपिषु for विधिषु K1. K2.; न तरां for नितरां noticed by Com.

तथापि व्यवसितोस्मि । चिरादालिख्य दर्शयति ।

मक० । विलोक्य । उपपन्नस्तावदत्रभवतोभिष्वङ्गः । सकौतुकम् ।

कथमचिरेणैव निर्माय लिखितः श्लोकः । वाचयति । ३५०

जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।

क्रोधभयहर्षलज्जादुःखश्रमरोगतापपीडाभ्यः ।
व्यायामसाध्वसादेः स्वेदः स्यात्पीडनेनापि ॥
शीतभयहर्षरोधस्पर्शजरारोगजः कम्पः ॥ इति ।

३५१-३५४ अधुना मालती चित्रं द्रक्ष्यतीति सानुरागोपालम्भं श्लोकं लिखति । जगतीत्यादि । ते ते नवेन्दुकलादयो भावाः पदार्था जयिनो मदजनने सर्वत्राप्रतिहताः स्वभावतो मनोज्ञा अन्ये सन्त्येव ये मनो मदयन्ति । मम पुनर्न मदहेतवः प्रत्युत दाहहेतव एवेति भावः । अत्र जयिन इत्यनेन कालविशेषे देशविशेषे च जयशालिन आनन्दसंदोहदा इत्युक्तम् । भाव्यन्ते भावनामर्हन्ति सुन्दरतयेति भावाः । मालतीभिन्नाः सहृदयहृदयाह्लादकाः । ते त इति वीप्सया चन्द्रादयो देवादयश्च प्रसिद्धा एवेति दर्शितम् । सर्वनाम्ना च ये यत्र चेतःप्रतिष्ठास्ते तत्र गृह्यन्त इति ध्वनितम् । तुशब्देनान्येषां तथात्वं तत्संप्रतिपत्तिद्वारेत्युक्तम् । कस्तर्हि मदहेतुरत आह । मम पुनरियं चित्रलिखिता मालती नयनयोर्ज्योत्स्ना यन्नेत्रगोचरं प्राप्ता स एवैकोत्र जन्मनि महोत्सवः । अत्र किं पुनः संभोगादिकमित्यनुरागः । स एव महोत्सवः । अनुरागो भवतु मा वा भूदित्युपालम्भः । एतेनात्यन्तानुरागो मालत्यां दर्शितः । एकपदेनान्येषामाविर्भावेपि नानन्दकत्वम् ।

---

३४७. अवहितोस्मि for व्यवसितोस्मि N.; अभिलिख्य for आलिख्य A. D. K1. K2. O.; प्रदर्शयति for दर्शयति A. D. K1. K2.

३४८. Bh. N. om. विलोक्य ; अभिषङ्गः for अभिष्वङ्गः N.

३५०. रचितः Bh. लिखितम् N. for लिखितः ; श्लोकोपि लिखितः for लिखितः श्लोकः C. ; N. om. श्लोकः. K1. N. om. वाचयति.

मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्मन्येकः स एव महोत्सवः ॥

१५९ प्रविश्य सत्वरं मन्दारिका । कलहंसअ पआणुसारेण उवलद्धोसि । माधवमकरन्दौ विलोक्य सलज्जम् । कधं एदे वि महाणुभावा इध ज्जेव्व । उपसृत्य । पणमामि । (क)

(क) कलहंसक पदानुसारेणोपलब्धोसि । कथमेतावपि महानुभावाविहैव । प्रणमामि ।

अत एव स एवेत्यनेन तत्पोषः । जन्मनीति सामान्यनिर्देशेन समस्तजन्मनि मालतीतुल्या नास्तीति व्यज्यते । वाचिकोयं रसः । यदाह ।

रसानुरूपैरालापैः श्लोकैर्वाक्यैः पदैस्तथा ।
नानालंकारसंयुक्तैर्वाचिको रस उच्यते ॥ इति ।

इह प्रकृतिमधुरत्वेपि मालत्या एव मदजननाद्यतिरेकालंकारः । प्रियाख्यानाप्रियोलंकारः । विलोचनचन्द्रिकेति रूपकम् । न चात्र नवेन्दुकला प्रतिरूपा सा च न मदहेतुरिति वाच्यम् । यतो नूयत इति नवः । प्रशस्तेन्दुरित्यर्थः । यद्वा । नवं नूतनमिन्दुकलादिकं चेति द्वन्द्वः । यद्वा । नवः सागरादुत्थितमात्रः । पूर्ण एवेत्यर्थः ।

३५५-३५६ यत्र पटीक्षेपेण प्रवेशस्तत्र प्रविश्येत्युक्तिः । अनुसारीनुसरणम् । एते हि ये चित्रफलके लिखिताः । इह गौरवादेकत्वे बहुवचनम् । द्वित्वे वा बहुवचनम् ।

३५३. जाता for याता Bh.; मनोरथ° for विलोचन Bh.

३५५. K1. K2. om. सत्वरं; पटाक्षेपेण N. सत्वरा O. for सत्वरम्; कलहंसअ twice Bh. K1. K2. पोरअ N. कलहंसय twice O. for कलहंसअ; पाद्दा K2. पाआ° B. Bh. पदा° A. K1. N. पया° O. for पआ°; Bh. C. N. O. om. उव; उअ for उव K1. K2.

३५६. N. om. माधवमकरन्दौ; दृष्ट्वा for विलोक्य A. K1. K2.; सहर्षम् for लज्जम् N.; कहं for कधं N. O.; एते K2. ते for एदे K1. O.

३५७. महाणुभाआ K1. K2. महाभाआ N. for महाणुभावा; इह B. D. O. इद K2. एत्थ N. for इध; ज्जेव Bh. O. जेव्व A. B. C. D. एव्व N. for ज्जेव्व; N. om. उपसृत्य; प्रणमति A. K1. K2. N. प्पणमामि O. for पणमामि.

* Com. uses the Plur.

उभौ । मन्दारिके इत आस्यताम् ।

मन्दा० । उपविश्य । कलहंसअ उवणेहि मे चित्तफलअं । (क)

कल० । गृहीत्वा । गेण्ह एदं । (ख) १६०

मन्दा० । विलोक्य । कलहंसअ केण किंणिमित्तं वा एत्थ मालदी आलिहिदा । (ग)

कल० । जो ज्जेव्व जंणिमित्तं मालदीए । (घ)

मन्दा० । सहर्षम् । दिट्ठिआ दंसिदफलं दाणिं विण्णाणं पआवइणो । (ङ) १६५

(क) कलहंसक उपनय मे चित्रफलकम् ।

(ख) गृहाणैतत्* ।

(ग) कलहंसक केन किंनिमित्तं वात्र मालत्यालिखिता ।

(घ) य एव यन्निमित्तं मालत्या ।

(ङ) दिष्ट्या दर्शितफलमिदानीं विज्ञानं प्रजापतेः ।

१६३–१६७ अभिलिखित इति शेषः । तथा च मालत्या विनोदाय माधवो लिखितस्तेनापि सा तदर्थं लिखितेत्यर्थः । अत्र विज्ञानं शिल्पिकौशलम् । अनुरूपानुरागादनयोरिति भावः । अवितथं सत्यम् ।

---

१५८. मक्° for उभौ B. N.; इह for इत A. D. K1. K2.

१५९. कलहंसक Bh. कलहंस twice K1. K2. कलहंस N. कलहंसय O. for कलहंसअ; उवणेहि for उवणेहि K2.; मं for मे K2.; O. om. मे; फलहअं Bh. फलयं O.

१६०. C. om. एदं; इमं for एदं N. O.; चित्त after एदं B.

१६१. गृहीत्वा before विलोक्य N.; निरूप्य for विलोक्य O.; N. om. कलहंसअ; कलहंसक for कलहंसअ O.; after केण A. D. K1. K2. add उण; कस्स for किं B.; किंनिमित्तं K2.; B. Bh. C. om. वा.

१६२. अहिलिहिदा D. N. लिहिदा O. for आलिहिदा.

१६३. K2. om. कल°। जो—°दीए; ज्जेव for ज्जेव्व.; B. Bh. D. K2. om. ज्जेव; जेण णिमित्तेण for जं णिमित्तं B. Bh. D. K2.

१६४. स्वगतम् after सहर्षम् O.; दिट्ठिआ K2. दिट्ठिअं N. दिट्ठिया O.; दंसिदं अत्तणो सफलं for दंसिदफलं दाणिं N.; णिअ before विण्णाणं B. Bh.; प्पया° for पआ° O.

१६५. पआवइणा for पआवइणो B. N.

* °वेदं चित्रफलकम् Com.

मक०। मन्दारिके यदत्र वस्तुन्येष ते वल्लभः कथयत्यापि तथा तत्।

मन्दा०। महाभाअ अध इं। (क)

मक०। क्व पुनर्मालती माधवं प्राग्दृष्टवती।

३७० मन्दा०। लवङ्गिआ भणादि वादाअणगदत्ति। (ख)

मक०। वयस्य नन्वमात्यभवनासन्नरथ्ययैव बहुशः संचरावहे तदुपपन्नमेतत्।

मन्दा०। अणमण्णन्तु मं महाणुभाआ जाव एदं भअवदो देवस्स मअणस्स सुचरिदं पिअसहीए लवङ्गिआए णिवेदेमि। (ग)

(क) महाभाग अथ किम्।

(ख) लवङ्गिका भणति वातायनगतेति।

(ग) अनुमन्येतां मां महानुभावौ* यावदेतद्भगवतो देवस्य मदनस्य सुचरितं प्रियसख्या लवङ्गिकाया निवेदयामि।

---

३६८ एवमेतन्मालत्यैव माधवप्रतिच्छन्दकं लिखितमित्यर्थः।

३७० दृष्टवतीत्यर्थः।

३७४–३७८ लवङ्गिकया द्वारा माधवानुरागो मालत्यामस्त्वि-

---

३६६. सखि before मन्दारिके Bh. N.; अवितथं for अपि तथा D. Com.

३६७. तत्तथा for तथा तत् O.

३६८. महाभाय for महाभाअ O.; तह तह N. तधा O. for महा—इं.

३६९. K2. om. प्राग्.

३७० फणादि for भणादि N.; यदा K2. जधा O. before. वादा°; वादाअणं N. वादायण O. for वादाअण°; °गतत्ति K2. °गदेत्ति N. for °गदत्ति.

३७१. N. om. नन्; B. om. बहुशः.

३७२. एव before एतत् N.

३७३. °मण्णादु for °मण्णन्तु N. माहाभाआ B. महाणुभावो N. महाणुभाया O. for महाणुभाआ; एअं for एदं A. D. K1.; N. O. om. एदं; भयवदो for भअवदो O.

३७४. देअस्स D. K1. देव्वस्स A. for देवस्स; मयणस्स for मअणस्स O.; B. Bh. C. om. सु; सुचरिअं K2. आचरिदं N. for सुचरिदं; पिअसखीए K2. भयवदीए O. for पिअसहीए; लवङ्गी° K1.

* Com. uses the Plur.

मक० । प्राप्तावसरमेतद्भवत्याः । मन्दारिका चित्रफलकं गृही- १७५
त्वा निष्क्रान्ता ।

मक० । वयस्य खरतरकिरणोयं भगवान्सहस्रदीधितिरलं-करोति मध्यमह्नस्तदेहि संस्त्यायमेत्र गच्छावः । उत्थाय परि-क्रामतः ।

माध० । एवं हि मन्ये । १८०

घर्माम्भोविसरविवर्तनैरिदानीं
मुग्धाक्ष्याः परिजनवारसुन्दरीणाम् ।

त्यर्थः संस्त्यायो गृहम् ॥ संस्त्यायः संनिवेशे च संघातेपि च दृश्यत इति मेदिनीकरः ॥

३८१-३८४ घर्मेत्यादि । मालत्याः परिजनवारसुन्दरीणां कपो-लकुङ्कुमानि प्रातर्वीरचितविचित्रपत्रावलीवैदग्ध्यं यत्तदधुना मध्याह्ने जहति त्यजन्ति । कैः । घर्माम्भसो विसरस्य समूहस्य विवर्तनैर्विविध-जलकणैः करणैः । अनेन नायिकायाः सुकुमारतया निःसहत्वमुक्तम् । मालत्याः कन्यात्वेन पत्रावल्यभावात्परिजनेत्युक्तम् । माङ्गल्यतया प्रातरेव कुङ्कुमेन पत्रावलीलिखनम् । अत एव वसन्तकालस्य शीतत्वा-त्कुङ्कुमेन भूषाकरणमिति मतमपास्तम् । धारासिक्तवसुंधरासुरभय

---

१७५. चित्रं B. चित्रभाण्डं D. K1. K2. for चित्रफलकं.

१७६. उत्थाय before निष्क्रान्ता C. O.; निर्गता for निष्क्रान्ता K2.

१७७. K1. om. वयस्य; मध्याह्नो वर्तते for खरतर—मह्नः N. O.; खर° for खर-तर° B. Bh.; K1. K2. om. अयं.

१७८. संस्त्यायनम् B. Bh. संस्त्ययम् O. for संस्त्यायम्; प्रविशावः for गच्छावः N. O.; इति before उत्थाय A. C. D. K1.

१७९. °क्रामन्ति for °क्रामतः O.

१८०. K1. om. हि.

१८२. परिसर° for परिजन° K1.; °सुन्दरीभिः C. K1. K2. O.

तत्पार्तविहितविचित्रपत्रलेखा-
वैदग्ध्यं जहति कपोलकुङ्कुमानि ॥

१८५ अपि च । उन्मीलन्मुकुलकरालकुन्दकोश-
प्रच्योतद्वनमकरन्दगन्धबन्धो ।
तामीषत्प्रचलविलोचनां नताङ्गी-
मालिङ्गन्पवन मम स्पृशाङ्गमङ्गम् ॥

इत्यभिधानाद्वर्षाकालप्रस्तावात् ॥ समूहनिवहव्यूहसंदोहविसरव्रजा इत्यमरः॥ इहोन्मादावस्था । अत एवात्र तत्संबद्धा कथा । यदाह ।

तत्संबद्धां कथां युङ्क्ते सर्वावस्थागतामिह । इति ।

३८५-३८८ उन्मीलदिति । हे पवन । उन्मीलन्मुकुलेन विकच-कोरकेण करालाद्विषमात्कुन्दगुच्छात्क्षरन्निबिडमकरन्दश्च गन्धश्च तयोर्बन्धो । मकरन्दस्य यो गन्धस्तद्बन्धो तत्सहचरेति वा । ईदृशोपि त्वं मे न सुखाय किं तु तापायातस्तां मालतीमीषदालिङ्गन्ममाङ्गमङ्गं प्रत्यङ्गं स्पृश । अमृतमयतदङ्गसङ्गशीतस्त्वं मम तापशान्तये भविष्यसीति भावः । यद्वा । तदीयतापशान्तिर्भवत्वित्यनुरागात्तामालिङ्गन्नित्युक्तम् । तां कीदृशीम् । प्रचलनेत्राम् । विरहे पवनस्य दुःसहत्वेन भयादितस्ततः क्षिप्तनेत्राम् । अत एव नम्रीभवदङ्गां च । इह विषमकुन्दकोशसंचरणेन गतिप्रतिबन्धान्मान्द्यं मकरन्दसङ्गाच्छैत्यं गन्धबन्धुतया सौगन्ध्यं च वायोरुक्तम् । [ईषदालिङ्गन्नित्यनेन सुरभिपदेनाभिघातनिःसहत्वं मालत्यामुक्तम्]॥ करालो दन्तुरे तुङ्ग इत्यमरः॥

---

१८३. °रेखा for °लेखा N.
१८४. °कुण्डलानि for कुङ्कुमानि C.
१८५. °कोषात् Bh. °गुच्छ° K2. for °कोश°.
१८६. प्रच्योतद् K1. K2. N. प्रक्षोतद् Bh. O. for प्रच्योतद् ; °वन for घन K1.
१८७. °लोलित for °प्रचल B ; °प्रचलितलोचनाम् O.

मक०। स्वगतम्।

अभिहन्ति हन्त कथमेष माधवं
सुकुमारकायमनवग्रहः स्मरः।
अचिरेण वैकृतविवर्तदारुणः
कलभं कठोर इव कूटपाकलः॥

तदत्र भगवती कामन्दकी नः शरणम्।

३८९–३९४ माधवस्यानङ्गदुःसहत्वमाह। अभिहन्तीत्यादि। एष स्मरोनवग्रहः प्रतिरोधशून्यः कोमलकायं माधवं कथमचिरेणैवाभिहन्ति। हन्तानुकम्पायाम्॥ हन्त हर्षेनुकम्पायामित्यमरः॥ कीदृशः। विकृतस्य भावो वैकृतं तस्य विवर्तोन्यथावस्थानं तेन दारुणो दुःखदः। यथा कलभं करिबालकं मृदुकायं कठोरो दुःसहः कूटपाकलो हस्तिवातज्वरोचिरेण हन्ति तथेत्यर्थः। सोप्यनवग्रहोप्रतिकरणीयो विकृतिविवर्तदारुणश्च भवति।

गजं वातज्वरो हन्ति तथा वै कूटपाकलः॥

इति वैद्यकम्। इदं स्वगतम्। स्वयमनध्यवसायादाह तदत्रेति। अत एव भगवती ज्ञानसंपन्नेह शरणं रक्षिका। द्वितीयाङ्कावतारोयम्। यदाह।

अङ्कावसाने यत्रैव भाविनोङ्कस्य सूच्यते।
वस्तुबीजमुपोद्घातैः सोङ्कावतार इष्यते॥

---

३८९. K1. om. मक०; all but C. N. om. स्वगतम्.
३९३. विवर्ण for विवर्त B.
३९४. पालकः for पाकलः B. C.
३९४. तदत्रभवती Bh. K2. O. तत्रभवती N. for तदत्र भगवती.

३९५ माध० । स्वगतम् । आश्चर्यम् ।

पश्यामि तामित इतः पुरतश्च पश्चा-
दन्तर्बहिः परित एव विवर्तमानाम् ।
उद्बुद्धमुग्धकनकाब्जनिभं वहन्ती-
मासक्ततिर्यगपवर्तितदृष्टि वक्त्रम् ॥

३९५-३९९ इदानीमुन्मादावस्थोद्भावनाबलात्तन्मयत्वमाह । पश्यामीत्यादि । तामेकामेव विवर्तमानां प्रपञ्चरूपां परितः सर्वत्र पश्यामीत्याश्चर्यम् । विवर्तमानत्वमेवाह । इत इत उभयपार्श्वे । पुरतोमे । पश्चात्पृष्ठे । अन्तर्मनसि । बहिस्त्वग्भागे । अनेन तदावेशात्तत्सर्वत्र तन्मयत्वमुक्तम् । यदाह ।

यो येन भावेनाविष्टः सुखदेनेतरेण वा ।
स तदाहितसंस्कारः सर्वं पश्यति तन्मयम् ॥

परित इत्यत्र पर्यभिभ्यां चेति तसिः ॥ कीदृशीम् । वक्त्रं वहन्तीम् । उद्बुद्धं विकसितं मुग्धं कान्तं यत्सुवर्णपद्मं ततो निरतिशया भा दीप्तिर्यस्य तत् । तन्निभं तत्तुल्यमिति वा । एतेन गौरीत्वमुक्तम् । आसक्तेन मय्यासक्त्या तिर्यगपवर्तिता दृष्टिर्यस्य तत् । यथा यान्त्या तयाहं दृष्टस्तथैव तां पश्यामीति भावः ।

---

३९५. आत्मगतम् for स्वगतम् N.; N. om. आश्चर्यम्.

३९६. इतश्च परश्च B. इतश्च पुरश्च K2. N. for इतः पुरतश्च; पारितश्च for पुरतश्च O.

३९७. बहिश्च परितश्च for बहिः परित एव B.; पुरत for पारित O.; च वर्तमानाम् for विवर्तमानाम् Bh. C. N.

३९८. वहन्तम् for वहन्तीम् K1.

३९९. °मासङ्ग° N. °मासक्ति O. for °मासक्त°; °वर्जित for °वर्तित B.

प्रकाशम् । वयस्य मम हि संप्रति ४००

प्रसरति परिमाथी कोप्ययं देहदाह-
स्तिरयति करणानां ग्राहकत्वं प्रमोहः ।

४००–४०६ अधुना सर्वाकारेण पीडामाह । प्रसरतीत्यादि । मां पश्य संप्रति मम कोप्यनिर्वचनीयस्वरूपो देहदाहः प्रसरति व्याप्नोति । अत एव परिमाथी सर्वतो मथनशीलः । करणानामिन्द्रियाणां ग्राहकत्वं मे प्रमोहस्तिरयति पिदधाति । सर्वेन्द्रियसंमोहो ममेत्यर्थः । मम गात्रं शरीरम् ॥ कर्तृ ॥ रणरणकस्य वियोगतरोर्वृद्धिमुपचयं बिभ्रदावर्ति भ्राम्यदस्ति । यद्वा । रणरणकः कामस्तस्य विवृद्धिमधिकाधिकदशागामित्वम् ॥ मारो रणरणः कामो विषय इत्युत्पलिनी ॥ तथा मम हृदयम् ॥ कर्तृ ॥ अन्तर्दहति ज्वलतीत्यर्थः । तन्मयत्वं मालतीमयत्वं च धत्ते । ईदृशी मम दशा सद्य एव विपत्तिमादधाति । तदत्र यथावत्त्वमाचरेति भावः । अत्रावर्तीति व्याधिः । ज्वलतीत्युद्वेगः । तन्मयत्वमित्युन्मादः । हृदयस्य तु तन्मयत्वधारणेन दुःसहदशायामपि जीवनाशा दर्शिता ॥ करणं क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः ॥ निष्क्रान्ता इति । वीजार्थं युक्तं कृत्वा निष्क्रमो भवति । यदाह ।

वीजार्थं युक्तियुक्तं च कृत्वा कार्यं यथारसम् ।
निष्क्रमं तत्र कुर्वीत सर्वेषां रङ्गवर्तिनाम् ॥ इति ।

वकुलवीथीति ।

नानारससमायुक्ता संधिद्वयविभूषिता ।
अर्थप्रकृतिभिः पूर्णा स्यादेकाङ्का तु वीथिका ॥

---

४०१. प्रमोद for प्रमोहः B.

रणरणकविवृद्धिं बिभ्रदावर्तमानं
ज्वलति हृदयमन्तस्तन्मयत्वं च धत्ते ॥

४०९ इति निष्क्रान्ताः सर्वे ।

॥ इति बकुलवीथी नाम प्रथमोङ्कः ॥

त्रिभिः पात्रैः प्रयोज्येयमुत्तमाधममध्यमैः ।
कर्तव्या नायिका चात्र शृङ्गारहृदयंयुता ॥

इति भरतः ॥

प्रासूत यं रत्नधरो गुणाढ्यो गुणाढ्यरूपा दमयन्तिका च।
जगद्धरं तत्कृतटिप्पणेङ्को गतोयमार्थो रसराजराजी ॥

॥ इति प्रथमोङ्कः ॥

---

४०३. आवर्ति गाढं for आवर्तमानं A. D. K2. and Com.

४०४. ज्वलित for ज्वलति Bh.

४०९. B. O. om. इति-नाम ; Bh. C. K1. K2. om. इति ; मालतीमाधवे before बकुल Bh. C. ; श्रीमन्मालतीमाधवीयनाम्नि नाटके for बकु°—नाम N. ; वेथी for °वीथी K2.

द्वितीयोऽङ्कः ।

ततः प्रविशतश्चेटचौ ।

प्रथमा । हला संगीदसालापरिसरे अवलोइदादुदीआ तुमं किं मन्तअन्ती आसी । (क)

(क) हला संगीतशालापरिसरेवलोकितादुतीया त्वं किं मन्त्रयन्त्यासीः ।

अधुना बकुलमालामादाय लवङ्किका गता तां प्रतीक्षमाणा मालती सौधारूढा तन्मार्गं पश्यति मकरन्दश्च कामन्दकी नः शरणमित्युक्त्वा तां प्रति तत्कथनाय गत इति स्थिते चेटचोः प्रवेशः । चेटीभाषा सौरसेनी । यदाह ।

नायिकायां च चेटयां च सौरसेनी प्रयुज्यते ।

न च नाटकप्रकरणयोरङ्काः कार्याः प्रत्यक्षनायका इति भरतादिह माधवप्रवेशाभावात्कथमङ्कावतार इति देश्यम् । मालत्या नायकत्वेन तत्सत्त्वात् । यदाह ।

गुरुः पुरोहितोमात्यो नायको नायिकापि च ।
सार्थवाह इति प्रोक्ताः षडेते नायका बुधैः ॥ इति ।

२–१३ अत्र हला सखि । परिसरे निकटे । अत्र वृत्तान्तो वार्त्ता ।

१. च after प्रविशतः K1.

२. एका for प्रथमा Bh. K1. K2. N. O.; सहि for हला D. K1. N.; संगीअ K1. K2. संगीदअ Bh. संगीत O. for संगीद; शाला for साला O.; °लोइआ K1. °लोयिता O. °लोकिआ K2. for °लोइदा; °दुदिआ Bh. °दुदीया O. for °दुदीआ; किं तुमं K1. भवअदी किं वि N. for तुमं किं; K2. om. तुमं.

३. किंपि for किं K2. आसि for आसी A. Bh. K1. K2. N.

द्वितीया । सहि तेण किल माहवपिअवअस्सेण मअरन्देण सअलो जेव्व मअणुज्जाणवुत्तन्तो भअवदीए णिवेदिदो । (क)

प्रथ० । तदो किं । (ख)

द्वितीय० । तदो भट्टिदारिअं दट्ठुकामाए भअवदीए पउत्तिणिमित्तं अवलोइदा अणुप्पेसिदा । मए वि ताए कधिदं जधा लवङ्गिआदुदीआ विविक्ते भट्टिदारिआ वट्टदि त्ति । (ग)

(क) सखि तेन किल माधवप्रियवयस्येन मकरन्देन सकल एव मदनोद्यानवृत्तान्तो भगवत्यै निवेदितः ।

(ख) ततः किम् ।

(ग) ततो भर्तृदारिकां द्रष्टुकामया भगवत्या प्रवृत्तिनिमित्तमवलोकितानुप्रेषिता । मयापि तस्यै कथितं लवङ्गिकाद्वितीया विविक्ते भर्तृदारिका वर्तत इति ।

भर्तृदारिका मालती । प्रवृत्तिर्वार्त्ता । विविक्तं विजनम् । इह मकरन्दाज्ञातमाधवावस्थया कामन्दक्या प्रकृतसिद्धयेवसरज्ञानार्थं मालतीवार्त्तां ज्ञातुं प्रहितावलोकितेति भावः । अत्र केसरो बकुलः । अव-

---

४. हि for किल N.; °पिअ A. °पिय O. for °पिअ; मयरन्देण for मअरन्देव O.

५. सयलो for सअलो O.; N. O. om. जेव्व; ज्जेव्व A. Bh. C. N. जेव D. जेव K1. जेअ K2. for जेव्व ; मअरंदु° Bh. मयणु° Q. for मअणु° ; °णुज्जाणा C. ; वुत्तन्तो A. वुत्तान्तो K2. for वुत्तन्तो.

६. N. om. प्रथ°—किं. K1. K2. om. प्रथ° । ··· द्वितीय° । (l. 7).

७. भट्ट° for भट्टि° Bh. O.; °दारिआअं K2. °दारियं O. for °दारिअं ; दिट्ठा K1. दिट्ठु K2. for दट्ठु°; N. om. भअवदीए ; भयवदीए for भअवदीए O.; प्पउ° for पउ° A. D. O.

८. णु for अणु° Bh. ; प्पेसिदा O. अणुप्पेसिता K2. for अणुप्पेसिदा ; पि for वि K1.; ताव for ताए N.; कहिदं for कधिदं K1. K2. N. O.; जहा B. O. जह N. for जधा.

९. दुदिआ Bh. दुदीया O. for दुदीआ ; N. om. विविक्ते ; भट्ट° for भट्टि Bh. O.; दारिआसिदं before वट्टदि N. ; ति for त्ति K2. ; K1. O. om. त्ति.

प्रथ० । हला लवङ्किआ क्खु केसरकुसुमाइं अवचिणोमि १०
त्ति मअणुज्जाणादो जेव्व णागदा ता किं संपदं संपत्ता । (क)

हिती० । अध इं । तं क्खु परावट्टन्तीं जेव्व हत्थे गेह्णिअ
पडिसिद्धपरिअणा भट्टिदारिआ उअरिअलिन्दअं समारूढा । (ख)

प्रथ० । णूणं तस्स महाणुभावस्स संकधाए अत्ताणं विणो- १९
देदि । (ग)

(क) हला लवङ्किका खलु केसरकुसुमान्यवचिनोमीति मदनो-द्यानादेव नागता* तत्किं सांप्रतं संप्राप्ता ।

(ख) अथ किम् । तां खलु परा†वर्तमानामेव हस्ते गृहीत्वा प्रतिषिद्धपरिजना भर्तृदारिकोपर्यलिन्दकं समारूढा ।

(ग) नूनं तस्य महानुभावस्य संकथयात्मानं विनोदयति ।

चिनोमि त्रोटयामि । इति हेतौ । अत्र परापतन्ती सत्वरमागच्छन्ती ।

---

१०. N. om. प्रथ°—समारूढा (l. 13); सहि for हला B. Bh. K1. K2. O; खु for क्खु K1. K2. O.; °माइ for माइं O.; °चिणेमि for °चिणोमि O.

११. मयणु° O. मअनो° K1. मअणो° K2. for मअणु°; °ज्जाणओ O. °ज्जाणं गदा K1. K2. for °ज्जाणादो; B. K1. K2. om. जेव्व; जेव्व O. ज्जेव C. D. N. for जेव्व; अणागदा for णागदा B.; संप्पदं for संपदं O; संप्पत्ता for संपत्ता O.

१२. ता for तं C.; खु for क्खु Bh. K1. K2. O.; °क्खंती O. °वुत्ति° Bh. °वईति (पतन्तीम् in छाया) K2. °वट्टन्ति K1. for °वट्टन्तीं; ज्जेव्व B. N. य्येव्व K1. ज्जेव Bh. C. O. for ज्जेव; घेत्तूण O. गेन्हिअ K1. for गेण्हिअ.

१३. सिद्धि for सिद्ध Bh.; पडि° for परि° O.; °यणा for °अणा O.; Bh. om. भट्टिदारिआ; भट्ट for भट्टि C. D. K2. O.; दारिया for दारिआ O.; उवरि for उअरि Bh. K1, K2. O.; °न्दए B. °न्दहं K2. °न्दयं O. for °न्दअं.

१४. णं K1. नूणं for णूणं O.; महानु° for महाणु° K1. °भावस्स B. D. °हावस्स N. for भावस्स; संगम for सं N.; °कहाए N. °कधाये K1. K2. for °कधाए; अत्ताणअं for अत्ताणं Bh.

१५. °देइ B. °पदि O. for °देदि.

* नायाता Com. † परापतन्तीम् Com.

द्विती० । निःश्वस्य । कुदो से आसासो । एदिणा अज्ज सविसेसदंसणेण अदिभूमिं क्खु ताए अहिणिवेसो गमिस्सदि । अण्णं च । णन्दणस्स कारणादो महाराओ भट्टिदारिअं पत्थअन्तो अमच्चेण विण्णत्तो । (क)

२० प्रथ० । किं त्ति । (ख)

(क) कुतस्तस्या आश्वासः । एतेनाद्य सविशेषदर्शनेनातिभूमिं खलु तस्या अभिनिवेशो गमिष्यति । *अन्यच्च । नन्दनस्य† कारणान्महाराजो भर्तृदारिकां प्रार्थयमानोमात्येन विज्ञप्तः ।

(ख) किमिति ।

कृतकार्यत्वेन सत्वरमागमनं भूतधर्मः । उपर्यलिन्दकं बाह्यप्रदेशालाया उपरीत्यर्थः ।

१७-२० अत्रातिभूमिमुत्कर्षम् । अभिनिवेश आसक्तिः । कल्यः प्रातः । कल्लीति पाठे कल्लिशब्दो देशी पूर्वदिनवाचकः । अत एव कल्लि पल्लीनिवासिन इति । किं विज्ञप्तमित्यर्थः ।

२१-२७ इदमभूताहरणं वाक्यम् । यदाह ।

अभूताहरणं तस्याद्यशक्यं कपटाश्रयम् ॥

---

१६. निश्वस्य for निःश्वस्य K1. ; N. om. निःश्वस्य ; खु before से N. ; आसासो for आसासो A. ; B. Bh. om. स.

१७. खु for क्खु Bh. K1. K2. O. ; गदो before ताए K1. K2. ; हिणिवेसो for अहिणिवेसो K1. ; भविस्सदि for गमिस्सदि K1. K2. ; त्ति after °स्सदि B. Bh. C. K2. O.

१८. अणक्कंच कल्यमेव C. कल्यमेव K1. कल्यमेव K2. कलं च (margin अण्णं च) O. for अण्णं च ; अ for च N. ; णं before णन्द° Bh. ; कालणादो for कारणादो N. ; °राआ for °राओ A. ; भट्ट for भट्टि B. Bh. K1. O. ; दारिआं K1. K2. N. दारियं O. for दारिअं ; पत्थयन्तो K2. प्पत्थयन्तो O. पअच्छत्थन्तो A. °पत्थंतो C. अभ्यर्थतो D. पत्थयन्तो K1. for पत्थअन्तो.

१९. विणत्तो for विण्णत्तो Bh.

२०. किन्ति Bh. K2. किन्ति K1. for किंत्ति ; ति for त्ति O.

* Com. om. अन्यच्च and has कल्यमेव. † कारणेन Com.

द्विती० । पहूवदि णिअस्स कण्णआजणस्स महाराओ त्ति । ता जादो आमरणं क्खु मालदीए हिअअसल्लं माहवाणुराओ त्ति तक्केमि । (क)

प्रथ० । अवि णाम भअवदी किं पि भअवदित्तणं एत्थ दंस-
इस्सदि । (ख) २९

द्विती० । अइ असंबद्धमणोरहे एहि । (ग)

इति परिक्रम्य निष्क्रान्ते । प्रवेशकः ।

(क) *प्रभवति निजस्य कन्यकाजनस्य महाराज इति । †तज्जात आमरणं ‡खलु मालत्या §हृदयशल्यं माधवानुराग इति तर्कयामि ।

(ख) अपि नाम भगवती किमपि भगवत्तीत्वमत्र दर्शयिष्यति ।

(ग) अयि असंबद्धमनोरथे एहि ।

वाक्यतत्त्वमज्ञात्वाह [तज्जात इत्यादि] । अत्र दुःखदत्वेन शल्य-मिव शल्यम् । अजहल्लिङ्गम् । अत्रापि नाम संभावनायाम् । भगव-तीत्वं ज्ञानादिवैभवम् । निष्क्रान्ते चेटचौ । प्रवेशक इति वक्तव्य-स्य च बहुत्वाद्रसभङ्गप्रसङ्गेनान्योक्त्या प्रवेशकः । यदाह ।

---

२१. जं before पहवदि D. O.; प्पहवदि for पहवदि O.; णियस्स for णिअस्स O.; महाभाओ B. महाराणेओ C. for महाराओ; तदो for ता D. N. O.

२२. जादं A. O. for जादो; D. om. जादो; खु for क्खु Bh. K1. K2. N. O.; B. N. om. क्खु; क्खु सलं मालदीए भविस्सदि माह° for क्खु माह° D.; ताए before माल° N.; C. K1. om. हिअअ; हिअए for हिअअ K2. O.; °राउ for °राओ Bh.

२४. भयवदी for भअवदी° O.; वि किपि ए for किं पि K2.; वि for पि N.; भगव-दित्तणं Bh. भअवदीत्तणं A. for भअवदित्तणं; एत्थ भयवदित्तणं° O. एत्थ भवदित्तणं K1. for भ°—त्थ; K2. om. एत्थ; दंसेदि for दंसइस्सदि N.

२५. °यिस्सदि for °इस्सदि K2.; त्ति after °स्सदि D.

२६. K2. om. the Prakrit अइ—एहि and gives its छाया only with गच्छाव: after एहि; अयि for अइ K1. O.; C. om. एहि; गच्छम्ह after एहि A. D. K1.

२७. K1. K2. N. om. परिक्रम्य.

* यत्प्रभ° Com. † ततो Com. ‡ Com. om. खलु. § हृदये शल्यम् Com.

ततः प्रविशत्युपविष्टा सोत्कण्ठा मालती लवङ्गिका च ।

मालती । हुं सहि, तदो तदो (क)

लवङ्गिका । तदो तेण महाणुभावेण उवणीदा मे इअं बउलमाला । (ख) इति मालामर्पयति ।

(क) हुं सखि ततस्ततः ।

(ख) ततस्तेन महानुभावेनोपनीता म इयं बकुलमाला ।

यत्तु प्रयोगबाहुल्यादङ्कैर्थो न समाप्यते ।
बहुवृत्तान्तोत्पकथैः स विधेयः प्रवेशकैः ॥
अङ्कानामन्तरालेषु संक्षिप्तार्थप्रयोजनैः ।
भृत्यवर्गे कथाबद्धो विज्ञेयोयं प्रवेशकः ॥

२९–३५ हुं प्रभे । लवङ्गिकाकथितबकुलमालाप्रार्थनापर्यन्तश्रुतवार्तया मालत्याभिमवार्ताकर्णनोत्कया पृच्छ्यत इत्यर्थः । विरहोत्कण्ठितेयम् । यदाह ।

अनेककार्यसंयुक्तो यस्या नागच्छति प्रियः ।
तदनागमदुःखार्ता विरहोत्कण्ठिता तु सा ॥

प्रियकथापरत्वे मोट्टायितभावोयम् । यदाह ।

श्रुत्वा कथां प्रियजनस्य सखीमुखेभ्यः
कर्णोदरस्थितचलत्तनुतर्जनीकम् ।
यत्साङ्गभङ्गमिह जृम्भितमङ्गनानां
मोट्टायितं तदुदितं कविभिः पुराणैः ॥

२८. N. O. om. उपविष्टा.

२९. K1. K2. om. मालती; Bh. C. N. O. om. हुं; N. om. सहि; C. om. one तदो.

३०. सहि केण for तदो तेण N.; °भाएण A. °हाएण B. °हावेण N. for °भावेण; °णीता for °णीदा K2.; N. om. मे; B. O. om. इअं; इयं K1. एसा Bh. C. for इअं; बउ° Bh. बहु° K1. K2. for बउ°.

३१. B. Bh. C. K1. N. O. om. इति मालाम्; K2. om. मालाम्; समर्पयति for अर्पयति K2. O.

* Lavaṅgikā is Mālatī's dhātrī and not sakhī

माल० । गृहीत्वा सहर्षं निर्वर्ण्य । सहि एक्कपासविसमपडिबद्धा क्खु एसा विरअणा । (क)

लव० । एत्थ दाव अरमणीअत्तणे तुमं जेव्व अवरज्झसि । (ख)

माल० । कधं विअ । (ग)

लव० । जेण सो मुद्धदुव्वासामलङ्गो तधा विहत्थीकिदो । (घ)

(क) सखि एकपार्श्वविषमप्रतिबद्धा खल्वेषा विरचना ।

(ख) *अत्र तावदरमणीयत्वे त्वमेवापराध्यसि ।

(ग) कथमिव ।

(घ) येन स †मुग्धदूर्वाश्यामलाङ्गस्तथा विहस्तीकृतः ।

प्रतिबद्धा घटिता । मालती माधवचेष्टाकर्णनाकाङ्क्षयाजानतीवाह । कथमिव । कथं ममापराध इत्यर्थः । अत्र दूर्वेत्यादिना शृङ्गारित्वे तात्पर्यमुक्तम् । तथानिर्वचनीयप्रकारेण । विहस्तो व्याकुलः ।

---

३२. कुदो after सहि N.; एक्क° for एक्क° K1. K2. O.; फास A. वास B. Bh. पास्स K1. K2. for पास; विसमं for विसम N.; प्पडिबंधा O. वडिबद्धा K2. for पडिबद्धा.

३३. Bh. N. om. क्खु; खु K1. K2. ख्खु O. for क्खु. इअं for एसा A. Com. N.; विरयणा for विरअणा O.

३४. सहि before एत्थ Bh.; K1. K2. N. om. दाव; दाणिं for दाव O.; एदाए before अरम° K1. K2.; रमणीयत्तणे K2. रमणिज्जयंदे O. for अरमणीअत्तणे; O. om. तुमं जेव्व; ज्जेव्व C. D. K1. K2. ज्जेव A. एव्व N. for जेव्व, °रज्झसि K1. K2. N. रज्झादि° O. for °रज्झसि.

३५. कधं Bh. कहं B. K1. K2. N. O. for कधं; विय for विअ O.

३६. N. om. मुद्ध, मुद्धा K1. सुद्ध for मुद्ध O.; B. K2. O. om. दुव्वा, उच्छा for दुव्वा K1.; तहा B. K1. K2. तदा D. तह N. तथा O. for तधा; विहत्थ° for विहत्थी° K1.; कदो for किदो Bh. K1. K2.

* Com. adds सखि. † Com. om. मुग्ध.

माल० । पिअसहि लवङ्गिए सव्वधा आसासणसीलासि । (क)
लव० । सहि का एत्थ आसासणसीलदा । णं भणामि सो वि
पिअसहीए मन्दमारुदुव्वेल्लन्तप्पफुल्लपुण्डरीअविब्भमेहिं पढ-
४० मारद्धवउलावलीविरअणावदेससंजमिदबलामोडिअवित्थरन्तेहिं

(क) प्रियसखि लवङ्गिके *सर्वथाश्वासनशीलासि† ।

(ख) सखि कात्राश्वासनशीलता। ननु भणामि सोपि प्रियसख्या मन्दमारुतोद्वेल्लत्प्रफुल्लपुण्डरीकविभ्रमाभ्यां प्रथमारब्धबकुलावलीविरचनापदेशसंयमितबलात्कारविस्तृताभ्यां ‡लोचनाभ्यां विजृम्भमाणवि-

३८–४३ अत्र स त्वयापि विलोचनाभ्यां पश्यन्प्रत्यक्षीकृतो दृष्ट एवेत्यन्वयः । अपिर्भिन्नक्रमः । उद्वेल्लत्कम्पमानम् । विभ्रमो विशिष्टा भ्रान्तिः सोयमित्याकारा । सादृश्यं वा विभ्रमः । माधवस्य पुण्डरीकाक्षत्वात् । विरचनापदेशेन घटनव्याजेन यः संयमोन्यादर्शनं तं प्रापिताभ्यां बलामोट्या बलात्कारेण विस्तरं गच्छद्भ्याम् । बलामोडिर्बलात्कारे देशी । यद्यप्यवलोकयन्नित्यनेन लोचनाभ्यामिति प्राप्तं तथापि विशिष्टलोचनप्रतिपादनार्थं तदुक्तम् । विजृम्भमाणो वर्धमानः । स्ति-

३७. O. om. पिअसहि; N. om. पिअ; सव्वदा K2. सव्वया Bh. सव्वहा K1. N. for सव्वधा.

३८. K1. K2. om. एत्थ; °सीणदा or °सीलदा K1.; णणु for णं K2.; O. om. वि; K1. om. सो वि पिअसहीए.

३९. पिय for पिअ O.; मारुअपल्हत्थ B. Bh. C. मारुदप्पन्हअ K1. मारुदोद्वेलत् K2. मारुअप्पचलिअ N. मारुयदोलिय O. for मारुदुव्वेल्लन्त; प्पफु° O. प्पफु° A. B., पफु° the rest; विम्भमेहिं Bh. O. ब्भमेहिं C. for विब्भमेहिं; पुढमा N. प्पढमा O. for पढमा.

४०. °बद्ध for °द्ध A. Com.; वडलमालावली K1. K2. वडलमालावली C. वडलावली° O. for वडलावली; विरयणा for विरअणा O.; संजमण for संजमिद O.; मोडि° A. Bh. D. K2. O. °लोडिअ C. for °मोडिअ, वित्थारिदेहिं for वित्थरन्तेहिं N.

* Com. om. लवङ्गिके. † Com. adds after शीलासि, यद्वा । आशंसनशीलासि.

‡ विलोच° Com.

लोअणेहिं विअम्भमाणविम्हअत्थिमिददीहपेरन्तपरिअत्तणाविलासतण्डविदभूलदाविडाम्बिदाणङ्गसारङ्गविब्भमविअड्ढं अवलोअअन्तो पच्चक्खीकिदो जेव्व । (ख)

स्मयास्तमितदीर्घपर्यन्तपरिवर्तनाविलासताण्डवितभ्रूलताविडम्बितानङ्गशारङ्गविभ्रमविदग्धमवलोकयन्प्रत्यक्षीकृत *एव ।

मितः स्निग्धो दीर्घपर्यन्तमतिदीर्घम् । परिवर्तना पुनःपुनर्गमनं तत्र विलासो विशिष्टदृष्टिव्यापारस्तेन ताण्डवितया नर्तितया भ्रूलतया विडम्बितः समीकृतोनङ्गशारङ्गविभ्रमः कामधनुर्विलासस्ततो विदग्धमिति क्रियाविशेषणम् ।

गमनासनपाणिपादचेष्टा सविशेषं नयनभ्रुवां च कर्म ।
दयितोपगमे यदप्रयत्नात्क्रियते नूनमयं विलास उक्तः ॥

इति भरतः । शारङ्गरङ्गन्त इति प्रयोगाच्छारङ्गेति भिन्नो रेफः ॥ शारङ्गं धनुषि स्मृतमिति शाश्वतः ॥ ततस्त्वदवलोकनविकलता मालारम्यत्वे हेतुरिति तात्पर्यमिह ।

---

४१. लोयणेहिं for लोअणेहिं O.; विइम्भ° N. वियम्भ° O. for विअम्भ°; °आण for °माण A.; विम्हय O. विब्भअ K1. for विम्हअ; त्थिमिअ N. च्छिमिद K1. for त्थिमिद, प्पेरन्त for पेरन्त O. परिअंतणा B. Bh. N. परियंत्तणा C. O. for परिअत्तणा.

४२. विलासुल्लसिअ for विलासतण्डविद N.; तांडविद Bh. K2. तण्डविअ K1. तण्डविय O. for तण्डविद, लया for लदा°; °भाविदा N. °डम्बिता K2. °डम्बिया O. for °डम्बिदा, °णङ्ग for °णङ्ग K2. सरसंरंभ for सारङ्ग N.; विम्भमेहिं O. विब्भमेहिं Bh. C. K1. K2. for विब्भम, विअड्ढं B. सुविअड्ढं C. सुविअढं Bh. सुडअढं K1. K2. विप्पढुं O. for विअड्ढं.

४३. अवलोअण Bh. अवलोअन्तो B. C. D. K1. K2. आलोअन्तो N. अवलोकयन्तो O. for अवलोअअन्तो; तुए after अव-न्तो B. K2.; पच्चक्खी° for पच्चक्खी O. कदो for किदो Bh. C.; एव्व N. ज्जेव O. ज्जेव्व A. C. D. ज्जेव्व Bh. for जेव्व.

* त्वया after °लोकयन् Com.

माल० । लवङ्गिकां परिष्वज्य । अम्मो पिअसहि किं दाव
४५ तस्स महाणुभावस्स साहाविआ जेव्व मुहुत्तसंणिधाइणो जणस्स
विप्पलम्भहत्तआ विलासा आदु जहा पिअसही संभावेदि । (क)

लव० । विहस्य सासूयमिव । तुमं वि सहावेण जेव्व तस्सिं अव-
सरे असंगीदअं णच्चाविदासि । (ख)

(क) अम्मो प्रियसखि किं तावत्तस्य महानुभावस्य स्वाभाविका एव मुहूर्तसंनिधायिनो जनस्य *विप्रलम्भयितृका विलासा आहोस्वि-द्यथाप्रियसखी संभावयति ।

(ख) त्वमपि स्वभावेनैव तस्मिन्नवसरेसंगीतकं नर्तितासि ।

४४–४६ आमिति तदुक्तस्वीकारे । अम्मो इति पाठे अम्मो हर्षे वितर्के वा । विप्रलम्भितो विप्रलम्भं प्रापितः ॥ तारकादित्वादि-तच् । ततः स्वार्थे कः ॥ आदुशब्दोत्राहोस्विद्वाचकः । शीलस्य बहुकालपरिचेयतया मुहूर्तमात्रसंनिधाने विप्रलम्भचिन्ता । किमिदं नयनविकारादि स्वाभाविकमानुरागिकं वेति ज्ञातुं न शक्यत इति भावः । विप्पलम्भहत्तका इति पाठे विप्रलम्भचिन्तका इति ज्ञेयम् ।

४७–५४ अत्र मन्मथेनेति शेषः । असंगीतकं निभृतनृत्यं यथा

---

४४. आम् C. D. आ Bh. आम N. O. for अम्मो; प्रिय for प्रिअ O.; आम before किं N.

४५. N. O. om. महाणुभावस्स; महानु° for महाणु° K1.; °भावस्स for °भावस्स A. B.; साहाविओ D. साहाविया O. for साहाविआ; ज्जेअ A. C. D. O. ज्जेव K1. ज्जेअ K2. एव्व N2. for जेव्व; ते before मुहुत्त O; मुहुत्तं for मुहुत्त K1. K2.; संणिधायिणो K1. K2. संनिहाइणो N. संनिधाइणो O. for संणिधाइणो.

४६. हेदुआ A. °आ N. °इत्तका O. for इत्तआ; अहवा C. K1. K2. होदु N. उत O. for आदु; जधा for जहा B.; प्रिय for पिअ O.

४७. तुम for तुमं K2. पि for वि O.; °वेणेव्व for °वेण जेव्व N.; B. Bh. om. जेव्व; ज्जेव्व A. C. D. K 2. ज्जेव O. for जेव्व.

४८. संगीदअं B. D. असंगीअं K1. असंगीदं N. असंगीदयं O. for असंगीदअं; णचाविदासि A. णचाविदा एव्व N. णच्चाविदा आसी O. for णच्चाविदासि.

* विप्रलम्भहेतुकाः; विप्रलम्भितकाः; विप्रलम्भचिन्तकाः Com.

माल° । सलज्जम् । हुं तदो तदो । (क)

लव° । तदो पडिणिअत्तमाणजत्ताजणसंकुलेण अन्तरिदे ५० तस्सिं मन्दारिआए घरं उवगदम्हि । ताए क्खु चित्तफलअं पभादे हत्थीकिदं आसी । (ख)

माल° । किंणिमित्तं । (ग)

लव° । तं क्खु माहवाणुअरो कलहंसओ णाम कामेदि सा तस्स दंसइस्सदि त्ति। तदो पिअणिवेदिआ मन्दारिआ संवुत्ता। (घ) ५५

(क) हुं ततस्ततः ।

(ख) ततः प्रतिनिवर्तमानयात्राजनसंकुलेनान्तरिते तस्मिन्मन्दारिकाया गृहमुपगतास्मि । *तस्याः खलु चित्रफलकं प्रभाते हस्तीकृतमासीत् ।

(ग) किंनिमित्तम् ।

(घ) तां खलु माधवानुचरः कलहंसको नाम कामयते सा तस्य

तथा नृत्यं कारितासीत्यर्थः । सासूयं परद्वेषसहितम् । हुमिति प्रणयकोपे । अत्र तस्मिन्माधवे । खलु हेतौ । हस्तीकृतं न्यासीकृतम् । अत्र कामयत इच्छति ।

---

४९. सलज्जा for सलज्जम् C.; इव after सलज्जम् Bh.; विहस्य before हुं Bh. C. K1. K2. N. O.; K2. om. हुं; Bh. C. om. one तदो.

५०. णिउ त्तमाण B. C. णिवत्तमाण N. नियत्तमाण O. for णिअत्तमाण; B. Bh. N. O. om. जत्ता; जणदा for जण N.; संकुले B. संकले N. for संकुलेण; °णान्त° for °ण अन्त° K2.; N. om. अन्तरिदे.

५१. जणे after तस्सिं A. C. D. K1, K2.; °रिआ for °रिआए N.; उव° A. उवा° Bh. D. for उव°; N. K1, K2. om. क्खु; ख्खु for क्खु O.; °फलहअं Bh. फलयं O. for फलअं.

५२. पहादे D. प्पभादे O. for पभादे; हच्छे for हत्थी° K1.; कदं for किदं Bh. C D. K1. K2.; आसि for आसी A. B. Bh.

५३. निमित्तं for णिमित्तं K2.

५४. इदं for तं N., खु Bh. K1. N. O. हु K2. for क्खु; °अरो A. B. K1. K2. वरो O. for °अरो°; °हंसो N. °हंसयो O. for °हंस ओ; Bh. K1. K2. om. णाम; तदो before सा B.; सो for सा C. K1. K2. O.

५५. संदंस° for दंस° D.; दंसदि for दंसइस्सदि K2; पिय for पिअ O.; °वेदइत्तआ N. °वेदिइत्तिआ O. for °वेदिआ; स K1. मम K2. मे A. Com. after °वेदिआ; मन्दारिया for मन्दारिआ O.

* तया for तस्याः Com.

माल० । स्वगतम् । णूणं तेणावि कलहंसएण तं पडिच्छन्दअं अत्तणो पहुस्स दंसिदं भविस्सदि । प्रकाशम् । सहि किं दाणिं दे पिअं । (क)

लव० । एदं क्खु संदाविदस्स संदावआरिणो दुल्लहमणोरहावेसदूसहाआसदज्झन्तचित्तस्स क्खणमेत्तणिव्वावअं तुह पडिच्छन्दअं । (ख) इति चित्रं दर्शयति ।

दर्शयिष्यतीति । ततः प्रियानिवेदिका मन्दारिका संवृत्ता ।

(क) नूनं तेनापि कलहंसकेन तत्प्रतिच्छन्दकमात्मनः प्रभोर्दर्शितं भविष्यति । सखि किमिदानीं ते प्रियम् ।

(ख) एतत्खलु संतापितस्य *संतापकारिणो दुर्लभमनोरथावेशदुःसहायासदह्यमानचित्तस्य क्षणमात्रनिर्वापकं तव प्रतिच्छन्दकम् ।

५९–६८ अत्र दुर्लभायां त्वयि मनोरथाभिनिवेशस्तेन यो दुःसहायासस्तेन दह्यमाने चित्ते क्षणमात्रनिर्वापकमिति । अत्रानासङ्गेनाश्वासः । लवङ्गिका स्वयं लिखित्वा माधवलिखितत्वेन बोधयतीति भावः । सदृशमिति । मधुरतया निर्माणस्य सदृशं वचनमित्यर्थः ।

---

५६. तेणावि K2. तेणवि N. तेण O. for तेणावि;° हंसएण for °हंसएण O.; O. om. तं; पडिच्छ° for पडिछ° K2.

५७. °न्दयं for °न्दअं O.; णाहस्स A. B. K1. K2. O. णाधस्स Bh. पहुणो N. for पहुस्स; हविस्स° N. हुविस्स° D. for भविस्स°; त्ति after °स्सदि B.; तदो before प्रकाशम् B.

५८. ते for दे K2. N.; पियं O. प्पिअं B. for पिअं.

५९. ख for क्खु K1. K2. O.; तस्स after °विदस्स O.; °कारिणो B. K1. K2. O. °हारिणो Bh. for °आरिणो.

६०. °यास for °आस O.; जुत्त Bh. ड्डज्जन्त C. K1. भज्जन्त K2. धज्जन्त N. ज्जलन्त O. for दज्झन्त; हियअस्स for चित्तस्स O.; खण Bh. K1. K2. क्खण O. for क्खण, णिव्ववयं O. णिवाइत्ताआ K1. for णिव्वावअं.

६१. प्पडि° N. परि° K1. for पडि°; °च्छन्दअं K2. N. °छन्दयं O. for °छन्दअं; B. Bh. C. N. om. इति; त्ति for इति O.; चित्रफलकं for चित्रं C.

* त्वत्संताप° Com.

माल° । सहर्षं निर्वर्ण्य । अहो दाणिं पि हिअअस्स मे अणासङ्गो जेण एव्वं पि आसासणं विप्पलम्भो त्ति संभावेमि । कधं अक्खराइं पि । (क) । इति वाचयति ।

जगति जयिनस्ते ते भावा नवेन्दुकलादय इत्यादि पूर्वोक्तं ६५
पठित्वा सानन्दम् । महाभाअ सरिसं क्खु दे णिम्माणस्स वअणं मधुरदाए लक्खीअदि । दंसणं उण तक्कालमणोहरं परिणामदी-

(क) अहो इदानीमपि हृदयस्य मेनासङ्गो येनैवमप्याश्वासनं विप्रलम्भ इति संभावयामि । कथमक्षराण्यपि ।

(ख) महाभाग सदृशं खलु ते निर्माणस्य वचनं मधुरतया लक्ष्यते* ।

तवाकृतिर्मधुरा यथा तथा वचोपि मधुरमित्यर्थः । यस्येदृशं वचस्तस्य कथमेवं दर्शनमित्युपालम्भपूर्विका पृच्छा । यदाह ।

६२. सोच्छ्वसं A. सहर्षोच्छ्वासं K1. K2. N. O. for सहर्षं; चिरं A. चिरं C. K1. K2. O. before निर्वर्ण्य; N. om. निर्वर्ण्य; स्वगतं after निर्वर्ण्य O.; B. Bh. K1. O. om. पि; वि for पि C. D. K2. N.; मे हियअस्स O. मे हिअअस्स K1. K2. for हिअअस्स मे.

६३. अणासंघो B. Bh. D. K1. O. अनाश्वासः C. अणासासो N. अणासन्दो K2. for अणासङ्गो; एवं A. Bh. C. एअं K2. एदं D. O. N. for एव्वं; वि for पि N. सणा for °सणं B.; लम्भं for °लम्भो N.; N. om. त्ति; संभावेदि K2. O. संभावीअदि N. for संभावेमि; कहं B. N. O. कहिं K2. for कधं; एत्थ before अक्ख° N; K1. has a lacuna between जेण and राइं पि.

६४. अक्खराइं N. O. for अक्खराइं; वि for पि D. N., O. om. पि; दिस्सन्दि after वि N.; Bh. K2. O. om. इति; संस्कृतमाभिन्त्य for इति—ति N.

६५. N. om. तेते—°दयः K1. K2. om. नवेन्दुकलादयः; the whole Sloka in B. Bh. C. O.; Bh. O. om. इत्यादि पूर्वोक्तं पठित्वा; K1. K2. om. आदिपूर्वोक्तं; N. om. पूर्वोक्तं.

६६. पठति for पठित्वा N.; महाभाय for महाभाअ O.; सरिअं for सरिसं K 2; खु for क्खु Bh. K1. K2. O.; निम्मा° for णिम्मा° K2.; वयणं O. विरअणा° A. for वअणं.

६७. मधुर° for मधुर° D. K1. K2. N.; K1¹ K2. N. O. om. लक्खीअदि; मण° for मणो° O.

* Com. om. लक्ष्यते.

हसंदावदारुणं । धण्णाओ क्खु ताओ अम्मकाओ जाओ तुमं ण पेक्खन्ति पेक्खिअ वा अत्तणो हिअअस्स पहवन्ति । इति रोदिति । (ख)

लव० सहि किं एव्वं पि दे णत्थि आसासो । (क)

माल० सहि कधं । (ख)

दर्शनं पुनस्तत्कालमनोहरं परिणामदीर्घसंतापदारुणम् । धन्याः खलु ताः कन्यका* यास्त्वां न प्रेक्षन्ते प्रेक्ष्य वात्मनो† हृदयस्य प्रभवन्ति ।

(क) सखि किमेवमपि ते नास्त्याश्वासः ।

(ख) सखि कथम् ।

यत्र भावनयोपेतमात्मानमथवा परम् ।
पृच्छन्निवाभिधत्तेर्थं सा पृच्छेत्यभिधीयते ॥

नाट्यधर्मत्वेन परोक्षस्यापि प्रत्यक्षीकरणम् । यदाह ।

परोक्षेपि च वक्तव्यो नार्या प्रत्यक्षवत्प्रियः ॥

अम्मकाशब्दः स्त्रियां कन्यायां वा देशी ।

७२–७८ अत्रोत्खलितं छिन्नम् । बन्धनं वृन्तशाखासंयोगः । कङ्केलिरशोकः । निःसहाक्षमा । परिखिद्यसे परिहीयसे । एतेन का-

---

६८. अवि B. अवि अ Bh. अ C. K2. मणहरं अ N. after दारुणं; अधण्णा N. धण्णा B. for धण्णाओ; N. om. क्खु; खु for क्खु Bh. K1. K2. O.; D. om. क्खु ताओ; N. om. ताओ; कण्णकाओ O. कण्णआओ A. C. K1. K2. कणकाओ Bh. इत्थिआओ N. for अम्मकाओ; जाउ Bh. for जाओ.

६९. पेक्खंति O. पेक्खन्ति K1. for पेक्खन्ति; °न्ति । अपि णाम अत्तणो A. °न्ति । अवि णाम अत्तणो O. for °न्ति-अत्तणो; अवि णाम before पेक्खिअ K1. K2.; N. om. वा; हियअस्स for हिअअस्स O.; वा ण after °अस्स N.; पभवंति Bh. K2. °पभवंति O. for पहवन्ति.

७१. N. om. किं; किं after पि instead of after सहि Bh.; एवं for एव्वं Bh. K2. O.; वि for पि N.; K1. om. दे, दे before आसासो Bh.

७२. N. om. सहि; कहं for कधं D. N.; विअ after कहं N.

* जियो Com.

† प्रेक्षन्ते । अपि नात्मनो Com.

लव० । जस्स कारणादो उक्खण्डिअबन्धणं विअ कङ्केल्लि-पल्लवं किलम्मन्तणोमालिआकुसुमणीसहा परिखिज्जसि सो वि जाणाविदो भअवदा मम्महेण संदावस्स दूसहत्तणं त्ति । (क) ७५

माल० । कुसलं दाणिं तस्स महाणुभावस्स भोदु मम उण दुल्लहो आसासो । साल्लम् । विसेसदो अज्ज पिअसहि । (ख)

(क) यस्य कारणादुत्खण्डित*बन्धनमिव कङ्केल्लिपल्लवं क्लाम्यन्नव-मालिकाकुसुमानीःसहा परिखिद्यसे सोपि ज्ञापितो भगवता मन्मथेन संतापस्य दुःसहत्वमिति ।

(ख) कुशलमिदानीं तस्य महानुभावस्य भवतु मम पुनर्दुर्लभ आश्वासः । विशेषतोद्य प्रियसखि ।

मावस्था तनुतोक्ता । अस्रं नेत्रजलम् । संस्कृतमिति । आसन्नमरण-तया प्रकृतिविपर्ययद्योतनाय स्त्रियाः संस्कृताश्रयणम् । यद्वा । मर-णसमये प्राकृतस्मरणस्य हीनयोनिजन्मफलकत्वेन बोधनात्तत्काले स्त्रियाः संस्कृताश्रयणम् । यद्वा । वैदग्ध्यद्योतनाय तत् । यदाह ।

७३. कालणादो for कारणादो N.; खुडिद O. उक्खदित K2. उक्खण्डिद K1. उक्खडिअ B. उक्खाडिअ Bh. for उक्खण्डिअ; बंधणं for बन्धणं Bh.; अ for विअ O.; N. om. विअ; कंकिल्लि Bh. कंकेलि K2. कंकेली N. for कङ्केल्लि.

७४. विअ हिअअं धरिती N. जीविदं कर्ध वि धारयन्ती तुमं O. after °ल्लवं; किलियंत O. कलिसन्त K1. क्लिस्सन्त A. क्लिंत C. किलंत D. किलंस N. किल Bh. for किलम्मन्त; किलिमण्णव° for किलम्मन्त K2.; णव for णो K2. O.; मालिया for मालिआ K1. O.; तुमं कुसुमाउहेण after णीसहा N.; परिहीयसि K1. K2. O. परि-खिज्जीअसि D. परिलक्खीअसि Bh. C. परिहिज्जसि N. for परिखिज्जसि.

७५. K2. om. भअवदा (but has its translation in the छाया); भयवदा for भअवदा O.; B. om. संदावस्स; संतावस्स for संदावस्स Bh.; B. Bh. C. K1. K2. om. त्ति.

७६. सहि before कुसलं N.; दाणीं for दाणिं A.; महानु° for महाणु° K1.; °भा-गस्स B. भावस्स Bh. C. K2. O. °हावस्स N. for °भावस्स; होदु for भोदु B. N. O.; मह for मम N.

७७. सुदुल्ल° for दुल्ल° D. O.; आआसो A. आस्सासो C. for आसासो; B. om. सा-ल्लम्; मए before विसे° B.; N. O. om. विसे—सहि.

* उत्खलित Com.

संस्कृतमाश्रित्य ।

मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं
प्रमाथी निर्धूमो ज्वलति विधुतः पावक इव ।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभवति न चाम्बा न भवती ॥

लव० । एव्वं जेव्व पच्चक्खसोक्खदाइणो परोक्खदुक्खदूसहा

(क) एवमेव प्रत्यक्षसौख्यदायिनः परोक्षदुःखदुःसहाः* सज्जनस-

संस्कृतभाषावाचः प्रायो नाट्ये खलु स्त्रियाः श्राव्याः ।
क्वचिदपि विदग्धतायाः प्रबोधनार्थं प्रशस्यन्ते ॥

७९–८२ मनोराग इत्यादि । प्रियसखि मामद्य त्रातुं न तातः प्रभवति न वा माता न वा त्वम् । कुतः । मनोराग आधिरविरतं प्रमाथी क्षोभकारी यथा तीव्रं विषं तथा विसर्पति व्याप्नोति । यथा धातुत्वगादिषु विषं व्याप्नोति तथाङ्गानि म उद्वेग इत्यर्थः । यद्वा । सविशेषदर्शनाच्चित्तानुराग इच्छाभेदस्तीव्रं यथा तथा मनो विसर्पति व्याप्नोति दाहकारित्वाद्विषमिव । तथा विधुतः संधुक्षितोग्निर्यथा ज्वलति विधूननाच्चिर्धूमं यथा तथा स एव रागो ज्वलति ज्वालामालाकुलीभवति । इत इतः सर्वत्र प्रत्यङ्गं हिनस्ति पीडयति गरीयाञ्ज्वर इव । तं

७९. रोग° for राग° N.; तीव्रो for तीव्रं O.; विसर्पन् for विसर्पति Bh. N.
८०. निर्धूमं A. K1. K2. O. विधूमं N. for निर्धूमो.
८१. बलीयान् for गरीयान् C.; अत इतो for इत इतो N.
८२. तातस्त्रातुं K1. K2.; च नाम्बा च for न चाम्बा न N.
८३. एवं for एव्वं Bh. K2. एवं N.; जेव्व Bh. K1. ज्जेव K2. and ज्जेम्ब the rest; पच्चक्खं B. पच्चक्ख Bh. पच्चक्खा O. for पच्चक्ख; सोक्खा for सोक्ख O.; दायिणो for दाइणो O.; परोक्ख O. परोक्खं B. वराक्ख N. for परोक्ख; दुःसहाभासकारिणो for दुक्खदूसहा A; दुःख for दुक्ख O.; दुख after दुक्ख Bh.; दुस्सहा for दूसहा K2.
* दुःसहायासकारिणः° Com.

सज्जणसमाअमा होन्ति । अवि अ । जस्स वादाअणन्तरमुहु-
त्तदंसणेण सविसेससमिद्धहुदवहाअन्तपुण्णिमाचन्दोदआ णिक्क-
रुणकामव्वावारसंसइदजीविदा दे सरीरावत्था तस्स जेव्व संप-
त्तसविसेसदंसणा भविअ अज्ज संतप्पसि त्ति किं एत्थ
भणिदव्वं । ता पिअसहि सलाहणिज्जं दुल्लहमणोरहफलं

मागमा भवन्ति । अपि च । यस्य वातायनान्तरमुहूर्तदर्शनेन सविशेषस-
मृद्धहुतवहायमानपूर्णिमाचन्द्रोदया निष्करुणकामव्यापारसंशयित-
जीविता ते शरीरावस्था तस्यैव संप्राप्तसविशेषदर्शना भूत्वा मा संतप्य-
सीति किमत्र भणितव्यम् । तत्प्रियसखि श्लाघनीयं दुर्लभमनोरथफलं

त्यक्त्वा ममाधिस्त्वया समाधातुं न शक्यत इति भावः । यद्वा । तात-
स्तातुं न शक्नोति नन्दननिरासेन माधवाय मददानात् । अम्बापि न
तथा । तथानुवर्तमानस्य तातस्यानिषेधात् । लवङ्गिकायाश्च तयोः
समशीर्षिकया गणनं स्वाच्छन्द्येन स्वमतप्रकाशनाय ।

८४-९० अत्र भणितव्यं युज्यत एवेत्यर्थः । यस्याव्यक्तं दर्शनं

---

८४. असअस after दूसहा Bh.; असज्जण for सज्जण O.; समागमा Bh. C. K1. K2. for समाअमा; होन्दि for होन्ति N.; अपि अ K2. अवि य O. for अवि अ; पिअसहि after अवि अ N.; वादायण for वादाअणन्तर O.; °न्दर for °णन्तर N.; मेत्त after मुहुत्त A. C.

८५. दंसणे O. संदंसणेन N. for दंसणेण; वि after °णेन N.; Bh. N. O. om. सविसेस; सु before समिद्ध Bh. N. O.; हुतावहा° O. हुअवहा° Bh., D. K1. K2. for हुदवहा°; °यंत O. °अमाण C. for °अन्त; पुण्ण before पुण्णिमा K1.; पुण्ण C. N. O. पुणिमा Bh. for पुण्णिमा; यंदोदया O. ओंदोआ C. चन्दादया K1. K2. for चन्दोदआ; अदि before णिक्करु° D.; निक्क° for णिक्क° O.

८६. आकाम for काम Bh.; वावार B. C. D. K1. K2. N. for व्वावार; संसाइद for संसइद Bh.; दीसइ bofore दे B., एव्व N. जेव्व K1. K2. ज्जेव Bh. O. and the rest ज्जेव्व.

८७. सद before संपत्त Bh. संपत्तं C. K1. K2. संपदं N. for संपत्त; दंसणादो for °दंसणा N.; भविय for भविअ O.; A. Bh. N. om. भविअ; Bh. om. अज्ज; इन्ति for त्ति K2.

८८. एत्थ for ता N; N. om. पिअसहि; हविसहि for पिअसहि O.; सही for सहि A.; सिलाह for सलाह N.

जीअलोअस्स गुरुआणुराअसरिसं महाणुभाअवल्लहसमाअमो
९० त्ति एत्तिअं जाणीमो । (क)

मालं० । साहि दइदमालदीजीविदे साहसोवण्णासिणि अवेहि ।
साहसम् । अहवा अहं जेव्व वारं वारं पलोअअन्ती दुक्ख-
व्ववत्थाविदधीरत्तणावट्टम्भेण अत्तणो हिअएण दूरविज्जम्भ-

जीवलोकस्य गुरुकानुरागसदृशं महानुभाववल्लभसमागम इत्ये-
तावज्जानीमः ।

(क) सखि दयितमालतीजीविते साहसोपन्यासिनि अपेहि ।
अथवा अहमेव वारं वारं प्रलोकयन्ती दुःखव्यवस्थापितधीरत्वावष्टम्भे-

---

चन्द्रस्याग्नित्वं जीवितसंशयं च कुरुते तस्य व्यक्तं दर्शनं त्वदुपन्य-
स्तप्रकारं तापं कुरुत इति किमत्र चित्रम् । चन्द्रेाग्नित्वेन ज्ञानाच्चि-
द्राच्छेद उक्तः । मृकुमारायामस्यामतिपीडाकारित्वेन निष्करुणत्वम् ।
व्यापारो दशावस्थः । किमत्र कर्तव्यमित्यत आह । तदिति । तथा
च गुरुतरानुरागस्यैतत्फलं यत्सखीद्वारा वल्लभसमागमः कारयितव्य
इति भावः ।

९१–९४ अत्र दयितं प्रियम् । महाकुलकलङ्कशङ्कया साहसम् ।

---

८९. जीव for जीअ K1. K2. N.O.; जं after °अस्स N.; गरुया° O. गरुआअ° K2. गरुआ° C. D. K1. N. for गुरुआ°; °आनु° for °आणु° K1.; °राय O. °रा-अस्स N. for °राअ; सरिस A. Bh. D. O. सरिसो N. for सरिसं; महाभाअ B.C.N. महाभाय O. for महाणुभाअ; समागमो for समाअमो A. C. D. K2. O.

९०. एत्तियं for त्ति एत्तिअं O ; जाणामि A for जाणीमो.

९१. K2. K1. om. सहि; दयिदं O Bh. दइअ B. for दइद; मालती° for माल-दी° K2.; °जीविते for °जीविदे O.; °सोपण° for °सोवण्णा° K1. K2.; °सिणी for °सिणि N.; अपेहि for अवेहि°.

९२. C. om. साहसम्; ज्जेव K2. एव्व N. ज्जेव्व A. C. D. O. Bh. for जेव्व; विलोअंती Bh. पलोयंती O. विलोअंदी N. अवलोअंती B. for पलोअअन्ती; दुःखव्यवस्था° O. दुक्खविवत्था° Bh. दुक्खप्पडिट्ठा° N. दुःखावत्था° Kl. दुक्खा-वत्था° B. K2. for दुक्खव्यवस्था°.

९३. विरत्तणा° for धीरत्तणा° K1.; °वत्थंभेण Bh. °वत्थंभेण O. for °वट्टम्भेण; मे for अत्तणो C.; हियएण for हिअएण O.; दूरं for दूर° N.; विलिज्जंतलज्जाणेण Bh.

माणदुव्विणअलहुएण एत्थ अवरज्झामि। तधा वि पिअसहि!(क)

भूयः संस्कृतमाश्रित्य। ९९

ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी
दहतु मदनः किं वा मृत्योः परेण विधास्यति।
मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया
कुलममलिनं न त्वेवायं जनो न च जीवितम्॥

आत्मनो हृदयेन दूरविजृम्भमाणदुर्विनयलघुकेनात्रापराध्यामि। तथापि प्रियसखि।

अत एव रोदनम्। तथा च त्वमपेक्षापगच्छ। प्रियभाषिणीं त्वां किमधिक्षिपामि यदहमेवात्र वाच्येत्याह। अथवेति। अत्र क्षणं क्षणमालोकनाकुलत्वाद्दुःखव्यवस्थापितं यद्धीरत्वं तस्यावष्टम्भोविद्यमानमेवैतदारोपस्तेनेत्यर्थः। लघ्वी लघुतां गता। अहमत्रापराध्यामीति येन तवैतादृशसाहसोपन्यास इति भावः। तथापि प्रियसखि।

९६–९९ अधुना साहसाकरणं हृदि निधाय सनिर्वेदमाह। ज्वलत्वित्यादि। प्रतिरात्रं पूर्णश्चन्द्रो ज्वलतु तापयतु। तथापि न साहसं करोमीति भावः। गगन इत्यनेनाप्राप्यत्वादनुपागमनीयतोक्ता। तर्हि कामस्त्वां पीडयिष्यतीत्यत आह। मदनो दहतु मृत्योर्मरणात्परं स किं करिष्यति। मरणे सति दुःखस्यापि त्यागादिष्टमेव तदिति

मिलंत° O. विलीअमाणलज्जा° N. विलइज्जन्त° A. °विअलिदलज्जेण D. विलज्जंतलज्जत्तणेण C. विगल° K2. °विलविजत्तलज्जत्तणेण Kl. for विजम्भमाण°.

९४. दुव्विणय° for दुव्विणअ° O. K2.; लहु N. लहुइ A. Bh. D. लहुई O. for लहुएण; अवरद्धम्हि K2. अवरद्धम्मि N. O. अवरद्धहि Kl. for अवरज्झामि; ता N. तहा B. O. K2. तह D. तदा Kl. for तधा; N. om. वि; पिय° O. for पिअ°.

९५. Bh. O. N. om. भूयः.

९६. नगरे for गगने K2.

९७. विधास्यतः for विधास्यति N.

९८. यदयं for दयित Bh.

१०० लव० । स्वगतम् । एत्थ दाणिं को उवाओ । (क)

अथ नेपथ्यार्धप्रविष्टा प्रतीहारी । एसा भअवदी कामन्दई । (ख)

उभे । किं भअवदी । (ग)

(क) अत्रेदानीं क उपायः ।

(ख) एषा भगवती कामन्दकी ।

(ग) किं भगवती ।

भावः । परेणेति ॥ प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया ॥ इदं नायिकायाः सत्त्वजधैर्यम् । यदाह ।

चापलेनानुपहतं चित्तं धैर्यमुदीरितम् ॥

ननु दुःखहानाय माधवानुसरणमेव वरमत आह । मम पुनस्तातः पिता दयित इष्टः । कीदृशः । श्लाघ्यः सर्वश्लाघाविषयः । अमलवंशा मातेष्टा । निर्मलं कुलं चेष्टम् । अयं हृदिस्थो जनो माधवो नैवेष्टः । साहसक्रियायेति शेषः । तर्हि कथं जीवनमत आह । न च जीवितमिष्टम् । अत्र जीवितद्वेषादुद्वेगावस्था । यदाह ।

प्रद्वेषः प्राणितव्ये यः स उद्वेगः स्मृतो बुधैः ॥

१००–१०७ उद्वेगनाशोपायं चिन्तयन्ती लवङ्गिकाह । अत्रेदानीं क उपायः । प्रतीहारी । एषा भगवती कामन्दकी । मालतीजीवनोपाय इति भावः । प्रतीहारीत्यनेन संबन्धघटनं सूचितम् । यदाह ।

---

१००. दाणिं for दाणिं A. D.; उआओ for उवाओ Bh.

१०१. K2. which gives the Sanskrit rendering immediately after the Prâkrit reads only अत्रेदानीं भगवती कामन्दकी between उवाओ and उभे, l. 102. Bh. O. N. Kl. om. अथ; नेपथ्यार्धः for नेपथ्यार्धे Bh.; दाणिं after एसा Kl.; भयवदी for भअवदी O.; कामन्दकी for कामन्दई. Kl.

१०१. भगवती Bh. भयवदी O. भअवई N. for भअवदी.

प्रती० । भट्टिदारिअं दट्ठुकामा आअदा । (क)

उभे० । तदो किं विलम्बीअदि । (ख)

प्रतीहारी निष्क्रान्ता । १०५

मालती चित्रं प्रच्छादयति ।

लव० । स्वगतम् । सुसमीहिदं क्खु जादं । (ग)

ततः प्रविशति कामदक्यवलोकिता च ।

काम०। साधु सखे भूरिवसो साधु । प्रभवति निजस्य कन्यकाजनस्य महाराज इत्युभयलोकाविरुद्धं वचनमुपन्यस्तम् । ११०

(क) भर्तृदारिकां द्रष्टुकामागता ।

(ख) ततः किं विलम्ब्यते ।

(ग) सुसमीहितं खलु जातम् ।

संधिविग्रहसंबन्धनानाचारसमन्वितम् ।

निवेदयन्ति याः कार्यं प्रतीहार्यस्तु ता मताः ॥

प्रतीहारीत्यत्र बहुलवचनान्मनुष्येपि दीर्घः ॥ उभयोर्वाक्ये। किमर्थमागतेत्यर्थः । अत एवाभिमवाक्ये तद्व्यापारकथनम् । सुसमीहितं खलु जातम् । इदानीं यत्कामन्दक्यागमनमिति भावः ।

११०–११५ उभयेति । इहलोकाविरुद्धं साक्षादप्रतिषेधेन राजकोपाजननात् । परलोकाविरोधस्त्वात्मीयस्य कुमारीजनस्य प्रभुर्न

---

१०१. भग° कामं° before भट्ट D.; भट्ट° for भट्टि° B. C. D. O.; °दारियं for °दारिअं K1. O.; दट्ठु for दट्ठुकामा B. C.; आगदा for आअदा B. O. Bh. K2.

१०४. विलम्बे° for विलम्बी° N. O. Bh.

१०६. चित्रफलकम् for चित्रं A. Bh.; छादयति O. आच्छादयति A. K1, N, Bh, K2 for प्रच्छादयति.

१०७. सुसमाहिदं C. सुसमीहितं K1. for सुसमीहिदं; खु for क्खु K1. O. Bh; एदं for जादं Bh.

१०९. N. K1. om. सखे; निज° for निजस्य B. C. N.; कन्या° for कन्यका° A. K1.

११०. उत्तरमुप° for वचनमुप° Bh. N. K1. K2. O.

अपि च। अद्य मन्मथोद्यानवृत्तान्तेन भगवतो विधेरनुकूलताम-
वगच्छामि। बकुलावलीचित्रफलकव्यतिकरसंविधानकौतुकम-
द्भुतं प्रमोदमुल्लासयति। इतरेतरानुरागो हि दारकर्मणि परार्ध्यं
मङ्गलम्। गीतश्चायमर्थोङ्गिरसा यस्यां मनश्चक्षुषोरनुबन्धस्त-
११९ स्यामृद्धिरिति।

अव०। एसा मालदी। (क)

काम०। निर्वर्ण्य।

निकामं क्षामाङ्गी सरसकदलीगर्भसुभगा
कलाशेषा मूर्त्तिः शशिन इव नेत्रोत्सवकरी।

(क) एषा मालती।

परस्येति साधारणोक्त्यासत्यानुदीरणादित्यर्थः। व्यतिकरो मिलनं तद्रूपं संविधानम्। दारकर्मणि परिणये। परार्ध्यं श्रेष्ठम्। अनुबन्धो रतिः। ऋद्धिरुपचयः।

११८-१२१ निकाममित्यादि। इयं कल्याण्यस्माकं मनो रमयति। कुतः। अत्यर्थं क्षीणाङ्गी। सरस आर्द्रोपर्युषित इति यावत्।

१११. मदनो° for मन्मथो° N.; O. om. भगवतो; Kl. om. भगवतो-कौतुकम्; विधेरप्यनु° for विधेरनु D. O.

११२. अध्यवगच्छामि C. अप्यवगच्छामि K2. for अवगच्छामि; बकुलमाला° for बकुलावली° N.; अपि C. N. O. कमपि Kl. Bh. K2. ममापि N. किमपि B. before अद्भुतम्; संविधानकं तु K2. संविधानं तु N. Bh. संविधानकम् B. for संविधानकौतुकम्.

११३. अद्भुत for अद्भुतं O.; N. om. प्रमोदम्; °तरगुणानुरागणोर्हि for °तरानुरागो हि B.; Bh. om. हि; परार्धं for परार्ध्यं A.

११४. अङ्गम् for मङ्गलम् K2.; C. N. om. अङ्गिरसा; वाह् before मनश्च° A.; अनुरागः K2. निबन्धः N. for अनुबन्धः.

११५. सिद्धिरिति for ऋद्धिरिति O.

११६. प्रती° for अव° Kl. K2.; एषा for एसा Kl. K2.; मालती for मालदी O.

११७. दृष्ट्वा before निर्वर्ण्य B. Bh.; विलोक्य for निर्वर्ण्य O.

अवस्थामापन्ना मदनदहनोद्दाहविधुरा- १२०
मियं नः कल्याणी रमयति मनः कम्पयति च॥

अपि च। परिपाण्डुपांसुलकपोलमाननं
दधती मनोहरतरत्वमागता।
रमणीयजन्मनि जने परिभ्रम-
ल्लँलितो विधिर्विजयते हि मान्मथः॥ १

नियतमनया संकल्पनिर्मितः प्रियसमागमोनुभूयते। तथा ह्यस्याः

नीवीबन्धोच्छ्वसनमधरस्पन्दनं दोर्विषादः
स्वेदश्चक्षुर्मसृणमधुराकेकरस्निग्धमुग्धम्।

कदल्या गर्भो मज्जा तद्वद्रम्या क्षीणत्वपाण्डुत्वाभ्याम्। इह गर्भपदेनातिपाण्डुत्वं कोमलत्वं चोक्तम्। कलाशेषा शशिनो मूर्तिरिव द्वितीयाचन्द्रलेखेव। अत एव प्रस्तुतकार्यसंपादकत्वेन रमयति। उद्दाहेनोत्कटदाहेन विह्वलां दशामापन्ना सती मनः कम्पयति। अतिपीडनादनिष्टाशङ्कित्वादिति भावः। इह तनुताख्या कामदशा सूचिता।

१२२–१३१ परीत्यादि। पांसुलं रूक्षम्। पाण्डुरूक्षकपोलवदनापीयं रम्या। यतो मनोज्ञजन्मनि जने बलन्कामस्य विकारो यादृशस्तादृश ईप्सितः सन्विजयी भवति। संकल्पो मनोव्यापारः। नीवीत्यादि। जघनवस्त्रबन्धनं नीवी। तस्या बन्धस्य ग्रन्थेरुच्छ्वसनं शिथिलता। वासःश्लथतानुरागादपि। यदाह।

---

१२०. °नोन्माद N. °नोद्दाम° B. C. for °नोद्दाह°.

१२२. पांशुल for पांसुल° Bh.

१२४. परिस्फुरन् for परिभ्रमन् K2.

१२६. A. B. C. D. insert अथवा before नियत°; कृत before संकल्प° Kl. K2.; कल्प° for संकल्प° Bh.; निर्मित° for निर्मितः N.; अतो for तथा O.

१२९. खेदश्च° for स्वेदश्च° Kl.; मुकुलाकेकर Bh. O. मुकुलाकेसर N. for मधुराकेकर; °तारं for °मुग्धम् A.

११० गात्रस्तम्भः स्तनमुकुलयोरुत्प्रबन्धःप्रकम्पो
गण्डाभोगे पुलकपटलं मूर्छना चेतना च ॥
इत्युपसर्पति ।

स्वेदोरुवेपथुस्तम्भाः श्रथता जघनच्छदे ।
१११ आविर्भवति नारीणामनुरागवशात्मनाम् ॥

अधरस्पन्दनमधरकम्पनम् । एतत्तु स्फुरितचुम्बने । यदाह ।

रदने विशन्तमोष्ठं ग्रहीतुं या समिच्छति ।
निजोष्ठः कम्पते यच्च स्फुरितं चुम्बनं मतम् ॥

दोर्वैषादो बाह्वोर्निःसहत्वम् । आलिङ्गनसौख्यात् । स्वेद आयासात् । मसृणं कोमलम् । मधुरं ललितम् । संकल्पलब्धस्य दुरालोकत्वादाकेकरम् । भृङ्गारात्स्निग्धम् । सुखभावनया मुग्धम् । चक्षुः । संकल्पमात्रलब्धतया प्रियेसूयायोगाज्जिह्मा दृष्टिः । जिह्मा दृष्टिरसूयायाम् । यदाह ।

ललिताकुञ्चितपुटा शनैस्तिर्यग्विसर्पिणी ।
निगूढागूढतारा च जिह्मा दृष्टिरुदाहृता ॥

लब्धे [illegible] धृतिहर्षाभ्यां ललितम् । तल्लक्षणं तूक्तमेव ।

आकेकरा घनालोके विच्छेदे प्रोषितेषु च ।
आकुञ्चितपुटापाङ्गसंगतार्धनिमेषिणी ।
मुहुर्व्यावृत्ततारा च दृष्टिराकेकरा मता ॥

दोर्दोषा भुजा भुज इति शब्दभेदः । गात्रस्तम्भः शरीरनिश्चलता । अतिहर्षात् । यदाह ।

अतिहर्षभयरोषरागेभ्यः स्तम्भसंभवः ॥

मुकुलाकारत्वात्स्तनावेव मुकुलौ । तयोरुत्प्रबन्धो विच्छेदरहितः कम्पः । प्रियस्य गाढालिङ्गनात् । गण्डाभोगे गण्डमण्डले पुलकपटलं

---

११० कलशयोः for मुकुलयो O.; उत्प्रबंधः for उत्प्रबन्धः C.
१११. O. Bh. N. om. इति.

लवङ्किका मालतीं चालयति । उभे उत्तिष्ठतः ।

माल० । भअवदि वन्दामि । (क)

काम० । महाभागे समीहितफलभाजनं भूयाः । १३५

लव० । सुविहिदं आसणं । एत्थ उवविसदु भअवदी । (ख)

सर्वा उपविशन्ति ।

माल० । कुसलं भअवदीए । (ग)

(क) भगवति वन्दे ।

(ख) *सुविहितमासनम् । अत्रोपविशतु भगवती

(ग) कुशलं भगवत्याः ।

रोमाञ्चसंघः । प्रियचुम्बनसंकल्पात् । आत्यन्तिकत्वार्थं पटलग्रहणम् । मूर्छना मोहः । निरतिशयानन्दयोगात् । यदाह ।

स्तब्धता वपुषि मीलनं दृशोर्मूर्छना च रतिलाभलक्षणम् ॥

रतिविलाससंकल्पेनान्तरा चेतना च ।

१३४–१४४ बौद्धानां प्रव्रजितं प्रति वन्दामीति नतिसंप्रदायः । यद्वा । वन्दामि वन्द इति सामान्यत एव । मालतीचित्तविनोदाय स्वस्य च तद्विषयावष्टम्भदर्शनायाह । भाजनमिति । कपटमेव नाटकम् । अत्र बाष्पं नेत्रजलम् । स्तम्भः प्रतिबन्धः । मन्थरितो मन्दी-

---

१३३. चालयित्वा for चालयति A. B. Bh. C. Kl. K2.; मालदि इदा after चा-त्वा A.

१३४. भयवदि O. भगवदि K2. for भअवदि.

१३५. निःश्वस्य after काम० O; वत्से महाभागधेयजन्मतायाः फलस्य N.; महाभागजन्मतायाः फलस्य O. for महाफल०; अभिमत० for समीहित० A.; फलस्य for फल० D. K1. K2.

१३६. एदं A. एदं पवित्तं N. विवित्तं O. for सुविहिदं; N. om. एत्थ-वदी; उपविसदु for उवविसदु O.; भयवदी for भअवदी O.

१३८. भय० for भअ० O.; D. om. भअवदीए.

* दत्तमासनम् C. om.

काम० । निःश्वस्य । कुशलमिव ।

लव० । स्वगतम् । पत्थावणा क्खु एसा कवडणाडअस्स । प्रकाशम् । गुरुभवाहत्थम्भमन्थरिदकण्ठपडिलग्गणीसासं अण्णारिसं जेव्व भअवदीए वअणं । ता किं दाणिं उव्वेअकारणं भविस्सदि । (क)

काम० । नन्वयमेव चीरचीवरविरुद्धः परिचयः ।

लव० । कधं विअ । (ख)

काम० । अयि त्वमपि किं न जानासि ।

इदमिह मदनस्य जैत्रमस्त्रं सहजविलासनिबन्धनं शरीरम् ।

(क) प्रस्तावना खल्वेषा कपटनाटकस्य । गुरुकबाष्पस्तम्भमन्थरितकण्ठप्रतिलग्ननिःश्वासमन्यादृशमेव भगवत्या वचनम् । तत्किमिदानीमुद्वेगकारणं भविष्यति ।

(ख) कथमिव ।

कृतः । तादृशकण्ठे प्रतिलग्नो निःश्वासो यत्र तत् । परिचयो मालत्यभिष्वङ्गः । उद्वेगकारणमिति शेषः ।

१४७–१५२ इदमित्यादि । मालत्या इदं शरीरं विफलगुणातिशयं भविष्यतीति त्वं किं न वेत्सि । अनुचितजामातृसंबन्धशोचना-

---

१३९. निश्वस्य for निःश्वस्य Bh.

१४०. पत्थावणा for पत्थावणा O.; खु for क्खु Bh. K2. O.; °णाडअस्स Bh. नाडयस्स O. for° णाडअस्स.

१४१. गरुअ° B. K2. गरुय O. for गुरुअ; वाह्य° for वाह° K2.; वाहभरथ्थम्भ for वाहत्थम्भ N.; परिलग्गणिस्सासणिग्गमं K1. K2. परिलग्गणिग्गमं Bh. O. पडिलग्गणिग्गमं N. for पडि—सासं; निस्सासं for णीसासं B. C.

१४२. अण्णारिसं for अण्णारिसं K1. K2.; जेव्व A. B. C. D. O. विअ N. for जेव्व; भय° for भअ° O.; वयणं for वअणं O.; दाणीं A. D. ति एत्थ O. for दाणिं उव्वेय for उव्वेअ O. कालणं for कारणं N.

१४३. हुविस्सदि B. हविस्सदि N. for भविस्सदि ; त्ति after °स्सदि O.

१४४. N. om. ननु.

१४५. कहं for कधं D. K2. N. O.; विय for विअ O.

१४६. B. C. Om. त्वमपि ; K2. A. om. किं; वेत्सि for जानासि A.

अनुचितवरसंप्रयोगशोच्यं विफलगुणातिशयं भविष्यतीति ॥

मालती वैचित्यं नाटयति ।

लव० । अत्थि एदं णरेन्दवअणाणुरोहिणा अमच्चेण णन्द- १५०
णस्स पडिवण्णा मालदित्ति सअलो जणो अमच्चं जुगुच्छेदि। (क)

माल०। स्वगतम्। कधं उवहारीकिदम्हि राइणो तादेण। (ख)

(क) अस्त्येतन्नरेन्द्रवचनानुरोधिनामात्येन नन्दनस्य प्रतिपन्ना मालतीति सकलो जनोमात्यं जुगुप्सते ।

(ख) कतमुपहारीकृतास्मि राज्ञस्तातेन ।

वहम् । यतः । इह जगति यत्कामस्य जैत्रं जयनशीलमस्त्रं सहजविलासस्य निबन्धनं कारणं च । एतेनैव सहजविलासा जायन्त इत्यर्थः ॥ वरो जामातरि श्रेष्ठ इति विश्वः ॥ वैचित्यं विमनस्कत्वम् । नाटयति करोति । पितृनिन्दैव पूर्वशोकार्थ इति द्योतयति लवङ्गिका । [अस्त्येतदिति] । अत्र जुगुप्सते निन्दति । अत्रानुपहरणीयाप्युपहारीकृतेत्यनेन च्व्यर्थेन पितुर्गुणानभिज्ञत्वं सूचितम् । उपहारश्च मरणभरणप्रच्छागादिः क्रियत इति मरणतुल्यतास्य दर्शिता । इह पश्चात्तापनामा नाट्यालंकारः । यदाह ।

अनुतापातिरेकस्तु पश्चात्ताप उदाहृतः ॥ इति ।

---

१४९. वैचित्र्यं for वैचित्यं C. N.

१५०. एत्तं for अत्थि N.; जं after एदं N. णरिंदं for णरेन्द° O.; वयणा for वअणा° O.; णरेंदवअणोनुरोहेण for णरे—णा Kl., °णानु° for °णाणु° Bh., °रोधेण N. °रोधिणा O. for रोहिणा; नन्दणस्स अमच्चेण for अम–°णस्स O.; Kl. N. om. अमच्चेण.

१५१. पडिपण्णा B. C. Kl. K2. पडिण्णादा N. प्पडिवण्णा O. for पडिवण्णा; °दीति for °दित्ति K2; सयलो for सअलो O.; एव्व D. एव Kl. K2. after सअलो; B. om. अमच्चं; जुगछेदि O. जुगुत्थदि Kl. K2. जुउछुइ N. जुगुच्छदि Bh. for जुगुच्छेदि.

१५२. Kl. om. माल°–तादेण; B. Bh. om. स्वगतम्; कहं for कधं D. K2. N.; उव° for उव° O.; °कदम्मि for °किदम्मि Bh. K2; तातेण for तादेण K2.

काम० । आश्चर्यम् ।

गुणापेक्षागून्यं कथमिदमुपक्रान्तमथ वा
१५९ कुतोपत्यस्नेहः कुटिलनयनिष्णातमनसाम् ।
इदं त्वैदंपर्यं यदुत नृपतेर्नर्मसचिवः
सुतादानान्मित्रं भवतु स हि नो नन्दन इति ॥

माल० । स्वगतम् । राआराहणं क्खु तादस्स गुरुअं ण उण मालदी । (क)

१६० लव० । एव्वं जधा भअवदीए आणत्तं । अण्णधा तस्सिं वरे

(क) राजाराधनं खलु तातस्य गुरुकं न पुनर्मालती ।
(ख) एवं यथा भगवत्याज्ञप्तम् । अन्यथा तस्मिन्वरे दुर्दर्शनेति-

१५३–१६० बालत्वात्स्नेहाच्च तातस्य गुणानभिज्ञत्वं मालती न जानातीत्याशयेनाह । गुणेत्यादि । इदं कार्यं गुणनिरपेक्षममात्येन कथमारब्धम् । रूपादिमति पुरजने सति तद्रहितनन्दनाय मालतीदानं कथमुपक्रान्तमिति भावः । अत एवाश्चर्यम् । अथवा पक्षान्तरे । कुटिलनये परवञ्चननीतौ कुशलचित्तानां कुतोपत्यस्नेहः । नैवेत्यर्थः । स्नेहस्य निरुपाधुपकारेच्छारूपस्य नृपानुरञ्जनादावुपाधावभावादित्यर्थः । इदं यदुपक्रान्तं तदैदंपर्यमिदंपरम् । एतदभिप्रायकमिति यावत् ॥ चतुर्वर्णादित्वादिदंपरशब्दे ष्यञ् ॥ उत निश्चये वितर्के वा । यन्नृपतेर्नर्मसचिवो नन्दनः कन्यादानादस्माकं मित्रमनपकारी भवत्वित्येवमुपक्रान्तम् ॥ निष्णात इत्यत्र निनदीभ्यां स्नातेः कौशल इति षत्वम् ॥ उत निश्चयवितर्कयोरिति धरणिः ॥ कामोपचरणं नर्म । यदाह ।

१५३. आश्चर्यम् twice for आश्चर्यम् K1. K2. N.

१५७. सचिवो Bh. स भवान् N. भगवान् O. सचिवान् C. for सहि नो; मे for नो A.

१५८. B. O. om. स्वगतम्; खु for क्खु K1. K2. O.; वहुमदं Bh. बहुमदं B. C. D. K1. K2. गरुअं O. for गुरुअं; णो for ण N.

१६०. एवं A. B. सच्चं N. for एव्वं; जह for जधा B. Bh. C. O.; N. om. जधा; भअदीए K1. भयवदीए O. for भअवदीए; अण्णदा K1. अण्णहा N. O. अणधा Bh. for अण्णधा.

दुद्दंसणे अदिक्कन्तजोव्वणे किं त्ति ण विआरिदं अमच्चेण । (ख)

माल० । स्वगतम् । हा हदम्हि समुत्थिदाणत्थवज्जपडणा मन्दभाइणी । (क)

लव० । ता भअवदि पसीद परित्ताहि इमादो जीविदमरणादो पिअसहिं तवावि एसा दुहिदा जेव्व । (ख) १६५

काम० । अयि सरले किमत्र मया भगवत्या शक्यम् । प्रभवति

क्रान्तयौवने* किमिति न विचारितममात्येन ।

(क) हा हतास्मि समुत्थितानर्थवज्रपतना मन्दभागिनी ।

(ख) तद्भगवति प्रसीद परित्रायस्वास्माज्जीवितमरणात्प्रियसखीं तवाप्येषा दुहितैव ।

उपचारः स्त्रीपुंसयोर्मनोजन्मनिबन्धनः ।

स एवात्र परिज्ञेयो नर्मसंज्ञः प्रयोक्तृभिः ॥

इति भरतः ।

१६१–१७० इतीति दुर्दर्शनादिकम् । अत्र जीवितमपि निष्फलत्वदुःखबहुलत्वाभ्यां मरणकल्पं जीवितमरणम् । उक्तप्रबन्धेन मालतीनैराश्यं विधायाह । अयीति ॥ भगवत्येति कृत्यानां कर्तरि वेति तृतीया

---

१६१. दुद्दंसणो K1. K2. दुद्दंसणे Bh. for दुद्दंसणे; जोव्वणोत्ति Bh. °जोव्वणेत्ति B. °जोव्वणो K1. K2. for जोव्वणे; किन्ति K2. किंति O. किंत्ति Bh. K1. for किंत्ति A. om. त्ति; विआरितं Bh. विआरिअं A. विभाविदं D. for विआरिदं; O. om. अमच्चेण.

१६२. समुवत्थिदाणत्थ° A. K1. K2. समुत्थिदणत्थ° B. समुवत्थिदं अणत्थ° Bh. समुट्ठिदाणत्थ° D. समुपत्थिदाणत्थ° N. समुवट्ठिदाणत्थ° O. for समुत्थिदाणत्थ°; °पदणा A. N. °वेदना B. वडणं Bh. °वडणा C. K1. K2. O. for °पडणा.

१६३. °भाइणीए for °भाइणी Bh.; अहं after °भाइणी. B.

१६४. K1. om. ता; पसीददु भअवदी A. N. पसीद भअवदि Bh. °पसीद भयवदी O. for भअ°—सीद; पसीद twice for पसीद K1. K2.; परित्ताअहि N. परित्ताएहि O. for प—हि; अध K1. अज्ज K2. before इमादो; N. om. इमादो; एत्तो for इमादो O.; जीवण A. जीव N. जीवंत O. for जीविद.

१६५. पिय° K1. प्पिय° O. for पिअ°; सहीं for °सहिं A. B. K1. K2.; तवापि K1. K2. O. तुहवि N. for तवावि; दुहिद Bh. O. दुहिदिआ K1. K2. for दुहिदा; ज्जेव्व A Bh. C. D. O. ज्जेव B. एव्व N. for जेव्व.

१६६. अपि for अयि C. D.; भवत्या मया for म—त्या Bh.; D. K1. K2. N. O. om. मया; भवत्वा K1. K2. भगवत्याः O. for भगवत्या.

* °यौवने इति Com.

प्रायः कुमारीणां जनयिता दैवं च। यच्च किल कौशिकी शाकुन्तला दुष्यन्तमप्सराः पुरूरवसं चकम इत्याख्यानविद आचक्षते वासवदत्ता च संजयाय राज्ञे पित्रा दत्तमात्मानमुदयनाय प्रायच्छादित्यादि तदपि साहसाभासमित्यनुपदेष्टव्य एवायमर्थः।

सर्वथा

राज्ञः प्रियाय सुहृदे सचिवाय कार्या-
दुत्वात्मजां भवतु निर्वृतिमानमात्यः।

न तु षष्ठी। अशक्यमित्यकारप्लेषसंभवात्॥ गान्धर्वविवाहे कन्यावरौ प्रभवत इति प्रायःपदतात्पर्यम्। जनयितेति। न राजेति भावः। माधवविवाहे भूरिवसुरेव सानुग्रहः। अत एव सरल इत्युक्तम्। किल प्रसिद्धौ। कौशिकी कुशिकवंशजा। चकमे कामयते स्म। आख्यानं पुरावृत्तम्। इहाख्याननामा नाट्यालंकारः। यदाह।

आख्यानं तु तदुद्दिष्टं यत्पुरावृत्तकीर्तनम्॥ इति।

निदर्शननामा नाट्यालंकारोपि। यदाह।

कथनादन्यचेष्टानां साध्यसिद्धिर्निदर्शनम्॥ इति।

कल्पपदेनोपदेष्टव्यत्वसूचनम्।

---

१६७. D. om. प्रायः; प्रायशः Bh. हि Kl. K2. for प्रायः; तद्वंशज° Kl. तद्वंशजाः K2. before दैवं; N. om. किल.

१६८. °न्तमुर्वशी चाप्स° D. °न्तमुर्वशी वाप्स° Kl. K2. for °न्तमप्स° °प्सरस उर्वेशी पुरू° for °प्पराः पुरू° O.; चारमतेत्या° for चकम इत्या° N.

१६९. Kl. om. च; प्रदत्तम् Bh. C. दत्ताम् D. for दत्तम्; दत्ता आत्मा° for दत्तमात्मा° Kl. K2.; D. om. आत्मानम्.

१७०. D. Kl. om. तदपि; साहसिक्यम् A. Kl. K2. साहसकल्पम् D. N. for साहसाभासम्; N. Kl. om. इति; °देष्टव्यकल्पं A. °देष्टव्यकल्प एवायमर्थः Bh. °देष्टव्यमेतत् D. °दिष्टमेतत् Kl. K2. °देष्टव्यमेव N. देष्टव्यकल्पोयमर्थः O. for °देष्टव्य–र्थः.

१७१. Kl. K2. om. सर्वथा.

१७२. भार्यां for कार्यां C.

दुर्दर्शनेन घटतामियमप्यनेन
धूमग्रहेण विमला शशिनः कलेव ॥ १७९

माल० । साध्वं स्वगतम् । हा ताद तुमं पि मम णाम एव्वं त्ति सव्वधा जिदं भोअतिल्लाए । (क)

अव० । चिराइदं भअवदीए । णं भणामि अस्सत्थसरीरो महाभाओ माहवो त्ति । (ख)

काम० । इदं गम्यते । वत्से अनुजानीहि माम् । १८०

(क) हा तात त्वमपि मम नामैवमिति सर्वथा जितं भोगतृष्णया।

(ख) चिरायितं भगवत्या । ननु भणाम्यस्वस्थशरीरो महाभागो माधव इति।

१७२–१८४ अधुना साहसेपि प्रवृत्त्यर्थं मालत्यनुशयाय पितुर्वैरस्य च दोषमाह । राज्ञ इति । कार्यादाराधनादेर्न त्वदृष्टार्थमित्यर्थः । अनेन सचिवेन । वार्धक्यात्कौरूप्याच्च दुर्दर्शनेन । धूमग्रहेण राहुणोत्पातधूमग्रहेण वा । पीडाकारित्वाद्दुर्दर्शनेन वा । ग्रहणं ग्रहः । मालती जातानुशयाह । [हा तातेति] एवं निःस्पृह इत्यर्थः । भोगेति । स्वभोगाय त्वमेवं करोषीत्यर्थः । अत्र चिरायितं बहुकालमागतम् । इतीति । अतः शीघ्रं गम्यतामिति भावः । जनान्तिकमिति ।

उक्तस्याश्रवणं कार्यात्पार्श्वस्थैः स्याज्जनान्तिकम् ॥

---

१७६. N. O. om. साध्वं; K1. K2. om. स्वगतम्; वि for पि N.; B. om. मम; मह for मम N.; णाम मम for मम णाम Bh.; एव्वत्ति Bh. एवं ति O. for एव्वं त्ति; ति for त्ति K1.

१७७. सव्वहा for सव्वधा N.; भोग° for भोअ° K1. K2. O.; तिल्लीए C. तिल्लाए K1. for तिल्लाए.

१७८. चिरायिदं for चिराइदं K2. O.; भअवस्या K2. भयवदीए O. for भअवदीए; माहवी before णं instead of before त्ति N.; असुत्थ° A. असत्थ° B. Bh. C. D. K1. K2. for अस्सत्थ°; °चित्तो for °सरीरो N.; क्खु D. सो K1. K2. N. before महा°.

१७९. °णुभावो N. °माअ O. for °माओ.

१८०. A. om. इदं; K2. om. वत्से; गमनाय after माम C. D. K1. K2. N.

लव० । जनान्तिकम् । सहि मालदि संपदं भअवदीसआसादो तस्स महाणुभावस्स उग्गमं जाणीमो । (क)

माल० । सहि अत्थि मे कोदूहलं । (ख)

लव० । प्रकाशम् । को एसो माहवो णाम जस्स भअवदी
१८५ सिणेहगुरुअं अत्ताणं धारेदि । (ग)

काम० । अप्रास्ताविकी महत्येषा कथा ।

(क) सखि मालति सांप्रतं भगवती*सकाशात्तस्य महानुभावस्योद्गमं जानीमः ।

(ख) सखि अस्ति मे कौतूहलम् ।

(ग) †क एष माधवो नाम यस्य भगवती स्नेहगुरुकमात्मानं धारयति ।

इति भरतः । लवङ्गिका मालतीं साकाङ्क्षयति [सखि मालतीत्यादि] । उद्गममुत्पत्तिम् । अस्तिमे कुतूहलम् । तत्पृच्छेत्यर्थः । अत्र [लव० वा०] यस्य कृत इति शेषः ।

१८६–१९० सकृत्रिमावहित्थमाह । अप्रास्ताविकीति । अयमा-

---

१८१. N. om. संपदं; संपदि for संपदं O.; भअवदीए A. Bh. D. N. भयवदी O. for भअवदी°; सयासादो for सआसादो O.

१८२. °णुभाअस्स A. Bh. C. K1. °भाअस्स D. °णुहावस्स N. for °णुभावस्स.

१८३. अपवार्य before सहि B. C.; तहैव before सहि B.; तथैव अत्थि सहि for सहि अत्थि Bh.; सखि for सहि K2.; एत्थ before मे N.; कुदूहलं for कोदूहलं K2.

१८४. K1. om. लव०; भअवदि A. भयवदि O. before को; एस for एसो O.; O. om. णाम; जोअं (छाया-यस्य) K1. जं K2. जस्सिं N. जेण O. for जस्स; भयवदी for भअवदी O.; एत्थं after °वदी N.

१८५. सणेह for सिणेह K1. K2.; गरुअं B. Bh. C. D.; उरुअं K1. गरुयं O. for गुरुअं; अत्ताणअं Bh. C. D. अप्पाणअं K1. K2. for अत्ताणं.

१८६. अप्रस्ताविकी A. C. D. K2. अप्रस्ताविनी Bh. अप्रस्तावनीया N. for अप्रास्ताविकी; एव after महती D.

* भगवत्याः Com. † Com. follows A.

लव°। तथावि आचक्खदु भअवदी। पसादं करेदु। (क)

काम°। श्रूयताम्। अस्ति विदर्भाधिपस्य नरपतेरमात्यः समग्रधुर्यपुरुषप्रकाण्डचक्रचूडामणिर्देवरातो नाम यमशेषभुवनमहनीयपुण्यमहिमानमात्मनः सतीर्थ्यं पितैव ते जानाति[१९०] योसौ यादृशश्चेति। अपि च।

व्यतिकरितदिगन्ताः श्वेतमानैर्यशोभिः
सुकृतविलसितानां स्थानमूर्जस्वलानाम्।

[क] तथाप्याचष्टां *भगवती। प्रसादं करोतु।

शयः। माधवगुणस्तुतावुपाधिमाशङ्क्य मालत्या अनादरे मम तटस्थता न घटेत। अतः सानुबधं पृच्छत्विति सानुबन्धमियमप्याहेति। समग्रः संपूर्णः। धुरि कार्यभारे साधुर्धुर्यो मन्त्री। प्रकाण्डं प्रशस्तम्। चूडामणिरिव चूडामणिः श्लाघ्यः। सर्वमन्त्रिप्रधानमित्यर्थः। महनीयं पूज्यम्। पुण्यं प्रशस्तम्। यद्वा। महनीयौ पुण्यमहिमानौ यस्य तम्। सतीर्थ्य एकगुरुः। समानं तीर्थमुपाध्यायो यस्य। तीर्थे इति [समानतीर्थे वासीति?] यत्प्रत्ययः।

१९२–१९५ व्यतिकरितेत्यादि। इह जगति कथमपि शापादिना तादृशाः स्वर्गिणः संभवन्ति। कीदृशाः। यशोभिर्व्याप्तदिक्स्वरूपाः।

---

१८७. तथावि B. K2. तहवि D. N. तहावि K1. for तधावि; चक्खदु B. अक्खदु Bh. आक्खेदु K1. आचक्खेदु K2. आचक्खिअदु N. कहेदु O. for आचक्खदु; मे before भअवदी A. B. Bh.; भयवदी for भअवदी O.; मे after प्रसादं B.; करेदु-°पसादं for पसा-दु O.; करोउ for करेदु K2.

१८८. °धिपतेरमा° for °धिपस्य नरपतेरमा° A. D. N., स after °रमात्यः K1.

१८९. समस्त° for समग्र° B. D. K1. K2. O.; B. Bh. C. N. O. om. धुर्यः; N. om. चक्र.

१९०. B. om. आत्मनः सतीर्थ्यं; स्वतीर्थ्यात् for सतीर्थ्यं N.

१९१. D. om. योसौ; तादृशः after यादृशः B. Bh. *कथयतु Com.

अकलितमहिमानः केतनं मङ्गलानां
१९९ कथमपि भुवनेऽस्मिंस्तादृशाः संभवन्ति ॥

माल० । जनान्तिकम् । साहि तं क्खु भअवदीगाहिदणाम-हेअं सव्वदा तादो सुमरेदि । (क)

लव० । साहि समं किल विज्जाहिगमो किदो त्ति तक्कालवेदिणो मन्तअन्ति । (ख)

(क) सखि तं खलु भगवतीगृहीतनामधेयं सर्वदा तातः स्मरति ।

(ख) सखि समं किल विद्याधिगमः कृत इति तत्कालवेदिनो मन्त्रयन्ते ।

श्वेतमानैरिति वर्तमाननिर्देशेन तेषामभिनवयशोयोगित्वमुक्तम् । बलवतां पुण्यविपाकानां त एव स्थानम् । त एव महाप्रकृतिन इत्यर्थः । यद्वा । पुण्यविलासानां बलवतां च त एव स्थानम् । तथा च पुण्यवन्तो बलवन्तश्च त एवेत्यर्थः । अत एवाधिकमहत्त्वाः । मङ्गलानामर्थसिद्धीनां केतनं निवासः ॥ केतनं तु ध्वजे कार्ये निमन्त्रणनिवासयोरिति विश्वः ॥

१९६–१९९ अत्र नामाग्रहणं श्वशुरत्वेनाङ्गीकारात् । गुरोर्नाम न गृह्णीयादिति स्मृतेः । तं देवरातम् । अत्र समं तुल्यं यथा तथा पाठः कृतो देवरातभूरिवसुभ्याम् । मन्त्रयन्ते कर्णाकर्णिकया वदन्ति ।

---

१९६. अपवार्य D. K1. for जनांतिकं; A. B. Bh. C. K2. O. om. ज–कं after माल०; एदे for तं K1.; N. om. क्खु; खु for क्खु Bh. K1. K2. O.; भयववदी for भअवदी O.; °वदीए for °वदी N.; गहिअ B. घहीद K2. गहीद O. for गहिद; °धेअं A. C. D. K1. °धेयं Bh. K2. °हेयं O. for °हअं; सव्वहा for सव्वदा N.; तातो for तादो K2.

१९७. सुमरादि for सुमरेदि K1.

१९८. B. om. किल; क्खु A. खु K1. for किल; भअवदीए तित्थसआसादो after किल N.; विज्जधि° B. Bh. K1. K2. विज्जाधि° C. for विज्जहि°; कदो for किदो A. Bh. C. D. K1. N.; संवेदिनो A. वेदी जणो B. Bh. C. वेदिनो K1. for वेदिणो.

१९९. मन्तन्ति A. O. मन्तेदि. B. Bh. C. मन्तेन्ति K1. मन्त्रयते K2. for मन्तअन्ति.

काम० । तत उदयगिरेरिवैक एव २००
स्फुरितगुणद्युतिसुन्दरः कलावान् ।
इह जगति महोत्सवस्य हेतु-
र्नयनवतामुदियाय बालचन्द्रः ॥

लव० । जनान्तिकम् । सहि अवि णाम माहवो भवे । (क)

काम० । असौ विद्याधारः शिशुरपि विनिर्गत्य भवना- २०५
दिहायातः संप्रत्यविकलशरच्चन्द्रमधुरः ।

(क) सखि अपि नाम माधवो भवेत् ।

२००–२०३ प्रकृतसिद्ध्यर्थं पितृगुणानुक्त्वा नायकगुणानाह तत इत्यादि । ततो देवरातादेक एव बालश्चन्द्र उदियाय । एको बालो जात इत्यर्थः । यद्वा । बालश्चन्द्र इव बालचन्द्रः । एकापत्यतया स्नेहाधिक्यसूचनार्थमेकग्रहणम् । धरायामेकाधिपत्यकथनाय वा । कीदृशः । स्फुरिता व्यक्तीकृता गुणानां शीलादीनां या द्युतिरौज्ज्वल्यं तया सुन्दरः । यद्वा । स्फुरितगुणद्युतिश्चासौ सुन्दरश्चेति । कलावाँश्चतुःषष्टिकलायुक्तः ।

नायके वर्णयेद्धूर्ती कलावत्त्वं च रम्यताम् ॥

इति भरतः । नयनवतां चक्षुष्मतां महोत्सवस्य कारणम् । नेत्रप्रीतिजनकत्वात् । यथोदयगिरेरेको बालचन्द्रोभिनवशरद्युदेति सोपि स्फुरितगुणोन्मीलद्धैर्मल्यादिका या द्युतिः प्रभा तया सुन्दरः कान्तः कलावान्नेत्रानन्दहेतुश्च भवति ।

२०५–२०९ बालत्वादितस्तदनागमनमाशङ्क्याह । असाविति । असौ शिशुरपि बालोपि संप्रतीहागतः । अस्तीति शेषः । कीदृशः । विद्याधारः । त्रयीतदङ्गविद्यावित् । बालः पञ्चदशवर्षवयस्कः । बालो वाप्यूनषोडश इति वचनात् । भवनाद्विनिर्गत्य बहिर्भूय । अनेन

---

२०४. K2. om. सहि ; सो after माहवो B.; हवे for भवे N.

यदालोकस्थाने भवति पुरमुन्मादतरलैः
कटाक्षैर्नारीणां कुवलयितवातायनमिव ॥

अत्र बालसुहृदा मकरन्देन सह विद्यामान्वीक्षिकीमधिग-
२१० च्छति । एष माधवो नाम ।

माल०। सानन्दं जनान्तिकम् । सहि सुदं तुए । (क)

लव० । सहि कुदो वा महोदहिं वज्जिअ पारिजादस्स उग्ग-
मो त्ति । (ख)

(क) सखि श्रुतं त्वया ।
(ख) सखि *कुतो वा महोदधिं वर्जयित्वा पारिजातस्योद्गम इति।

पथिकत्वमपास्तम् । यौवनमाह । अविकलः पूर्णो यः शारदशशी तस्मान्मनोज्ञस्तद्वद्वा मनोज्ञः । यद्दृष्टिविषये पुरं नारीणां कटाक्षैः संजात-नीलनलिनगवाक्षमिव भवति ॥ कुवलयितमित्यत्र तारकादित्वादितच् ॥ कीदृशैः । उन्मादतरलैः कामावेशचपलैः । यदायं रथ्यया याति तदो-न्मादान्विता युवत्यो वातायनेनैनं पश्यन्ति । तत्तु तन्नयनैः संजातकुव-लयमिव लक्ष्यत इत्याशयः । अनेन विद्यावत्त्वनूतनत्वरम्यत्वादिकमुक्त-म् । विद्यामित्यनेन विद्यावशेनायात इत्यनौद्धत्यं संबन्धार्थदेवरात-प्रस्थापनगोपनं च कृतम् ।

२११–२१३ सखि श्रुतं त्वया । एतेनाभिलाषं दर्शयति ।

---

२०७. °मुद्दाम for °मुन्माद N.

२०९. तद्दु for अत्र N.; एव after अत्र O.; N. om. सह; अधीते for अधिगच्छति Kl. N. O.

२१०. स before एष Bh., K1. K2. O.; एव for एष A. C.; इति after नाम A. N. O.

२११. लवंगिए after सहि D. K1. K2. N. O.; कहं महाउलप्पसूदो सो महाभाओ after सुदं N.; तुमए A. तए K1. for तुए; N. O. om. तुए.

२१२. जनांतिकं before सहि N.; तह ज्जेव B. तथैव Bh. त एवK1. before सहि K1. om. वा, °दधिं C. O. °अहिं K1. N. for °दहिं; उज्झिअ B. वज्जिय O. for वज्झिअ; °आअस्स A. Bh. C. K1. °जाअस्स N. °जायस्स O. for °जादस्स; आअमो B. आगमो C. for उग्गमो.

२१३. K1. N. om. त्ति. * Com. om. सखि.

नेपथ्ये शङ्खध्वनिः।

काम°। अहो कालातिपातः। संप्रति हि। २१५

क्षिपन्निद्रामुद्रां मदनकलहच्छेदसुलभा-
मवाप्तोत्कण्ठानां विहगमिथुनानां प्रथमतः।
दधानः सौधानामलघुषु निकुञ्जेषु घनता-
मसौ संध्याशङ्खध्वनिरनिभृतः खे विचरति॥

वत्से सुखं स्थीयताम्। इत्युत्तिष्ठति। २२०

लवङ्गिकैतद्वयति। [कुतो वेति]। अनेन महाकुलीनत्वं न तु कामन्दक्याः कल्पनेति दर्शितम्।

२१५–२१९ कालातिपातः कालक्षेपः। क्षिपन्नित्यादि। संप्रति गगनेयं संध्याशङ्खध्वनिः संध्याकालसूचकः शङ्खशब्दो विचरति श्रूयते। किं कुर्वन्विहगमिथुनानां चक्रद्वन्द्वानां प्रत्यासन्नविरहात्सोत्कण्ठानाम्। निद्रैव मुद्रा। संभाषणप्रतिरोधात्। तां प्रथमतः क्षिपन्हरन्। कीदृशीम्। मदनकलहः सुरतं तस्य च्छेदोवसानं तेन सुलभाम्। यद्वा॥ मदनकलहश्छिद्यतेनेनेति घञ्। पुंसि संज्ञायामिति वा घः॥ मदनकलहच्छेदो रतं ततः सुलभाम्। सुरतश्रमजनितामित्यर्थः। संप्रति धवलगृहाणां महत्सु गह्वरप्रदेशेषु प्रतिध्वनितो घनतां दधानः। अत एवानिभृतः प्रौढः सन्विचरति। यद्वा। प्रथमतः खे विचरति तदनु दिवाकेलिकलह-

---

२१४. K1. N. om. नेप°—निः.

२१५. वेला° for काला° D.

२१६. हरन् for क्षिपन् K1.; सुभगा° for सुलभा° Bh.

२१७. °मुपात्तोत्कण्ठानां N. मुपात्तोत्कम्पानां O. for °मवाप्तोत्कण्ठानाम्.

२१९. अतिभृतः for अनिभृतः A.

२२०. तदुत्तिष्ठामः for वत्से-ताम् A. B. Bh. C. D. K2. Bh. om. इति; C. N. om. इत्यु-ति; उत्तिष्ठन्ति for उत्तिष्ठति A. D. K1.

माल० । अपवार्य । कधं उवहारीकिदम्हि राइणो तादेण राआ-
राहणं क्खु तादस्स गुरुअं ण उण मालदी । सान्नम् । हा ताद
तुमं पि णाम मम एव्वं त्ति सव्वधा जिदं भोअतिण्हाए । सानन्दम् ।
कधं महाकुलप्पभवो वि सो महाभाओ । सुभणिदं पिअसहीए
२२५ कुदो वा महोदहिं वज्जिअ पारिजादस्स उग्गमो त्ति । अवि णाम
तं पुणो वि पेक्खिस्सं । (क)

(क)*कथमुपहारीकृतास्मि राज्ञस्तातेन राजाराधनं खलु तातस्य
गुरुकं न पुनर्मालती । हा तात त्वमपि नाम ममैवमिति सर्वथा
जितं भोगतृष्णया । कथं महाकुलप्रभवोपि स† महाभागः । सुभणितं
प्रियसख्या कुतो वा‡ महोदधिं वर्जयित्वा पारिजातस्योद्गम इति । अपि
नाम तं पुनरपि प्रेक्षिष्ये ।

च्छेदात्सौधसमीपतरुनिवासकलविङ्कमिथुनानां निद्रामुद्रां क्षिपन्विचर-
ति । ते हि प्रबलशङ्खध्वनिनिबोधिताः कलकलं कुर्वन्तीति भावः ।

२२१–२२९ अपवार्य निभृतम् ।
निगूढभावसंयुक्तमपवारितकं भवेत् ॥

---

२२१. सानंदं स्वगतं for अपवार्य N.; सालं सहि after अपवार्य D.; N. om. कधं—सानंदं (l. 223); कहं for कधं D.; कदम्हि for किदम्हि A. Bh. D. K1. K2.; D. om. तादेण; परा° for राआ° K1.

२२२. °राधणं for °राहणं K1.; खु for क्खु K1. K2. O.; गरुअं B. Bh. D. K1. बहुमदं K2, गरुयं O. for गुरुअं; न for ण O.; मालती for मालदी Bh.; D. K2. om. सान्नं.

२२३. तुवम्मि for तुमंपि K1.; वि for पि Bh. O.; मम णाम for णाम मम K1. O.; B. om. मम; एव्वत्ति Bh. एवत्ति K1. एवन्ति K2. O. for एव्वं त्ति; B. om. त्ति; सव्वदा for सव्वधा K2; भोग for भोअ K1. K2.; तल्लाए for तिल्लाए K1.

२२४. B. Bh. C. om. कधं; कहं for कधं K1. K2. N.; उल for कुल N.; प्पहवो D. K2. द(प)हवो K1. प्पसूदो N. O. for प्पभवो; N. om. वि; B. Bh. C. om. वि सो; हि for वि D.; °णुभागो A, भागो B, for भाओ; सुदु for सु D. N. O.; प्पिय for पिअ O.

२२५. तदो व for कुदो वा K1.; °दधिं C. O. °आहिं K1. N. °दधि K2. for °दहिं; डज्झिअ B. वज्जिय O. for वज्जिअ; आअस्स A. Bh. C. K1. °जाअस्स N. °जायस्स. O. for °जादस्स; आअमो B. अगमो C. for उग्गमो.

२२६. K2. om. तं; डणो for पुणो; N.; N. O. om. वि; पेक्खे N. प्पेक्खिस्सं O. for पेक्खिस्सं.

* सखि कथम् Com. † प्यसौ Com. ‡ Com. om. वा.

लव० । अवलोइदे इदो इदो एदिणा सोवाणेण ओदरम्ह । (क)

काम० । अपवार्य । साधु संप्रति मया तटस्थयैव मालतीं प्रति निसृष्टार्थदूतीवृत्तस्य लघूकृतो भारः । तथा हि ।

वरेऽन्यस्मिन्द्वेषः पितरि विचिकित्सा च जनिता २३०
पुरावृत्तोद्गारैरपि च कथिता कार्यपदवी ।

(क) अवलोकिते इत इत एतेन सोपानेनावतरावः ।

इति भरतः । अधुना मनःप्रविष्टसाहसवाञ्छया ब्रूते [कथं महाकुले इत्यादि] । [लव० वा०] संजननेनेति पाठे संजननं सोपानमेव । तटस्थतया घटितकत्वेन साधुत्वम् । निसृष्टार्थेति ।

स्त्रीपुंसयोराशयमादधाना स्वयं च कार्यं प्रतिपादयन्ती ।
सृष्टार्थिका सा परदारयोगे दूती नियोज्या बहुधा सुधीभिः ॥

इति भरतः । मालतीं प्रतीत्यनेन मदयन्तिकां प्रति विद्यत एवेति भावः ।

२३०—२३५ प्रकृते निष्पन्नं स्वव्यापारमाह । वर इत्यादि । अन्यस्मिन्वरे नन्दने द्वेषः कारितः । पितरि निन्दा जनिता । पुरावृत्तोद्गारैः शकुन्तलादीनां पितृनिरपेक्षात्मदानकथनैः कार्यपरिपाटी कथिता ।

---

२२७. अव° for लव° N. ; N om. अव-इदो इदो; A. K1. K2. om. one इदो; एहि before एदिणा A. C. K1. K2. O. ; एदेण for एदिणा N. ; शंजवणेण K1. सञ्जवणेन K2. सोपाणमग्गेण N. for सोवाणेण ; उदरह्म Bh. ओसरह्म. K1. अवयरह्म O. for ओदरह्म.

२२८. अवलोकिते before साधु N.

२२९. दूतीकृत्यस्य A. दूतीकल्पस्य C. O. दौत्यस्य N. for दूतीवृत्तस्य; लघु° for लघू° D. ; Bh. K1. K2. O. om. तथाहि; कुतः for तथाहि N.

१६६. पल्लविद for पल्लविअ Bh. K1. K2. N. O.; °लुव्वेलन्त B. °लुव्वेल Bh °लव्वेल K1. °लोद्वेलद् K2. °लुव्वेल N. O. for °लुव्वेलन्त; K2. N. om. चन्द; °न्दिकोद्दाम K2. °ण्दिउद्दाम N. °ण्डिमुद्दाम O. for °न्दिओहाम; Bh. C. om. उद्दाम.

१६७. दलित Bh. विदलिअ N. for दलिद; विभा° for विहा° A. Bh. D. K1. K2. N.; गमेदि after मुहाइं D. K2.; D. om. इमेअ; N. om. अ; °लसिअ for °लसिद N.; दुग्ध for दुद्ध K2.

१६८. D. om. सिन्धु; वारिराशि Bh. राशि C. धारा K1. N. O. for सिन्धु; °लज्जल K1. °लुज्जण K2. for °लुज्जल; ज्जोण्हा for जोण्हा Bh.; Bh. K1. K2. N. O. om. जल; पक्खा° Bh. K1. K2. N. विख्खा O. for प्पक्खा; °लिअ for °लिद A. N.; गअणाङ्गणा A. गअणहंगणा B. णहंगणा Bh. O. णहोङ्गणा K1. णहोङ्गणाः K2. णहंकणा N. for गअणङ्गणा; मलिअ for मलिद N.

पाडलावउलणिम्महणबहलपरिमलुग्गारसंवलणमसिणमंसला-
१७० अन्तमलअमारुदुद्धूमाविददहदिसामुहा वसन्तरअणीपरिणाहा
अणत्थकारिणो भविस्सन्ति पिअसहीए त्ति । (क)

काम० । लवङ्गिके

यदि तद्विषयोनुरागबन्धः
स्फुटमेतद्धि फलं गुणज्ञतायाः ।

नयसृणमांसलायमानमलयमारुतोद्धूमायितदशदिङ्मुखा वसन्तरज-
नीपरिणाहा अनर्थकारिणो भविष्यन्ति प्रियसख्या इति ।

द्रुमः । संवलनं मिश्रीभावः । मसृणं मन्दम् । मांसलः पुष्टः । धू-
मायितं धूमेनेवाकुलीकृतम् । परिणाह आभोगः ।

१७३–१७७ एवं श्रुत्वा कामन्दकी तटस्थेवाह । यदीत्यादि । यदि तद्विषयोनुरागस्तदा गुणज्ञतायाः प्रव्यक्तमेतद्विशिष्टं फलम् । तदा सैव गुणं जानातीत्यर्थः । एतद्धीति पाठ एतद्गुणज्ञतायाः फलमेवेत्यर्थः । हिरवधारणे । इति नन्दितमानन्दं प्रापितमपि मे हृदयम-

---

१६९. पाटल A. पाटला C. D. पाडल N. for पाडला°; वकुल Bh. मडल D. for वडल; Kl. om. वडल; मुडल after वडल K2.; णिग्गहन्त Bh. पसरन्त K2. णिम्महंत O. for णिम्महण; N. om. बहल; मसु° for मलु° Kl.; °प्फाल K2. °प्पीड N. °प्पील O. for °ग्गार; संदलण C. संवलन Kl. संकलण N. O. for संवलण; Bh. om. मसिण; मंसल Bh. मांसलाअन्त K2. for मंसलाअन्त.

१७०. °अमाण D. °यमाण Kl. °यंत O. for °अन्त; मलय for मलअ Kl. O.; °दधूमा° N. °उद्धुमा° O. for °दुद्धूमा°; °विद for °विद K2.; Kl. om. दह; दस for दह A. D. K2. N. O.; दिहा for दिसा B. Bh. C., N. om. वसन्त; रअणि for रअणी Kl.; रअणीपरिमाणा after °न्ति instead of रअणीपरिणाहा after मुहा N.; °णामा for °णाहा B.

१७१. होंति N. होअंत्ति O. for भविस्सन्ति; अवि before पिअ N.; प्पिय for पिअ O.; Kl. om. त्ति.

१७२. ननु before लव° Bh. K2. O.; Kl. om. लवङ्गिके.

१७४. °द्धिफलं for °द्धि फलं D.

इति नन्दितमप्यवस्थयास्या १७९
हृदयं दारुणया विदीर्यते मे ॥

माध० । स्थान एव हृदयोद्वेगो भगवत्याः ।

काम० । अहो प्रमादः ।

प्रकृतिललितमेतत्सौकुमार्यैकसारं
वपुरयमपि सत्यं दारुणः पञ्चबाणः। १८०
चलितमलयवातोद्भूतचूतप्रसूनः
कथमयमपि कालश्चारुचन्द्रावतंसः ॥

लव० । अण्णं च जाणिदं भोदु भअवदीए। एदं माहवपडि-

(क) अन्यच्च ज्ञातं भवतु भगवत्या । एतन्माधवप्रतिच्छन्दकस-

स्या अवस्थया विदार्यते । एतदवस्थतया मरणमप्यस्याः संभाव्यत इति भावः । स्थाने युक्तम् । स्थानेशब्दोव्ययो योग्यवाची । हल्लासो हृदयशोषः ।

१७९–१८६ प्रकृतीत्यादि । अस्या वपुरिदं स्वभावसुन्दरं सौकुमार्यमेवैकः सारः स्थिरांशो यत्र तत् । एतत्सत्यं निश्चितम् । अयमेव कामचरितानुभावात्कामोप्ययं निर्दयः । अहोपि सत्यम् । पञ्चबाण

---

१७६. °हृदयं for हृदयं K1.; विदार्यते for विदीर्यते A. Bh. K2. N. Com.

१७७. अहो before स्थाने N.; खलु for एव N.; O. om. एव; हल्लासो A. K2. Com. उल्लासो K1. हृदयस्योल्लापो N. for हृदयोद्वेगो; भवत्याः for भगवत्याः B. C.

१७८. K2. O. om. काम० ।; प्रसादः for प्रमादः Bh.

१७९. लुलित° for ललित° D.; °यैस्य सारं for °यैकसारं C.

१८१. वलित C. K1. ललित K2. for चलित; प्रसूतिः for प्रसूनः C.

१८२. °भासः for °तंसः K1.

१८३. अण्णच for अण्णं च O.; अ for च C. N.; होदु for भोदु N. O.; इदं K2. तं O. for एदं; च B. Bh. C. O. अ K2. N. before माहव; °पाडि° for पडि° O.

छन्दअसणाहं चित्तफलअं। मालत्याः स्तनांशुकमपनीय दर्श-
१८५ यति। एसा वि तस्स ज्जेव्व सहत्थविरइदत्ति कण्ठावलम्बिदा
बउलमाला जीवणं पिअसहीए त्ति। (क)

माध०। सस्पृहम्।

जितमिह भुवने त्वया यदस्याः
सखि बकुलावलि वल्लभासि जाता।

नार्थं चित्रफलकम्। एषापि तस्यैव स्वहस्तविरचितेति कण्ठावलम्बिता बकुलमाला जीवनं* प्रियसख्या इति।

इत्यनेनैकबाणापेक्षया दुःसहत्वमुक्तम्। अयमपि कालश्चलन्मलयानिलकम्पितचूतपुष्पश्चारुचन्द्रभूषणश्च। कथमिति शिरश्चालने। हिमादेरपगमाच्चारुचन्द्रत्वम्। तदीदृशेनर्थहेतौ कथमियं जीविष्यतीत्यहो प्रमादः। अत्र [ल० वा०] नाथपदेन चित्रगतस्यापि माधवस्य मालतीनाथत्वं ध्वनितम्। विरचितेति हेतोः। जीवितफलकत्वाज्जीवितम्। कार्यकारणयोरभेदात्।

॥१८७–१९२ स्तनांशुकापनयनेन व्यक्तस्तनदर्शनात्सस्पृहम्। जितमित्यादि। सखि बकुलमाले त्वयेह भुवने जितम्। यतः प्रौढमृणालदण्डपाण्डुरमनोहरस्तनविस्तारविलासपताकेवास्या मालत्या

---

१८४. छन्द for छन्दअ A.; सणाधं for सणाहं K2.; °फलहअं for °फलअं Bh. K1.; °लती for °लत्याः K1; K2. om. मालत्याः; K1. K2 N. om. दर्शयति.

१८५. पि K2. य O. for वि; हत्त for हत्थ K1.; °इअत्ति B. Bh. C. °इदा इति K2. for °इदत्ति; कण्डा° for कण्ठा° K1.; °म्बिआ K2. °म्बिआ N. for म्बिदा.

१८६. जअिणं B. जीविदं K1. O. संजीवणं N. for जीवणं; प्पिय for पिअ O.; K1. K2. N. om. त्ति; इति बकुलमालां दर्शयति after सहीए K1. N.

१८७. K2. om. सस्पृहम्.

१८८. °मिव for °मिह A.; भुवनं for भुवने N.

* जीवितं Com.

परिणतबिसकाण्डपाण्डुमुग्ध- ११०
स्तनपरिणाहविलासवैजयन्ती ॥

नेपथ्ये कलकलः। सर्वे आकर्णयन्ति।

पुनर्नेपथ्ये। रे रे संकरघराधिवासिणो जणवदा एसो क्खु जोव्वणारम्भगव्वसंभरिददुव्विसहामरिसरोसवइअरबलामोडि- अविहडिदुग्घाडिदलोहपञ्जरणिबद्धसिङ्खलाणिरोहपडिभङ्गसंक- ११५

(क) रेरेशंकरगृहाधिवासिनो जानपदाः एष खलु यौवनारम्भगर्व-* संभृतदुर्विषहामर्षरोषव्यतिकरबलात्कारविघटितोद्घाटितलोहपञ्जर- निबद्धशृङ्खलानिरोधप्रतिभङ्गसंकलितनिजलीला†विलासोद्वेल्लदुह-

वल्लभा जातासि। मालतीवल्लभत्वात्सखीत्युक्तम्। हृदयधारणेन वल्ल- भेत्युक्तम्। तथा च मालत्यालिङ्गनं तव संपन्नं न ममेति भावः। कलकलः कोलाहलः।

१९३–२०४ अत्रैष व्याघ्रः क्रुद्धयमविलासं कुरुते। सर्वं भक्षय- तीत्यर्थः। मठाच्छात्रादिगृहान्निर्गत्य। कीदृशः। यौवनारम्भेण प्रवृद्धौ

१९०. दण्डपाण्डुमुग्ध K2. O. दंडकांडपांडु N. for काण्ड°पाण्डुमुग्ध.

१९१. विशाल for विलास B. Bh.

१९३. N. om. पुन-ष्ये; अरे अरे Kl. अरेरे K2. अरे O. for रेरे; °रहरा° Bh. °रपुर Kl. °रडर K2. O. राहिवास N. for °रघरा°; अहिवासिणो B. Bh. णिवासिणो Kl. O. वासिणो K2. N. for अधिवासिणो; जाणवदा Bh. जणा C. D. जणपदी Kl. जाणपदा N. जाणव्वदा O. for जणवदा; सो for एसो A.; खु for क्खु K2.

१९४. णव before जोव्व° K2. O.; जोव° for जोव्व° Kl.; D. Kl. K2. N. om. गव्व; °भरिदु° Bh. °भरिअदु° N. ° रांभेद O. for °भरिददु°; °मपरिस for °मरिस Kl.; Bh. C. om. रोस; प्पसर for रोस O.; व्वइ° Kl. व्वदि° K2. for वइ°; °थलरा° Kl. °करबला° K2. for °अरबला°; °मोडि A. B. Bh. Kl. O. मोडण K2. for °मोडिअ.

१९५. विघाइदोद्घाटिद K2. विघडिअ N. for विहडिदुग्घाडिद; K2. om. बद्धसिङ्खला; पडिभङ्ग A. बद्ध Kl. परिलग्ग N. for णिबद्ध; N. om. सिङ्खलाणिरोहपडिभङ्ग; संगलिद B. C. O. संकुलिद D. K2. संगलिअ N. for संकलिद.

* Com. om. गर्व. † विलासपर्यन्तोद्वेल्लदुच्छलद्दह° Com.

लिदणिअलीलाविलासुव्वेल्लन्तबहलुत्तुङ्गलङ्गूलविअडवेजअन्ति-
आडम्बरुद्दामसरीरसंणिवेसो मडादो अवक्कमिअ तक्खणसतिण्ह-
कवलिदाणेअदेहिंदेहावअवमज्झणिट्ठुरट्ठिखण्डटंकारकडकडाअ-
न्तकरवत्तकठिणदाढाकरालमुहकन्दरो पअण्डवज्जणिग्घाददा-

लोत्तुङ्गलाङ्गूलविकटवैजयन्ति*काडम्बरोद्दामशरीरसंनिवेशो मठाद-
पक्रम्य तत्क्षणसतृष्णकवलितानेकदेहिदेहावयवमध्यनिष्ठुरास्थिखण्ड-
टंकारकटकटायमानकरपत्रकठिनदंष्ट्राकरालमुखकन्दरः प्रचण्डवज्र-

यौ दुःसहावक्षान्तिक्रोधौ तयोर्मिलनेन यो बलत्कारस्तेन विघटितं त्य-
क्तबन्धीकृतमुद्घाटितं मोटितं च यल्लोहपञ्जरं तत्र प्रतिबद्धशृङ्खला-
निरोधप्रतिभङ्गो विपरीतभङ्गस्तेन संकलिता मिलिता या निजलीला
तद्विलासपर्यन्त उद्वेल्लत्कम्पमानोत एवोच्छलल्लूर्ध्वं गच्छन्यो बहलतु-
ङ्गलाङ्गूलः स्थूलोच्छ्रितलाङ्गूलस्तस्य विस्तीर्णवैजयन्तिकासदृशप्रपञ्चे-

---

१९६. णिअ for णिअ K2.; °सुव्वेल्लंतबहलतुंग B. °सुव्वेल्लंतवहलुत्तुंग Bh. K1. °सपेरंतोव्वेल्लंतोच्छलत्तुंग D. °सुव्वेलकम्पमाण K2. °सुव्वेलवहलुत्तुंग N. °सुव्वेलतुंग O. for °सु-ङ्ग; लंगड B. लाङ्गूल K2. for लङ्गूल; वैज° for वेज° A. B. Bh. C. D. K1. K2. N.

१९७. °अन्तिका for °अन्तिआ K2.; विडंबडंबरुद्दामर Bh. विडंबडंबरुद्दाम C. O. खडलंबिदसरुद्दामर D. विडम्बरुद्दामर K1. विडम्बणाडम्बरोद्दाम K2. विसमडामरुद्दाम N. for डम्बरुद्दाम; णिवेसो for संणिवेसो O.; मठादो B. Bh. K1. मडादो D. O. मठदो K2. for मडादो; अप for अव N.; °क्कमिद for °क्कमिअ O.; सनद्ध C. तिण्ह D. सतण्ण K1. सतिण्ण N. सण्ण O. for सतिण्ह.

१९८. कवलिआ° D. N. कलिदा° K2. for कवलिदा°; °णअ for °णेअ Bh.; °हाव-अम° Bh. °हावयवम° O. for °हावअवम°; °रअन्थि A. °रछि C. °रात्थि D. °राट्ठि K2. °रथ्थि N. O. for °रट्ठि; खंडण for खण्ड D. K1.; कडकडायंत Bh. कडाक-टाअन्त K1. कडकडन्त K2. कटकटाअंत N. कडयडंत O. for कडकडाअन्त.

१९९. दंत before कर° B. Bh. K1.; करपत्त for करवत्त D. K1. N.; कठिन K1. कढिण K2. कढिण N. for कठिण; पचण K2. प्पयंड O. for पअण्ड; विअडविदं भणुद्दाम for पअ-ग्घाद N.; °घाअ A. °घाय O. for °घाद.

* °कावलम्बितडम्बरोद्दामर Com.

रुणचवेडामोडणपाडिदाणेअणरतुरंगजङ्घलुग्गारभरिदगलगुहा- २००
गब्भगम्भीरघग्घरोरल्लिगल्लूरणसद्दसंदब्भपडिरवाभोअभीसावि-
दणट्ठविद्दाविदासेसजणणिवहो कठोरणहरकप्परक्कमणणिद्दअदा-

निर्घातदारुणचपेटामोटन*पातितानेकनरतुरंगजाङ्घलोद्गारभरितगल-
गुहागर्भगम्भीरघर्घरोरल्लिगल्लपूरणशब्दसंदर्भप्रतिरवाभोगभीषितनष्टवि-
द्रावितशेषजननिवहःकठोरनखरकर्पराक्रमणनिर्दयदारितजन्तुगात्रा-

नोद्भामर उत्कटकठोरक्रियः शरीरसंनिवेशो यस्य सः। परगुणासहिष्णुतामर्षः। रोषः क्रोध एव। यद्वा। स्थिरः क्रोध एवामर्षः। यदाह।

क्रोधः कृतापराधेषु स्थिरोमर्ष इति स्थितः।
प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोध उच्यते॥

यद्वा। अमर्षोक्षान्तिः। तत्क्षणं सतृष्णं कवलिता येनैकप्राणिशरीरावयवास्तेषां मध्ये कठोराणि यान्यस्थीनि तेषां खण्डे खण्डने यष्टंकारो

---

२००. ववेडा K1. चपेडा N. चपेटा O. for चवेडा; मोडन K1. मोडिअ N. मोटिद C. for मोडण; पडिदाणेक B. पाडिदासोअ C. कवलिदाणेअ D. K1. K2. पडिदमिलिदाणेअ N. for पाडिदाणेअ; तुरअगजमंसजङ्घ° B. तुरंगगजुज्जङ्घ° Bh. तुरंगगजजङ्घ° O. for तुरं-जङ्घ°; °ग्गाल for °ग्गार K1. K2.; भरिअ for भरिद N.

२०१. B. om. घग्घर; गग्गरो° for घग्घरो° K2. N.; °रोरल्लिद Bh. °रोल्लि K1. for °रोरल्लि; गल्लूर C. गल्लूरण K1. गल्लपूरण K2. for गल्लूरण; N. om. सद्द; D. om. संदब्भ; संरंभ for संदब्भ B. Bh.; पूरिअगअणअलोभअ for पडि-विद N.; प्पडि° for पडि° O.; °होअ for °भोअ O.; °भीसिद A. भेसिद O. for भीसाविद.

२०२. तुण for णट्ठ C.; विद्दाविद A. विद्दाद D. णिद्दविद्दारद K1. णिद्दविद K2. विद्दाविअणिद्दाविद N. णट्ठविद O. for विद्दाविद; णिअहो K1. णियाओ O. for णिवहो; कढोर for कठोर O.; प्पहार for कप्प-ण Bh.; क्कपर K1. कप्परा° K2. for कप्पर; °कोरोरंफ C. °रक्कम D. °रक्कमम K1. °रखुरंप N. °रोरुप्पहार O. for °रक्कमण; णिद्दलिआकिंदु for णिद्द-रिद N.; णिद्दय for णिद्दअ K2. O.; दलित D. दलिद K1. विदारिद K2. कत्तरिय O. for दारिद.

* कवलित Com.

रिदजन्तुगत्तावअवप्पउत्तरक्तकइमिअगइवहो दुट्ठसद्दूलो कुविअ-
कअन्तलीलाइदं करेदि। ता रक्खध जधासत्ति पिअसहीए मदअ-
२०५ न्तिआए जीविदं त्ति। प्रविश्य बुद्धरक्षिता सत्रासम्। परित्ताअध

वयवप्रवृत्तरक्तकर्दमितगतिपथो दुष्टशार्दूलः कुपितकृतान्तलीलायितं करोति। तद्रक्षत यथाशक्ति प्रियसख्या मदयन्तिकाया जीवितमिति।

ध्वनिभेदस्तेन कटकटायमानाः करपत्रवत्कठिना या दंष्ट्रास्ताभिः करालो भीषणो मुखकन्दर आस्यकुहरं यस्य सः। टंकारेण दुर्भेत्वमुक्तम्। दुर्भेद्यप्रवृत्तौ दन्तानां कटकटाशब्दकरणं स्वभावः। विस्तीर्णत्वात्कन्दर इव कन्दरः। प्रचण्डवज्रप्रहारदारुणो यश्चपेटः पाणितलप्रहारस्तेन यदामोटनं चूर्णनं तेन कवलिता आस्वादिता येनेकनरास्तुरंगाश्च तेषां जाङ्गलं मांसं तस्योद्गारेण प्रपूरणेन भरितो यो गलगुहागर्भस्तत्र गम्भीरो घर्घरो दीर्घमधुरो य उरक्षिर्गलगर्जितं तेन यो गल्लपूरणशब्दस्तस्य संदर्भेण समूहेन प्रतिरवाभोगः प्रतिशब्दविस्तारस्तेन भीषितो भयं नीतो नष्टो विद्राणो निष्ठापितो निष्ठां पर्यन्तं

---

२०३. °त्ताणसरीर for गत्तावअव O.; गदा° for गत्ता° K2.; °त्तावरोविर्तेतरंगिद for °त्ताव-उत्त N.; A. D. K1. om. अवअव; °वयअ for °वअव K2.; D. om. प्पउत्त; पउत्त for प्पउत्त B. Bh. C. K1. K2. O.; कदामिअ Bh. K1. कदमिद K2. O.; पहो for वहो D. K1.; साहूलो A. सदूलो K1. for सद्दूलो; Bh. D. K1. K2. N. O. om. कुविअ.

२०४. किदन्त B. कदन्त K2. कियंत O. for कअन्त; °यिदं for °इदं K2. O.; करोदि for करेदि K1.; पडि N. परि O. before रक्ख°; रक्खद K1. रक्खद twice K2. रक्खह N. for रक्खध.; K2. om. जधासत्ति; K1. om. जधा-आए; जहा for जधा D. N.; सत्तिए A. Bh. C. D. O. सत्तिए N. for सत्ति; A. Bh. N. om. पिअ—आए; O. om. पिअसहीए; जीवंतीं मदयंतियं for मद-दं O.

२०५. अप्प A. Bh. अत्तणो N. before जीविदं; °विअं for °विदं N.; O. om. त्ति; °ई जधासक्तीति for °दंत्ति K2.; सर्वाः सभयाः भृण्वन्ति before प्रविश्य K2.; संभ्रांता after प्रविश्य N.; K1. N. O. om. सत्रासम्; °अड K1. °अधं K2. °यध O. for °अध; N. om. परित्ताअध.

परित्ताअध । एसा णो पिअसही अमच्चणन्दणस्स बहिणिआ मदअन्तिआ एदिणा दुट्ठसद्दूलेण विणिहदविद्दाविदासेसपरिअणा अभिभवीअदि । (क)

माल० । लवङ्किए अहो पमादो । (क)

माध० । ससंभ्रममुत्थाय । बुद्धरक्षिते क्वासौ । २१०

परित्रायध्वं परित्रायध्वम् । एषा नः प्रियसख्यमात्यनन्दनस्य भगिनी मदयन्तिकैतेन दुष्टशार्दूलेन विनिहतविद्रावितशेषपरिजनाभिभूयते । (क) लवङ्किके अहो प्रमादः ।

लम्बितोशेषजननिवहो येन सः । कठोरनखकर्परात्क्रमणेन निर्दयं दारितं यज्जन्तुशरीरं ततः प्रवृत्तरक्तेन संजातरुधिरेण कर्दमीकृतो गतिपथो गमनवाटो येन सः । कर्पर इव कर्परः । निम्नत्वात् ॥ उरक्षिर्गलगर्जितमिति रत्नकोशः ॥

२१०–२१८ मदयन्तिकापरिरक्षणत्वरयाह । क्वासाविति । अम्महे सभयहर्षे आश्चर्ये वा । एषोपीहस्थ एव । अत्रापिर्विस्मये । यस्यावस्था भगवत्योक्ता यन्निमित्ता वा ममेयमवस्था स एष इति

---

२०६. A. K1. om. परित्ताअध; °अधं K2. °धा O. for °अध; प्रिय for पिअ O.; नन्द° for णन्द° O; भइणी for बहिणिआ N.

२०७. मदय° for मदअ° O.; K1. om. एदिणा; एदेण for एदिणा K2.; दुट्ठ for दुट्ठ K2.; सद्दू° for सद्दू° K2.; O. om. विणिहद; K1. N. om. विणि°; °हिद for °हद Bh.; C. om. विद्दाविदासेस; विद्दाविअ° A. विद्दाविअ K1. N. विद्दविद O. for विद्दाविदा°; B. Bh. K1. N. O. om. असेस.

२०८. अहिहवीअदि A. अभिहवीआदि Bh. अभिहवीअदि C. अभिभूअदि D. अहिहूयीअदि K1. अभिभूवीअदि K2. अहिहवीयदि O. for अभिभवीअदि.

२०९. सहि before लव° N.; Bh. om. लवङ्किए; लवङ्कि K1. लवङ्किके K2. O. for लवङ्किए; प्पमादो for पमादो A. B. C. D. O.; त्ति after °मादो K2.

२१०. B. om. ससं-य; Bh. K1. K2. N. O. om. ससंभ्रमम्; क्वासौ twice Bh. C. D. K2. O.

* निष्ठापित Com.

माल० । माधवं दृष्ट्वा सहर्षसाध्वसमात्मगतम् । अम्महे एसो वि इहत्थो ज्जेव्व । (क)

माध० । स्वगतम् । हन्त पुण्यवानस्मि यदहमतर्कितोपनतदर्शनोल्लसितलोचनयानया

२१५ अविरलमिव दाम्ना पौण्डरीकेण नद्धः
स्नपित इव च दुग्धस्रोतसा निर्भरेण ।

(क) अम्महे एषोपीहस्थ एव ।

भावः । स्वच्छन्दप्रियालोकनतुष्टस्य माधवस्योक्तिः । हन्तेत्यादि । अयं श्लोको गद्यादिः । हन्त हर्षे । अचिन्तितोपस्थितदर्शनानन्दितलोचनयानया चक्षुषा पौण्डरीकेणेव दाम्ना स्रजाविरलं घनं यथा तथाहं नद्धो बद्धः । आवृत इति यावत् । कान्तालोकनेन सात्त्विकभावाविर्भावात्स्वीयस्तम्भं ज्ञात्वा नद्ध इत्युत्प्रेक्षितम् । अत्राविरलपदेन पौनःपुन्यं पुण्डरीकपदेन श्वेतभागविभावनं च ध्वनितम् । दुग्धस्रोतसा दुग्धाम्भःप्रवाहेण निर्भरेण निरतिशयेन संसक्तेन वा स्नपित इवाप्लुत इवाहम् । तथाविधावलोकनजातरोमाञ्चतया स्नपितत्वेनोत्प्रेक्षितम् । अत्र निर्भरपदेन परिचयपर्यवसानतोक्ता । एवं च द्वाभ्यां नेत्रनैर्मल्यमुक्तम् । कृत्स्नो निःशेषोहं स्फारितेन विस्तारितेन चक्षुषा कवलित इव पीत इव । स्फारितत्वेन कवलनयोग्यतोक्ता । कवलने

२११. N. om. माधवं दृष्ट्वा; A. om. माधवं; सहर्षं ससाध्वसं च for सहर्षसाध्वसं Bh. K1. K2. N. O.; N. om. आत्मगतम्; स्व for आत्म K1. K2.; अम्महे for अम्महे Bh. K1. O.

२१२. B. Bh. N. om. वि; अत्थ A. इह K1. K2. एत्थ N. for इहत्थो.

२१३. B. om. स्वगतम्.

२१४. °ल्लासित° for °ल्लसित° O.; B. Bh. N. om. लोचन°; K1. om. अनया.

२१५. नद्धः and दाम्ना interchange places in K1. K2.; बद्धः for नद्धः O.

२१६. स्रोतसां for स्रोतसा B. Bh. D.; निर्झरेण C. निर्झरेण D. निर्घनेन K1. for निर्भरेण.

कवलित इव कृत्स्नश्चक्षुषा स्फारितेन
प्रसभममृतमेघेनेव सान्द्रेण सिक्तः ॥

बुद्ध० । महाभाअ उज्जाणबाहिरेत्थामुहे । (क)
माधवः साटोपं परिक्रामति ।

काम० । वत्स अप्रमत्तो भूत्वा विक्रमस्व ।

(क) महाभाग उद्यानबाह्यरथ्यामुखे ।

बाह्यसंवेदनाभावात्प्रणय उत्प्रेक्षितः । सान्द्रेण निविडेन सुधामयजलधरेण प्रसभं बलात्सिक्त इवाहम् । आनन्दातिशयशालितयामृतसिक्तत्वेनोत्प्रेक्षा । तदिह माधवस्य परमनिर्वृतिसौख्यमुक्तम् । तत्र च प्रथमपदेन तारकातरलता । द्वितीयेन गोलकचाञ्चल्यम् । तृतीयेन पुटविस्तारो विलासश्च । चतुर्थेन चैतन्यसंपत्तौ पुण्यवत्तोपपादनम् । तत्रापि मेघपदेन संतापशान्तिः । अमृतपदेन स्तम्भसंभावना । प्रसभपदेन तत्संगतिरेव विपत्प्रतीकार इति सूचितम् । सेचनपदेन तस्मिन्दरालोकनेसंपूर्णता । सान्द्रपदेन तत्कालिकसकलक्लेशविलयः सूचितः । स्रोतसां निर्झरेणेति पाठे निर्झरेण प्रवाहेणेत्यर्थः ।

२१९–२२८ [बु० वा०] क्वासाविति प्रश्नस्योत्तरमिदम् । साटोपं सावेगम् । अप्रमत्तं सावधानम् । क्रियाविशेषणमिदम् ।

२१७. स्वीक्षण K1. स्वेक्षण K2. for चक्षुषा.

२१८. वर्षेण° for मेघेन° A. D. N. O.

२१९. °भाग for °भाअ K2.; एसो खु N. इदो O. after °भाअ; °ज्जाणं for °ज्जाण Bh.; D. om. बाहि; बाहिर K1. O. बाहिअ N. for बाहि; रच्छा Bh. रच्छा K1. K2. N. for रत्था.

२२१. N. om. काम°–°मस्व; वत्स twice Bh.; अप्रमत्तं for अप्रमत्तः K1. K2. O. Com.; K1. K2. O. om. भूत्वा; परिक्रा° for विक्र° O.

माल० । जनान्तिकम् । लवङ्किए हद्धी हद्धी संसओ क्खु जादो । (क) सर्वास्त्वरितं परिक्रामन्ति ।

माध० । अमे दृष्ट्वा सबीभत्सम् । अहह ।

२२९ संसक्तत्रुटितविवर्तितान्त्रजाल-
व्याकीर्णस्फुरदपवृत्तरुण्डखण्डः ।
कीलालव्यतिकरगुल्फदग्नपङ्कः
प्राचण्ड्यं वहति नखायुधस्य मार्गः ॥

(क) लवङ्किके हा धिक् हा धिक् संशयः खलु जातः ।

रुधिरादिकं वीक्ष्य सबीभत्सं सघृणम् । अहह विस्मये खेदे घृणायां च । संसक्तेत्यादि । नखायुधस्य व्याघ्रस्य मार्गः प्राचण्ड्यं रौद्रत्वं वहति । कीदृशः । संसक्तः संलग्नस्त्रुटितश्छिन्नो विवर्तितः खण्डखण्डीकृतोन्त्रजालमन्त्रसमूहस्तेन व्याकीर्णं व्याप्तं सद्यो हतत्वात्स्फुरत्किंचिच्चलदपवृत्तमधोमुखं रुण्डखण्डं कबन्धरूपं शकलं यत्र सः । उरुबुक्केति पाठ उरु महद्बुक्कमग्नमांसम् । कीलालव्यतिकरेण रक्तसंघेन गुल्फदग्नो गुल्फपरिमाणः पङ्कः कर्दमो यत्र । अत एव बीभत्सयोगित्वम् ॥ कबन्धे रुण्डमस्त्रियामित्यमरः । कीलालं रुधिरे तोय इति मेदिनीकरः ॥ प्रमाणे दग्नच् ॥ पङ्कः पापे च कर्दम इति विश्वः ॥

---

२२२. N. O. om. जनान्तिकम्; हद्धीहद्धी लवङ्किए for लवङ्किए हद्धीहद्धी K1.; °ङ्किके for °ङ्किए K2. N. O.; N. om. हद्धीहद्धी; O. om. one हद्धी; हा धिक् हा धिक् for हद्धीहद्धी K2.; B. om. क्खु; खु for क्खु K2.

२२३. N. om. सर्वा-मन्ति; माधवमनुगच्छन्ति for परिक्रामन्ति K1. K2. O.

२२४. कामंदकीमाधवौ for माध० । N.; K1. K2. N. om. अमे दृष्ट्वा.

२२५. निवर्तिता° for विवर्तिता° C. D.

२२६. तुंड B. Bh. K1. दण्ड K2. मुंड N. for रुण्ड.

२२८. प्राचण्ड्यं for प्राचण्ड्यं K1. वदति for वहति K2.

अहो प्रमादः ।

वयं बत विदूरतः क्रमगता पशोः कन्यका २३०
सर्वाः । हा मदअन्तिए । (क)
कामन्दकीमाधवौ । सहर्षाकूतम् ।

कथं तदभिपातितादधिगतायुधः पूरुषात् ।
कुतोपि मकरन्द एत्य सहसैव मध्ये स्थितः
इतराः । साहु महाभाअ साहु । (ख) २३५
कामन्दकीमाधवौ । सभयम् । दृढं च पशुना हतः

(क) हा मदयन्तिके ।
(ख) साधु महाभाग साधु ।

२३०–२३८ वयमित्यादिना दंष्ट्रायुधपर्यन्तेन पृथ्वीच्छन्दसा श्लोकः स वाचनिकः । वयं तस्य व्याघ्रस्यातिदूरतः । पशोः क्रमगताक्रमणं प्राप्ता । कन्यका मदयन्तिका । कथं मकरन्दः कुतोपि स्थानादेत्यागत्य शीघ्रं मध्ये व्याघ्रमदयन्तिकयोः स्थितः । तेन व्याघ्रेणावपातिताद्गृहीतात्पुरुषाद्गृहीतखड्गः सन् । अत आकाङ्क्षितलाभः । अत एव सहर्षाकूतमित्युक्तम् ॥ पुरुषाः पूरुषा अपीत्यमरः ॥ पुरुषशब्दश्छन्दस्येव युज्यत इत्यदेदयम् । पूर्वपूरुषतपांसि जयन्तीत्यादिनैषधदर्शनाद्भाषायामपि तत्प्रयोगात् । मकरन्दः पशुना दृढं निहतो दृढमाहतस्ताडितो

२३९. N. om. अहो प्रमादः; K2. om. अहो; प्रमादः twice K2.
२३०. °रगाः for °रतः N.; गताः for गता B.; कन्यकाः for कन्यका B.
२३१. °यन्तिए for °अन्तिए K1. O.
२३२. सहर्षम् for सहर्षाकूतम् K1.
२३३. तदव° Bh. K2. N. O. च भुवि K1. for तदभि°; °दवगता° for °दधिगता° K2.; °पुषः for °पुरुषः Bh.; संभ्रमात् for पूरुषात् N.
२३४. स्थितो for स्थितः O.
२३५. साधु for साहु in both places K1. K2.; °भाग for °भाअ K2.; B. om. 2nd साहु.
२३६. N. O. om. सभयम्; परशुना for च पशुना K2.; हतो for हतः N, O.

इतराः । अच्चाहिदं अच्चाहिदं । (क)

कामन्दकीमाधवौ सहर्षम् । प्रमथितश्च दंष्ट्रायुधः ॥

इतराः । सानन्दम् । दिट्ठिआ पडिहदं दुज्जादं । (ख)

२४० काम ० । साकूतम् । कथं व्यालनखरप्रहारनिःसृतरक्तनिवहः क्षितितलनिषक्तखड्गलतावष्टम्भनिश्चलःसंभ्रान्तमदयान्तिकावलम्बितस्ताम्यतीव वत्सो मे मकरन्दः ।

(क) अत्याहितमत्याहितम् ।

(ख) *दिष्ट्या प्रतिहतं दुर्जातम् ।

वा । रक्तदर्शनेन सभयम् । अत्याहितं महाभयम् ॥ अत्याहितं महाभीतिरित्यमरः॥ व्याघ्रभयत्राणोपकारितया व्यवस्थितमदयान्तिकासंबन्धात्सहर्षत्वम् । दंष्ट्रायुधो व्याघ्रः।प्रमथितो निहतः।अमुनेत्यर्थात् ।

२३९–२४७ दुष्टमुपक्रान्तं दुर्जातम् ॥ व्याघ्रे चौरे च व्याल इति शाश्वतः ॥ स मकरन्दः क्षितितलनिषक्तखड्गलतावष्टम्भेन निश्चलः । इह मकरन्दक्षतेन रुजारूपः संधिप्रवेश उक्तः । यदाह ।

---

२३७. Bh. N. O. om. this line; अव्वाहिदं for अच्चाहिदं Kl.; Kl. om. one अच्चाहिदं.

२३८. Bh. N. O. om. काम-हर्षम्; व्यसुरसौ कृतश्चामुना for प्रम-युधः N. O.

२३९. Kl. K2. N. O. om. सानन्दम्; साहु Kl. पिअंपिअं णः संवुत्तं K2. दिट्ठिआ O. for दिट्ठिआ; अच्चाहिदं जादं for दिट्ठि—ज्जादं N.; णिहदं for पडिहदं K2.

२४०. व्याघ्र for व्याल K2. N.; नख for नखर K2. O.; निसृत K2. विनिसृत N. for निःसृत ; प्रवाहः A. निवह Bh. for निवहः

२४१ निषिक्त B. विषक्त Bh. O. विषिक्त C. D. निहित Kl. for निषक्त; वासः (or वामः) before खड्ग Kl.; षड्ग for खड्ग Bh.; निषण्णः for निश्चलः B. Bh.

२४२. °वलंबितं ता° C. °वलम्बस्ता° Kl. वलम्बितोयं ता N. for °वलम्बितस्ता°; N. O. om. इव; °नीति for °नीव Bh. Kl.; B. N. om. मे; मे वत्सो for वत्सो मे K2. O.; °रंदकः for °रन्दः B.

* Com. adds before this प्रियं प्रियं नः संवृत्तम्.

इतराः । हद्धी हद्धी गाढप्पहारदाए किलम्मदि महाभाओ । (ग)

माध० । कथं प्रमुग्ध एव । कामन्दकीं प्रति । भगवति मां २४९ परित्रायस्व ।

काम० । अतिकातरोसि वत्स नन्वेहि तावत्पश्यामः ।

॥ इति परिक्रम्य निष्क्रान्ताः सर्वे ।

इति मालतीमाधवे शार्दूलविद्रावणो नाम तृतीयोङ्कः ॥

(ग) हा धिक् हा धिक् गाढप्रहारतया क्राम्यति महाभागः* ।

रुजा प्रोक्ता प्रहारव्यथेति । अवष्टम्भनमवष्टम्भः । संभ्रान्ता विमुग्धा । प्रमुग्धो मोहं गतः । पश्याम इति दर्शनात्समाश्वास इति भावः ।

प्रासूत यं रत्नधरोतिमान्योतिमान्यरूपा दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेङ्कोगमत्तृतीयो रसराजिरम्यः ॥

॥ इति तृतीयोङ्कः ॥

---

२४३. O. om. one हद्धी; अतिकातरो हि before गाढ K1.; पहारि° for प्पहार° K2.; किलिम्मदि Bh. O. कालिमदि K1. क्लिमदि K2. for किलम्मदि; त्ति after °मदि K2.

२४४. °णुभाओ for °भाओ B.

२४५. मुग्ध for प्रमुग्ध Bh.; N. O. om. कामन्दकीं प्रति; तद् before भग° K1. K2. O.

२४६. B. om. परि; परित्रायस्व twice Bh. K2.; परित्रायस्व माम् for मां परित्रायस्व K2. O.

२४७. A. D. K2. om. वत्स; वत्स अ-सि for अ-सि वत्स A. B. C. D. K2. तदे° for नन्वे° A. B. Bh. C. D.; N. om. तावत्; पश्यावः for पश्यामः A. Bh. D. K2. O.

२४८. B. K1. K2. N. O. om. परिक्रम्य.

२४९. B. K1. K2. O. om. इति-नाम; Bh. om. इति; माधवीयनाम्नि नाटके for माध-नाम N.; °शोकगृहं for शा-णो Bh.; समाप्तः after °योङ्कः K1.

* Com. adds मकरन्दः.

चतुर्थोङ्कः ।

ततः प्रविशतो मदयन्तिकालवङ्किकाभ्यामवलम्बितौ प्रमुग्धौ माधवमकरन्दौ संभ्रान्ता कामन्दकी मालती बुद्धरक्षिता च ।

मद ० । पसीद भअवदि परित्ताहि परित्ताहि मदअन्तिआणिमित्तसंसइदजीविदं विवण्णजणानुकम्पिणं महाभाअं । (क)

इतराः । हद्धी हद्धी किं दाणिं अम्हेहिं एत्थ पेक्खिदव्वं । (ख)

(क) प्रसीद भगवति परित्रायस्व* परित्रायस्व मदयन्तिकानिमित्तसंशयितजीवितं विपन्न†जनानुकम्पिनं महाभागम् ।

(ख) हा धिक् हा धिक् किमिदानीमस्माभिरत्र प्रेक्षितव्यम् ।

२–१० संभ्रान्ता व्याकुला । अत्रापन्नमापन्नतम् । अम्महे हर्षे आश्चर्ये वा ।

---

१. °शाति for °शतो K2.; °तः कामंदकीमदयंतिका° Bh. °तो लवङ्किकामदयन्तिका° O. for °तो–ङ्किका°; मालतीं° for लवङ्किका° N.; अन्वितौ for अवलम्बितौ B.; B. K2. om. प्रमुग्धौ; मकरंदमाधवौ for मा–न्दौ N.

२. संभ्रान्ताश्च for संभ्रान्ता K1. K2. O.; ततश्च after संभ्रान्ता N.; लवंगिका for मालती N.; °रक्षिताः for °रक्षिता K1. K2. O.; K1. K2. O. om. च.

३. भअवदि पसीद for प-दि K1. K2.; प्रसीद for पसीद O.; °त्ताहि for °त्ताहि in both places Bh. N.; °त्ताअस्स K1. °त्तायस्स K2. for °त्ताहि; B. K1. K2. om. one परित्ताहि; °यन्तिआ for °अन्तिआ K2.

४. णिमित्तं for णिमित्त C. D. N. O.; °सइद K1. °सयिद K2. for °सइद; K1. om. जीविदं; आवण्ण A. O. विपण्ण Kl. आपण्ण K2. for विवण्ण; K1. K2. N. O. om. जण; अणु° for अनु° Bh. K1. K2. O.; °नुभावं Kl. °नुभावं K2. for °भाअं.

५. O. om. one हद्धी; B. Bh. D. Kl. om. एत्थ; पक्खिदव्वं Bh. पेक्खिदन्तं K2. for पेक्खिदव्वं.

* Com. follows B. K1. K2. † आपन्न Com.

काम०। उभौ कमण्डलूदकेन सिञ्चा। ननु भवत्यः पटाञ्चलेन वत्सौ वीजयन्तु। मालत्यादयस्तथा कुर्वन्ति।

मक०। समाश्वस्यावलोक्य च। वयस्य कातरोसि किमेतत्। ननु स्वस्थ एवास्मि।

मद०। सहर्षम्। अम्महे पडिबुद्धं दाणिं मअरन्दपुण्णअन्देण।(क) १०

माल०। माधवस्य ललाटे हस्तं दत्वा। सहि लवङ्गिए दिट्ठिआ वड्ढसि। णं भणामि पडिबुद्धो जेव्व दे पिअवअस्सो पडिवण्णचेअणो महाभाओ मअरन्दो त्ति। (ख)

(क) अम्महे प्रतिबुद्धमिदानीं मकरन्दपूर्णचन्द्रेण।

(ख) सखि लवङ्गिके* दिष्ट्या वर्धसे। ननु भणामि प्रतिबुद्ध एव ते प्रियवयस्यः प्रतिपन्नचेतनो महाभागो मकरन्द इति।

११–२२ वर्धस इत्यनेन वर्धापनं याचमानोक्तिप्रकारः। शिरस्या-

---

६. Kl. K2. om. उभौ; अभिषिच्य for सिक्त्वा B.; Kl. K2. om. ननु; तत्र before भवत्यः Kl. K2.; °ञ्चलैः for °ञ्चलेन O.

७. Bh. C. N. om. वत्सौ; वत्सौ after वीज° instead of before, Kl. K2.; °यत Kl. K2. °यध्वं N. °यन्तां O. for यन्तु.

८. विलोक्य for अवलोक्य Kl. K2.; अति Kl. K2. O. अपि N. after वयस्य; °तरोस्मि B. तरस्त्वं K2. °तर O. for °तरोसि.

९. माध०। before ननु N.

१०. N. om. सहर्षम्; अम्हहे for अम्महे Bh. Kl. N. O.; प्पाडि for पडि O.; °ण्णं for °बुद्धं C.; पुण्णिमा A. पुण्णिम O. for पुण्ण; चंदेण Kl. K2. N. यंदेन O. for अन्देण.

११. D. Kl. K2. N. om. सहि लवङ्गिए; दिट्ठिया for दिट्ठिआ O.

१२. वड्ढासि Bh. वड्ढावसि Kl. वड्ढविसि K2. वड्ढसि O. for वड्ढसि; नं for णं O.; Bh. Kl. K2. N. om. पडिबु—अस्सो; O. om. पिअ; पदिपण्ण Kl. प्पडिवण्ण O. for पडिवण्ण; वेअणो for चेअणो B. Bh. C.

१३. °तणो for °अणो K2.; °भाअ B. °णुभावो Kl. °भाग K2. for °भाओ; मक° for मअ° K2.; Bh. C. Kl. N. O. om. मअरन्दो; C. om. त्ति.

* Com. follows D. Kl. K2. N.

माध० । आश्वस्य । वयस्य साहसिक एह्योहि । इत्यालिङ्गति ।

१५ काम० । उभौ शिरस्याघ्राय । दिष्ट्या जीवितवत्सास्मि ।

इतराः । पिअं पिअं णो संवुत्तं । (क) सर्वा हर्षं नाटयन्ति ।

बुद्ध० । जनान्तिकम् । हला मदअन्तिए एसो जेव्व सो । (ख)

मद० । जाणिदं जेव्व मए जहा एस माहवो अअं पि सो जणो त्ति (ग)

२० बुद्ध० । अवि सच्चवादिणी अहं । (घ)

मद० । ण हु अण्णारिसेसु तुम्हारिसीओ पक्खवादिणीओ

(क) प्रियं प्रियं नः संवृत्तम् ।

(ख) सखि मदयन्तिके एष एव सः ।

(ग) ज्ञातमेव मया यथैष* माधवोयमपि स जन इति ।

(घ) अपि सत्यवादिन्यहम् ।

घ्राणमायुर्वर्धनायेति वृद्धाः । हलेति सखीसंबोधनम् । मकरन्दनामग्रह-

---

१४. आश्वर्यं Bh. समाश्वस्य K1. K2. निश्वस्य N. for आश्वस्य; N. om. वयस्य °सिक्य for °सिक B.; K1. N. om. इति; मकरंद before आलिङ्गति K1. K2.; °लिंगतः for °लिङ्गति B.

१५. जीवद् for जीवित K2. N. O.

१६. प्रियं for पिअं in both places, O.; K1. K2. N. om. one पिअं; सर्वे for सर्वा N. O.

१७. सहि for हला A. K1. K2. N. O.; सो for एसो K1. K2.; एसो for सो K1. K2.

१८. तदैव A. तथैव Bh. तथैव C. सहि N. before जाणिदं; °णिदो for °णिदं Bh.; A. om. जेव्व; जह K1. K2. N. जधा O. for जहा; B. om. जहा; K1. om. एस; एसो A. N. अअं B. for एस; महाभाओ D. हु O. after एस; एस for अअं B.; वि for पि N.; Bh. om. पि; पिओ for पि सो B.

२०. अइ B. Bh. C. D. सहि K1. अपि N. for अवि; पिअ before सच्च Kl.; वाइणी for वादिणी B. Kl. K2.

२१. खलु A.D. हि Bh. for हु; अम्हारि° D. अणारि° Kl. ण अम्हारि° (optional) N. अणीदि° O. for अण्णारि°; °रिसीओ for °रिसीओ Bh.; अलं before पक्ख Kl.; प्यख्ख for पक्ख O.; वाइ° for वादि° B.

* Com. follows D.

होन्ति । माधवमवलोक्य । साहि मालदीए वि रमणिज्जो इमस्सिं महाणुहावे अणुराअप्पवादो । (क)

पुनर्मकरन्दमेव सस्पृहमवलोकयति ।

काम० । स्वगतम् । रमणीयोर्जितं हि मदयन्तिकामकरन्दयोर्दैवा- २५
दद्य दर्शनम् । प्रकाशम् । वत्स मकरन्द कथं पुनरायुष्मानस्मिन्न-
वसरे मदयन्तिकाजीवितत्राणहेतुर्भगवता दैवेन संनिधापितः ।

(क) न खल्वन्यादृशेषु पुष्पादृश्यः पक्षपातिन्यो भवन्ति । सखि मालत्या अपिरमणीयो* स्मिन्महानुभावेनुरागप्रवादः ।

णेन स्वामित्वमभिप्रैति । संभावनायामपिशब्दः । न हि पक्षपातिन्य-स्त्वादृश्यो मन्दं भद्रं वदन्तीति भावः ।

२५–३१ अक्लेशोपनतत्वेन रमणीयम् । शार्दूलनाशेनोपकार-पूर्वमुत्पन्नत्वादूर्जितं सातिशयम् ।

आयुष्मानिति वृद्धेन वाच्यो बालः शुभाशयः ॥

इति भरतः । उानद्यवृत्तान्तो मालतीप्रत्यक्षमुत्तरोपक्रमः । परापत-न्नागच्छन् । अवस्कन्दोतिक्रमः । गोचरमित्यजहल्लिङ्गतयान्वयः । अ-

---

२२. होअंति for होन्ति O. आलोक्य for अवलोक्य N.; N. om. वि; °णीओ B. °णिज्ज K1. K2. णिओ N. for णिज्जो; एव्व after °णिज्जो. D.; इह for इमस्सिं K1. K2.

२३. महा° for महाणु° B. N.; °भाए B. °भावे Bh. C. K1. K2. N. O. for °हावे; K1. K2. om. अणु; राग for राअ Bh. K1. K2.; पवादो B. प्पवादा Bh. प्पहावः K1. पवाहः K2. for प्पवादो.

२४. K1. om. the line; इति for पुनर् N. O.; सस्नेहम् for सस्पृहम् N. O.; पश्यति for अवलोकयति K2. N. O.

२५. K2. om. हि; मकरंदमदयंतिक° for मद–न्द° Bh.; O. om. दैवाद्.

२६. D. om. अथ; संदर्शनं for दर्शनम् N.; N. om. आयुष्मान्.

२७. प्राण B. जीव K2. for जीवित; हेतोः for हेतुः A. D. K1. K2. N. O.; N. om. भगवता.

* Com. follows D.

मक० । अद्याहमन्तर्नगर एव कांचिद्वार्त्तामुपश्रुत्य माधवस्य चित्तोद्वेगमधिकमाशङ्कमानस्त्वरितमवलोकितानिवेदितकुसुमाकरोद्यानवृत्तान्तः परापतन्नेव शार्दूलावस्कन्दगोचरगतामेतामभिजातकन्यकामभ्युपपन्नवानस्मि । मालतीमाधवौ विमृशतः ।

काम० । स्वगतम् । वृत्तेन खलु मालतीप्रदानेन भवितव्यम् । प्रकाशम् । वत्स माधव दिष्ट्या सुहृद्बुद्ध्या वर्धितोसि मालत्या तदयमवसरः प्रीतिदायस्य ।

माध० । भगवति इयं हि

यद्व्यालव्रणितसुहृत्प्रमोहमुग्धं
सौजन्याद्विहितवती गतव्यथं माम् ।

भिजाता कुलीना । तथा चाभिजात्येन मदुपकारं ज्ञास्यतीति भावः । आभिजात्येन ज्ञानं च तथाविधाकारादिना ॥ कन्यकेत्यत्रानुकम्पायां कन् ॥ अभ्युपपत्तिः प्राप्तिः । विमृशतः । परस्परक्लेशकारिण्या शङ्केति भावः ।

३४–३९ प्रीतिदायस्य वर्धापकदानस्य । यदित्यादि । व्याघ्रखण्डितसुहृत्प्रमोहेन संतप्तं मां सौजन्येन विगतक्लेशं कृतवती ततोत्यर्थं

---

२८. अथ for अद्य Bh.

२९. B. om. अधिकम्; त्वरिततरम् for त्वरितम् N.

३०. °चरता° B. Bh. D. °चरंगमित° K1. °चरंगता° K2. °चरा° N. for °चरगता°; इमाम् for एताम् K1. K2. N. O.

३१. Bh. N, O. om. अस्मि; स्वगतं before विमृशतः N.

३२. प्रवृत्तेन for वृत्तेन Bh.; दानेन for प्रदानेन K1. K2.

३३. K1. om. वत्स; Bh. N. O. om. सुहृद्बुद्ध्या; सदृश्या K1. सदृश्या K2. for सु-बुद्ध्या; वर्जि° for वर्धि° K1.; मालत्याः for मालत्या A. Bh.

३४. यद् D. सो K1. K2. N. O. for तद्; दानस्य for दायस्य C. N. O.

३५. एह्येहि for भग-हि B.; N. om. इयं हि.

३६. व्याघ्र for व्याल D.; प्रमोद for प्रमोह C.

३७. कारुण्याद् for सौजन्याद् N. O.; व्रणं for व्यथं K2.

तत्कामं प्रभवति पूर्णपात्रवृत्त्या
स्वीकर्तुं मम हृदयं च जीवितं च ॥

लव० । पडिच्छिदो क्खु णो पिअसहीए अअं पसादो । (क) ४०

मद० । स्वगतम् । जाणादि महाभाअधेओ जणो अवसरे रमणिज्जं मन्तिदुं । (ख)

माल० । स्वगतम् । किं णाम मअरन्देण उव्वेअकारणं सुदं भविस्सदि । (ग)

माध० । वयस्य का पुनर्ममाधिकोद्वेगहेतुर्वार्ता । ४५

(क) प्रतीष्टः खलु नः प्रियसख्या अयं प्रसादः ।
(ख) जानाति महाभागधेयो जनोऽवसरे *रमणीयं मन्त्रयितुम् ।
(ग) किं नाम मकरन्देनोद्वेगकारणं श्रुतं भविष्यति ।

मम हृदयं जीवितं च पूर्णपात्रवृत्त्या वर्धापकेन स्वीकर्तुमियं प्रभवति । त्वं च प्रभवसीत्यर्थः । तदायत्ते मे हृदयजीविते इति भावः । यद्वा । चोरि-काविवाहसंपादनेन हृदयहारिता नोचेज्जीवितहारितेत्यर्थः ॥ वर्धापकं यदानन्दादलंकारादिकं पुनः । आकृष्य गृह्यते पूर्णपात्रं पूर्णानकं च तत् ॥ इति हारावली । पूर्णपात्रं वर्धापकेपि चेति मेदिनीकरोपि ॥

४१–४९ गुरुकरमणीयं श्रोत्रसुखदम् । मकरन्देन कांचिद्वार्ता-मुपश्रुत्येति यदुक्तमेतच्छङ्कमानः पृच्छति । वयस्येति । ज्यायाञ्ज्येष्ठः ।

३८. भगवति for प्रभवति B.

४०. पडिट्ठिदो for पडिच्छिदो B. K1. K2.; खु for क्खु K2.O.; णं for णो B.; प्पिय for पिअ O. पसाओ K1. K2. प्पसादो O. for पसादो.

४१. B. om. स्वगतम्; जानादि for जाणादि K1.; °हाभाअहेअ D. °हाणुभाओ N. for °हाभाअधेओ; अअं before जणो N.; जनो for जणो K1.; Bh. K1. K2. N. O. om. अवसरे; गुरुअ B. गरुअ K1. K2. before रमणिज्जं.

४२. °णिअं B. C. D. N. °णीअं Bh. °णीयं K1. °णीयं K2. O. for °णिज्जं.

४३. मक° for मअ° O.; मअरन्देण after उ–णं (instead of before) K1.; आरणं for कारणं A. C.

४५. N. om. the line; °कोद्वेजिनी for °कोद्वेग O.; B. K1. O. om. हेतुः.
* Com. om. अवसरे and adds गुरुक.

प्रविश्य पुरुषः । वत्से मदयन्तिके भ्राता ते ज्यायानमात्यनन्दनः समादिशति । अद्य परमेश्वरेणास्मद्भवनमागत्य भूरिवसोरुपरि परं विश्वासमस्मासु च प्रसादमाविष्कुर्वता स्वयमेव प्रतिपादिता मालती तदेहि संभावयामः प्रमोदमिति ।

मक० । वयस्य सेयं वार्त्ता । मालतीमाधवौ वैवर्ण्यं नाटयतः ।

मद० । मालतीं सहर्षमालिङ्ग्य च । सहि मालदि तुमं क्खु एक्कणअरणिवासेण सहपंसुकीलणादो पहुदि मे पिअसही आसी वहिणिआ अ । संपदं उण घरस्स मण्डणं जादासि । (क)

(क) सखि मालति त्वं खल्वेकनगरनिवासेन सहपांसुक्रीडनात्प्रभृति मे प्रियसख्यासीद्भगिनिका च । सांप्रतं *पुनर्गृहस्य मण्डनं जातासि।

परमेश्वरो राजा । विश्वासमभेदम् । संभावयामः कारयामः । उत्सवपूर्वको हर्षः प्रमोदः ।

५३–५७ मङ्क्षातृवधूर्भविष्यसीति भावः । नोशब्दोस्माकमित्यर्थे

४६. B. om. ज्यायान्.

४७. संदिशति for समादिशति Bh.; भुवन° for भवन° C.; एत्य for आगत्य D.; अमात्य before भूरि° K2.

४८. D. om. परं; परं before प्रसा° B.; प्रतिपादिता after मालती (instead of before) K1. O.

४९. इति after °लती Bh.; °यावः for °यामः Bh. C. N.; प्रसादं for प्रमोदं O.

५०. इयं सा for सेयं K1. O.; विचिन्त्य before वैवर्ण्यं K1. K2.; वैचित्यं for वैवर्ण्यं A.

५१. सहर्षं मालतीं for मालतीं सहर्षं N.; K1. K2. om. मालतीं; आश्लिष्य for आलिङ्ग्य K1. K2. N. O.; खु for क्खु Bh. K1. K2. O.; एक for एक्क B.

५२. °गर for °अर K2.; वासेण B. अधिवासेण K1. K2. O. अहिवासेण N. for णिवासे°; सुह for सह B.; N. om. सह; पांसु for पंसु K1. K2.; कीलनादो K1. कीलादो N. for कीलणादो; B. Bh. om. पहुदि; °पहुदि for पहुदि O.; B. N. om. मे; प्पिय for पिअ O.; आसि for आसी A. Bh.; K1. K2. N. O. om. आसी; णिवहिणिआ K2. भइणी N. for वहिणिआ.

५३. K1. K2. N. om. अ; आसि before संपदं K1. K2. N.; सप्पयं for संपदं O.; खु for उण N.; णो A. Bh. D. K1. मे K2. अम्हाणं N. before घरस्स; सहि after मण्डणं K1.; जाआसि for जादासि N.

*पुनर्नो Com.

काम० । वत्से मदयन्तिके दिष्ट्या वर्धसे भ्रातुर्मालतीलाभेन ।

मद० । तुम्हाणं आसिसां पहावेण । सहि लवङ्गिए फलिदा ५५
णो मणोरहा तुम्हाणं लाहेण । (क)

लव० । सहि अम्हाणं पि अत्थि मन्तिदव्वं । (ख)

(क) *युष्माकमाशिषां प्रभावेण । सखि लवङ्गिके फलिता नो मनोरथा युष्माकं लाभेन ।

(ख) सखि अस्माकमप्यस्ति† मन्त्रयितव्यम् ।

निषेधे च तुल्यरूप इति निषेधोप्यत्र स्फुरति । अत एव सोत्कण्ठमाह । भ्रातुरित्यादि । उभयत्रोत्तरमाह । [युष्माकमिति] । भरिआ इति पाठे भृताः पूर्णा इत्यर्थः । [ल ० वा ०] अयमभिसंधिः । यूयं राज्ञः प्रणयिनो वयं सेवकाः । अतो युष्मत्संबन्धेन वयं पूर्णमनोरथा इति वचनमात्रम् । वस्तुतस्तु त्वत्संबन्ध एवास्माकं न भवितेति । माधवविवाहस्यावश्यकत्वात् । यद्वा । यदेतत्त्वया मन्त्रितमस्माकं मनोरथाः पूर्णा युष्माकं लाभेनेति वयमेव तद्ददामः । तेन त्वं मकरन्देन परिणेतव्येति मनोरथा अस्माकमेव पूर्णा भविष्यन्तीति गूढमुक्तम् । व्यक्तं तु युष्माकं राजमित्राणां लाभेन राजसेवका वयमेव पूर्णमनोरथा इति भावः । यद्वा । एतत्कामन्दक्याख्यं मन्त्रिरूपं द्रव्यमस्माकमप्यत्र विषये वर्तते तेन प्रतिहतमेतत् ।

---

५४. भद्रे for वत्से K1. K2.; N. om. दिष्ट्या.

५५. भअवदि before तुम्हाणं A. K2.; O. om. आसिसां; आसिसो B. असिसा Bh. आसीसाणं K1. K2. आसिसाणं N. for आसिसां; पसादेण B. Bh. K1. K2. N. °पसादेण O. for पहावेण; भाविणो before फलिदा D.; भरिता K2. भरिआ N. for फलिदा (Com. notices भरिआ).

५६. मे for णो K1. K2.; °मनो for °मणो K1.; तुम्ह for तुम्हाणं O.; लाभेण Bh. लाभेन K2. for लाहेण.

५७. N. om. सहि; A. B. add किं, C. किंचि after सहि; C. om. पि; वि N. ति O. for पि; N. O. om. अत्थि; एदं before मन्ति° K1. K2.; °तव्वं for °दव्वं K2.

* Com. follows A.; आशीःप्रसादेन Com. † एतत् for अस्ति Com.

मद०। सहि बुद्धरक्खिदे दाणिं विवाहमहूसवं संभावेम्ह।(क)

बुद्ध० । सहि एहि गच्छम्ह । (ख) इत्युत्तिष्ठतः।

६० लव०। जनान्तिकम्। भअवदि जहा एदे हिअअभरिदुव्विन्त-विम्हआणन्दसुन्दरं अन्दोलाअन्तधीरत्तणमणोहरा पल्हत्थन्ति मदअन्तिआमअरन्दाणं दलिदकन्दोट्ठदामसरिच्छा कडक्खवि-

---

(क) सखि बुद्धरक्षिते इदानीं *विवाहमहोत्सवं संभावयावः।

(ख) सखि एहि गच्छावः।

६०-६३ अत्र भरमितो भरितः ॥ शकन्ध्वादित्वात्परूपम् ॥ यद्वा। भरणं भरः संजातोस्य ॥ तारकादित्वादितच्। व्यवस्थितविभाषया वेट्प्राप्तेः ॥ अत एव वासवदत्तादौ भरितेति प्रयोगः। हृदये भरितौ पूर्णावुद्वृत्तावमान्तौ विस्मयानन्दौ ताभ्यां सुन्दराः। व्याघ्रनिपाताद्धृदयनिहितो विस्मयः। इष्टदर्शनादानन्दः। आन्दोलितं परित्यक्तं

---

५८. एहि before सहि D.; एहि for सहि A. C. O.; Bh. N. om. सहि; °रक्खिए for °रक्खिदे N.; एहि before दाणिं N.; N. om. विवाह; मंगल before महूसवं B.; °म्ह Bh. °वआवो K1. °वेम N. for °वेम्ह.

५९. N. om. the line except उत्तिष्ठतः; A. Bh. C. K1. O. om. एहि.

६०. B. om. जनान्तिकं; जधा A. O. जह N. for जहा; N. om. एदे; °दुव्वंत B. दुव्वत्त Bh. K1. K2. °दुचत्त C. °अडप्पडित N. °युक्षसंत O. for °दुव्विन्त.

६१. °याणन्द for °आणन्द K2. O.; सुन्दरा A. D. सुंदर N. for सुन्दरं; आन्दोलिद A. दोलाविअ Bh. दोलाअंत C. K1. K2. आंदोलाअंत D. घोलाविद N. दोलाविद O. for अन्दोलाअन्त; °त्तणा B. पेरत्त Bh. पेरंत N. O. for °त्तण; पेरंत C. परमेत K1. परन्त K2. after °त्तण; मण for मणो N. O.; °रहा for °हरा B. C.; पल्हच्छन्ति K1. पप्फुलन्ति K2. पल्लत्थंति N. पल्लवंति O. for पल्हत्थन्ति.

६२. मक° for मअ° K2.; दर before दलिद A.; K2. om. दलिद; सुंदर after दलिद B; णिलुप्पल A. B. कुदोद् Bh. कंदोत्थ O. for कन्दोट्ठ; मंसलच्छविणो N. मालाछवीओ O. for दा°-च्छा; सछहा Bh. सच्छाआ K1. K2. for सरिच्छा; दिट्ठि for कडक्ख B. N. O.; संभेआ N. वियारा O. for विक्खेवा.

* Com. om. विवाह.

क्खेवा तहा तक्केमि मणोरहणिव्वुत्तसंबन्धा एदे त्ति। (क)

कामे०। विहस्य। नन्विमौ विलोकनेन मानसं मुहुर्मुहुर्मोहन-
मनुभवतः। ६९

तथा हि।

ईषत्तिर्यग्वलनविषमं कूणितप्रान्तमेत-
त्प्रेमोद्वेदस्तिमितललितं किंचिदाकुञ्चितभ्रु।

(क) भगवति यथैते हृदयभरितोद्वृत्तविस्मयानन्दसुन्दरमान्दो-* लायमानधीरत्वमनोहराः पर्यस्यन्ति† मदयन्तिकामकरन्दयोर्दलितनी-लोत्पलदामसदृक्षाः‡कटाक्षविक्षेपास्तथा तर्कयामि मनोरथनिर्वृत्तसं-बन्धावेताविति।

यद्धीरत्वं तेन मनोहराः। दलितं विकसितम्। कन्दोट्टं नीलोत्पलम्। स-दृक्षास्तुल्याः। कान्ता दृष्टिरियम्।

६४–७२ मोहनं सुरतम्। अत एव कामशास्त्रम्।

मोहनं नारभेत्तावद्यावन्नोत्कण्ठिता प्रिया॥ इति।

ईषदित्यादि। एतदनयोर्दृष्टं दर्शनं व्यक्तं शंसति यदेतौ मानसं मोहनम-नुभवत इत्यन्वयः। दृष्टं कीदृशम्। ईषन्मनाक्तिर्यग्वलितेन विषमं म-

---

६३. तह for तहा A. D. K1. N.; मण्णे N. मण्णेध O. for तक्केमि; °हर for °रह Bh.; णिवुत्त Bh. K1. K2. O. णिक्खित्त C. for णिव्वुत्त; समाअमा for संबन्धा N.; एदं ति Bh. N. for एदे त्ति.

६४. N. om. विहस्य; मम after विहस्य Bh.; तु for ननु Bh.; N.O. om. विलो-कनेन; परस्पर before मान° N.; मानस for मानसं N.; O. om. one मुहु:; N. om. मुहुर्मुहु:; प्रमोदं A. C. Kl. K2. मोहसुखं Bh. संमोहनं N. मोदमेव O. for मोहनं.

६७. वलित for वलन A. D. K1. K2.; कुञ्चित for कूणित A. B.

६८. °दारेचितभ्रु A. °दारेचितं तु Bh. K1. for °दा-भ्रु.

* Com follows A. † Com. परिवर्तन्ते. ‡ Com. has दृष्टि for कटाक्ष; Com. inserts आकेकरा: before तथा.

अन्तर्मोदानुभवमसृणं स्तम्भनिष्कम्पपक्ष्म
व्यक्तं शंसत्यचिरमनयोर्दृष्टमाकेकराक्षम् ॥

न्दम्। अनेन संकल्पसंगतानङ्गस्य पराभ्यूहशङ्कितेयं दृगित्युक्तम्। यदाह। शङ्कायां शङ्किता ज्ञेयेति। कुञ्चितप्रान्तमाकुञ्चितापाङ्गम्। मदयन्तिकाया जडत्वान्मकरन्दस्यान्यदर्शनसासूयत्वाज्जिह्मा दृष्टिः। यदाह।

जिह्मा दृष्टिरसूयायां जडतालस्ययोस्तथा ॥ इति।

दृष्टिद्वयेन सुरतप्रागवस्थोक्ता। प्रेम्ण उद्भेदादतिपरिपाकात्स्तिमितं स्थिरं लुलितमर्धमुकुलितं च। अर्धमुकुलितेयं दृक्। यदाह।

अङ्गादिष्वर्धमुकुला गन्धस्पर्शसुखादिषु।
अर्धव्याकोषपक्ष्माग्रा यस्तार्धमुकुलैः पुटैः ॥
स्मृतार्धमुकुला दृष्टिः किंचिन्मीलिततारका ॥

अनेन रताभोग उक्तः। नखदशनक्षतादिशङ्कया मानं सूचयति। किंचिदाकुञ्चिते अनमिते भ्रुवौ यत्र तत्। एकस्या एव भ्रुव उत्क्षेपणं कुञ्चनमिह। यदाह।

एकस्या एव उत्क्षेपो भ्रुवः कुञ्चनमुच्यते ॥

कोपे चास्य प्रयोगः। यदाह।

कोपे वितर्के हेलायां लीलादौ सहजे तथा।
दर्शने ग्रहणे चैव भ्रुवमेकां समुत्क्षिपेत् ॥

मानस्याल्पत्वसूचनार्थमाङ्प्रयोगः। रतावसानमाह। हृदये हर्षानुभवेन मसृणं स्निग्धं मन्दं वा। रतान्ते लज्जामाह। स्तम्भं लज्जान्विततया पतितोर्ध्वपुट्त्वात्। कथं पुनः संभोगो भावीति चिन्तया निष्कम्पम्। शून्यतया निष्कर्म्पं वा। तादृशं पक्ष्म यत्र। तद्विच्छेदमाह। आकेकर-

६९. °मोदा° for °मोदा° N.; मसृण for मसृणं C. N.; तम्भ Kl. K2. स्तस्त N. O. for स्तम्भ.

पुरुषः । वत्से इत इतः ।

मद० । सहि बुद्धरक्खिदे अवि पुणो वि दीसइ एस जीविदप्पदाई पुण्डरीअलोअणो । (क)

बुद्ध० । जइ देव्वमणुऊलं भविस्सदि । (ख) पुरुषेण निष्क्रान्ते ।

माध० । अपवार्य । चिरादाशातन्तुस्खुटतु बिसिनीसूत्रभिदुरो
महानाधिव्याधिर्निरवधिरिदानीं प्रसरतु ।

(क) सखि बुद्धरक्षिते अपि* पुनरपि दृश्यत एष जीवितप्रदायी पुण्डरीकलोचनः ।

(ख) यदि दैवमनुकूलं भविष्यति ।

क्षि यत्र तत् । आकेकरा त्वरालोके विच्छेदे प्रोषितेषु चेत्याद्युक्तम् । तदिहाकेकरलक्षण आकुञ्चितेत्यादि प्रथमपदेनोक्तम् । द्वितीयेन मुहुर्व्यावृत्ततारेत्युक्तम् । तृतीयेन हर्षितार्धेत्याद्युक्तम् । अपि नाम संभावनायाम् । अव्ययसमुदायत्वात् ।

७६–७९ करुणावस्थामाह । चिरादित्यादि । चिरशङ्कित आशातन्तुर्मालतीप्राप्त्याशारूपहृदयावलम्बनं संप्रति भिद्यताम् । बिसिनीसूत्र-

---

७१. A. om. वत्से.

७२. अपवार्य after मद० । N.; K1. om. सहि; °रक्खिए N. for रक्खिदे; नाम after अवि A. D. K1. K2.; N. om. वि; दाव after वि A. Bh. C. D. O.; दीसिदइ Bh. दीसीअदि K1. K2. दीसायिस्सदि O. for दीसइ; स K1. K2. एसो N. for एस; °विअ for °विद N.

७३. प्पदो A. C. D. दायी K1. प्पआई N. ल्वदाई O. for प्पदाई.

७४. जदि for जइ K2. N.; दिव्वं K1. K2. for देव्वं; °कूलं A. Bh. C. °ऊलं K1. for °ऊलं; °ऊलइस्सदि N. °कूलियस्सदि O. for °ऊलं—स्सदि; A. B. C. D. K1. add त्ति after °स्सदि; K1. K2. N. O. om. पुरुषेण; B. adds सह after पुरुषेण.

७५. इति before निष्क्रा° K1. K2.; निष्क्रान्ताः K1. K2. निष्क्रामति N. निःक्रामंति O. for निष्क्रान्ते.

७७. आधिर्व्या° for आधिव्या° B. C. O.

* Com. follows A. D., &c., and has दृश्यते for दृश्यते.

प्रतिष्ठामव्याजं व्रजतु मयि पारिप्लवधुरा
विधिः स्वास्थ्यं धत्तां भवतु कृतकृत्यश्च मदनः ॥

८० अथ वा। समानप्रेमाणं जनमसुलभं प्रार्थितवतो
विधौ वामारम्भे मम समुचितैषा परिणतिः।
तथाप्यस्मिन्दानश्रवणसमयेस्याः प्रविगल-
त्प्रभं प्रातश्चन्द्रद्युति वदनमन्तर्दहति माम् ॥

वद्भिदुरो भेदनस्वभावो यतः॥ भिदेः कर्मकर्तरीति कुरच् ॥ संभूय नु-
टितत्वेन मृणालतन्तुसाम्यम्। नैराश्यान्मरणमाह। आधिर्मनोव्यथा
तद्रूपो व्याधिरनवच्छिन्नोत एव महान्व्याप्नोतु। इह महत्त्वनिरवधित्वा-
भ्यां मरणमाह। आशाच्छेदानन्तरं च मरणमुचितमेव। यदाह।

सर्वैः कृतैः प्रतीकारैर्यदा नास्ति समागमः।
कामाग्निना समाप्तस्य जायते मरणं ततः॥

क्षीहेतुमरणादधीरत्वमाशङ्क्यानुज्ञोत्तरमाह।पारिप्लवधुरा चपलकक्षा
सत्यं स्थितिं मयि बध्नातु। अभीष्टलाभेन विधिर्निराकुलो भवतु। मालतीं
विना दुःसहवेदनादायी मनोभूः कृतकृत्यो भवतु। मरणादधिकं किं क-
र्तव्यमस्येत्यर्थः। एतदुपालम्भगर्भं वच उद्वेगात्। यदाह।

हहादचिन्तानिःश्वासग्लानिखेदप्रजागरैः।
रोदनैर्मन्दभणितैर्दैवोपालम्भनेन च॥ इति।

८०–८३ समानेत्यादि। वामारम्भे प्रतिकूले विधौ ममैषा परि-
णतिः पूर्वोक्ता युक्तैव। कीदृशस्य। तुल्यप्रीतिं दुष्प्रापं जनं याचितव-
तः। वामे हि विधौ सुलभमपि न लभ्यते किं पुनरसुलभमिति भावः।

---

७८. निर्व्याजं K1. K2. °मव्याजां N. for °मव्याजं; धुरं for धुरा K1. K2.
७९. धत्तां स्वास्थ्यं for स्वा—त्तां O.
८१. °दैषा for °चैषा K1.
८२. परि° for प्रवि° O.

काम०। स्वगतम्। एवमतिदुर्मनायमानः पीडयति मां वत्सो माधवो वत्सा मालती च दुष्करं निराशा प्राणिति। प्रकाशम्। ८५
पृच्छामि तावदायुष्मन्तम्। अपि भवानमंस्त यथा भूरिवसुरेव मालतीमस्मभ्यं दास्यति।

माध०। सलज्जम्। न हि न हि।

काम०। न तर्हि प्रागवस्थायाः परिहीयसे।

मक०। भगवति दत्तपूर्वेत्याशङ्क्यते। ९०

दृष्टकारणस्यानुपलम्भाद्विधेर्वामत्वम्। असुलभत्वं परतन्त्रत्वात्। यद्यपि युक्तेर्थे खेदो नास्ति तथाप्यस्या मालत्यास्तादृशं मुखं मामन्तर्दहति। एतन्मुखं वीक्ष्य मनस्तापो मे भवतीति भावः। अस्मिन्दानभ्रवणसमये नन्दनाय मालती दातव्येति श्रुत्वा खेदात्कान्तिशून्यत्वम्। अत एव प्रातश्चन्द्रकान्ति क्वापि विगतकान्ति भवति। अथ च प्रातश्चन्द्रोपमया रागध्वनेर्विधिं प्रति मालतीकोपोपि सूचितः।

८५-९९ दुष्करं यथा तथा प्राणिति जीवति। अमंस्त मन्यते स्म। प्रागवस्था मालतीप्राप्तिलक्षणा। तदा तस्याज्ञानमिति भावः। दत्त-पूर्वा पूर्वं दत्ता॥ क्षुप्क्षुपेति समासः॥ इदं च तापहेतुः। वागिति वाचि

---

८४. जनान्तिकं for स्वगतम् K1. O.; K2. om. स्वगतम्।

८५. K1. K2. N. om. माधवो; च after वत्सा K1. K2. N. O.; K1. N. O. om. च after °लती; K2. N. O. om. प्रकाशम्.

८६. प्रकाशं after °युष्मन्तम् K2. N. O.; अथ किं for अपि N.; K1. K2. N. O. om. यथा; B. om. एव.

८७. अस्मभ्यं मालतीं for मा–भ्यं K1. K2.; न before दास्यति C. इति after °स्यति B. K1. K2. N. O.

८८. N. om. this and the next three lines; O. om. one नहि.

८९. Bh. om. काम°।; A. Bh. om. न; किं for न O.; °स्थया for °स्थायाः Bh.

९०. माध° । for मक°। K1. K2.; B. om. भगवति; अदत्त for दत्त B.; °शंकते for °शङ्क्यते B.

काम° । जानामि तां खलु वार्त्ताम् । इदं तु प्रसिद्धमेव यथा नन्दनाथ मालतीं प्रार्थयमानं भूरिवसुर्नृपतिमुक्तवान्प्रभवति निजस्य कन्यकाजनस्य महाराज इति ।

मक° । अस्त्येतत् ।

९९ काम० । अद्य च स्वयं राज्ञैव दत्ता मालतीति पुरुषेणावेदितम् । तद्वत्स वाक्प्रतिष्ठानि देहिनां व्यवहारतन्त्राणि वाचि पुण्यापुण्यहेतवो व्यवस्थाःसर्वेषां जनानामायतन्त इति । सा च भूरिवसोर्वागनृतात्मिकैव न खलु महाराजस्य मालती निजा कन्यका कन्यादाने च नृपतयः प्रमाणमिति नैवंविधो १०० धर्माचारसमयस्तस्मादविमर्शितव्यमेतत् । कथं च वत्स मामनवधानां मन्यसे ।

सर्वं प्रतिष्ठितमिति भावः । अनृतात्मिकासत्या । धर्माचारसमयो धार्मिकसिद्धान्तः ॥ समयाः शपथाचारकालसिद्धान्तसंविद इति विश्वः ॥

९९. K2. om. काम° ।; जानासि for जानामि A. C. D. K2.; O. om. तां; न before तां C; न after तां K1. K2.; तावत् for तु K1. K2. O.

९२. किं तु before नन्द° N.; नर° for नृ° O.; एवम् before उक्तवान् C. K2. O.; प्रभवति before प्रभवति B. Bh. C. O.

९३. निज for निजस्य B. Bh. C. K1. K2.

९५. एव after अद्य A.; C. om. च; N. om. राज्ञा; मालती दत्तेति for दत्ति K1. K2. N. O.; संप्रत्येवं K1. संप्रत्येव K2. N. after इति; आवेदितं पुरुषेण for पु-तम् N.

९६. हृदि for वाक् A. K1.; A. B. C. D. add °बन्धनानि after °ष्ठानि; °रान्तराणि for °रतन्त्राणि K1. K2.

९७. च after वाचि K1. K2.; सर्वथा N. for सर्वेषां; हेतवो व्यवस्थिताः सर्वं च वचनानामायत्तं for हेतवो-इति A. B. Bh. C. D.; N. om. इति.

९८. अनृता B. अनृतात्मका N. अमृतात्मिका O. for अनृतात्मिका; मालती निजमहाराजस्य K1. K2. मालती महाराजस्य O. for महा-ती; कन्यका मालती for माल-का N.

९९. निज for निजा C O.; K1. K2. om. निजा; निज before कन्या N.; कन्यका for कन्या B. N.; K2. om. कन्या; प्रदाने for दाने A. K1. K2. N. O.; K1. om. च; विषयः for समयः K1.

१००. तद् for तस्माद् D.; विमर्शितव्यं A. D. अमर्शितव्यं C, विमर्षितव्यं K1. विमर्षनीयं K2. अव्यवस्थितं N. अविचिकित्स्यं O. for अविमर्शितव्यम्; एव before एतत् N.; च before वत्स K1.; K2. om. वत्स.

पश्य । मा वा सपत्नेष्वपि नाम तद्भू-
त्पापं यदस्यां त्वयि वा विशङ्कचम् ।
तत्सर्वथा संगमनाय यत्नः
प्राणव्ययेनापि मया विधेयः ॥ १०५

मक० । सुष्ठु युज्यमानमादिश्यते युष्माभिः ।

अपि च ।

दया वा स्नेहो वा भगवति निजेस्मिञ्शिशुजने
भवत्याः संसाराद्विरतमपि चित्तं द्रवयति ।

१०२–१०५ निजावधानमाह । मा वेति । अस्यां मालत्यां त्वयि च यत्पापं विवाहानिर्वाहे मरणरूपं शङ्कनीयं विप्रयोगजन्यदुःखादि वा तच्छत्रुष्वपि नाम प्राकाश्ये मा वा भून्मैव भविष्यति । वाशब्द एवार्थे । स्वकर्तव्यमाह । तदिति । तस्माद्युवयोः संबन्धाय सर्वप्रकारेण जीवत्यागेनापि मया प्रयत्नः कार्यः । यदि बुद्धिकौशलेन न सिद्धिस्तदा प्राणव्ययेनापि साध्यमित्यपेः स्वरसः । मरणादेरमङ्गलतया पापपदेनोपन्यासः । शत्रुष्वपि मा भूदिति लोकोक्तिच्छायालंकारः ।

१०८–११२ दयेत्यादि । हे भगवति अस्मिञ्शिशुजने बालजने माधवे मालत्यां च दया करुणा स्नेहो ममता च संसाराद्विरक्तमपि भगवत्याश्चित्तं द्रवयत्यार्द्रीकरोति । भवत्या इति दयास्नेहान्वयि चित्तान्वयि च । काकाक्षिगोलकवत् । वाशब्दौ चार्थे । अत एव चित्तद्रवणात् । व्रत-

---

१०२. वं for वा Bh. K1.; मा for तद् Bh.

१०३. °चि शङ्कचम् for विशङ्कचम् K1. K2. (in K2. पि written above चि).

१०५. सर्वं before सुष्ठु N.; सर्वं for सुष्ठु O.; सर्वं after सुष्ठु K1. K2.; इदं after °मानम् Bh.; भवतीभिः for युष्माभिः B.

१०८ जने for निजे O.

१०९ चेतो for चित्तं B.

११० अतश्च प्रव्रज्यासुलभसमयाचारविमुखः
प्रसक्तस्ते यत्नः प्रभवति पुनर्दैवमपरम् ॥

नेपथ्ये । भअवदि कामन्दइ एसा भट्टिणी विण्णवेदि मालदिं घेऊण तुरिदं आअच्छदु त्ति । (क)

काम° । वत्से उत्तिष्ठ । सर्वं उत्तिष्ठन्ति ।

११५ मालतीमाधवौ सकरुणानुरागमन्योन्यमवलोकयतः ।

(क) भगवति कामन्दकि एषा भट्टिनी विज्ञापयति मालतीं गृहीत्वा त्वरितमागच्छत्विति ।

ग्रहणपूर्वकसर्वैषणानिवृत्तिः प्रव्रज्या । तस्यां सुलभोवश्यंभावी समयाचारोनुष्ठानविशेषो ध्यानादिविषयस्तत्र विमुखो निरुद्धो यत्नस्ते प्रसक्तोविच्छिन्नः सन्प्रभवति । च एवार्थे । कार्यासिद्धिरदृष्टविलम्बात् । तत्र न भवत्या दोष इत्याह । अपरं पुनर्दैवं प्रभवति । ईश्वरस्त्रीषु राज्ञीपदोपचारेण भट्टिनीत्युक्तम् । भरतोप्याह ।

राजस्त्रियस्तु संभाष्याः सर्वाः परिजनेन तु ।
भट्टिनी स्वामिनीत्येवं नाट्ये प्राहुर्विचक्षणाः ॥

---

११० समयसुलभा° for सुलभसमया° A.Bh. C.; समुदा° for समया° K1. K2.

११२. भगवति Bh. भगवदि K2. for भअवदि; कामन्दइ भयवदि for भ-इ O.; विण्° for विण्ण° K1.; A. B. Bh. C. D. add अधा after °वेदि.

११३. °लदीं A. D. °लदी B. C. for °लदिं; घेतूण B. घेत्तूण Bh. N. O. गेहिअ K1. for घेऊण; तुरिअं for तुरिदं N.; आगछेत्ति D. आअच्छदित्ति K1. आगच्छदित्ति K2. आअछुत्ति N. for आअ-त्ति.

११४. उत्तिष्ठ twice B.; B. om. सर्वं-न्ति; सर्वा for सर्वं N.; उत्थाय परिक्रामन्ति for उत्तिष्ठन्ति K1. K2. N. O.

११५. °रागौ for °रागम् K1.; K1, K2. om. अन्योन्यम्; आलोक° for अवलोक° B.

माध०। स्वगतम्। कष्टमेतावती लोकयात्रा मालत्या समं माधवस्य। अहो नु खलु भोः।

सुहृदिव प्रकटय्य सुखप्रदः
प्रथममेकरसामनुकूलताम्।
पुनरकाण्डविवर्तनदारुणः
प्रविशिनष्टि विधिर्मनसो रुजम्॥ १२०

माल०। स्वगतम्। महाभाअ लोअणाणन्द एत्तिअं दिट्ठोसि।(क)

(क) महाभाग लोचनानन्द* एतावद्दृष्टोसि।

११६–१२१ लोकयात्रा दर्शनादिकम्। अहो नु खलु भो इत्यव्ययसमुदायो निर्वेदे। सुहृदित्यादि। एकत्रैव रसो रतिर्यस्यास्ताम्। यद्वा। एक एव रसः शृङ्गारो यस्यां ताम्। निरन्तरां वानुकूलतामानुकूल्यं प्रथमं प्रकाश्य सुखप्रदो विधिः पुनर्मनसो रुजं पीडां प्रविशिनष्ट्यतिशयितां करोति। कीदृशः। अकाण्डादकस्माद्विवर्तनेना-

---

११६. K1. K2. N. O. om. स्वगतम्; कथम् for कष्टम् K1. K2. O.; हि after °वती K2. N.; माधवस्य मालत्या सम लोकयात्रा K1. O. मालत्या समं लोकयात्रा K2. माधवस्य मालत्या सह लोकयात्रा N. for लोक–वस्य.

११७. निर्वेदे before अहो K1.; Bh. om. नु; मोहः for भोः Bh.

११८. प्रदां for प्रदः N. O.

११९. प्रकटीप्य° for प्रकटय्य A.; °रसाद् for °रसाम् K1. K2.

१२१. विधिरहो विशिनष्टि मनोरुजं for प्रवि–जम् A. Bh. C. D.; परि° for प्रवि° K1. N. O.

१२२. अवधार्य for स्वगतम् K1. K2. N. O.; महानुभाअ K1. महानुभाव N. महाणुभाव O. for महाभाअ; लोचणा° B. लोअणा° K2. for लोअणा°; °णंदअ B. °नंद O. for °नन्दु; एत्तिकं for एत्तिअं K1.

* °नन्दक एतावदेव Com.

लव०। हद्धी हद्धी सरीरसंसअं जेव्व णो पिअसही आरोविदा अमच्चेण। (क)

१२५ माल०। स्वगतम्। परिणदं मे दाणिं जीविदतिद्धाए फलं। णिव्वूढं अ णिक्करुणदाए तादस्स कावालिअत्तणं। पडिट्ठिदो

(क) हा धिक् हा धिक् शरीरसंशयमेव नः प्रियसख्यारोपितामात्येन।

न्यथाभावेन विरुद्धवर्तनेन वा दारुणो दुःखदायी। सुहृदिव। यथा मित्रमानुकूल्यमुत्पाद्य सुखप्रदं सदकाण्ड एव विरुद्धाचरणान्मनःपीडां करोति तयेत्यर्थः।

१२२-१२६ [माल० वा०] पुनर्दर्शनं न भवितेति भावः। अत एवैतावदित्यनेन करुणा। नयनानन्देत्यनेनानुरागः। अत्र पुरा विरहदशायां माधवप्रतिच्छन्दकादिदर्शनाद्धारितस्य जीवितस्य पर्यवसानं वृत्तमिति परिणतपदस्यार्थः। कापालिकत्वं नृशंसता। अघोरघण्टस्य सूचनमप्येतत्।

---

१२१. O. om. one हद्धी; प्रिय for पिअ O.; समारोविदा K1. K2. आरोहदा for आरोविदा.

१२४. मालदी after अमच्चेण K1. K2.

१२५. A. K1. K2. N. om. स्वगतम्; A. N. om. मे; दाणिं मे for मे दाणिं Bh. K1. K2.; जीव for जीविद Bh.; सात्तं after फलं A. K1. K2.

१२६. च for अ D.; Bh. K1. om. अ; °ताए for °दाए O.; कावालिअत्तणं तादस्स for ता–त्तणं K1. K2.; A. B. Bh. C. D. add वि after तादस्स; परिसेविदो B. Bh. परिसेविदो C. परिट्ठिदो K1. पडिट्ठिदो K2. परिपिट्ठिदो N. पडित्थिदो O. for पडिट्ठिदो.

दुट्ठदेव्वस्स दारुणसमारम्भसरिसो परिणामो । कं एत्थ उवालहामि मन्दभाइणी कं वा असरणा सरणं पडिवज्जामि । (क)

लव० । सहि इदो इदो । (ख) इति कामन्दक्या सह निष्क्रान्ते ।

माध०।स्वगतम् । नूनमाश्वासनमात्रमेतन्माधवस्य सहजस्नेहकातरा करोति भगवती । सोद्वेगम् । हन्त सर्वथा संशायितजन्मसाफल्यः संवृत्तोस्मि । तत्किमिदानीं कर्तव्यम् । विचिन्त्य । न

(क) परिणतं म इदानीं जीविततृष्णायाः फलम् । निर्व्यूढं च निष्करुणतया तातस्य* कापालिकत्वम् । प्रतिष्ठितो दुष्टदैवस्य दारुणसमारम्भसदृशः परिणामः । कमिहोपालभे मन्दभागिनी कं वाशरणा शरणं प्रतिपद्ये ।

(ख) सखि इत इतः ।

१३१–१३४ जन्मसाफल्यं मालतीप्राप्त्या । महामांसेति भाव्यङ्गवचनम् । वीरहस्तान्मांसं गृहीत्वा वीरायाभिमतवरदानमिति श्मशानसिद्धयोगिनीमतम् । यद्वा।उभयथा मरणमुपस्थितम् ।महामांसविक्रये मालतीलाभोपि शङ्क्यत इति तत्करणम् । मांसविक्रयस्य मकर-

१२७. अ after °दो K2.; दुद्देव्वस्स Bh. देव्वहदअस्स N. दुद्धदेव्वस्स O. दुट्ठदेव्वस्स A. B. C. D. K2. for दुट्ठदेव्वस्स; अदि before दारुण K1. K2.; दारुणो for दारुण O.; N. om. सरिसो; ता before कं N.; एच्छ K1. इत्थ K2. वा O. for एत्थ; B. Bh. D. N. om. एत्थ; उवलम्भामि K1. उवलहामि K2. उवालंभामि N. उवालहामि O. for उवालहामि.

१२८. °भाइ K1. °भाइआ N. °भाआ O. for °भाइणी. दाणी before कं K1.; B. om. अशरणा; वडिवज्जामि Bh. प्पज्जामि O. for पडिवज्जामि.

१२९. K1. om. one इदो; K1. N. O. om. इति; A. D. K1. K2. N. O. om. कामन्दक्या सह; सगं for सह Bh.; निक्कामन्ति A. D. K1 K2. परिक्कामति N. परिक्कामंति O. for निष्क्रान्ते.

१३०. °श्वासना Bh. K2. °श्वसना K1. °श्वास O. for °श्वासन; एव before एतद् A. D. K1. K2.; एव for एतद् N.

१३१. कातरां for कातरा C.; °वर्ती for °वती C.; B. Bh. C. om. सर्वथा.

१३२. °साकल्यं for °साफल्यः C.; B. om. तत्–तव्यं; N. om. इदानीं; अथ for इदानीं K1. K2.; इति before विचिन्त्य K1. K2.

* Com. तातस्य after °कत्वं.

खलु महामांसविक्रयादन्यमुपायं पश्यामि । प्रकाशम् । वयस्य मकरन्द अपि भवानुत्कण्ठते मदयन्तिकायाः ।

१३९ मक० । अथ किम् ।

तन्मे मनः क्षिपति यत्सरसप्रहार-
मालोक्य मामगणितस्खलदुत्तरीया ।
त्रस्तैकहायनकुरङ्गविलोलदृष्टि-
राश्लिष्टवन्यमृतसंवलितैरिवाङ्गैः ॥

१४० माध० । सुलभैव बुद्धरक्षितापियसखी भवतः । अपि च । प्रमथ्य क्रव्यादं मरणसमये रक्षितवतः
परिष्वङ्गं लब्ध्वा तव कथमिवान्यत्र रमताम् ।

न्दर्शनिधावशक्यत्वान्मकरन्दं मदयन्तिकां प्रत्युत्कण्ठयति । वयस्येति । मदयन्तिकायाः कृत इति शेषः । यद्वा ॥ अधीगर्थेति कर्मणि षष्ठी॥

१३९–१३९ अथ किं स्वीकारे । तन्म इत्यादि । तन्मम चित्तं हरति यदेतादृशैरङ्गैर्मामालिङ्गितवती । सरसः सरक्तः प्रहारो यस्य तादृशं मामवलोक्य । अत एव त्वरयागणितं स्खलत्प्रभृदयदुत्तरीयं स्तनावरणवासो यस्याः सा । एतेन निरन्तरस्तनस्पर्शः सूचितः । अत एवानन्दसंदोहदायित्वादमृतसिक्तैरिव । भयवत्त्वेन त्रस्तैकवर्षीयहरिणस्येव चञ्चला दृष्टिर्यस्याः सा ॥ वर्षोऽदो हायनोस्त्रीत्यमरः ॥

१४०–१४४. त्रासेन त्वदालिङ्गनं न तु स्नेहादिति शङ्कापनोदाय दूती सुलभतयानुरागमेवाह । सुलभेति । प्रमथ्येत्यादि । सा तवालिङ्गनं प्राप्यान्यत्र कथं रमताम् । अपि तु नैव । इवशब्दोनवक्तृको । कुलीनि-

---

१३३. अन्यद् for अन्यम् A. Bh. C. D. K1. K2. N.; उपायान्तरे for उपायं A. Bh. C. D. N.

१३४. °त्कण्ठसे for °त्कण्ठते Bh.; °कायां for °कायाः N.

१३६. सहसा for सरस C.

१३९. °तैरपाङ्गैः for °तैरिवाङ्गैः B.

१४०. दुर्लभा न D. O. न दुर्लभा N. for सुलभा; N, O. om. एव; °क्षितायाः for °क्षिता K2.; B. om. प्रिय; N. om. भवतः.

तथा च व्यापारः कमलनयनाया नयनयो-
स्त्वयि व्यक्तस्नेहस्तिमितरमणीयश्चिरमभूत् ॥

मक०। तदुत्तिष्ठ पारासिन्धुसंभेदमवगाह्य नगरीमेव प्रविशा- १४५
वः। उत्थाय परिक्रामतः।

माध० । अयमसौ महानद्योः संभेदः । य एषः

जलनिबिडितवल्गव्यक्तनिम्नोन्नताभिः
परिगततटभूमिः स्नानमात्रोत्थिताभिः ।

कमालिङ्ग्य नान्यत्र रमत इति भावः । कीदृशस्य । क्रव्यमाममांसम-क्तीति क्रव्याद्व्याघ्रः । तं विनाश्य मरणकाले तां रक्षितवतः । एतेन कृतोपकारितोक्ता । अतोपि नान्यत्र रमते । पद्माक्ष्याश्चक्षुषोस्तथा तेन प्रकारेण त्वयि व्यापारश्च व्यक्तः स्नेहास्तिमितो मन्दोत एव रमणी-यश्चिरमभूत् । रागेण तया साभिलाषमालोकितोसीति भावः । एतेनानु-राग उक्तः । यदाहानुरागप्रकरणे ।

तुष्यत्यस्य कथाभिस्तु सस्नेहं च निरीक्षते ॥
क्रव्यमामिषमुद्वासमिति हारावली ॥

१४५–१५१ पारा च सिन्धुश्च ते नद्यौ तयोः संगमः । अव-गाह्य विलोडय । स्नात्वेति यावत् । क्लमशान्तिहेतुतया महामांसादा-नहेतुतया च स्नानम् । व्यतिकरः संगमः । जलेत्यादि । वधूभिर्नारीभिः सेवितततटदेशः । कीदृशीभिः। जलेन निबिडितमङ्गलं यद्वासस्तेन व्य-

---

१४३. °वदनाया for °नयनाया Bh. C.
१४४. स्तिमिर for स्तिमित B. K1.
१४५. D. N. om. मक° । ; वरदा for पारा N.; नगरमेव for नगरीमेव K2.
१४६. परिक्रम्य for परिक्रामतः B. Bh. C.
१४७. मक° for माध° N. O.; Bh. om. माध° । ; व्यतिकरः for संभेदः Com. K1. K2. N. O; अयं for यः O.
१४९. स्नात for स्नान N.

१५० रुचिरकनककुम्भश्रीमदाभोगतुङ्ग-
स्तनविनिहितहस्तस्वस्तिकाभिर्वधूभिः ॥
इति निष्क्रान्ताः सर्वे ।
॥ शार्दूलविभ्रमो नाम चतुर्थोङ्कः ॥

क्तौ निम्नोन्नतौ जघनादिस्तनाद्यौ यासाम्।अत एव स्तानमात्रोत्थिताभिः। मात्रपदेन स्नानार्द्रवस्त्रापरित्यागः सूचितः । अत एव चाह्लादहेतुतया स्नानमपि । तौ दृष्ट्वा तासां लज्जामाह । मनोज्ञस्वर्णघटशोभावानाभोगः परिपूर्णता ययोरुरुकुचयोस्तयोर्विनिहितौ दत्तौ हस्तावेव स्वस्तिकौ याभिस्ताभिः। हस्ताभ्यां स्वस्तिकोन्योन्यवामदक्षिणविन्यासः। यदाह ।

मणिबन्धनविन्यस्तावरालौ स्त्रीप्रयोजितौ ।
उत्तानौ वामपार्श्वस्थौ स्वस्तिकः परिकीर्तितः ॥

अरालश्चैवम् ।

आद्या धनुर्लताकारा कुञ्चितोद्भुष्टकस्तथा ।
शेषा भिन्नोर्ध्ववलिता अरालेङ्गुलयः करे ॥

कनकेत्यादिना तासां गौरीत्वमुक्तम् । मङ्गलकलशानामिवैषां दर्शनेनेष्टसिद्धिरपि सूचिता ।

अस्तूत वः स्मरधरो द्विजेशो द्विजेशकन्या दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेङ्गोगमच्चतुर्थो रसराशिवासः ॥

॥ इति चतुर्थोङ्कः ॥

---

१५०. महा° for मद्य° O.

१५१. निःक्रान्तौ for निष्क्रान्ताः Bh.; Bh. om. सर्वे.

१५२. मालतीमाधवप्रकरणे चतुर्थोङ्कः संपूर्णः for शा-ङ्कः D; A. Kl. K2. N. O. om. शा-म; संभमो Bh. संक्रमो C. for विभमो; समाप्तः after अङ्कः A.

पञ्चमोऽङ्कः ।

ततः प्रविश्याकाशयानेन भीषणोज्ज्वलवेशा कपालकुण्डला ।
कपा° । षडधिकदशनाडीचक्रमध्यस्थितात्मा
हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः ।

संप्रति प्रमथ्य क्रव्यादमित्यनेनाघोरषण्टकपालकुण्डलाप्रवेशे सूचिते महामांसविक्रयप्रतिज्ञया च माधवस्य श्मशानप्रवेशे सत्यङ्कावतारः ।

१–५ आकाशयानेन प्रवेशो योगसिद्धिसूचनाय । भीषणा भयंकरी । उज्ज्वलवेशा विशुद्धशरीरा । एतदपि योगिनीत्वादेव । षडधिकेत्यादि । स शक्तिनाथः शिवो जयति जययुक्तो भवति ॥ कालसामान्ये भवन्ती वक्तव्येति भाष्यकारवचनात्कालत्रितयेपि वा लट् ॥ श्मशाननाथस्य जयेन श्मशानसाधनसिद्धिः सूचिता । कीदृशः । अविचलितं निःस्पन्दीभूतम् । विषयान्तरव्यावृत्तमिति यावत् । मनो येषां तैः साधकैर्मृग्यमाणेन्विष्यमाणः । अनेन ध्यानानुष्ठानमुक्तम् । यदाह ।

रूपवर्णप्रमाणाढ्यं परिकल्प्य सुबुद्धिना ।
तथा ध्यायेत देवेशं यथा चित्तं स्थिरं भवेत् ॥

चित्तस्थैर्यं तु निर्विषयतयैव । यदाह ।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धस्य विषयासङ्गि मुक्तेर्निर्विषयं मनः ॥

तथा च निराकारोप्यर्थं सहसैव न साक्षात्कारविषयो भवतीति न योग्यानुपलम्भमात्रेण निरस्य इत्यपि कटाक्षितम् । शक्तिभिर्ब्राह्मीमाहेश्वरीकौमारीवैष्णवीवाराहीमाहेन्द्रीचामुण्डाचण्डिकाख्याभिरष्टाभिः परितो नद्धो वेष्टितो भैरवमूर्तित्वात् । यद्वा । शक्तिभिर्ज्ञानेच्छाप्रयत्नात्मिकाभिः परिणद्ध उपचितः । अत एव शक्तीनामणिमादीनां नाथः प्रभुः ।

१. °ज्ज्वला for °ज्ज्वलवेशा A. Bh. C. K1. K2. O.

अविचलितमनोभिः साधकैर्मृग्यमाणः
स जयति परिणद्धः शक्तिभिः शक्तिनाथः ॥

अत एव जयति सर्वोत्कृष्टो वर्तते । कीदृशः । षट्सु कर्णनाभिहृत्कण्ठतालुभ्रूमध्यवर्तिषु शिवशक्तिसंघट्टस्थानेषु नाडीसंघट्टेषु हृदाद्यधिष्ठितप्राणविशेषचलनयोगाच्चक्रेष्विव मध्येधिकं प्रधानं यद्दशनाडीचक्रमिडापिङ्गलासुषुम्णागान्धारीहस्तिजिह्वापूषारुणालम्बुषाकुहूशङ्खिन्याख्या दश नाड्यो हृन्नैकोत्तरशतसंख्यासु तिर्यगूर्ध्वाधोगतनाडीषु प्रधानतमास्तासां चक्रं तस्य मध्ये पद्ममध्यवर्तिसूक्ष्माकाशदेशे प्राणाद्याधारे स्थित आत्मा कूटस्थो नित्यो यस्य स तथा । तत्र प्रमाणम् ।

आशिरश्चरणं देहं यद्यपि व्याप्य तिष्ठति ।
तथाप्यस्य परं स्थानं हृत्पङ्कजसमुद्भवम् ॥ इति ।

स्थितिरपि तस्य तत्र परमात्मतत्त्वाविर्भाव एव । यद्वा । षड्भिरधिका दश नाड्यः षोडशसंख्यास्तासां चक्रं तत्र मध्ये स्थितश्चासावात्मा चात्मस्वरूपः । तदुक्तम् । सर्वं शिवमयं मतमिति । यद्वा । षडधिकं यद्दशनाडीचक्रम् । मतभेदेनैते पक्षाः । हृदि हृत्पद्मे विनिहितरूपो ध्यातमूर्तिः सन्यस्तद्विदां शिवशक्तिसाक्षात्कारवतां सिद्धिदोणिमाद्यैश्वर्यप्रदः । अत्र मानम् ।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥
सकलं चिन्तयेत्तस्मात्सिद्धयर्थं सततं शिवम् ॥
ध्यानेन तत्परं गच्छेत्सर्वैश्वर्यगुणाष्टकम् ॥
महिमा लघिमाणुत्वं प्राकाम्यं वशितेशिता ।
प्राप्तिः कामावसायित्वं शम्भोरैश्वर्यमष्टधा ॥

मृग्यमाणोप्ययं केनापि ज्ञायते न तु सर्वेण । यदाह ।

इयमहमिदानीं
नित्यं न्यस्तषडङ्गचक्रनिहितं हृत्पद्ममध्योदितं
पश्यन्ती शिवरूपिणं लयवशादात्मानमभ्यागता।

यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ इति।

यद्वा। तद्विदां ताः सिद्धीरुपायदेशकालप्रमाणेतिकर्तव्यताभिर्ये विदन्ति तेषां सिद्धिदोभिलषितसिद्धिद इत्यर्थः।

६–१० आत्मनि योगसिद्धिमाह। नित्यमित्यादि। इयमहमिदानीमभ्यागताभीष्टस्थानाभिमुखमागता श्रीपर्वतादित्याक्षेपात्। कीदृशी। शिवस्वरूपमात्मानं पश्यन्ती। लयवशाच्चित्तैकाग्रतया। अनेन सर्वेषां तत्प्रकाशोपास्तः। कीदृशम्। नित्यमविनाशिनम्। न्यस्तानि देहे मन्त्रन्यासेनार्पितानि यानि षडङ्गानि हृदयशिरःशिखानेत्रकवचास्त्राणि तेषां चक्रे समूहे निहितमारोपितं मन्त्रन्यासेन। यदाह।

षडङ्गमेतत्कथितं सर्वसिद्धिप्रदायकम्।
न्यसेद्यो भक्तियुक्तात्मा साधको ज्ञानचिन्तकः॥
त्रिकालमेककालं वा शरीरे विन्यसेद्बुधः॥

अनेनाङ्गावरणमुक्तम्। नित्यन्यस्तेति पाठे नित्यं प्रत्यहं न्यस्तानीत्यर्थः। हृत्पद्ममध्ये हृत्कमलकर्णिकायां ध्यानाभ्यासात्सूर्यवदुदितम्। यदाह।

पद्मसंकाशसंस्थानं हृदयं तत्र दृश्यते।
सूक्ष्मो हि पुरुषो ज्ञेयः परमात्मा हृदि स्थितः॥
अभ्यासात्पश्यते सूर्यं परमात्मानमात्मना।

नाडीनां पूर्वोक्तानामिडापिङ्गलादीनामुदयक्रमेण वायुपूरणपरिपाटया जगतः शरीरस्य पञ्चभूतात्मकस्य पञ्चामृतानां पृथिव्यप्तेजोवाय्वाका-

---

*. नित्य for नित्यं K2. noticed by Com.; षडंघ्रि for षडङ्ग B.

नाडीनामुदयक्रमेण जगतः पञ्चामृताकर्षणा-
दप्राप्तोत्पतनश्रमा विघटयन्त्यग्रे नभोम्भोमुचः ॥

शानां योगर्द्धिबलाच्च आकर्षस्तस्मादप्राप्तोलब्ध उत्पतनेनाकाशयानेन श्रमो यया सा। यद्वा। अमृतमिवामृतं देहस्थितिहेतुत्वात्। तत्पुनर्बिन्दुस्थानात्कुण्डलिनीस्रावणेन स्रवद्रसविशेषो रसनाधःस्थितरन्ध्रस्रवद्रसविशेषो वा। स हि व्यापकत्वेन पञ्चशब्दवाच्यः। तदाकर्षणात्। यद्वा। जगतः शरीरस्य पञ्च यान्यमृतानि शिवशक्त्यात्मकानि रूपरसगन्धस्पर्शशब्दलक्षणानि स्थूलमहाभूतमात्रापरिपोषकाणि योगिनीनां तेषामुपयोगात्तदाकर्षणेन सामर्थ्यादिकं योगिनीनामिति भावः। न च लयवशत्वेन निष्क्रियतयोत्पतनं न संभवतीति वाच्यम्। लयस्यान्यत्रापि सामर्थ्यात्। यदाह।

मनोप्यन्यत्र निक्षिप्तं चक्षुरन्यत्र पातितम्।
तथापि योगिनां योगो ह्यविच्छिन्नः प्रकीर्तितः॥ इति।

उत्पतनादिमाहात्म्यादेवाग्रेभुवःपुरोवर्तिनो मेघान्विघटयन्ती द्विधा कुर्वती। अग्रे नभ इति पाठे। आकाशमेघानग्रे विघटयन्तीत्यर्थः। न च नभःपदवैयर्थ्यम्। वनपर्वतादावपि मेघसद्भावेन तद्विघटन आकाशगामित्वोत्कर्षाप्रतिपादनात्। यद्वा। अग्रेनभो नभसि मेघान्विघटयन्ती॥ अग्रेशब्दो विभक्तिप्रतिरूपको निपातः। तस्य विभक्त्यर्थेव्ययीभावः॥ अनेन श्लोकद्वयेन शान्तो रस उक्तः। अत्र भरतोपि शान्तस्तु नवमो रस इत्याह। स च विषयवैरस्यादुपजायते। यदाह।

शान्तो विषयवैरस्याद्रसः संजायते पुनः॥ इति।

---

१०. अग्रेभुवो° for अग्रे नभो° K1. K2. noticed by Com.

अपि च। उल्लोलस्खलितकपालकण्ठमाला-
संघट्टक्वणितकरालकिङ्किणीकः।
पर्याप्तं मयि रमणीयडामरत्वं
संधत्ते गगनतलप्रयाणवेगः॥

तथा हि। १९

विष्वग्वृत्तिर्जटानां प्रचलति निबिडग्रन्थिबद्धोपि भारः
संस्कारक्काणदीर्घं पटु रटति कृतावृत्तिखट्वाङ्गघण्टा।

११–१४ कपालकुण्डलायाः पूर्वोक्तभीषणोज्ज्वलत्वमुपपादयति। उल्लोलेति। गगनतलगमनवेगो मयि सकलं रमणीयडामरत्वं रमणीयत्वं मनोहरत्वं डामरत्वं भीषणत्वमुद्भटत्वं वा केलिसंरम्भनिर्भरत्वं वा संधत्ते समर्थं कुरुते॥ डामरोड्डामरौ भीमे केलिसंरम्भनिर्भर इति रत्नकोशः॥ वेगबलादुल्लोलेन यातायातेन स्खलिता या कपालानां कण्ठवर्तिनी माला तस्याः संघट्टक्वणितेनान्योन्यकपालसंघृष्टिध्वनिना करालो मूका क्षुद्रघण्टिका यत्र सः। कपालमालोच्चध्वनिना तद्ध्वनेरश्रवणान्मूकत्वमिव मूकत्वम्। यद्वा। तथाविधक्वणितेन करालो दन्तुरो। विषमेति यावत्। किङ्किणी यत्र सः। कुलयोगिनीनां किङ्किण्यादिध्वनिना सानन्दत्वम्। यदाह।

समुद्रघोषसंभारकिङ्किणीघण्टिकास्वनैः।
सदानन्दो भवेद्योगी न निद्रा न क्षुधा तृषा॥ इति।

१६–१९ तदेवाह। विष्वगिति। जटानां भारः समूहो निबिडं दृढं यथा तथा ग्रन्थिबद्धोपि विष्वग्वृत्तिः सर्वतोव्यापी सन्प्र-

---

११. उद्भूत Bh. N. डाङ्कित O. for उल्लोल.
१६. प्रचलित for प्रचलति Bh.; नद्धोपि for बद्धोपि A. B. Bh. C. D.
१७. खट्वा° for खट्वा° Bh.

ऊर्ध्वं धूनोति वायुर्विवृतशवशिरःश्रेणिकुञ्जेषु गुञ्ज-
न्नुत्तालः किङ्किणीनामनवरतरणत्कारहेतुः पताकाः ॥
२० परिक्रम्यावलोक्य च । गन्धमाघ्राय । इदं तावत्पुराणनिम्बतैला-
क्तपरिभृज्यमानरसोनगन्धिभिश्चिताधूमैः पुरस्ताद्विभावितस्य म-

चलति । गगनगमनवेगादित्यर्थात् ॥ विष्वक्शब्दो नानार्थः सुषमा-
दिषु पठ्यते तेन षत्वम् ॥ कृतावृत्तिः कृतगतागता कृतमण्डलभ्र-
मणा खट्वाङ्गसहिता घण्टा संस्कारेण संतानेन यः क्वाणो ध्वननं तेन
हीर्षं पटु रमणीयं च यथा तथा रटति शब्दायते । एतेन डामरत्व-
मुक्तम् । खट्वाङ्गं वाद्यभेदः । वायुरूर्ध्वं पताका धूनोति कम्पय-
ति ॥ धूञ् कम्पने । दीर्घान्तः स्वरतीत्यादिसूत्रे न्यासकारेणोक्तः ॥
कीदृशः । विवृतानि यानि निर्मांसतया शवशिरांसि तेषां श्रेणयः
पङ्क्तयस्तासां यानि कुञ्जानि गहनाः प्रदेशास्तेषु गुञ्जन्ध्वनन् । अत
एवोत्ताल उद्भटध्वनिः क्षुद्रघण्टिकानामजस्ररणत्कृतिहेतुश्च । अनेन
रमणीयत्वमुक्तम् ॥ निक्काणी निक्कणः क्काणः क्कणः क्वणनमित्यपीत्यम-
रः ॥ यद्वा । पटुरटनेन रमणीयत्वं पताकाकम्पनेन डामरत्वमत्रोक्तम् ।

२०-२८ पुराणेत्यादिना चिताधूमानां स्वभावाख्यानम् । अक्तं
म्रक्षितम् । परिभर्जनं वह्निमध्यनिक्षेपपाकः । अम्लरसेनैकेनोनं प-

---

१८. शिव for शव K1.

१९. पताका K1. K2. पताकां N. O. for पताकाः.

२०. अथो विलोक्य for परि-च N.; K1. K2. om. परि-च; O. om. च; N. om. गन्धमाघ्राय; अवलोक्य after आघ्राय K1. K2.; च after इदं N. O.; तत् for तावत् K1. K2. N.; O. om. तावत्; बिंबि for निम्ब Bh.; अभ्यक्त for अक्त K1. O.; B. om. अक्त.

२१. भृज्य° for भृज्य° K1 ; नरमांस Bh. रस C. N. O. after रसोन; अधस्ताद् for पुरस्ताद् K1. K2. N. O. ; विभाव्यमानस्य for विभावितस्य K1. K2. महा for महतः N.

हतः इमशानवाटस्य नेदीयः करालायतनं यत्र पर्यवसितमन्त्रसाधनस्यास्मदुरोरघोरघण्टस्याज्ञया सविशेषमद्य पूजासंभारो मया संनिधापनीयः । कथितं च मे गुरुणा वत्से कपालकुण्डले अद्य भगवत्याः करालायाः प्रागुपयाचितं स्त्रीरत्नमुपहर्तव्यम् । २५
तदत्रैव नगरे विदितमास्त इति तद्विचिनोमि । सकौतुकमवलोक्य । तत्कोयमतिगम्भीरमधुराकृतिरुत्तम्भितकुटिलकुन्तलः कृपाणपाणिः इमशानवाटमवतरति । य एषः

च्चरसं रसोनम् ॥ लसून इति ख्यातम् । वट्यते वेष्ट्यतेनेनेति वाटः ॥ हलश्चेति घञ् ॥ पन्था वाटः पथो माथ इति भागुरिः ॥ नेदीयो निकटम् । पर्यवसितं समाप्तं विनष्टं च । मन्त्रसाधनं पुरश्चरणजपादि । संभारः समूहः । उपयाचितं मनीषितार्थं स्वीकृतम् । यद्दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये । उपयाचितकं तत्तु दोहदं संप्रचक्षत इति हारावली ॥ स्त्रीरत्नमिति ॥ जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षत इति विश्वः । विदितमुपलब्धम् । विचितमिति पाठेन्विष्टम् । गम्भीरेत्यादि ।

विकाराः सहजा यस्य हर्षक्रोधभयादिषु ।
भावेषु नोपलभ्यन्ते तद्गाम्भीर्यमुदाहृतम् ॥ इति ।

---

२२. च after यत्र C. D. K1. K2.; B. om. मन्त्र.

२३. मया before पू-रः instead of after, K2.; N. om. मया.

२४. संभावनीयः for संनिधापनीयः B.; हि for च N; यथा before वत्से O.

२५. N. om. अद्य; B. Bh. C. D. add मया after अद्य; यन्मया before भागु° O.

२६. च after तद् K1. K2.; N. om. नगरे; विचितमा° for विदितमा° K2. noticed by Com.; O. om. तद्; N. om. तद्विचिनोमि; अग्रे after स-कम् A. Bh. C. D.

२७. O. om. तत्; K1. K2. om. अति; O. om. मधुर; B. om. कुटिल; °न्तल for °न्तलः K1.

२८. K1. K2. om. °वाट.

कुवलयदलश्यामोप्यङ्गं दधत्परिधूसरं
ललितविकटन्यासः श्रीमान्मृगाङ्कनिभाननः।
हरति विनयं वामो यस्य प्रकाशितसाहसः
प्रविगलदसृक्पङ्कः पाणिर्ललन्नरजाङ्गलः ॥

अभ्यासात्करणानां तु श्लिष्टत्वमुपजायते ।
महत्स्वपि विकारेषु तन्माधुर्यमुदीरितम् ॥

इति भरतः। उत्तम्भितो जूटाकारेण बद्धः कुटिलो वक्रः कुन्तलः केशो यस्य सः। एतेन रौद्ररसवत्त्वोक्ता ।

२९–३५ कुवलयेत्यादि । य एष स्वभावान्नीलनलिनपत्रवच्छ्यामोपि विप्रलम्भात्सर्वतः पाण्डुरमङ्गं दधत्। ललितो रमणीयो विकटो भीषणो न्यासो देहन्यासो यस्य सः। ललितत्वं स्वभावात्। विकटत्वं रौद्रात्। यद्वा । न्यासः करचरणादिचालनम्। श्रीमानतिरम्यः। मृगाङ्कान्निरतिशया भा यत्र तादृशमाननं यस्य। अत एव हेयत्वार्थं मृगाङ्कपदेनोपन्यासः। यस्य वामः पाणिर्विनयं हरत्यपनयति। अत्र हेतुमाह। प्रविगलदसृक्पङ्कः स्रवद्रुधिरकर्दमः। ललच्चञ्चलं नरजाङ्गलं महामांसं यत्र सः। न हि विनीतो रक्तं महामांसं च धारयति। अत्र पूर्वार्धेन ललितत्वमुत्तरार्धेन विकटत्वमुक्तम्। अत एव व्यक्तसाहसः। महामांसधारित्वेन वीरबीभत्सरसावुक्तौ। यदाह।

उत्साहाध्यवसायाद्विस्मयहर्षाच्च मोहाच्च ।
विविधाद्गन्धविशेषाद्वीररसो नाम संभवति ॥

---

२९. पाण्डुरं for धूसरं B.

३० चरण for विकट; A. B. Bh. C. D. K1. K2. न्यास for न्यासः B.; सभा° for निभा° N. O.

३१. साहसं for साहसः D.

३२. गलन् for ललन् B. O.

निरूप्य । अये स एष कामन्दकीसुहृत्पुत्रो महामांसस्य पणायिता माधवः । तत्किमनेन । भवतु समीहितं संपादयामि । विगलितप्रायः पश्चिमसंध्यासमयः । तथा हि । संप्रति १९

व्योम्नस्तापिच्छगुच्छावलिभिरिव तमोवल्लरीभिर्व्रियन्ते
पर्यन्ताः प्रान्तवृत्त्या पयसि वसुमती नूतने मज्जतीव ।
वात्यासंवेगविष्वग्वितततवलयितस्फीतधूम्याप्रकाशं
प्रारम्भेपि त्रियामा तरुणयति निजं नीलिमानं वनेषु ॥

अनभिमतदर्शनेन च गन्धरसस्पर्शशब्ददोषैश्च ।
उत्तेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति ॥

दधदित्यत्र नाभ्यस्ताच्छतुरिति नुमो निषेधः ॥ जङ्गलं निर्जनस्थाने त्रिलिङ्ग्यां पिशितेक्षियामिति मेदिनीकरः ॥ पणायिता विक्रेता । विगलितप्रायो भ्रष्टप्रायः ॥

३६–३९ व्योम्न इत्यादि । गगनस्योपान्ता ध्वान्तलताभिर्व्याप्यन्ते । तमालपुष्पस्तबकपङ्क्तिभिरिव । एवं च पृथिव्युपान्तभागेन नूतने जले मज्जतीव । उत्प्रेक्षेयम् । त्रियामा रात्रिः प्रारम्भे प्रदोषमात्रेपि नीलत्वं निजं वनेषु तरुणयति । कीदृशम् । वातानां समूहो वात्या तस्याः संवेगेन विवर्तनेन विष्वक्चतुर्दिशं विततं विस्तारितं वलयितं वलयाकारं स्फीतं गभीरं या धूम्या धूमसमूहो नीहारो वा

---

३३. K1. K2. N. O. om. अये; N. om. स; सुतो for पुत्रो O.; K2. om. महा-ता; पणायिता for पणायिता A. C. K1. N.

३४. N. om. भवतु; यथा before समी° N. O.; विलोक्य after °यामि K1. K2.

३५. च after प्रायः A. B. Bh. C. D. K1. K2.; N. om. तथाहि । संप्रति.

३६. म्रियन्ते for व्रियन्ते K1.

३८. संगेन B. N. संयोग Bh. for संवेग; विलसित for वलयित O.; प्रकारं for प्रकाशं O.

३९. पदेषु for वनेषु O.

परिक्रम्य निष्क्रान्ता । विष्कम्भकः ।

ततः प्रविशति यथानिर्दिष्टो माधवः ।

माध० । साशंसम् ।

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ॥

तत्सदृशम् । एवं चान्धकारोपगमाद्गतप्राया संध्येत्यर्थः ॥ धूम्या धूम-समूहेपि नीहारेपि निगद्यत इति धरणिः ॥

४२-४६ साशंसं सप्रार्थनम् । प्रेमेत्यादि । मुग्धदृशो मालत्यास्तास्ता अनुभूताश्चेष्टाः संभोगे चुम्बनादयो मयि पुनर्भूयासुः ।

चेष्टाविशेषाः संभोगे चुम्बनालिङ्गनादयः ।

इति कण्ठाभरणम् । कीदृशयः । प्रथमं प्रेम्णा संभोगप्रीत्यार्द्रा इव तापशान्तिहेतुरोमाञ्चादिजनकत्वात् । ततो विश्वासमुपेत्य चित्तप्रसादस्पृशः । ततः परिचयात्सुखास्वादभेदादुद्भटरागोद्रेकाः । निसर्गमधुराः सहजमनोज्ञाः । यास्वाशंसोपनीतास्वपि क्षणात्तिरतिशयसुखघनो लयो लीनता भवति । ताश्च चेष्टासु मनो लीयत इत्यर्थः । कीदृशः । अन्तःकरणस्य मनसो बाह्येन्द्रियव्यापारावरोधनशीलः । मालतीमयत्वेन तन्मनो बाह्यविषये न व्याप्रियत इत्यर्थः । अत एवानेकशङ्कातङ्कसंकुलेपि तत्र स्थाने माधवस्य न साध्वसादिकमपीति भावः । यद्वा । तास्ताश्चेष्टा बकुलवीथ्यादिषु यास्तया कृतास्तास्ता मयि भवेयुः । तासामेव दुर्लभत्वादाशंसनीयता ।

---

४०. N. om. परिक्रम्य; शुद्ध before विष्क° N.

४१. B. om. य–ष्टो.

४२. सावज्ञं for साशंसम् K1.

४५. विषय for करण N.

४६. °दाशंका for °दाशंसा D.; सान्द्रोदयः for सान्द्रो लयः A. C. D.

किं च । अतिमुक्तमङ्कथितकेसरावली
सततासिवाससुभगार्पितस्तनम् ।
अपि कर्णजाहविनिवेशिताननं
प्रियया तदङ्कपरिवर्तमाप्नुयाम् ॥ ५०

अथ वा । दूरे तावदेतत् । इदमेव प्रार्थये ।

४७-५० प्रथमप्रीतिहेतुत्वादालिङ्गनमाशास्ते । अतिमुक्तेत्यादि । प्रियया सह तदङ्कपरिवृत्तिमप्यहमाप्नुयाम् । तत्तस्या अङ्के क्रोडे सर्वतोभावेन वर्तनम् । हृदयालिङ्गनमित्यर्थः । अर्पिभिश्चक्रमः । यद्वा । तदङ्के परिवर्तनमूर्ध्वाधःक्रमेण पुरुषायितमाप्नुयाम् । कीदृशः । प्रियया कर्णजाहे कर्णमूले विनिवेशितमाननं यत्र । ममापि सः । प्रथमपक्षे कर्णमूलेर्पितमाननं येन सः ॥ तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणञ्जाहचाविति मूले जाहच्प्रत्ययः ॥ अतिक्रान्ता मुक्ता यया सातिमुक्ता । मुक्ताहारमपास्य तदर्पणादतिक्रमः । यद्वा । अतिमुक्तातिविरला मालत्यवलोकनव्यासङ्गात् । एतादृशी या मङ्कथिता केसरावली तस्याः सततासिवासेन सुभगः सुरभिरर्पितस्तनो यत्रेति क्रियाविशेषणम् । अविमुक्तेति पाठो न मनोहरः । अवियुक्तत्वादेव सततासिवासस्य लब्धत्वात्सततग्रहणस्य व्यर्थत्वात् ।

---

४७. K1. K2. om. किं च; अपि for किं N.; अतिमुक्त Bh. O. अपि चाह K1.; for अतिमुक्तं; °मुङ्कथित B. C. °कम्प्रथित N. for °मङ्कथित.

४८. °गायित for °गार्पित C.

४९. °ताननः for °ताननं A. B. Bh. C. D. N. O.

५०. तदङ्क for तदंग B. Bh. C. D. K2.; परिवृत्त° A. परिविर्त्ति° K1. परिवृत्ति° K2. N. परिरंभ O. for परिवर्त°.

५१. Bh. K1. K2. om. दूरे तावदेतत्; तावत् before प्रार्थये K1. K2. N. O.

संभूयेव सुखानि चेतसि परं भूमानमातन्वते
यत्रालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः ।
यद्बालेन्दुकलोच्चयादवचितैः सारैरिवोत्पादितं
तत्पश्येयमनङ्गमङ्गलगृहं भूयोपि तस्या मुखम् ॥

५२—५५ संभूयेत्यादि । तस्यास्तन्मुखं पुनरपि पश्येयमित्येतदेव प्रार्थये ॥ अङ्गप्राप्तेर्दुर्लभत्वादिति भावः । कीदृशम् । कामस्य मङ्गलार्थं गृहम् । तत्र कामो हृष्टो वसतीत्यर्थः । यद्वा । कामस्य मङ्गलघटितं हिरण्यघटितं गृहम् ॥ कल्याणं मङ्गलं विद्यात्काञ्चनं च तदक्षममिति विश्वः ॥ यद्वा । अनङ्गस्य मङ्गलानामुपचयहेतूनां सौकुमार्यादीनां गृहम् । अत एवोत्प्रेक्षते । बालचन्द्रकलोदयाद्गृहीतैः सारैरुत्पादितमिति । अत्रोदयादिति भावेन द्रव्याभिधानान्नवेन्दुकलाया अवचिताः सारास्तैरुत्पादितमित्यर्थः । सकलजनानन्दिनवेन्दुकलातोप्यधिकमनोहरमिति भावः । यद्वा ॥ ल्यब्लोपे पञ्चमी ॥ तेन बालेन्दुकलोदयं प्राप्यावचितैरित्यर्थः । यद्वा । बालेन्दुकलोदयात्पतिपच्चन्द्रकलोदयादारभ्यावचितैः पूर्णिमापर्यन्तमित्यर्थात् । आरभ्येत्यस्य लाभः पञ्चमीत एव । तथा च पूर्णेन्दुना मुखसाम्यं लभ्यते । क्वचित्कलोच्चयादिति पाठः । तत्रोच्चयात्समूहादित्यर्थः । यत्र मुखे संमुखीभूते सुखानि ॥ कर्तृणि ॥ मिलित्वेव परं भूमानं बाहुल्यं विस्तारयन्ति चित्ते । अनेनान्तःप्रीतिरुक्ता । इवशब्द उत्प्रेक्षायाम् । एवपाठे विस्मय एवशब्दः । बहिःप्रीतिमाह । नेत्रोत्सवोलब्धलाभाभिमानोनुरागं प्रस्तौति स्रवति । रतेर्द्रवमयीत्वात् । समाधिरलंकारः ।

५२. संभूयैव for संभूयेव N.

५३. पथप्रतारिणि for प—णि K1; प्राप्नोति K1. N. प्रस्तौति O. for प्रस्तौति.

५४. कलोदयात् for कलोचयात् Com.; °दृपचितै for °दवचितैः N.; °रिवासादितं for °रिवोत्पादितं C.

यत्सत्यमधुना तत्संदर्शनेनातिस्वल्पोपि न विशेषः। मम हि संप्रति सातिशयप्राक्तनोपलम्भसंभावितात्मजन्मनः संस्कारस्यानवरतप्रबोधात्प्रतायमानस्तद्विसदृशप्रत्ययान्तरैरतिरस्कृतप्रवाहः प्रियतमास्मृतिप्रत्ययोत्पत्तिसंतानस्तन्मयमिव करोत्यन्तर्वृत्तिसारूप्यतश्चैतन्यम् । तथा हि । ६०

५६—६० मानसमौत्सुक्यातिशयमाह । मम हीति । मामकीनः प्रियास्मरणरूपज्ञानोत्पत्तेः संतानः परिणतिसमूहः स्मृतिरूप एव मम चैतन्यमात्मतत्त्वं तन्मयमिव करोति । मालतीमयं करोतीत्यर्थः । कीदृशः । प्रतायमानो दीर्घीभवन् । अत्र हेतुः । संस्कारस्य भावनाया अतिशयितप्रबोधादुद्रेकात् । कीदृशस्य संस्कारस्य । सातिशयात्सादरात्स्फुटाकाराद्वा बकुलवीथ्यां पूर्वकालानुभवाल्लब्धजन्मनः । प्रतायमानत्वमेवोपपादयति । तद्विसदृशैर्मालतीविलक्षणविषयैर्ज्ञानान्तरैरतिरस्कृतप्रवृत्तिः । तथा चान्तरा विषयान्तरास्फुरणान्न प्रवाहतिरस्कार इति भावः । नन्वात्मतत्त्वस्य पुष्करपलाशवन्निर्लेपतया कथं मालतीमयत्वमत आह । अन्तरिति । अन्तःपदमिह बुद्धितत्त्वपरम् । तथा च बुद्धितत्त्वस्य या प्रवृत्तिः सहजसिद्धो व्यापारः सा यत आत्मतत्त्वे भेदाग्रहात्प्रतिभासते तस्मात् । सांख्यदर्शने बुद्धेर्भोक्तृत्वात् । यद्वा । अन्तर्वृत्तिरिति भावप्रधानम् । तथा चान्तर्वृत्तित्वमन्तरवस्थानरूपं सादृश्यमात्मबुद्ध्योस्तस्मात् ।

५६. B. om. अधुना; N. om. तत्; संदर्शनाद् for संदर्शनेन O. संदर्शनं नेति Bh. संदर्शनं नेति N. for सं—ति; B. K1. K2. om. अति; वा before स्वल्पो Bh.; Bh. om. न; हि after न N.

५७. K2 O. om. संप्रति; N. om. सातिशय; °भादराद्बकुलवीथ्यां पूर्वकालानुभवाल्लब्धजन्मनः before प्राक्तनो° K2.; °पलंभित N. for °पलम्भ; °तात्मजनः Bh. °तात्मनः N. O. or °ता—नः

५८. प्रबोधनात् C. प्रबोधा° D. for प्रबोधात्; प्रतीयमानः for प्रतायमानः A.Bh. C.; °द्विसदृशैः for °द्विसदृश N. O.; प्रतापा° for प्रत्यया° B.

५९. °भाव: for वाह: B.; O. om. अन्तर्; तद्वृत्ति Bh. अत्यन्तवृत्ति D. for अन्तर्वृत्ति.

लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च ।

६१—६४ स्वोक्तमेव दर्शयति । लीनेवेत्यादि । सा प्रियास्माकं चेतसि लग्ना संबद्धा । संबद्धत्वे यथासंभवं प्रकारानाह । लीनेव निह्नुतेव । यत्र यस्य संबद्धस्य न प्रत्यक्षोपलम्भस्तत्र तल्लीनमित्युच्यते । यथा पयसि लीनं लवणम् । सर्वत्रात्र लग्नत्वस्य प्रकारभेदेनोपमाभेदाः । पूर्वपूर्वापरितोषाद्वा । तथाहि । लीनत्वस्याप्रतिभासात्स्पष्टप्रतिभासार्थमाह । प्रतिबिम्बितेव । यत्र स्वच्छद्रव्याभिहतं चक्षुः परिवृत्य द्रव्यान्तरं गृह्णाति तत्तत्र प्रतिबिम्बितमित्युच्यते । यथा स्फटिके रक्तपुष्पम् । प्रतिच्छायाया वस्त्वन्तरसंसर्गाधीनत्वेनासाहजिकत्वात्साहजिकत्वोपबर्णनायाह । लिखितेव । यत्प्रशिथिलावयवसंयोगाश्रयेण द्रव्येण घनद्रव्योपरि संस्थानविशेषस्तन्निर्मीयते तत्तत्र लिखितमित्युच्यते । यथा पत्रे लिपिः । लिखनस्य जलाद्युपनिपातविनाशितया न चिरस्थायित्वमतस्तदर्थमाह । उत्कीर्णरूपेव । यत्र निबिडद्रव्ये तादृशेन किंचिदवयवविभागः क्रियते तत्तत्रोत्कीर्णम् । यथा टङ्कादिना शिलादि । अस्याप्येकभागवृत्तितया सर्ववृत्तित्वार्थमाह । प्रत्युप्तेव । प्रत्युप्तमधरोपितम् । यत्र द्रव्यान्तरसंसर्गि तत्तत्र प्रत्युप्तम् । यथाङ्गुलीयके मण्यादि । अस्यापि शक्योद्धारत्वान्निबिडसंबन्धायाह । वज्रलेपघटितेव । यत्र किंचिद्द्रव्याभिघातजन्यकर्मजन्यसंयोगविभागानाश्रयस्तत्तत्र वज्रलेपघटितम् । यथा हीरकादि । तथापि लेपस्य बहिर्वृत्तित्वादन्तःसंसर्गार्थमाह । अन्तर्निखातेव । यत्र संबद्धमूर्ध्वाधःसंयोगादिना धृतं नोपलभ्यते तत्तत्र निखातमुच्यते । यथा भूमौ मूलकादि । निखातत्वं सर्वरोपणमुप्तत्वमधरोपणमित्यनयोर्भेदः । निखातस्यापि निर्बन्धातिशयेन शक्योद्धा-

६२. लेख for लेप K1.

सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभि-
श्चिन्तासंततितन्तुजालनिबिडस्यूतेव लग्ना प्रिया ॥

रतया विवेकादिदुःशक्यत्वार्थमाह । कामस्य पञ्चभिः शरैः कीलितेव। कीलितस्य प्रतिकीलनोद्धार्यतयाशक्योन्मूलनायाह । चिन्तापरंपरासूत्र-समूहेन गाढं यथा स्यात्तथा स्यूतेव सीवनं प्रापितेव । जालनिबिडसीवनेनानुच्छेदनीयत्वमुक्तम् । इहोपधेयाभेदेप्युपाधिभेदादपौनरुक्त्यमित्यवधेयम् । एकमेव हि वस्तु तत्तदुपाधिवैशिष्ट्याद्भिन्नबुद्धिविषयो यथा दण्डिकुण्डलित्यादिः । यद्वा । नोस्माकं चेतसि सा लग्ना दृढं संबद्धा । दृढसंबद्ध एव लग्नपदार्थः । शरो लग्न इत्यादौ तथादर्शनात् । दृढसंबद्ध एव नानाप्रकारेण स्थिरीक्रियते । कामबाणपञ्चकेन कीलितेव । चिन्ताप्रवाहरूपतन्तुसंतत्या स्यूतेव । ननु द्वयमप्यदो न युक्तम् । तया सहान्तरस्य चैतन्यस्य संबन्धाभावात् । अतो विषयविषयिभावप्रकारान्मतभेदेनाह । लीनेवेति । लीनत्वं तदात्मतया संबद्धत्वम् । विषयविषयिणोस्तदात्मरूप एव संबन्ध इति योगाचारमतमनेनोक्तम् । प्रतिबिम्बितेवेति सांख्यमतोपदर्शनम् । लिखितेवेति सौत्रान्तिकमतोपदर्शनम् । तत्र हि ज्ञानेन स्वीयाकारार्पणं विषये क्रियत इति तत्तदाकारस्याभिव्यक्तिः । शिलादौ तुरगादिवदिति लिखनसाम्यम् । उत्कीर्णरूपेवेति विषयाकारेण चैतन्यपरिणाम इहोत्कीर्णरूपता । अतस्त्रिदण्डिमतम् । प्रत्युप्तेवेति पूर्वरूपतिरोधानादन्यरूपाविर्भावेन सुवर्णरचितभाजनादाविव तत्तद्विषयाकारतया ज्ञानविपरिणाम इति पातञ्जलमतम् । वज्रलेपघटितेवेति नैयायिकमतम् । तदीयतामात्ररूपो हि स्वभावभेदःप्रकाशस्य विषयविषयिभावः । अयं च यावद्वस्तुस्थिरतया वज्रलेपघटनातो न भिद्यते । अन्तर्निखातेवेति विज्ञानवादिमतोपदर्शनम् । अत्र हि विज्ञानस्यान्तर्निखननाच्च

६९ नेपथ्ये कलकलः ।

माध० । अहो संप्रति प्रगल्भमानकौणपनिकायस्य महती इमशानवाटस्य रौद्रता । अस्मिन् हि

पर्यन्तप्रतिरोधिमेदुरचयस्त्यानं चिताज्योतिषा-
मौज्ज्वल्यं परभागतः प्रकटयत्याभोगभीमं तमः ।

बाह्यवस्तुस्थितिरिति । इहापि तथा । एते च विषयविषयिभावविकल्पास्तच्चिन्ताप्रकारत्वान्माधवस्य चित्ते विपरिवर्तन्ते । एवं च चेतसा सह संबन्धः । पश्चात्कीलनेन वा सीवनेन वा गाढसंबद्धतां गता भवति लग्ना । ततश्च तद्दर्शनं महापुरुषानुभूतं तस्येति किमत्र चित्रमिति भावः । अत्र पञ्चभिरित्यनेन युगपत्कामबाणविषयत्वमात्मनो निवेदयता दुःसहदशाशालित्वं सूचितम् । चेतोभुव इत्यनेन तत्प्रभवस्य तस्य मर्मज्ञता ध्वनिता ।

यथाशक्ति यथायुक्ति यथागति यथामति ।
यथाधीति यथानीति विवेचितमिदं मया ॥

६६—७१ कौणपनिकायो राक्षससमूहः । रौद्रता भीषणत्वम् । पर्यन्तेत्यादि । तमः ॥ कर्तृ ॥ चिताज्योतिषामौज्ज्वल्यं परभागतो गुणोत्कर्षाधानात्प्रकटयति व्यक्तीकरोति । तमसि संनिहिते सति तेजसां कान्त्युत्कर्षः स्फुट एवेति भावः । कीदृशं तमः । आभोगात्परिपूर्णतया भीमम् । चितालोकमण्डलस्य पर्यन्ते निकटदेशे प्रतिरोधनशीलं मेदुरं स्निग्धं चर्येण संघेन स्त्यानं घनम् । यद्वा । पर्यन्ते यः प्रतिरोधोन्धकारस्य प्रसरणनिवारणं तेन मेदुरो मांसलो यश्चयस्तेन घनमित्यर्थः । कटाः

---

६६. आकर्ण्य before अहो N.; K1. K2. om. संप्रति; प्रगल्भता B. K1. K2. वर्धमान N. for प्रगल्भमान; कौणप for कौणप O.; महतः for महती O.

६७. N. om. वाट°; अत्र for अस्मिन् N.

६८. °रोध for °रोधि K1. K2.; घन for चय Bh. N. O.; रोधिषा° for ज्योतिषा B.

संसक्ताकुलकेलयः किलकिलाकोलाहलैः संमदा- ७०
दुत्तालाः कटपूतनाप्रभृतयः सांराविणं कुर्वते ॥

भवत्वाघोषयामि तावत् । उच्चैः । भो भोः श्मशाननिकेतनाः कटपूतनाः ।

शवाः । पूतनाः श्मशानवासिनो राक्षसास्तत्प्रभृतयोन्येपि तत्रस्थाः शृगालादयः किलकिलाकोलाहलैः किलकिलारूपारावैः सांराविणं परस्पराह्वानं कुर्वते संमदाद्धर्षात् । उत्ताला उद्भटाश्चञ्चला वा । तालादुद्गता उत्तालाः ॥ द्रुप्द्रुपेति समासः ॥ तेनान्योन्यहस्ततालवन्त इति वा । संसक्ता मिलिता आकुलास्त्वरायुक्ताः केलयः क्रीडा येषां ते । यद्वा । संसक्तत्वेनाकुला केलिर्येषां ते । संसक्त इति भावप्रधानम् । यद्वा । संसक्ता कुलेन स्वयूथेन केलिर्येषां ते ॥ त्रिपदबहुव्रीहावुत्तरपदस्वाभाव्यान्न पुंवद्भावः ॥ सान्द्रस्निग्धे च मेदुर इत्यमरः ॥ किलकिलेत्यव्यक्तशब्दः । अविभावितविशेषः शब्दसमूहः कोलाहलः ॥ सपूर्वाद्धेतेरभिविधौ भाव इनुण् । तदन्तास्स्वार्थेण् । आदिवृद्धिः ॥ शवानां शब्दकरणं वेताधिष्ठानात् । रौद्ररस इह । तल्लक्षणं तु भरते ।

इति रौद्रो रसो दृष्टो रौद्रैरेवाङ्गचेष्टितैः ।
शस्त्रप्रहारभूयिष्ठभयकम्पक्रियात्मकः ॥ इति ।

७२—७५ भो भो इत्यभिमुखीकरणरूपे संबोधने । निकेतनं गृहम् । अशस्त्रपूतं संमुखपतितस्य स्वर्गिणो मांसं शस्त्रपूतम् । अतस्तेषामप्राप्यमिदमिति न तादृशमिदम् । यद्वा । अशस्त्रपूतं शस्त्रेणाच्छिन्नम् । धातूनामनेकार्थत्वात् । शस्त्रहतमांसस्य रणे सुलभतया तेषामस्पृहात इदमतादृशमिति भावः । अव्याजं निष्कपटम् । यद्वा ।

---

७०. किलि° for किल° K2. O.

७१. °दुत्ताना: for °दुत्ताला: B.; पूतन for पूतना Bh. K2. O.; सांकरिणं for सांराविणं o.

७२. तादिदं for भवतु N.; N. om. तावत्; A. N. om. उच्चैः; भोगाः for भोभोः K1.; A. B. C. om. one भोः; केतना: for निकेतना: Bh. K1. K2.

७३. K2. om कट.

अशस्त्रपूतमव्याजं पुरुषाङ्गोपकल्पितम् ।
७५ विक्रीयते महामांसं गृह्यतां गृह्यतामिदम् ॥

पुनर्नेपथ्ये कलकलः ।

माध० । कथमाघोषणानन्तरमेव सर्वतः समुच्चलदुत्तालवेतालमुक्ततुमुलाव्यक्तकलकलाकुलः प्रचलित इवाविर्भवद्भूतसंकटः श्मशानवाटः । आश्चर्यम् ।

इष्टसिद्धिं पणीकृत्य साहसाद्यदुपार्जितम् ।
अशस्त्रपूतं निर्व्याजमेतन्मांसं विदुर्बुधाः ॥

इति परिभाषितमेव ।

स्त्रियश्चतुष्पदे श्रेष्ठाः पुरुषा द्विपदे तथा ॥

इति वचनात्पाशस्त्यार्थमाह । पुरुषस्याङ्गादानीयोपकल्पितम् । विक्रीयत इष्टसिद्धिमूल्येनेत्यर्थात् । विक्रयस्य मूल्यसापेक्षत्वात् । यद्वा । विक्रीयते दीयते । धातोरनेकार्थत्वात् ।

७७-८३ उच्चैर्घुष्टं तु घोषणेत्यमरः ॥ वेतालः श्मशानदेवतार्किंकरः ॥ तुमुलं रणसंकुल इत्यमरः ॥ तेषामन्योन्यस्पर्धया रणे संकुलत्वम् । अविभावितार्थत्वेनाव्यक्तत्वम् । प्रचलित उच्चावचः । संकटो व्याप्तः । कर्णेत्यादि । उल्का ज्वाला मुखे येषां ते उल्कामुखाः शृगालभेदाः । तेषां मुखैर्नभ आकीर्यते व्याप्यते । यद्वा । उल्कामुखा एतन्नामप्रसिद्धा एव रणवासिनो जन्तुभेदाः । कीदृशैः । कर्णसमीपवि-

---

७४. °तं निर्व्याजं for °तमव्याजं B. C. O.

७५. °तामिति for तामिदम् Bh. C. K1.; इति after इदम् N.

७६. Bh. K1. K2. N. O. om. पुनः.

७७. आभाषणा° B. आघोषा° C. for आघोषणा°; N. om एव; °चरद् for चलद् K1. N.; N. om. वेतालमुक्त; कुल after वेताल B. K1. O.

७८. K2. O. om. भवद्; भूरि before भूत B.

७९. आश्चर्यम् twice Bh. K1, K2.

कर्णाभ्यर्णविदीर्णसृक्कविकटव्यादानदीप्ताग्निभि- ८०
र्दंष्ट्राकोटिविसंकटैरित इतो धावद्भिराकीर्यते ।
विद्युत्पुञ्जनिकाशकेशनयनभ्रूश्मश्रुजालैर्नभो
लक्ष्यालक्ष्यविशुष्कदीर्घवपुषामुल्कामुखानां मुखैः ॥

अपि च ।

एतत्पूतनचक्रमक्रमकृतग्रासार्धमुक्तैर्वृका- ८५
नुत्पुष्णत्परितो नृमांसविषसैराघर्घरं क्रन्दतः ।

दीर्णसृक्काभ्यां विकटं करालं यद्व्यादानमास्यविकासस्तेन दीप्तेग्निर्येषु । ऊर्ध्वाधःस्थितदंष्ट्राणां कोटिभिरग्रैर्विसंकटैः संकुलैर्विकरालैर्वा । सर्वतो धावद्भिः । विद्युत्पुञ्जतुल्यानि केशनयनभ्रूश्मश्रुजालानि यत्र तैः । पिङ्गलत्वात्केशादीनां विद्युत्तुल्यता । अत एवोल्कामुखः शृगालान्यो जन्तुभेद इति पक्षः साधीयान् । उल्काप्रकाशाल्लक्ष्याण्यन्यदालक्ष्याणि विशुष्काणि दुर्बलानि दीर्घाणि वपूंषि येषां तेषाम् । एतेन दुर्बलत्वमुक्तम् ॥ प्रान्तावोष्ठस्य सृक्कणी इत्यमरः । केशेत्यादौ पूर्वनिपातविधेरनित्यत्वाद्भ्रूशब्दमपहाय केशशब्दस्य पूर्वनिपातः । लक्ष्यशब्दो ण्यति यकारवान् । कर्मणि घञि तद्रहित इत्यवधेयम् ॥ अद्भुतरसोयम् ।

८४-८८ अपि चेति । अपिर्जुगुप्सायाम् । चः समुच्चये । गर्हामाह । एतदित्यादि । एतत्पूतनचक्रं श्मशानप्रेतसमूह आलोक्यते । किं कुर्वत् । अत्याकुलतयाक्रमेण युगपत्कृतो यो ग्रासस्तेनार्धं भूमौ पतितमर्धं चर्वणेन मुख एव स्थितम् । तत्र भूमिपतितैरर्धमुक्तैर्मनुष्यमांसविषसैरुच्छिष्टैः सर्वत्र वृकान्कोकानारण्यकुक्कुरादीनुत्पुष्णत्पुष्टान्कुर्वत् । अक्रमत्वं प्रतिपक्षशङ्कया । अभिलाषातिशयाद्वा । कीदृशान् । अह-

---

८०. सृक्कि for सृक्क K2.
८१. °रापूर्यते for °राकीर्यते K2.
८२. विकाश for निकाश K1.
८३. लक्ष्या° for लक्ष्या° C.
८४. N. om. अपि च.
८६. उत्पुष्णत् for उत्पुष्णत् K1.; °रादर्दरं for °राघर्घरं N.

खर्जूरद्रुमदग्धजङ्घमसितत्वक्चर्मनद्धैर्वितत-
स्नायुग्रन्थिघनास्थिपञ्जरजरत्कङ्कालमालोक्यते ॥
समन्तादवलोक्य विहस्य च । अहो प्रकारः पिशाचानाम् ।

महमिकया मांसमहणादीषद्वर्धरमव्यक्तशब्दं यथा स्यादेवं रुदतः । एतत्तु कुक्कुरेषु स्फुटमेव । कीदृशं पूतनचक्रम् । खर्जूरद्रुमदग्धा तत्प्रमाणा जङ्घा यस्य तत् । एतेन जङ्घानां ग्रन्थियोगित्वकर्कशत्वनीरसत्वलोमशत्वानि दर्शितानि । असिता श्यामा या त्वक्चर्म तया नद्धा सर्वतो विस्तीर्णा याः स्नायवो नहरु इति ख्यातास्ताभिर्ग्रन्थिषु संधिभागेषु घनानि दृढान्यस्थ्नां पञ्जराणि येषां तादृशा जरन्तो जीर्णाः कङ्काला मांसादिशून्यास्थिभागा यस्य तत् । वृकपदं शृगालाद्युपलक्षणपरम् ॥ कोक ईहामृगो वृक इत्यमरः ॥ यद्वा । शालावृकाः कपिक्रोष्टुश्वान इति नानार्थेमरदर्शनादेतस्यैवैकदेशो वृकशब्दः । तेन भीमभीमसेनादिवदस्यापि तावदर्थप्रतिपादकतेत्यवधेयम् । यद्वा । वृको घोघ इति ख्यातः ॥ विघसो भोजनशेषेपीत्यमरः । स्याच्छरीरास्थि कङ्काल इत्यमरः ॥

८९–९२ विहस्येति । अतिसात्त्विकेपि मयि भीषणत्वममी पूतनाः कुर्वन्तीत्यसंबद्धक्रियया हासः । यदाह ।

असंबद्धैस्तु हासः स्याद्वाग्वेषक्रियादिभिः ॥ इति ।

प्रकारो वैलक्षण्यम् । ततेत्यादि । एते पूर्वोक्तादन्ये पिशाचा विस्तृतदीर्घजिह्वाभीषणमुखविवरं विदार्य व्यादाय दग्धपुराणरोहिणानामिव श्रुतिं दधति धारयन्ति । दग्धत्वेन श्यामत्वं पुराणत्वेन जीर्णत्वं च दर्शितम् ॥ रोहिणो रोहण इति ख्यातस्तरुः । घोघरात्ति इति ख्यातो वा । रोहितोपि स एव । अत एव रोहितः व्रीहिनाशक इत्यमरोपि । रोहणानामिति

८७. दग्ध for दग्न K1.; °कृतः for °कृत K1.
८८. कंकार° for कङ्काल° Bh.
८९. विलोक्य for अवलोक्य O.; B. om विहस्य; Bh. C. K1. N. O. om. च.

एते हि ९०

ततपृथुरसनोग्रमास्यगर्तं दधति विदार्य विवर्णदीर्घदेहाः।
ललदजगरघोरकोटराणां द्युतिमिह दग्धपुराणरोहिणानाम्॥
परिक्रम्य। हन्त बीभत्समेवाग्रे वर्त्तते।
उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युपपूतीनि जग्ध्वा। ९५

पाठे रोहन्तीति रोहणास्तरवस्तेषामित्यर्थः। ललता चलताजगरेण सर्पेण भीषणच्छिद्राणाम्॥ निष्कुहः कोटरं स्त्री नेत्यमरः॥ तदिह कोटरेणास्यमजगरेण रसना रोहिणेन पिशाच उपमीयन्ते। भयानको रसः। यदाह।

विकृतरवसत्त्वदर्शनसंत्रासारण्यशून्यगृहगमनात्॥
गुरुनृपयोरपराधात्कृतश्च भयानको ज्ञेयः।

९३–९७ बीभत्सं घृणाकरम्। निर्भिद्येत्यादि। अयं प्रेतरङ्कः प्रेत-रूपो रङ्कः क्षुधाभिशुष्यच्छरीरोऽयमनाकुलं यथा तथा क्रव्यं मांस-मत्ति खादति। किं कृत्वा। प्रथममादौ कृत्तिं चर्म निर्भिद्य निर्भिन्नीकृत्य पश्चादुत्कृत्य च्छित्वा। उत्कृत्येति पाठे चर्मकोषाकर्षणमुत्कर्तनं तत्पुनः पुनः कृत्वेत्यर्थः। अथानन्तरं पृथुना महतोच्छोफेन भूयांसि बहूनि मां-सानि जग्ध्वा भक्षयित्वा। कीदृशानि। अंसयोः स्कन्धयोः स्फिचोः कटि-मांसपिण्डयोः पृष्ठे कायपश्चाद्भागे पिण्डयोर्जङ्घापाश्चात्यभागयोरादिप-

---

९०. ततः for एते हि N.

९१. पृथुतर for ततपृथु N.; दशना° for रसनो O.; विवृत्य for विदार्य K1 K2. O.; विशुष्क for विवर्ण N.

९२. चलद् B. Bh. K1. K2. O. गलद् N. for ललद्; °तिमव & °तिमिह (in margin) O; इव for इह A. D. N.

९३. अवलोक्य च after °क्रम्य N.; अति before बीभत्सम् N.; O. om. एव; अग्रतो for अग्रे N. O.; K1. K2. om. वर्तते.

९४. निर्भिद्योत्कृत्य for उत्कृत्योत्कृत्य Com.; अपि for अथ K1. K2.; पृथूच्छोष B. पृथूस्सेध N. for पृथूच्छोफ.

९५. स्पिक् for स्फिक् O.; पीठा° for पिण्डा° N.; गन्धीनि for पूतीनि K2.; °न दग्ध्वा for °नि जग्ध्वा K1.

आत्तस्नाय्वन्त्रनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥

अपि च ।

निष्टापस्विद्यदस्थ्नः क्वथनपरिणमन्मेदसः प्रेतकाया-
१०० न्कृष्ट्वा संसक्तधूमानपि कुणपभुजो भूयसीभ्यश्चिताभ्यः ।

दात्कक्षामूलाद्यवयवेषु स्थूलभानि। उच्छूनत्वात्तेषाम्|उग्रपूतीन्युत्कटगन्धानि| पृथूत्सेधेति पाठे पृथुनोत्सेधेन कायेन बहुतां गतानीत्यर्थः| यद्वा। उत्सेधेनोन्नत्या भूयांसीत्यर्थः||उत्सेधः काय उन्नतिरित्यमरः। कीदृशो रङ्कः| आर्तस्त्वरावान्। पर्यस्तमितस्ततः क्षिप्तं नेत्रं येन सः । एतदुभयं रङ्केषु प्रसिद्धमेव। अन्तःपर्यस्तनेत्र इति पाठेन्तर्मध्ये स्थितनेत्रः। रङ्कत्वेन कोटराक्षत्वादित्यर्थः। आत्तस्नाय्वन्त्रनेत्र इति पाठ आत्तानि गृहीतानि स्नाय्वन्त्रनेत्राणि येन सः। अत एवान्त्राद्युत्पाटनाय प्रकटितदन्तः। दौर्बल्यप्रकर्षणात्प्रकटितदशनत्वम्। अङ्कस्थात्क्रोडीकृतात्करङ्कात्कपालादाकृष्येत्याक्षेपात्। अन्यथापादानानुपपत्तिः| कीदृशं क्रव्यम्। अस्थिषु यत्संतिष्ठति तत्। स्थपुटगतमपि निम्नोन्नतत्रिषमस्थानगतमपीत्यर्थः। अत एव रङ्कः ॥ स्त्रियौ स्फिचौ कटिप्रोथावित्यमरः। पिण्डः खण्डेङ्कभेदेस्यादिति मेदिनीकरः। करङ्को मस्तकेपि स्यादिति धरणिः ॥ अयं बीभत्सो रसः ।

९९–१०२ निष्टापेत्यादि। एतेपि कुणपभुजः शवभक्षकाः पिशाचा बह्वीभ्यश्चिताभ्यः प्रेतकायानाकृष्य तेषामेव जङ्घानलकं जङ्घाप्रधान-

---

९९. आर्तःपर्यस्त A. D. अन्तःपर्यस्त noticed by Com. for आत्तस्नाय्वन्त्र; नेत्र for नेत्रः Bh. K1. गहन for दशनः C.

९९. °यदस्थ्नः for °यदस्थ्नः A. D. margin of O.; परिगलन् for परिणमन् N.; कायात् for कायान् O.

१००. घृष्ट्वा for कृष्ट्वा B.; °मादपि for °मानपि O.

उत्पक्वस्रंसिमांसं प्रचलदुभयतः संधिनिर्मुक्तमारा-
देते निष्कुष्य जङ्घानलकमुदयिनीमज्जधाराः पिबन्ति ॥
विहस्य । अहो प्रादोषिकः प्रमोदः पिशाचानाम् ।

मस्थि निकुष्य विगतमांसावरणं कृत्वा मज्जधाराः पिबन्ति । मज्जास्थिमध्यस्थितस्नेहः । कीदृशीः । आराद्दूरत एवोदयिनीर्लम्बमानाः । द्रवमयत्वात् । यद्वा । आरात्समीपे पिबन्तीति योजना ॥ आराद्दूरसमीपयोरिति त्रिश्वः । चितामूयस्त्वेनातिभीषणतोक्ता । कीदृशान् । निष्टापेनेषत्तापेन स्विद्यन्त्यसृज्झि येषाम् । पहत्व इत्यादिसूत्रेणासृक्शब्दस्यासन्नादेशेल्लोपे रूपम् ॥ अस्थ इति पाठो न युक्तः ॥ तृतीयादावस्थीत्यादिनानङ्विधानात् । यद्वा । प्रेतकायादिति पञ्चम्यन्तः पाठः । अतोस्थ इति पञ्चम्यामनङि रूपम् । चिताभ्य इति ल्यब्लोपे पञ्चमी । निसस्तपतावित्यनभ्यावृत्तौ षत्वम् ॥ क्थनेन पाकक्रमेणाङ्गेषु परिणमज्जीर्यन्मेदो येषां तान्संसृष्टधूमानपि । कीदृशं जङ्घानलकम् । उत्पक्वमुच्छूनं कृत्वा पक्वमत एव स्रंसनशीलं मांसं यस्मात् । यद्वा । उत्पक्वेनोद्गतपाकेन स्रंसि मांसं यस्मात् ॥ उत्पक्व इति भावे क्तः । प्रचलन्तः शिथिलीभवन्त उभयतो जानूरुपर्वणो गुल्फाच्च ये संधयोस्थ्नां परस्परमिलनस्थानानि तैर्निर्मुक्तम् । प्रचलमिति पाठ उभयतः पार्श्वाभ्यां प्रचलम् । अत एव संधिपरिमुक्तमित्यर्थः ॥ कुणपः शवमस्त्रियामित्यमरः ॥ नलकं नरहड इति ख्यातम् । सरी इति ख्यातं वा । बीभत्स एवात्र रसः ।

१०३—१०८ अहो इति बीभत्सशृङ्गारदर्शनेनाश्चर्यम् । प्रादोषिको रात्रिप्रारम्भजः । शृङ्गारबीभत्सयोः परस्परविरोधेपि संस्थानसाम्यात्संभेदाभास इह । प्रसाधनाच्चात्र शृङ्गारः । यदाह ।

---

१०१. प्रचलम् for प्रचलद् noticed by Com.; सारादे° Bh. °मादावे° O. for °मारादे°

१०२. निश्चोत्य Bh. Kl. निष्कृत्य N. निश्चूष्य O. for निष्कुष्य.

१०३. पिशाचाङ्गनानाम् A. B. D. पिशाचीनाम् O. for पिशाचानाम्.

तथा हि ।

अन्त्रैः कल्पितमङ्गलप्रतिसराः स्त्रीहस्तरक्तोत्पल-
व्यक्तोत्तंसभृतः पिनद्ध सहसा हृत्पुण्डरीकस्रजः । १०५
एताः शोणितपङ्ककुङ्कुमजुषः संभूय कान्तैः पिब-
न्त्यस्थिस्नेहसुराः कपालचषकैः प्रीताः पिशाचाङ्गनाः ॥

ऋतुमाल्यालंकारैः प्रियजनगान्धर्वकाव्यसेवाभिः ।
उपवनगमनविहारैः शृङ्गाररसोपि संभवति ॥

अत एवायं श्लोकः कण्ठाभरणेपि रससंकराभास उदाहृत इति। अन्त्रैरित्यादि । एताः पिशाचस्त्रियः कान्तैः संभूय मिलित्वा कपालचषकैरस्थिस्नेहसुरा मज्जमद्यानि पिबन्ति । कीदृश्यः । अन्त्रै रचितो मङ्गलार्थं प्रतिसरो हस्तसूत्रमूर्णामयं याभिस्ताः । अवैधव्यचिह्नं मङ्गलप्रतिसरो भवति । यद्वा । प्रतिसरः कङ्कणम् । तदप्यवैधव्यचिह्नतया मङ्गलम् ॥ कङ्कणे करसूत्रे च भवेत्प्रतिसरोस्त्रियामिति मेदिनीकरः ॥ स्त्रीहस्त एव रक्तपद्मं तेन व्यक्तमुत्तंसं कर्णभूषणं बिभ्रति याः । सहसा शीघ्रं हृत्पद्ममालाः पिनद्ध परिधाय । हृत्पद्मस्य श्वेततया पुण्डरीकपदेनोपन्यासः । यदाह ।

द्वादशाङ्गुलसंपूर्णे श्वेते हृदयपङ्कजे ॥ इति ।

मालाया मनोहरतयान्या मा गृक्षात्विति परिधाने शीघ्रता । अत एव प्रीताः । रक्तकर्दमकुङ्कुमवत्यः । अत्र पिबन्त्यस्थीत्यादौ यतिभङ्गशङ्का न कार्या । संधिकृतपदविच्छेदे तस्यादोषत्वात् । देवां द्रक्ष्यस्युपलविषमामित्यादौ तथा दर्शनात् ॥ चषकं पानपात्रं स्यादिति हारावली ॥ इह बीभत्समिश्रः शृङ्गाररसः ।

---

१०४. Bh. C. K1. N. om. तथाहि.
१०५. त्नो° for त्नको° K2.
१०७. शिरसां B. शिरसो C. शिरसा D. for सहसा; °रीके for रीक B.
१०८. °न्त्यस्मिन् for °न्त्यस्थि B.; सुरां for सुराः K2, O.; कलाप for कपाल K1.

परिक्रम्य पुनरश्लेति पठित्वा । कथं नाम प्रशान्तभीषणविभीषिकाप्रकारैर्झटित्यपक्रान्तं पिशाचैः । अहो निःसत्त्वता पिशाचानाम् । परिक्रम्य दृष्ट्वा सनिर्वेदम् । विचितश्चैष समन्ताच्छ्मशानवाटः । तथाहि खल्वियं पुरत एव ।

गुञ्जत्कुञ्जकुटीरकौशिकघटाघूत्कारसंवल्गित-
क्रन्दत्फेरवचण्डडात्कृतिभृतप्राग्भारभीमैस्तटैः ।

१०९—११६. झटिति शीघ्रम् । विभीषिका परभयदायिनी रौद्ररूपता । तस्याः प्रकारा भेदाः । अपक्रान्तं प्रपलाय्य गतम् । निःसत्त्वा इत्यनेनात्मप्रौढिर्दर्शिता । महामांसविक्रयादपि नेष्टलाभ इति निर्वेदः । विचितो व्याप्तः । तमोव्याप्तत्वेन कथं विचितत्वज्ञानमित्यत आहेयमिति । गुञ्जदित्यादि । इयं सरित्पुरत एवास्ति । पारेश्मशानं श्मशानपारदेशे ॥ पारे मध्ये षष्ठ्या वेति समासः ॥ कुञ्ज एव कुटीरोल्पा कुटी तत्र या कौशिकघटा पेचकसमूहः । गुञ्जन्तीनां कुञ्जकुटीरकौशिकघटानां घूत्कारूपं संवलितं ध्वनितम् । क्रन्दच्छृगालानां डात्कृतिर्डात्कारः शब्दविशेषः अनयोर्द्वन्द्वः । ताभ्यां भृतः पूरितो यः प्राग्भारोप्रतटं तेन भीषणैस्तटैर्लक्षिता ॥ लक्षणे तृतीया ॥ अन्तरभ्यन्तरे शीर्णास्त्रुटिता ये करङ्काः कपालानि तेषां

१०९. °रशलपूतेति B. Bh. °रशलपूतमिति N. °रशलपूतमभ्याजमिति K1. K2. O.; ब्राग् for नाम A. B. Bh. C. D. अति after नाम N. O., after ब्राग् A. Bh. C. D. गति for अति B.; क्रान्त for प्रशान्त O.; C. N. om. प्रशान्त; विभीषण for भीषण Bh.

११०. भीषिका A. B. D. विभीषिका O. for विभीषिका; विकारैः for प्रकारैः N. O.; ब्राग् for झट् O.; परिक्रम्य दृष्ट्वा before अहो O.; निःसत्त्वाः सर्वे N. निःसत्त्वाः O. for निः सत्त्वता.

१११. N. om. पिशाचानाम्; O. om. पिशाचा—ष्ट्वा: N. om परिक्रम्य दृष्ट्वा; पुरो before दृष्ट्वा K2.; चैव for चैष N.; सर्वतः for समन्तात् N. O.

११२. N. om. हि.

११३. च्छूत्कार for घूत्कार A.; संवर्धित N. संवर्गित O. for संवल्गित.

११४. डात्कृत for डात्कृति Bh. C.

११९ अन्तःशीर्णकरङ्ककर्करपयःसंरोधकूलंकष-
स्रोतोनिर्गमघोरघर्घररवा पारेइमशानं सरित् ॥

नेपथ्ये । हा ताद निक्करुण एसो दाणिं दे णरेन्दचित्ताराह-णोवअरणं जणो विवज्जइ । (क)

(क) हा तात निष्करुण एष इदानीं ते नरेन्द्रचित्ताराधनोपकरणं जनो विपद्यते ।

कर्करो भग्नावयवः काकर इति प्रसिद्धो वा कर्करो यत्र । अत एव तरतां संतरणशीलानां संरोध्यवरोधकः कूलंकषः कूलविदारको यः स्रोतोनिर्गमस्तेन घोरो घर्घरोऽव्यक्तरूपो रवः शब्दो यत्र सा । तरः-संरोधीति पाठे तरसा वेगेन संरोधि गमनविरोधि । कर्करेण दृढेन तरसा संरोधीत्यर्थः ॥ अल्पा कुटी कुटीरः स्यादित्यमरः ॥ घटा-शब्दः समूहमात्रवचनोपि करिघटादौ त्वात्यन्तिकस्तस्य प्रयोग इत्यत्रेयम् । घुत्कारडात्कृती अनुकरणशब्दौ । क्वचित्फात्कृतीति पाठः । तत्रापि फात्कृतिरनुकरणशब्द एव । फेरुफेरवजम्बुका इत्यमरः । तटः प्राग्भार इत्यपीत्यमरः । कर्करो भग्नभागेपि दृढेपि खण्डितेपि चेति धरणिः ॥ तदिह करङ्ककर्करसंकुलनदीप्रवाहस्तीरं पातयति घर्घररवं च कुरुत इति स्फुटमेव ।

११७—१२३. हा तात इत्यत्र हायोगेपि न द्वितीया । हाशब्द-स्य शोकवाचिन उपग्रहात् । तस्य च संबोधने प्रथमाप्रयोगात् । तदन्यार्थस्य योगे द्वितीयेति न्यासः । अङ्कमुखे स्त्रीरत्नापहारस्य सूचितत्वान्नेपथ्ये भणनमिदम् । नाद इत्यादि । अयं तावन्नादः श्रोत्र-

११९. कर्पर for कर्कर Bh. N.; तरत् B. K1. K2. N. तरः D. for पयः संरोधि for संरोध B. D. K1. K2. N.

११७. हदम्हि after हा K1.; दाणिं for दाणिं D.; K1. om. दे; णरिंद for णरेन्द K1. K2. O.; °रोहणो° K1. °राधणो° O. for °राहणो°.

११८. °रणो A. Bh. K1. °रणसाहणं D. for °रणं; वि before जणो B.; णावज्जइ B. विपज्जइ N. विवज्जदि O. for विवज्जइ.

माध० । साकूतमाकर्ण्य ।

नादस्तावद्विकलकुररीकूजितस्निग्धसार- १२०
श्चित्ताकर्षी परिचित इव श्रोत्रसंवादमेति ।
अन्तर्भिन्नं भ्रमति हृदयं विह्वलत्यङ्गमङ्गं
देहस्तम्भः स्खलयति गतिं कः प्रकारः किमेतत् ॥

योः संवादं पूर्वोपलम्भाकारतामेति । कीदृशः । विकला त्रस्ता या कुररी हापूतीति प्रसिद्धा पक्षिवधूस्तस्याः कूजितवत्स्निग्धः स्नेहलस्तार उच्चश्च । त्रासान्मालत्यास्तारो नादः । अत एव चित्ताकर्षी प्रियत्वाच्चित्तानुकर्षकः । परिचित इव पूर्वमुपलब्ध इव । अत एव श्रोत्रसंवादितास्य । परिचयश्च शंकरगृहे वृत्तः । यदि श्रोत्रसंवादमेति कथं तर्हीवकार इत्यत आह । अन्तर्भिन्नं द्विधाभूतं संशयाक्रान्तं हृदयं भ्रमति दोलायते । उभयत आकर्षात् । अत्र मालतीगमनासंभवात्संवादस्य च स्फुटत्वात् । यद्वा । अन्तर्भिन्नं विद्धमसंभवेनित्यर्थात् । तथा बन्धुगतानिष्टशङ्काकलङ्कात्प्रत्यङ्गं विह्वलति । करादीनि कंपन्त इत्यर्थः । तस्याः कथमिहावस्थानमिति भयाद्देहस्तम्भः । यदाह ।

हर्षव्याधित्रासरोषाद्यैः स्तम्भः संभवति ।

चिन्तास्तिमितत्वाद्गतिश्च स्खलति । कथमकस्मादेव ममेदं वृत्तमिति विमर्शमाह । कोयं प्रकारः किंनिमित्तं स्नेहमाविष्करोति । किमेतत् । सैवेयं किमन्यद्वा तत्तुल्यमित्यर्थः । संमुग्धिमिति पाठे कर्णपीडां करोतीत्यर्थः । नादश्रुत्या मोहात् ।

---

१२१. संमुग्धिमे° for संवादमे° noticed by Com.

१२२. विज्वलति for विह्वलति Kl. O.

१२३. देहोत्कम्पः B. Bh. C. Kl. गात्रस्तम्भः N. for देहस्तम्भः; स्खलति च गतिः for स्खल—ति A. D.

करालायतनाद्यायमुच्चरन्करुणो ध्वनिः ।
१२६ विभाव्यते ननु स्थानमनिष्टानां तदीदृशाम् ॥

भवतु पश्यामि । इति परिक्रामति ।

ततः प्रविशतो देवार्चनव्यग्रौ कपालकुण्डलाघोर-
घण्टौ कृतवध्यचिह्ना मालती च ।

माल० । हा ताद णिक्करुण एसो दाणिं दे णरेन्दचित्ताराहणो-
१३० वअरणं जणो विवज्जइ । हा अम्ब सिणेहमअहिअए हदासि
देव्वदुव्विलसिदेण । हा मालदीमअजीविदे मम कल्लाणसाहणे-

(क) हा तात निष्करुण एष इदानीं ते नरेन्द्रचित्ताराधनोपकरणं जनो विपद्यते । हा अम्ब* स्नेहमयहृदये हतासि दैवदुर्विलसितेन ।

१२४-१२८. करालेत्यादि । अयमुत्थितकरुणरसो ध्वनिः कथं वा संभाव्यत इत्यन्वयः । उच्चरन्नुत्तिष्ठन् । वितर्कसंधारणमाह । नन्विति । ननु संभावनायाम् । इदृशां संभाव्यमानजातीयानामनिष्टानां जनवधानामिदं करालायतनं स्थानमिति संभाव्यते । वध्यचिह्नं न्यस्तालक्तकेत्यादि ।

१२४. करुण for करुणो A. D. N. O.

१२५. मंनिध्यानं for °मनिष्टानां B.; ईदृश for ईदृशां A. B. K1. K2. O.

१२६. Bh. om. इति परिक्रामति; K1. om. परिक्रामति.

१२७. देवता° for देवा° A. O.; व्यग्रहस्तौ for व्यग्रौ A. D.

१२८. च मालती for मालती च O.

१२९. निक्करुण for णिक्करुण K2.; Bh. D. K1. K2. om. दाणिं; णरिन्द K1. O. नरिन्द K2. for णरेन्द.

१३०. °वअरण Bh. °वअरणो K1. °पवरणं K2. for वअरणं; विपज्जइ N. विवज्जदि O. for विवज्जइ; णेहमय for सिणेहमअ O.; N. om. सिणेहमअ; हिअअ for हिअए K1.; तुमं वि before हदासि A. D.; हदं हि for हदासि N.

१३१. देव for देव्व O.; °सिदेन for °सिदेण O.; मालती for मालदी Bh.; °मय for °मअ O.; जीविए N. जीविते O. for जीविदे; हा before मम O.; मह for मम N.; कल्याण for कल्लाण Bh. K1.; °णैक्क for °णेक्क K2.

* मातः Com.

क्कसुहसअलव्वावारे भअवदि चिरस्स जाणाविदासि दुःखं सिणेहेण। हा पिअसहि लवङ्गिए सिविणआवसरमेत्तदंसणा अहं दे संवुत्ता।(क)

माध०। हन्त सैवेयं हरिणेक्षणा। संप्रति निरस्त एव संदेहः। १३५ तदहमपि नामैनां जीवन्तीं संभावये। त्वरितं परिक्रामति।

कापालिकौ। देवि चामुण्डे नमस्ते नमस्ते।

सावष्टम्भनिशुम्भसंभ्रमनमद्भूगोलनिष्पीडन-
न्यञ्चत्कूर्परकूर्मकम्पविगलद्ब्रह्माण्डखण्डास्थिति।

हा मालतीमयजीविते मम कल्याणसाधनैकशुभ*सकलव्यापारे भगवति चिरस्य ज्ञापितासि दुःखं स्नेहेन। हा प्रियसखि लवङ्गिके स्वप्नावसरमात्रदर्शनाहं ते संवृत्ता।

१३२—१३५. अत्र भगवति कामन्दकि इति शेषः। चिरस्य बहुकालम्। एकशुभस्थाने। एकमुखमिति पाठ एकमुखमेकवाक्यतापन्नम्। हन्तेति निश्चयलाभे।

१३८-१४०. सावष्टम्भेत्यादि। देवि युष्माकं क्रीडितं नृत्यं वन्दे। कीदृशम्। साटोपो यो निशुम्भो निर्दययन्त्रणं करणभेदस्ततः संभ्रमादा-

---

१३२. मुक्क after सुह C.; मुक्क; B. D. O. सुल N. for सुह; वावारे for व्वावारे Bh. K1. K2.

१३३. पिअ Bh. पिय O. for पिअ; सिविणअदंसणमेत्ता for सि—णा N.; सिविअणा° for सिविणआ° K1. K2. मेत for मेत्त K1.

१३४. Bh. om. दे; ते for दे K1 O.

१३५. K1. om. हन्त; N. om. सै—क्षणा; मदिरे° for हरिणे° A. C. D. N.; हन्त before संप्रति K1. K2.; मे before संदेह N. O.

१३६. N. O. om. अहं; एव for अपि नाम B.; ताम् for नाम Bh. K1.; एतां for एनां C.; O. om. एनां; एव after जीवन्तीं N.; संभावयेयं for संभावये O.

१३७. अघोरघण्टकपालकुण्डले A. कपा-घण्टौ N. for कापालिकौ; K2. N. om. one नमस्ते.

१३८. निर्भर for संभ्रम A. B. Bh. C. D. K1. K2. नदत् for नमत् B.

१३९. कंप for कंप N.; विचलद् for विगलद् O.

* शुभ for मुक्क Com.; °नैकमुख noticed by Com. मुह in K1. K2. can also be read as मुह).

१४० पातालप्रतिमल्लगल्लविवरप्रक्षिप्तसप्तार्णवं
वन्दे नन्दितनीलकण्ठपरिषद्वृत्तक्रियं वः क्रीडितम्॥

अपि च। प्रचलितकरिकृत्तिपर्यन्तचञ्चन्नखाघातभिन्नेन्दुनिः-
स्यन्दमानामृतश्योतज्जीवत्कपालावलीमुक्तचण्डाट्टहासत्रसद्भूरि-
भूतप्रवृत्तस्तुति श्वसदसितभुजंगभोगाङ्गदग्रन्थिनिष्पीडनस्फार-

नमतो भूगोलस्यावनिचक्रस्य निष्पीडनेन न्यञ्चद्धोगच्छत्कर्परं पृष्ठास्थि यस्य कूर्मस्य तस्य कम्पेनाङ्गचालनेन विगलन्ती भ्रश्यन्ती ब्रह्माण्डख-ण्डस्य स्थितिर्यत्र तत्तथा। अनेन भूकम्प उक्तः। तथा च नम्रीभूतभूगो-ले स्वर्णवानामुत्सेकात्पातालतुल्यगल्लविवरे प्रक्षिप्ताः सप्तार्णवा यत्र तत्। नन्दितभैरवसभं च प्रकटविभवम्।

उत्क्षिप्ता तु भवेत्पार्ष्णिर्निशुम्भोयं निगद्यते।
अङ्गुल्योग्राञ्चिताः सर्वाः पादेग्रतलसंचरे॥

इति भरतः॥ कटाहे च कपालेपि पृष्ठास्थनि च कर्पर इति शाश्वतः॥ नाट्येश्वरीवर्णनमिदम्।

१४२—१५०. दण्डकमाह प्रचलितेत्यादि। देवि युष्माकं ताण्ड-वमुद्धतं नृत्यमस्माकमभीष्टया अशुभनाशाय तुष्टया आनन्दाय च भूयात्। अरिष्टया इति पाठे रिष्टिरशुभं तदभावोरिष्टिस्तस्यै। अनेन भाव्यनिष्टार्थसूचकदण्डोप्युक्तः। यदाह।

आकस्मिकमसंबद्धं समर्थमिव यद्भवेत्।
वाचामन्ते स दण्डः स्याद्भाव्यनिष्टार्थसूचकः॥

---

१४२. अघोर° for अपि च N.; प्रचलत् for प्रचलित C.; निष्यंद Bh. निस्पन्द K1. O. विष्यन्द K2. for निःस्यन्द.

१४१. °तोद्योत B. °तद्योत K1. K2. O. for °तद्द्योत.

१४४. गूभृत् for भूत C.; प्रवद्ध for प्रवृत्त O.; निष्पीडितोत्फाल for निष्पीडनस्फार O.; उत्फुल्ल for स्फार N.

फुल्लत्फणापीठनिर्यद्विषज्योतिरुज्जृम्भणोड्डामरव्यस्तविस्तारि- १४५
दोःखण्डपर्यासितक्ष्माधरम्। ज्वलदनलपिशङ्गनेत्रच्छटाच्छन्न-
भीमोत्तमाङ्गभ्रमि प्रस्तुतालातचक्रक्रियास्यूतदिग्भागमुत्तुङ्गख-
ट्वाङ्गकोटिध्वजोद्भूतिविक्षिप्ततारागणं प्रमुदितकटपूतनोत्तालवे-

---

रिष्टिः खड्गे नाशुभे स्त्रीति मेदिनीकरः। अरिष्टे तु शुभाशुभ इत्यमरः॥ यद्वा। ककारो देवमाता स्यादिति कोशादृशब्दात्संबुद्धौ गुणे च हे अः देवमातः इष्ट्या अभीष्टयै भूयादित्यर्थः। कीदृशम्। प्रचलितगजाजुर-चर्मपर्यन्तेषूज्झतां नखानामाघातैर्भिन्नात्स्फुटिताहेवीमस्तकस्थचन्द्रा-क्षरदमृतस्य द्योतेनाग्रवेन जीवन्तीभिः कपालावलिभिर्मुण्डमालाभि-र्मुक्तैश्चण्डाट्टहासैरत्युद्धसनैरुल्लसतां बहुभूतगणानां प्रवृत्ता स्तुतिर्यत्र। यद्वा। भूतगणैः प्रवृत्ता प्रवर्तिता स्तुतिर्यत्र तत्॥ अन्तर्भावितण्यर्थः॥ यद्वा। प्रचलितः करिचर्मरूपोवधिर्यत्र तत्। पश्चात्कर्मधारयः। तथा ता-ण्डवाडम्बरायासेन श्वसतां श्यामसर्पाणां कायैर्ये केयूराकारग्रन्थय-स्तेषु निष्पीडनेनोत्फाल उद्गतमुखविकासस्तरलो वा फुल्लन्विस्तारिता-ङ्गत्वयः फणापीठः। विस्तारितया पीठेन रूपकम्। ततो निर्गतविषाग्नि-रुज्जृम्भणेनाधिक्येनोड्डामरः केलिसंवस्तु [संस्तव ?] रसातिशयो भयंकरो वा विषमो वा व्यस्त इतस्ततोगामी विस्तारी दीर्घो योदोः-खण्डः समूहस्तेन पर्यासितः क्षिप्तः पर्वतो यत्र तत्। देव्या अनेकबा-हुशालितया दोःखण्ड इत्युक्तम्॥ अञ्जादिकदम्बे खण्डमस्त्रियामि-

---

१४५. फुल्ल A. स्फुलत् K1. for फुल्लत्; °ज्जृम्भमाणो° for जृम्भणो° K2. व्यक्त for व्यस्त C.; विस्तार for विस्तारि D. K1.

१४६. खंड for खण्ड Bh; तलं for धरं K2.; रिंखज्जटाजूट N. रिंगज्जटाजूट O. for नेत्रच्छटाच्छन्न; सार B. सत्र Bh. K1. °टोप K2. for °च्छन्न.

१४७. स्फूत Bh. स्फुट C. for स्यूत; खट्टाङ्ग for खट्वाङ्ग A.

१४८. शृङ्ग for कोटि N. O.; °जोद्भूत B. D. °जोद्भूत Bh. °जोद्भुति C. °जोद्भूत O. for °जोद्भूति; विकट for कट B.

तालतालस्फुटत्कर्णसंभ्रान्तगौरीघनाश्लेषहृष्यन्मनस्त्र्यम्बकानन्दि वस्ताण्डवं देवि भूयादभीष्टये च हृष्टये च नः । इत्यभिनयतः।

माध० । हा धिक् । प्रमादः ।

न्यस्तालक्तकरक्तमाल्यवसना पाखण्डचण्डालयोः
पापारम्भवतोर्मृगीव वृकयोर्भीरुर्गता गोचरम् ।

त्यमरः ॥ तथा ज्वलतानलेन पिङ्गलं यत्नेत्रं ललाटलोचनं तस्य च्छटा ज्वालानिर्गमप्रसरस्तस्य साटेन विस्तारेण भीमं यदुत्तमाङ्गं शिरस्तस्य भ्रमिर्मण्डलाकारेण भ्रमणं तया प्रस्तुता प्रारब्धालातचक्रक्रिया वह्निप्रज्वलितार्धकाष्ठविशेषकर्म तया स्फुटा इवैकत्र प्रतिबद्धा इव दिग्भागा यत्र तत् । तथातिमहत्खट्वाङ्गाग्रध्वजोत्कम्पाद्विक्षिप्त इतस्ततस्तारागणो यत्र तत् । तथा हृष्टकटपुतनोद्भटवेतालानां तालेन कलकलेन स्फुटत्कर्णात एव संभ्रान्ता त्रसन्ती सत्वरा वा गौरी तस्या निबिडालिङ्गनेन हृष्यच्चित्तं त्र्यम्बकं शिवमत्यर्थमानन्दयति ॥ आभीरुण्ये णिनिः ॥साटो निकुञ्जे विस्तार इति विश्वः । शृङ्गमग्रेपि कीर्तितमिति शाश्वतः ।

१५१—१५५. धिक्प्रमाद इत्यत्र वर्तत इति क्रियाधारः ॥ तत उपपदविभक्तेः कारकविभक्तिर्बलीयसीति धिग्योगे द्वितीयां बाधित्वा प्रथमेत्यवधेयम् ॥ न्यस्तेत्यादि । सेयं भूरिवसोः सुता यस्याः कृते मयैवं दुःखमनुभूयते पाखण्डचण्डालयोर्गोचरं संमुखं गता । पाखण्डेषु चाण्डालोसौ । तद्दर्शनविरुद्धक्रियाकारित्वात् । यदाह ।

---

१४९. नाद Bh. K1. K2. लोल O. for ताल; स्तना° for धना° B.; कृष्यन् for हृष्यन् Bh.; त्र्यच्चका° for त्र्यम्बका° K1.

१५०. अरिष्टये for अभीष्टये N. O.; तुष्टये च before हृष्टये K1.; तुष्टये for हृष्टये B. K2.; °धायतः for °नयतः K1.

१५१. N. om. हा.

१५२. त्र्यस्ता° for न्यस्ता° B ; पाषण्ड A. Bh. पाषाण्ड K2. N. पाखण्डि O. for पाखण्ड; चाण्डाल° for चण्डाल° A.

१५३. °रम्भकयोः for °रम्भवतोः B. C. D.

सेयं भूरिवसोर्वसोरिव सुता मृत्योर्मुखे वर्तते
हा धिक्कष्टमनिष्टमस्तकरुणः कोयं विधेः प्रक्रमः ॥ १५५
कपाल० । तं भद्रे स्मर दयितोत्र यस्तवाभू-
दद्य त्वां त्वरयति दारुणः कृतान्तः ।

न भुञ्जीतार्कपत्रेषु स्त्रीबालं नैव घातयेत् ॥

यद्वा । पाखण्डौ च तौ चण्डालौ च । निषिद्धक्रियत्वात् । यदाह ।

अवध्यास्तु समाख्याताः सर्वयोनिगताः स्त्रियः ॥

चण्डालत्वादेव पापारम्भवतोर्मारणप्रवृत्तयोः । न्यस्ते अलक्तकरक्ते माल्यवसने यस्यां सा । एतद्वध्यचिह्नम् । यथा मृगी वृकयोः संमुखं गता तथेयं भीरुः । मृगीत्यनेन भयचलनेत्रतोक्ता । वसोर्देवताभेदस्य । एतेनास्य सुखित्वमुक्तम् । मृत्योर्यमस्य मुखे वर्तते । अत एव हाशब्दः परिदेविते स्त्रीरत्नमपि वध्यत इति । निन्दायां धिगिति । विषादे कष्टम् । कोपेनिष्टम् । अस्ता नष्टा करुणा दया यत्र । एतादृशो विधेरारम्भः कोयम् । निन्दितोयम् । कीदृग्वा ॥ किं वितर्के परिप्रश्ने क्षेपे निन्दाप्रकारयोरिति विश्वः ॥ करुणोयं रसः ।

इष्टवधदर्शनाद्वा करुणरसो नाम संभवति ॥

इति भरतः । चण्डालोपि च चाण्डाल इति शब्दभेदः । पुष्पपुष्पस्रजौ माल्यमित्यरः ॥

१५६-१६४. त्वं भद्रेत्यादि । प्रहर्षिणीच्छन्दसा श्लोकार्धम् । चामुण्डे भगवतीत्याद्यमिमार्धम् । हे भद्रे यस्तव दयितो वल्लभत्वेनेष्टस्तं स्मर । गुरुत्वात्स्मरणमस्य । यदाह ।

पतिरेको गुरुः स्त्रीणामिति ।

---

१५५. अरिष्टम° for अनिष्टम° B.
१५६. कापालिकौ for कपाल° K2.; त्वं for तं A. B. Bh. C. D. K1. K2.
१५७. °देव त्वां for °दय त्वां A.

माल० । हा दइअ माहव परलोअगदो वि सुमरिदव्वो तुम्हेहिं अअं जणो । ण हु सो उवरदो जस्स वल्लहो
१६० सुमरेदि । (क)

कपाल० । हन्त माधवानुरक्तेयं तपस्विनी ।

अघोर० । शक्तिमुद्यम्य । यदस्तु तदस्तु व्यापादयामि ।

चामुण्डे भगवति मन्त्रसाधनादा-
वुद्दिष्टामुपनिहितां भजस्व पूजाम् ॥

१६५ इति हन्तुमुपक्रान्तः ।

(क) हा *दयित माधव परलोकगतोपि स्मर्तव्यो युष्माभिरयं जनः । न खलु स उपरतो यस्य वल्लभः स्मरति ।

यद्वा । मदुपहरणीयत्वेन स इह जन्मनि ते वल्लभो न भूत एव । अतो जन्मान्तरेपि तल्लाभाय तं स्मर । यदाह ।

यं यं चापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ इति ।

कृतान्तो यमः । स्मरणफलमाह [न खलु स उपरत इति] । यस्येत्यधीगर्थेति कर्मणि षष्ठी ॥ यस्य गुणमिति वा । अन्तकाले माधवस्मरणं मुक्तिहेतुरिति कटाक्षितम् । हन्त खेदे । कामन्दकीमित्रपुत्रत्वान्ममापि माधवस्तादृश एव । तदनुरक्ता चेयं कथं वध्येति खेद इति भावः । अ

---

१५८. K1. K2. om. हा; दइद for दइअ Bh.; णाह for दइअ K1. K2. O णाह after दइअ A; B. om. माहव; पि for वि O.; D. N. om. वि.

१५९. K1. K2. om. तुम्हेहिं ; णहि K1. णहु K2. for णहु.

१६०. A. B. C. D. have जणो before सुमरेदि; सुमरइ for सुमरेदि N.

१६१. वराकी before तपस्विनी A. B. C. D.

१६२. B. om. शक्ति–°म्य ; शक्तिम् for शक्तिम् A.; Bh. N. O. om. यद—°र्यां

१६३. साधनार्थम् for साधनादौ Bh. K1. K2.

१६५. Bh. K1. K2. N. om. इति-क्रान्तः.

* Com. has नाथ for दयित.

माध० । सहसोपसृत्य प्रकोष्ठे मालतीं विक्षिप्य । दुरात्मन् अपेहि । प्रतिहतोसि कपालिकापसद ।

माल० । सहसावलोक्य । परित्ताअदु परित्ताअदु महाभाओ ।(क)

इति माधवमालिङ्गति ।

१७०

माध० । महाभाग न भेतव्यं न भेतव्यम् ।

मरणसमये त्यक्त्वा शङ्कां प्रलापनिरर्गलं
प्रकटितनिजस्नेहः सोयं सखा पुर एव ते ।

(क) परित्रायतां परित्रायतां* महाभागः ।

एव तपस्विन्यनुकम्प्या । उद्दिष्टां वाचा प्रतिज्ञाताम् । उपनिहितामुपढौकिताम् ।

१६६-१७४. कफोणेरधोभागो मणिबन्धपर्यन्तः प्रकोष्ठः । विक्षिप्यापसार्य । खड्गहस्तत्वेन बाहुमध्येपसारणं जातिः । प्रतिहतो निराकृतः । अपसद निन्दित । मरणेत्यादि । सोयं तव मित्रं पुरत एव वर्तत इत्याक्षेपात् । यो बकुलवीथ्यादिषु सानुरागदर्शनप्रसन्नया त्वया स्वीकृतः । मरणसमय इत्यनेनानुराग उक्तः । यदाह ।

---

१६६. Kl. om. सहस्तोपसृत्य; खड्गं before प्रकों° O.; मालतीं प्रकोष्ठे for प्र-तीं Bh. Kl. K2.; प्रकोष्ठेन for प्रकोष्ठे O.; O. om. मालतीं; खड्गं for मालतीं B. N.; गृहीत्वा खड्गं before विक्षिप्य Kl. K2.; निक्षिप्य for विक्षिप्य A. B. Bh. D.; आः before दुरात्मन् N.; Bh. repeats अपेहि; A. om. अपेहि.

१६७. एष before प्रति° A.; नन्वयं न भवसि after °कापसद A.

१६८. Kl. om. सहसावलोक्य; माधवं for सहसा O.; विलोक्य for अवलोक्य Bh.; A. B. C. D. Kl. K2. om. one परित्ताअदु A. B. Bh. C. D. Kl. K2. add मं before महा° महाणु° for महा° O. B.; भावो for भाओ C. D.; माहवो A. Kl. माहवः K2. after °भाओ.

१६९. B. Bh. Kl. O. om. इति; O. om. माधवमालिङ्गति; तम् for माधवम् B.

१७०. A. B. Kl. K2. O. om. one न भेतव्यम्.

१७१. त्यक्ताशङ्कः Bh. मुक्ताशंकः Kl. K2. त्यक्ताशंकः O. मुक्ताशङ्कां. Com. for त्यक्त्वा शङ्कां; प्रताप for प्रलाप A. B. D. Kl. K2. O.; निरर्गल A. Bh. C. D. निरर्गलः B. Kl. K2. O. for निरर्गलं.

* Com. om. one परित्रायतां.

सुतनु विसृजोत्कम्पं संप्रत्यसाविह पाप्मनः ।
फलमनुभवत्युग्रं पापः प्रतीपविपाकिनः ॥

१७५ अघो° । आः क एष पापोस्माकमन्तरायः संवृत्तः ।

कपा° । भगवन् स एवास्याः स्नेहभूमिः कामन्दकीसुहृत्पुत्रो महामांसस्य पणायिता माधवः ।

साहसानुरक्तं हि स्त्रियो भजन्त इति ।

तत्र मुक्ताशङ्को निर्भयः । पाखण्डादिति भावः । अत एव प्रतापेन निरर्गलोनभिभाव्यः । प्रलापेति पाठे हा नाथ माधवेत्यादिमालतीप्रलापेन निरर्गल उच्छृङ्खल इत्यर्थः । त्यक्त्वा शङ्कामिति पाठे शङ्कां लज्जादिकं वा त्यक्त्वा प्रतापनिराकुलो वा प्रतापनिरङ्कुशो वेत्यर्थः । यद्वा । शङ्कां त्यक्त्वा यं प्रति त्वया प्रकटितो निजस्नेहः सोयमित्यर्थः । यद्वा । अयं कीदृशः । प्रकाशितात्मस्नेहः । मरणसमये रक्षणादिति भावः । हे सुतनु अत उद्गतं कम्पं त्यज । असौ पापः संप्रत्येव पाप्मनो निषिद्धाचरणस्य फलं मरणरूपमुग्रं तीव्रमनुभविष्यति । संप्रतीत्यनेन प्रकृतोपयुक्तं निजाप्तत्वं पौरुषं च ध्वनितम् । कीदृशस्य । प्रतीपो विपरीतो विपाको विरुद्धपरिणतिर्यत्र तस्य ॥ अनुभवतीत्यत्र वर्तमानसामीप्ये वर्तमानवद्वेति भविष्यति लट् ॥ शृङ्गारवीरसंभेदोत्र ।

१७५-१७८. अन्तरायो विघ्नः । भूमिः स्थानम् । त्रासातिशयान्निःश्वासः । अत्रोपरि सौधोपरि । अलिन्द ओट्ट इति प्रसिद्धे । यूयमिति । अहमबला सुप्ता चान्येनानीता यूयं धीराधीरा विबुद्धा अपी-

१७४. वा पुनः for पाप्मनः N.

१७५. अयं after पापो N.

१७६. भगवत्या for भगवन् A.; N. om. भगवन्; A. om. स; अयम् after एव A. Bh. K1. K2.

१७७. पणा° for पणा° A. C. D. K1. K2. N. O.; नाम after माधवः A.

माध० । साम्प्रम् । महाभागे किमेतत् ।

माल० । चिरादाश्वस्य । महाभाअ अहं वि ण आणामि । एत्तिअं उण जाणामि उवरिअलिन्दअं पसुत्ता इह पबुद्धम्हि । तुम्हे १८० उण कहिं । (क)

माध० । सलज्जम् ।

त्वत्पाणिपङ्कजपरिग्रहधन्यजन्मा
भूयासमित्यभिनिवेशकदर्थ्यमानः ।

(क) महाभाग अहमपि न जानामि । एतावत्सु*नर्त्तनाभ्युपर्यलिन्दकं प्रसुप्तेह †प्रबुद्धास्मि । यूयं पुनः क्व ।

दानीमिह किमर्थमागता इत्यर्थः । त्वदित्यादि । हे भीरु महामांसविक्रयाय इमशाने भ्रमंस्तव क्रन्दितान्याकर्ण्यागतोस्मि । महामांसविक्रयफलमाह । त्वदिति । त्वद्विवाहेन धन्यजन्मा पुण्यजन्माहं भवामीत्यभिनिवेशेनातियत्नेनावेशेन वा कदर्थ्यमानः पीड्यमानः । अतस्त्वां विना न मे जीवनमिति संभाव्यमानफलतया मांसविक्रये प्रवृत्तोस्मीति भावः । त्वत्पादपङ्कजेति पाठे प्रेयसीचरणग्रहणस्य मान एव कर्तव्यतया मानप्रसादनमेवोत्तरोत्तरं चरितेत्याशंसितवान् । अत एव सलज्जमित्युक्तमिति भावः ॥ धन्यः पुण्य इति स्मृत इति विश्वः ॥

---

१७९. Bh. om. चिराद्; Bh. K1. K2. O. om. महा-पि जाणामि; अहं ण किंपि जाणामि for अहं-°णामि A. B. C. D.

१८०. एत्तिअं for एत्तिअं K1. O.; दाव Bh. K1. K2. दाणिं N. O. for उण; °लिन्दे A. °लिंदए D. K2. O. for लिन्दअं; °सुत्ता for पसुत्ता A. D. K2. O.; परिबु° A. पडिबु° B. K1. N. विबु° O. for पबु°; उम्हे Bh. तुमं O. for तुम्हे.

१८१. तत् for त्वत् A. D.; पाद for पाणि O. noticed by Com.; पुण्य for धन्य A.

* Com. adds एव after एतावत्. † °लिन्दके Com.; विबु° Com.

१८९ भ्राम्यन्नृमांसपणनाय परेतभूमा-
वाकर्ण्य भीरु रुदितानि तवागतोस्मि ॥

माल०। स्वगतम्। कधं मम कारणादो एव्वं एदे अप्पणिरवेक्खा परिभमन्ति। (क)

माध०। अहो नु खलु भोस्तदेतत्काकतालीयं नाम। संप्रति हि

१९० राहोश्चन्द्रकलामिवाननचरीं दैवात्समासाद्य मे
दस्योरस्य कृपाणपातविषयादाच्छिन्दतः प्रेयसीम्।

(क) कथं मम कारणादेवमेत आत्मनिरपेक्षाः परिभ्रमन्ति।

कुत्सितोर्थः कदर्थः। भीरु इत्यनेन रोदनोपपत्तिरुक्ता। तदिह त्वन्निमित्तमहं साहसी त्वं पुनः कीदृशीति न जान इति तात्पर्यम्। अत एव हर्षविस्मयवशादाह [मालती कथमित्यादि]। परिभ्रमणमितस्ततो गमनम्। आत्मनिरपेक्षः श्मशानभ्रमणेन।

१८९—१९३. विस्मयेहो नु खलु भोः। काकतालीयमचिन्तितोपनतम्। यथा काकागमनतालपतनयोरेकदा संभवो दैवाधीनस्तथेदमपीत्यर्थः। राहोरित्यादि। दैवाद्विधिवशादासाद्य प्राप्य। अर्थात्प्रियाम्। अस्य दस्योश्चौरस्य खड्गपातविषयात्प्रेयसीमाकर्षतो मम चेतः कथं वर्तताम्। नवनवरसोदयात्तत्र जान इत्यर्थः। कामिव। राहोराननचरीमिन्दुकलामिव। कृपाणपातविषयामिति पाठे खड्गपतनस्य विषय आश्रयो

१८७. अपवार्य for स्वगतम् B. Bh. K1. K2.; हद्धी हद्धी A. D. हद्धी K2. before कधं, कहं for कधं Bh. K. N.; मह for मम N.; काल° for कार° N. जव्व Bh. ज्जेव K2. एव्व N. एवं O. for एव्वं; B. D. om. एव्वं; B. C. D. om. एदे; वि Bh. K1. पि K2. before अप्प; °वेक्खो B. C. D. °विक्खा Bh. पेक्खा K2. O. for °वेक्खा.

१८८. पडि for परि B. N.; °क्कामदि B. C. D. °क्कामन्दिं A. भमंति Bh. क्रमन्ति K1. O. for भमन्ति.

१८९. B. om. नाम.

१९०. धीरस्य for दस्योर C.; समयाद् B. विषयां noticed by Com. for विषयाद्.

आतङ्काद्विकलं द्रुतं करुणया विक्षोभितं विस्मया-
त्क्रोधेन ज्वलितं मुदा विकसितं चेतः कथं वर्तताम् ॥
अघो० । रे रे ब्राह्मणडिम्भ ।
व्याघ्राघ्रातमृगीकृपाकुलमृगन्यायेन हिंसारुचेः १९५
पाप प्राण्युपहारकेतनजुषः प्राप्तोसि मे गोचरम् ।

यत्र तामेतादृशीं प्रेयसीं प्राप्य कथं मम चेतो वर्ततामिति योजना । यद्वा अस्य कीदृशस्य । आच्छिन्दतो द्विधाकर्तुमुद्यतस्य । प्रियामित्यर्थात् । ततो जीवनाभाव एवास्या इति भावः । चौरिकयापहरणेन दस्युत्वम् । तदिह प्रथमार्धेन हेतुरुक्तः । द्वितीयेन फलमाह । आतङ्काच्चिरचमत्कारा-द्विकलं न त्वस्य निसर्गसात्त्विकस्य भयमिति यद्यपि तथापि प्रियप्राप्त्या जीवनसव्यपेक्षतया भयमुचितमेव पूर्वं तु जीवननिरपेक्षतया निर्भयत्व-मित्यातङ्को भयमेव । राहोरित्युपमानं भयहेतुः । चन्द्रकलोपमया जग-न्नेत्रोत्सवकरीयं व्यसनमुपगतेति करुणया द्रवीभूतम् । दैवादासादेति विस्मयाद्विचलितम् । दस्योरित्यनेन मालतीमयं हन्तुमुद्यतश्चौर इति कोपेन दीप्तम् । आच्छिन्दतः प्रेयसीमिति प्रिया जीवननिर्वाहेन हर्षेण प्रसन्नम् ।

१९४-१९८. ब्राह्मणेति सिद्ध्यनुगुणशुचित्वार्थं यज्ञोपवीतधारणात् । डिम्भो बालकः । ब्राह्मणकपालभोजिनो मम ब्राह्मणवधेपि न दोष इत्यु-क्तमनेनेत्यपि भावः । व्याघ्रेत्यादि । हे पाप मालत्युपहारकृत्यपरस्य मे गोचरं समीपं यत्प्राप्तोसि । अत एव विघ्नकारितया पापेति । कीदृशस्य मे । व्याघ्रगृहीतहरिणीकृपयाकुलो यो मृगस्तन्यायेन मृगीमनुसरन्व्याघ्र-

---

१९३. वर्तते for वर्तताम् C. N.
१९४. अरे N. अये O. for रे रे.
१९५. प्राण for घ्रात C.
१९६. पापः C. प्रायः noticed by Com. for पाप.

सोहं प्राग्भवतैव भूतजननीमृध्नोमि खड्गाहति-
च्छिन्नस्कन्धकबन्धरन्ध्ररुधिरप्राग्भारनिःस्यन्दिना ॥

माध० । दुरात्मन् पाखण्डचण्डाल ।

असारं संसारं परिमुषितरत्नं त्रिभुवनं
निरालोकं लोकं मरणशरणं बान्धवजनम् ।

संनिधौ पतन्मृगस्तस्य वध्यो भवत्येवं हिंसारुचेः । एनां न रक्षसि त्वं तु म्रियस इति भावमाश्रित्य । पाठान्तरं हिंसारुचे इति संबोधनं वा । सोहं भवतैव प्रागग्रे भूतजननीं जगन्मातरं चण्डिकामृध्नोमि प्रीणयामि ॥ ऋधु वृद्धाविति स्वादिरपीति धातुप्रदीपः ॥ कीदृशेन । खड्गाहत्या व्यस्तस्कन्धच्छिन्नग्रीवः । अत एव कबन्धस्तस्य रन्ध्राद्रुधिरप्राग्भारं श्रोतनं समूहं वा निःस्यन्दितुं शीलं यस्य तेन । रुचेरिति पञ्चम्यन्तपाठे रुचेर्हेतोर्मे गोचरं प्राप्तोसीत्यर्थः । पापस्थाने प्रायः पाठे समस्तमेव पदम् ॥ केतनं कृत्ये केतावुपनिमन्त्रण इत्यमरः । गोचरस्तु समीपे स्यादिति धरणिः ॥ यत एव च्छिन्नग्रीवोत एव कबन्ध इति हेतुहेतुमद्भावेनोक्तिपोष एव । वीररसोयम् ।

१९९–२०३. मारणेपराधमाह । असारमित्यादि । हे पाखण्ड जगदसारं सारशून्यं विधातुं कर्तुं कथं व्यवसितः कृतप्रारम्भोसि ।

अशक्यानि दुरन्तानि समव्ययफलानि च ।
असत्यानि च कार्याणि नारभेत विचक्षणः ॥

इति न श्रुतं त्वया । तथा च संसारसारभूतेयमेव । अनया विनासार एव स इति । यदाह ।

१९७. गृध्नोमि for ऋध्नोमि B.

१९८. व्यस्त Bh. K1. K2. N. न्यस्त O. for छिन्न; रुधिर for रुधिर O.; निष्यंदिना Bh. K2. निस्पन्दिना O. for निःस्यन्दिना.

१९९. पाषण्ड A. Bh. N. O. पाषाण्ड K2. for पाखण्ड; चाण्डाल for चण्डाल A. B. Bh. D.

अदर्पे कन्दर्पे जननयननिर्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः ॥

सारं तु महिलारत्नं संसार इति निश्चयः ॥ इति ।
जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते ॥ इति ।

तत्सर्वमाकृष्येयं निर्मिता । अतो रत्नमियम् । मनोहरत्वदीप्तिमत्त्वतरलत्वादिनेयं वा रत्नम् । अत एव तदभावात्प्रमुषितरत्नं त्रिभुवनं कर्तुं व्यवसितोसि । तदेतत्सर्वविषयं चौर्यं दुरन्तमिति भावः । इयमतिकान्त्या जगदुद्द्योतयतीत्यालोकभूता । एतदभावान्निरालोकं तमः प्रविष्टं लोकं जनं कर्तुं व्यवसितोसि । अत एवोत्कृष्टं प्रति लोकोक्तिस्तेन विनान्धकारस्तत्सत्त्व उद्द्योत इति । बान्धवजनानामेतत्सखीनामियं जीवनहेतुः । अत एतन्नाशान्मरणशरणं सखीजनं विधातुं व्यवसितोसि । अन्यसखीनाशे तत्सख्यो दुःखिताः । एतन्नाशे तु म्रियन्त एवेति भावः । अत्रासारं संसारमित्यादिना नायिकागतरामणीयकातिशयवर्णनमुपक्रम्य मरणशरणमित्यादिस्नेहविषयतामतिपादनात्सैकवाक्यतयैकरसनिर्वाह इत्यदोदयम् । मात्रादिबन्धुव्यतिरिक्तोदासीनबान्धवसंग्रहपराज्जनस्तद्वात्स्वस्यैव माधवस्तथा विपत्तिं सूचयतीत्यदोषात् । तदीयगुणचिन्तनादेव मरणशरणता ममेत्यारब्धनिर्वाहाच्च । कन्दर्पश्चैतया मोहनास्त्रेण दर्पं करोति । एतदभावाददर्पं कन्दर्पम् । जननयनस्यैतदर्शनमेव फलम् । अत एतन्नाशात्तदफलम् । जगदनयालंकृतमेव । एतदभावाज्जीर्णारण्यतुल्यं तदिति । अत्र प्रियाप्रशंसया शृङ्गारो बन्धुमरणात्करुणा पाखण्डाक्षेपाद्वीरः कथमित्यद्भुतमिति नाना रसाः ।

---

२०१. विपत्तिः for व्यवसितः K1.

अपि च । रे पाप ।

२०५ प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥

अघोर० । दुरात्मन् प्रहर प्रहर । नन्वयं न भवसि ।

२१० माल० । पसीद णाह साहसिअ । दारुणो क्खु अअं हदासो ।

२०४–२१२. पुनरपि दोषमुद्भाव्य दण्डं चिकीर्षुराह । प्रणयीत्यादि । हे पाप तव शिरस्येष भुज आकस्मिकयमदण्ड इव पततु । आकस्मिकत्वेनाप्रतिक्रियत्वमुक्तम् । कीदृशस्य । तत्र वपुषि वधाय शस्त्रमुत्क्षोलयतः । अत्र भुजपदेन बाहुव्यापारमात्रेणैव इन्तव्योसीति शौर्यातिशय उक्तः । यद्वपुः सुकुमारशिरीषपुष्पाघातैरपि ताम्यति खिद्यति । कीदृशैः । सप्रश्रयसखीसविलासपरिहासरसप्राप्तैः । अत्रापि शृङ्गारवीरकारुण्यसंभेदः । [माल० वा०] अत्र त्वज्जीवने मम जीवनमपि सफलम् । अन्यथा तु मरणमेव वरमिति भावः । मालतीव कपालकुण्डलापि स्वनाथमाह । भगवन्निति । अवष्टम्भार्थमप्रमत्त इति ।

---

२०४. A. N. repeat रे.

२०५. प्रणय for प्रणयि C. K1. K2.N. O.; सलेल for सलील K1.; °साध्विगतैः for °साधिगतैः C.

२०९. आं before दुरा° A.; A. C. D. om. one प्रहर; दुरात्मन् before नन्व K2.; B. om. नन्व; एष for अयं B.

२१०. °सीय for पसीद O.; साहसिअ णाह पसीअ Bh. साहसिअ णाह पसीद K1. K2. साहसिय णाह O. for णाह साहसिअ; णाम. after °सिअ A.; खु for क्खु K1. K2. O.; एसो for अअं N.; B. om. अअं; N. om. हदासो; हतासो for हदासो K2.

परित्तासु मं णिअत्तीअदु इमादो अणत्थसंसआदो । (क)
कपा० । भगवन् अप्रमत्तो भूत्वा दुरात्मानं व्यापादय ।
माधवाघोरघण्टौ मालतीकपालकुण्डले प्रति । अयि भीरु
धैर्यं निधेहि हृदये हत एष पापः
किं वा कदाचिदपि केनचिदन्वभावि । २१५
सारङ्गसंगरविधाविभकुम्भकूट-
कुट्टाकपाणिकुलिशस्य हरेः प्रमादः ॥

(क) प्रसीद नाथ साहसिक । दारुणः खल्वयं हताशः । *परित्रायस्व मां निवर्त्यतामस्मादनर्थसंशयात् ।

२१३-२१७. द्वयोर्भयं ज्ञात्वोभावाहतुः । धैर्यमित्यादि । हे भीरु त्वं हृदये धैर्यं कुरु । एष पापो हतः । अस्य वधे कुतः संशय इति वृथा भयं त इति भावः । अत्र युक्तिमाह । सारङ्गेण मृगेण सह युद्धविधाने हरेः सिंहस्य प्रमादोनवधानता किं वा केनचित्कदाप्यनुभूतः । कीदृशस्य । इभकुम्भरूपं यत्कूटमुच्चप्रदेशस्तत्कुट्टनशीलं हस्त एव वज्रं यस्य । यद्वा । हरेरिन्द्रस्य हस्तिना सह युद्धे नास्ति प्रमादः । कीदृशस्य । हस्तिकुम्भवत्पीवरशृङ्गकुट्टाकं पाणिस्थकुलिशं यस्य ॥ कुम्भकूटपाणिकुलिशपदे शाकपार्थिवादिः ॥ सारङ्गः पुंसि हरिणे चातके च मतङ्गज इति मेदिनीकरः ॥ वीरो रस इह ।

२१२. ता before परि° Bh. D. K1. K2.; A. om. परित्तासु मं; °त्ताअह Bh. K1. °त्ताअदु D. ताअह K2. त्ताअ N. त्ताय O. for °त्तासु; A.B.D. have पडि before णिअ°; नि for णि K1. K2.; उत्तीअदु B. व्वत्तीअदु Bh. वत्तीअदु K1. K2. वत्तअदु N. यत्तीयदु O. for अत्तीअदु; अत्थ for अणत्थ K1. K2.

२१३. कापालिका K1. कपालिका K2. for कपा०; विक्रमस्व for दुरा-°दय B.; °दयस्व for °दय N.

२१६. °घण्टकौ for घण्टौ O. साटोपौ before मालती O.

२१४. निधाय for निधेहि C.; एव for एष K2.

२१५. सूदन for संगर Bh. K1. K2.

* Com. om. परि-मां and has तत्प्रतिनिवर्तताम् .

नेपथ्ये कलकलः । सर्व आकर्णयन्ति ।

पुनर्नेपथ्ये । भो भो मालत्यन्वेषिणः सैनिकाः इयमस्मात्य-
भूरिवसुमाश्वासयन्त्यप्रतिहतप्रज्ञागतिर्भगवती कामन्दकी वः
समादिशति । पर्यवष्टभ्यतामेतत्कपालायतनम् ।

नाघोरघण्टादन्यस्य कर्मैतदारुणाद्भुतम् ।
न करालोपहाराच्च फलमन्यद्विभाव्यते ॥

२१९–२२८. मालतीगृहकथाकथनायाह । भो भो इति । अप्रतिहतेति सत्यवचनेत्यर्थः । एतेनाघोरघण्टकृतो मालत्यपहार इति कामन्दकीवचनं सत्यम् । मालतीमाधवयोश्च विवाहः सत्य इति पश्चाद्भवतार इति सूचितम् । पर्यवष्टम्भनं सर्वतो वेष्टनम् । नेत्यादि । एतत्कर्म मालत्यपहरणात्मकं भीषणं सिंहकौशलहरणात् । अद्भुतं बहुरक्षकरक्षिताया अपि हरणात् । स्त्रीत्वाङ्गत्वेन पलायनेऽद्भुताह । भगवतीति । संमामादपसरणस्याधर्महेतुतया स्त्रियिकतया

---

२१८. सर्वा K1. सर्वाः K2. for सर्व; समाकर्ण° for आकर्ण० B.

२१९. B. N. om. पुनर्नेपथ्ये; K1. om. one भो अन्वेषणतत्पराः B. अन्वेषणपराः Bh. K1. K2. समन्वेषणपराः O. for अन्वेषिणः; N. om. सैनिकाः; पुरुषाः for सैनिकाः Bh. K1. K2. O.; K2. om. इयम्.

२२०. वसुभूतिमा° for भूरिवसुमा° K1.; प्रति° for अप्रति° K1.; अप्रत्यक्षा for अप्रतिहत-गतिः Bh.; प्रतिज्ञा for प्रज्ञागतिः A. B. K1. K2.; N. O. om. प्रज्ञा; B. om. भगवती; N. om. वः.

२२१. समाज्ञापयति for समादिशति D.; Bh. repeats पर्यवष्टभ्यतां; इदं for एतत् O.; Bh. adds कृतं aftre °यतनं; A. B. Bh. C. K1. K2. add कृतम् after °यतनं and make this line the first half of a s'loka. A. Bh. K1. K2. have thus a s'loka and a half, while the second half in B. C. is न करालो°-°भाव्यते and for नाघोर—कृतम् they have कपालकुण्डकापालिको नाघोरघंटादन्यस्यैतत्कर्म भीषणाद्भुतम् which in C. occurs between and in B. after the two halves.

२२२. °दन्यस्मात् for °दन्यस्य N.; भीषणाद्भुतं A. B. C. D. दारुणाद्भुतं O. for दारुणाद्भुतं.

कपा० । भगवन् पर्यवस्थाः स्मः ।

अघोर० । संप्रति विशेषतः पौरुषस्यावसरः । २२५

माल० । हा तात हा भअवदि (क)

माध० । भवतु बान्धवसमाजसुस्थितां मालतीं विधाय तत्समक्षमेनं व्यापादयामि । मालतीमन्यतः प्रेरयन्परिक्रामति ।

माधवाघोरघण्टौ । अन्योन्यमुद्दिश्य । आः पाप २३०

कठोरास्थिग्रन्थिव्यतिकररणत्कारमुखरः
खरस्नायुच्छेदक्षणविहितवेगव्युपरमः ।

(क) हा तात हा भगवति ।

चाह । संप्रतीति । पौरुषं पुरुषस्य व्यापारस्तेजो वा ॥ पौरुषं पुरुषस्योक्तं भावे कर्मणि तेजसीति विश्वः ॥ मालती तत्रावेगातिशयादाह । हा तात हा भगवति इति । मालतीरक्षार्थं कापालिको मया हत इत्यमात्यो जानात्वित्याशयेन मालतीं च कातरां वीक्ष्याह भवत्विति । बान्धवेत्यादिना भाविकार्योपयोग उक्तः । अन्यतः कापालिकादन्यदेशं स्वसंमुखमिति यावत् ।

२३०–२३४ द्वाभ्येकश्लोकेन प्रहारव्यापारमाहतुः । कठोरेत्यादि । हे पाप ममासिः खड्गस्तव प्रत्यङ्गं लवशः खण्डं खण्डं

२२४. B. C. D. K2. have भो before भगवन् .

२२५. हि after संप्रति O.

२२७. N. om. समाज; B. om. सु; संस्थां for सुस्थितां N.; एनां for मालतीं N.; ततः before तत् D.

२२८. एव before एनं Bh. Kl. K2.; दुरात्मानं after एनं A. Bh. D. K1. K2.; A. C. D. add कापालिकं चान्यतः °लिकामन्यतः K1. °लिकमन्यतः K2. °लिकं च B. after अन्यतः.

२३०. °घण्टकौ for °घण्टौ O.; रेरे for आः N.

२३१. °णत्कार for °णत्कार N.; मुखरा for मुखरः B.

२३२. वेग for वेग B.; °शमः for रमः A. B. C. D.

निरातङ्कः पङ्केष्विव पिशितापिण्डेषु विलस-
न्नसिर्गात्रं गात्रं सपदि लवशस्ते विकिरतु ॥

२३५ इति निष्क्रान्ताः सर्वे ।

श्मशानवर्णनं नाम पञ्चमोङ्कः ।

सपदीदानीमेव विक्षिपतु । कर्दमेष्विव मांसपिण्डेषु निरातङ्को यथा-
रुचि विचरन्सन् । कीदृशः । कठिनास्थिग्रन्थिघटनेन यो रणत्का-
रोव्यक्तध्वनिस्तेन मुखरः सशब्दः कठिनस्नायुच्छेदेषु मुहूर्तं कृतवे-
गोपरमश्च ।

कतीह पञ्चमाङ्कके स्फुरन्ति नोद्भटा रसाः।
मदीयबुद्धिरल्पिका क्व वेद तानशेषतः ॥
प्रासोष्ट यं रत्नधरोतिभव्योतिभव्यरूपा दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेङ्कोगमन्मनोहारिणि पञ्चमोयम् ॥

॥ पञ्चमोङ्कः ॥

---

२३३. °तङ्कं for तङ्कः N.; खण्डेषु for पिण्डेषु N.; विसरन् Bh. K2. प (also वि) सरन् K1. निपतन् O. for विलसन्.

२३५. D. om. सर्वे.

२३६. श्रीमालतीमाधवे before श्मशान° K2.; A. B. N. O. om. श्म°-नाम; श्मशानं for श्मशानवर्णनं Bh. K1.; मालतीमाधवे before पञ्च° A.; संपूर्णः after अङ्कः D.

॥ षष्ठोऽङ्कः ॥

ततः प्रविशति कपालकुण्डला ।

कपा० । आः दुरात्मन् मालतीनिमित्तं व्यापादितास्मद्गुरो माधवहतक अहं त्वया तस्मिन्नवसरे निर्दयं निघ्नत्यपि स्त्रीत्यवज्ञाता । सक्रोधम् । तदवश्यमनुभविष्यसि कपालकुण्डलाकोपस्य विजृम्भितम् ।

१–७. संप्रति पूर्वाङ्कवृत्तगुरुवधवर्तमानाङ्कभाविमालतीविवाहभविष्यदङ्कमालतीहरणान्याह । तत इत्यादि । आः पीडायां कोपे च ॥ आस्तु स्यात्कोपपीडयोरित्यमरः ॥ स्त्रीनिमित्तं कापालिकवधेन पापेति। इहानुभविष्यसीत्यनेन क्रमरूपो गर्भसंधिरुक्तः । यदाह ।

भाविनोऽर्थस्य यज्ज्ञानं क्रमः स परिकीर्तितः ॥

दुरात्मन् कामोपहतात्मन् । विजृम्भितं मालत्यपहरणेनेति भावः । तदेवाह । शान्तिरित्यादि । तस्य भुजंगशत्रोः सर्पहिंसकस्य गरुडस्य वा कुतः शान्तिर्निर्वृतिरुपशमो वा । अपि तु नैव । यस्मिन्नत्यक्तकोपातिग्मदन्ताग्रा विषोद्गारेण दुःसहा सर्पी सदैव दंशाय जागर्ति । एव-

---

१. प्रविश्य for ततः प्रविशति N.

२. पाप for आः D.; N. om. माल-त्तं; निमित्त for निमित्तं Bh. K1. K2. O.; निपातिता° C. विनिपातिता° D. N. O. for व्यापादिता°.

३. अहं after अवसरे instead of after हतक O.; च after अहं B; त्वया before स्त्री instead of before तस्मिन् K1.; निघ्नता for निघ्नती C. K1. K2.; N. om. अपि.

४. B. om. सक्रोधम्; फलाङ्कं after अवश्यम् D.; D. om. कोपस्य.

५. कोप for कोपस्य Bh. ; °म्भितं D. °म्भितस्य फलम् N. for म्भितम्.

शान्तिः कुतस्तस्य भुजंगशत्रोर्यस्मिन्नमुष्यानुशया सदैव ।
जागर्ति दंशाय निशातदंष्ट्राकोटिर्विषोद्गारगुरुर्भुजंगी ॥

नेपथ्ये । हे राजानश्चरमवयसामाज्ञया संचरध्वं
कर्तव्येषु श्रवणसुभगं भूमिदेवाः पठन्तु ।
चित्रं नानावचननिवहैश्चेष्टयतां मङ्गलेभ्यः
प्रत्यासन्नस्त्वरयतितरां जन्ययात्राप्रवेशः ॥

कारेण मुहूर्तमात्रमपि न स्वस्थेत्याशयः । अनुशयो गाढरोषः । गरुड-पक्षे तादृशी दंशार्थं जागर्ति । तस्यातिबलत्वान्न तत्करोतीति युक्तमेव ।

८–११. अधुना विवाहमङ्गलकृत्यं दर्शयति । हे राजान इत्यादि । जन्या वरस्य स्निग्धास्तेषां यात्रायाः प्रवेशो वधूगृहप्राप्तिः प्रत्यासन्नः समीपवर्त्यत एवात्यर्थं त्वरयति । ततो भो राजानः क्षत्रियाः विवाहकृत्येषु चरमवयसां वृद्धानामाशया संचरध्वं प्रवर्तध्वम् । विवाहारम्भे वृद्धोपदिष्टमेव कर्मकारैः कर्म क्रियते । इह तु प्रभुतातिशयान्नृपा एव कर्मकारा इति दर्शितम् । भूमिदेवा ब्राह्मणाः कर्णमनोहरं यथा तथा पठन्तु । वैवाहिकमङ्गलवेदानित्यर्थात् । यद्वा । यद्वेदस्वरूपं श्रवणसुभगं मङ्गलत्वात्तत्पठन्त्वित्यर्थः । पुरन्ध्रीर्लक्ष्यीकृत्याह । नानारचनानां मङ्गलादीनां समूहैः करणैश्चित्रमद्भुतं यथा तथा चेष्टयताम् ॥ भ्वादेस्तङ् ॥ यद्वा । चित्रं नाना कर्म । केचिन्मङ्गलगीतं केचिद्वाद्यं केचिन्नृत्यं कुर्वन्त्वित्यर्थः । मङ्गलेभ्यो मङ्गलं कर्तुम् ॥ क्रियार्थोपपदस्येति चतुर्थी । तादर्थ्ये वा । संचरध्वमिति समस्तृतीयायुक्तादिति तङ् ॥ व-

---

६. यदैव B. भुजंगी Bh. for सदैव.

७. वक्रोद्यतघोर for दंशाय निशात O.; निजो° for विषो° K1.

८. भो for हे A. B. C. D.

१०. Lacuna for नानावचन in Bh.; रचन for वचन A. D. K2.; विविधै: B. विभव: O. for निवहै: ; चेटतां for चेष्टयतां B. Bh. O. K1. K2. O.

यावत्संबन्धिनो न परापतन्ति तावदुत्सया मालत्या नगरदेवतागृहमविघ्नमङ्गलाय गन्तव्यमित्यादिशन्ति भगवतीनिदेशवर्तिनोमात्यदाराः। अन्यच्च यथा गृहीतसविशेषमण्डनः प्रतीक्ष्यतामानुयात्रिको जनः।

१५

कपा०। भवत्विती मालतीविवाहकर्मसत्वरप्रतीहारशतसंकुलात्प्रदेशादपक्रम्य माधवापकारं प्रत्यभिनिविष्टा भवामि। इति निष्क्रान्ता। विष्कम्भकः।

रास्निग्धेपि जन्यः स्यादिति मेदिनीकरः॥ एतेन चोरिकाविवाहमङ्गलमपि ध्वनिनोक्तम्।

१२-१८. संबन्धिनो वरस्य भ्रात्रादयः। पित्रादीनां नन्दने वृद्धेसंभवादिति। परापतन्त्यायान्ति। आविघ्नेति माधवविवाहायेति भावः। नन्दनविवाहस्य विघ्नवत्त्वात्। निदेश आज्ञा। अमात्यो भूरिवसुः। दाराः स्त्रियः। अनुयात्रानुगमनं तत्र नियुक्त आनुयात्रिको मालत्यनुगामी। कामन्दकीनामभ्रवणभीता निष्क्रमणार्थमाह। भवत्विति। परिकर्मेतिकर्तव्यता। अपक्रम्येति। [अ]मङ्गलवेशतयान्येनापि संभावितनिःसारणा यत इति भावः। माधवापकारमित्यनेनाष्टमाङ्कं सूचयन्ती विघ्नमुद्द्योतयति। अभिनिविष्टा बद्धकक्षा।

---

१३. च after यावत् Bh. C. K2. N. O.; आयांति for परापतन्ति Bh. K1., वत्साया for वत्सया D. O.; सह after मालत्या A. B. K1. K2.

१४. प्रवेष्टव्यम् for गन्तव्यम् K2.; आदिशति भगवती कामन्दकी N. आदिशति; भगवती O. for आदिश०-दाराः; नो after °शन्ति C.; Bh. om. भगवतीनिदेशवर्ति°.

१४. A. Bh. D. K1. K2. om. अन्यच्च; तत् Bh. K1. K2. तथा C. तदा D. for यथा; N. O. om. यथा; संगृहीत for गृहीत Bh. K1.; विशेष for सविशेष B. C. D.; प्रतीक्षतां A. N.O. प्रतिष्ठतां Bh. for प्रतीक्ष्यताम्.

१५. अनु for आनु° Bh. K2.; इति after जनः K1. K2. O.

१६. N. om. भवतु; O. om. इतो; N. om. मालती; परिकर्म for कर्म A. K2. N.; D. om. कर्म; D. O. om. शत; व्याकुलं for संकुलात् O.

१७. अस्मात् after संकुलात् A. D.; देशमुत्सृज्य for प्रदेशादपक्रम्य O.; अहमपि before माधवा° O.; कार for कारं Bh.; N. om. इति.

१८. च्च before विष्क° N.; विष्कंभः for विष्कम्भकः N.

ततः प्रविशति कलहंसकः ।

कल० । आणत्तोम्हि णअरदेवदागब्भघरट्ठिदेण समअरन्देण णाहमाहवेण जहा जाणाहि दाव जत्ताहिमुहं पउत्ता मालदी ण वेत्ति । ता जाव णं आणन्दइस्सं । [क]

ततः प्रविशतो माधवमकरन्दौ ।

माध० । मालत्याः प्रथमावलोकदिवसादारभ्य विस्तारिणो
भूयःस्नेहविचेष्टितैर्मृगदृशो नीतस्य कोटिं पराम् ।

(क) आज्ञप्तोस्मि नगरदेवतागर्भगृहस्थितेन समकरन्देन नाथमाधवेन यथा जानीहि तावद्यात्राभिमुखं प्रवृत्ता मालती न वेति। तद्यावदेनमानन्दयिष्यामि ।

१९–२७. हे राजान इत्यादौ श्लेषेण चोरिकाविवाहस्याप्यभिधानाज्जन्यपदेन माधवपरिजनतया कलहंसस्यापि वचनात्तत्प्रवेशमाह । प्राविदेयेति । गर्भगृहवर्तित्वेन माधवस्य गुप्तत्वम् । राजविरुद्धचोरिकाविवाहस्य दुष्करतया कामन्दकीप्रतिज्ञासत्यत्वेन च संदिहानाह । मालत्या इत्यादि । ममास्य विप्रलम्भजक्लेशस्य सर्वथोभयप्रकारेण निश्चितमध्यान्तः समाप्तिः । कीदृशस्य । मृगदृशो मालत्याः प्रचुरप्रेम्णा यानि विचेष्टितानि तैः परां कोटिं प्रकर्षकाष्ठां प्रापितस्य । आद-

१९. प्रविश्य for ततः प्रविशति N. O.; °हंसः for °हंसकः N.

२०. O. om. कल° । आणत्तोम्हि D. N. आण्णत्तोम्हि K2. for आणत्तोम्हि; O. om. णअर; देवता for देवदा K2.; O. om. गब्भ; गब्व for गब्भ K1.; हर for घर C.; त्थिदेण A. K2. ट्ठिद B. C. ट्ठिअ Bh. त्थिअ K1. वट्टिणा N. ट्ठिय O. for ट्ठिदेण; माहवसआसवट्टिणा मअरन्देण B. Bh. (with त्ति for ट्ठि) C. माहवपासवचिणा मअरन्देण K1. माहवसयासवत्तिणा मयरंदेण O. for समअ–°देण; णाहेण for णाहमाहवेण N.

२१. N. om. जहा; जधा for जहा B. O.; जणीहि K2. जाणेहि O. for जाणाहि; N. om. दाव; जत्ताभुहं A. K1. एत्तोभिमुहं K2. एत्तोमुहं N. इदोमुहं O. for जत्ताहिमुहं; मालती for मालदी Bh.; न for ण O.

२२. वेत्ति for वेत्ति Bh.; N. om. ता; तज्जाव for ता जाव O. Bh. K1. om. णं; णंदइस्सं Bh. णन्दइस्सं K1. णन्दयिस्सं K2. आणंदयिस्सं O. for आणन्दइस्सं.

२४. °लोकनदिना° for °लोकदिवसा° A. Bh. K1. K2.; विस्तारिणो A. विस्तारिणि O. for विस्तारिणो.

२५. °दशा for °दशो D.

अद्यान्तः खलु सर्वथास्य मदनायासप्रबन्धस्य मे
कल्याणं विदधातु वा भगवतीनीतिर्विपर्येतु वा ॥

मक० । वयस्य कथं भगवत्याः सुमेधसो नीतिर्विपर्येष्यति ।

कल० । उपसृत्य । णाह दिट्ठिआ वड्ढसि पउत्ता क्खु एत्तो मुहं मालदित्ति । (क)

माध० । अपि नाम सत्यम् ।

(क) नाथ दिष्ट्या वर्धसे प्रवृत्ता खल्वितोमुखं मालतीति ।

शैनदिनादारभ्य विस्तारं गतैः । तत्र प्रथमे बकुलवीथिचेष्टाभिर्द्वितीये माधवचित्रावलोकनादिना तृतीये स्वप्नोपभोगवर्णनादिना चतुर्थे मोहनाशककरस्पर्शादिना पञ्चमे भयकम्पिताङ्कालिङ्गनादिना विस्तार इति भावः । पर्यवसानमाह । भगवतीनीतिः कामन्दकीप्रेषितार्थदूतीकल्पः कल्याणं शुभं मालतीविवाहलक्षणं वा करोतु विपर्येतु विफला वा भवतु । तथा च विवाहे सति शृङ्गारसंभोगलाभेन कामायासशान्तिः । विपर्यये मरणादिति भावः ।

२८–३७. सुमेधसः सुबुद्धेः । विपर्येष्यति विपर्ययमेष्यति । [कल० वा०] अत्र यात्रा गमनम् । तस्य मुखमारम्भम् तद्वाक्यस्याश्वासपरत्वं तर्कयन्नाह । अपीति । अपि नामेति संभावनायाम् । अस्माकमित्यादि । वातविस्तारिमेघसमूहशब्दिततुल्यो ग-

२६. °यासस्य मे सर्वतः for यास—मे O.

२७. °धातु मे for °धातु वा B. K1.

२८. Bh. om. मक०—सत्यम् (l. 31); हि after कथं A. B. K1. K2. O.; सुमेधायाः for सुमेधसो N.; शक्तिः for नीतिः N.

२९. णाध for णाह O.; माहव for णाह K1.; माहव after णाह A.; दिट्ठिया for दिट्ठिआ K1. O.; वड्ढसि for वड्ढासि K2. पउत्ता for पउत्ता O.; हि C.K1. खु K2. O. for क्खु; जत्तामुहं A. एत्तोहिमुहं B. C. जत्ताहिमुहं Bh. D. एत्तोभिमुहं K2. for जत्तामुहं.

३०. N. om. पि.

३१. N. O. om. नाम; एतत् after सत्यम् N.

मक० । सखे किमश्रद्दधानः पृच्छसि । न केवलं प्रवृत्ता प्रत्यासन्ना च वर्तते । तथा हि ।

अस्माकमेकपद एव मरुद्विकीर्ण-
जीमूतजालरसितानुकृतिर्निनादः ।
गम्भीरमङ्गलमृदङ्गसहस्रजन्मा
शब्दान्तरग्रहणशक्तिमपाकरोति ॥

तदेहि जालमार्गेण पश्यामः । तथा कुर्वन्ति ।

कल० । णाह पेक्ख पेक्ख । इमे दाव उप्पडिआराअहंसविब्भ-
माहिरामचामरसमीरणोव्वेल्लकदलिआवलीतरंगिदुत्ताणगअण-

म्भीरमङ्गलार्थमुरजसहस्रजन्मा शब्द एकपदं एकस्मिन्क्षणेस्माकं शब्दान्तरग्रहणसामर्थ्यं निराकरोति । वाद्यरवेणान्यशब्दो न श्रूयत इत्यर्थः । सहस्रग्रहणमनेकोपलक्षणम् । सहस्रपत्रवत् ।

३९–४७. माधवोत्साहार्थमाह नाथेति । अत्र उत्पतिन उड्डीनः । विभ्रमो विलासो विशिष्टभ्रमणं वा । अभिरामस्तुल्यः । उद्वेल्लन्कम्पमानः । कदलिका पताका । तरंगितं तरंगयुक्तम् । उत्तानमग-

---

३२. B. om. सखे; इव A. Bh. K1. K2. एव O. after दधानः; निगैता for प्रवृत्ता C.

३३. अपि for च D.

३४. °पदमेव for °पद एव A. K1. K2.; एवमनुद्वि° for एव मरुद्वि° Bh.; विदीर्ण for विकीर्ण C.

३५. निनदा° for रसिता° D.

३७. श्रवण for ग्रहण N.

३८. पश्याव C. K1. O. पविश्याव: K2. for पश्यामः; हि K1. कुरुतः O. for कुर्वन्ति.

३९. णाह for णाह O.; पेक्खस्स for पेक्ख पेक्ख A.; इदो for इमे K1. K2.; अ after इमे A.; उप्फ° for उप्प° Bh; °डिद for °डिअ Bh. D. O.; रासमंडली C. राजहंस O. for राअहंस.

४०. °भिराम for °हिराम B. Bh. C. K1. K2. N. O.; °ओव्वे Bh. °ओव्वेल K1. °ओव्विल K2. °णुव्वेल्लिअ N. °णुव्वेल्ल O. for °ओव्वेल्ल; कअलीआ° B. C. कअलिआ° N. for कदलिआ°; °दुत्ताल A. दत्ताण D. N. for °दुत्ताण; गण for ग-अणङ्गण D.

ङ्गणसरोवरनिरन्तरुद्दण्डपुण्डरीअविब्भमं वहन्तो धवलादवत्त-
णिवहा दीसन्ति । इमाओ सविलासकवलिदतम्बूलवीडिआ-
पूरिदकवोलमण्डलाभोअव्वइअरक्खलिदमहुरमङ्गलुग्गीअबद्ध-
कोलाहलेहिं विविहरअणालंकारकिरणावलीविडम्बिदमहिन्द-
चावखण्डविच्छेदविच्छुरिदणहत्थलेहिं वारसुन्दरीकदम्बेहिं अ- ४५

(क) नाथ प्रेक्षस्व प्रेक्षस्व* । इमे तावदुत्पतितराजहंसविभ्रमाभि-
रामचामरसभीरणोद्देलकदलिकाबलीतरंगितोत्तानगगनाङ्गनसरोवर-
निरन्तरोद्दण्डपुण्डरीकविभ्रमं वहन्तो धवलातपत्रनिवहा दृश्यन्ते ।

भीरम् । गमनमेव सरः । उद्दण्डमुद्गतदण्डम् । आतपत्रं छत्रम् । मङ्गलातपत्रमिति पाठे विवाहे शुक्लच्छत्रस्य प्रशस्तता मङ्गलपदेन श्वेतत्वमुक्तम् । एताः करिण्यश्च दृश्यन्त इत्यन्वयः । चकारोऽध्याहर्तव्यः । चर्वितं भक्षितम् । व्यतिकरः संघट्टः । स्खलितं भङ्गिमत् । मङ्गलोद्गीतं मङ्गलरूपमुच्चैर्गानम् । विडम्बितं सदृशीकृतम् ।

४१. सरोअर A. सरो Bh. N. O. for सरोवर; णिरंत° for निरन्त° Bh. K2. O. वहन्तो B. D. उव्वहन्तो K2. वहंति O. for वहन्तो; मंगल before धव° N.; मंगला. for धवला° O.; °लातपत्त C. °लातवत्त N. for °लादवत्त.

४२. °संदि for सन्ति D.; एदा अ for इमाओ A.; Bh. C. K1. K2. N. O. om. इमाओ; दलिद Bh. K2. चव्विद D. दलिअ K1. कवलिअन्ती N. for कवलिद तम्बोल A. B. Bh. C. O. तंबोली K1. for तम्बूल; वीटिआ A. C. K1. वेडिआ B. आपीड O. for वीडिआ; N. om. वीडिआ.

४३. पूरिअ for पूरिद A. N.; कपोल for कवोल K2.; भोग for भोअ N.; D. om. व्वइअर; वइअर Bh. K2. वइअरु K1. वयिअर O. for व्वइअर; स्खलिअ for क्खलिद N.; मधुर K1. मुहु K2. for महुर; °ग्गीद for °ग्गीअ A. Bh. K1. K2. O.; N. om. बद्ध; वद्ध for बद्ध Bh.

४४. °काल for °कार O.; ° डम्बिअ for °डम्बिद C. D. N.

४५. चाव for चाव K2.; खंड for खण्ड Bh.; C. D. om. खण्ड; विच्छेअ A. K1. K2. विछेअ Bh. for विच्छेद; विछु° for विच्छु° Bh.; °रिअ for °रिद A. K1.; णहत्थलेहिं B. णहगणेहिं C. णहथलेहिं K1. णहअणेहिं K2. for णहत्थलेहिं; °म्बणेहिं K1. K2. °म्बणेहिं O. for °म्बेहिं.

* पश्य पश्य Com.

ज्झासिआ ओकणन्तकणआकिङ्किणीजालझणझणझंकारिणीओ करिणीओ। (क) माधवमकरन्दौ सकौतुकं पश्यतः।

मक०। स्पृहणीयाः खल्वमात्यभूरिवसोर्विभूतयः। तथा हि।

प्रेङ्खद्भूरिमयूखमेचकचयैरुन्मेषिचाषच्छद-
च्छायासंवलितैर्विवर्तितभिरिव प्रान्तेषु पर्यावृताः।
व्यक्ताखण्डलकार्मुका इव भवन्त्युच्चित्रचीनांशुक-
प्रस्तारस्थगिता इवोन्मुखमणिज्योतिर्वितानैर्दिशः॥

इयाः*सविलासकवलित†ताम्बूलवीटिकापूरित‡कपोलमण्डलाभोगव्यतिकरस्खलितमधुरमङ्कुलोद्गीतबद्धकोलाहलैर्विविधरत्नालंकारकिरणावलीविडम्बितमहेन्द्रचापखण्ड§ विच्छेदविच्छुरितनभःस्थलैर्वारसुन्दरीकदम्बैरध्यासिता¶ उत्कणत्कनककिङ्किणीजालझणझणंकारिण्यः करिण्यः।

विच्छेदः खण्डः। विच्छुरितं व्याप्तम्। झणझणारूपो झंकारशब्दः।

४९-५२. प्रेङ्खदित्यादि। तरणिकिरणसंपर्कादूर्ध्वमुखैर्मणिवीथीसंधैर्विवर्तितभिरितस्ततो गतैः प्रान्तेषु निकटेषु पर्यावृता व्याप्ता इव दिशो व्यक्तेन्द्रचापा इव भवन्ति। कीदृशैः। प्रेङ्खन्त इतस्ततश्चलन्तो भूरीणां सुवर्णानां मयूखाः किरणा यत्र तादृशो मेचकः स्निग्धश्चयो येषु तैः। मयूरमेचकनिभैरिति पाठे प्रेङ्खदित्यन्यो बहुमयूरस्तस्य मेचकाश्चन्द्रकास्तिरतिशया भा येषां तैः॥ मेचकश्चन्द्रके स्निग्धे श्यामलेपि च दृश्यत इति विश्वः। भूरि क्लीबं सुवर्णे च प्राज्ये स्यात्ति-

---

४६. असिदा Bh. अइझसिआ K1. अज्झसिदा K2. अज्झासिदा N. O. for अज्झासिआ; कणन्त A. K1. N. ओकणंत Bh. K2. for ओकणन्त; किकणी for किङ्किणी O.; N. om. जाल; रणिद after जाल O.; झलझणा Bh. झणझणा D. N. for झणझण; झणझणाओ for झणझणझंकारिणीओ K1. K2.; इंकारि° for झंकारि C.

४७. तौ for मा—न्दौ O.; °तुकौ for °तुकं O.

४८. सस्पृहं after मक०। D.; रमणीयाः for स्पृहणीयाः A. Bh. D. K1. K2.

४९. मयूर A. N. मयूख Bh. for मयूख; निभैः for चयैः K2. N.; चाप for चाष A.

* एताश्च Com. † चर्वित for कवलित Com. ‡ तंबूलावलिपूरित Com. § Com. om. खण्ड ¶ झणत्कनक Com.

अल०। कधं ससंभमाणेकपडिहारमण्डलावज्जिदुज्जलकण-
अकलहौअवत्तविचित्तवेत्तलदापरिक्खित्तरेहारइदमण्डलो दूरदो
जेव्व संट्ठिदो परिअणो । एसा अ बहलसिन्दूरणिभरसंज्झा- ५५
राओवरत्तमुहघोलन्तकन्तणक्खत्तमालाभरणधारिणिं करेणुर-

(क) कथं ससंभ्रमानेकप्रतिहारमण्डलावर्जितोज्ज्वलकनककलधौत-
पक्षविचित्रवेत्रलतापरिक्षिप्तरेखारचितमण्डलो दूरत एव संस्थितः

च्यलिङ्क इति मेदिनीकरः ॥ उन्मेष्युडुनो यथाषः पक्षिभेदस्तस्य च्छदच्छायया पक्षकान्त्या संवलितैरिव मिलितैः । कीदृशः । उद्गतचित्रस्य चीनदेशभवस्य वस्त्रस्य प्रस्तारेण शय्यया प्रसारेण वाच्छन्ना इव ॥ प्रस्तारस्तानितं शय्येति हारावली ॥ मणय इहाभरणस्थरत्नानि ।

५३–५९. अत्रावर्जिता तिर्यक्त्यक्ता । कनकं हिरण्यम् । कलधौतं रजतम् ॥ कलधौतं हेमरौप्ययोरिति विश्वः ॥ पङ्केन लेपेन । वेत्रलता वेत्रदण्डिका । परिक्षिप्ता रचिता । मण्डल इति । अस्मान्मण्डलात्केनापि न बहिर्गन्तव्यमिति भावः । दूरत एव मालत्या इत्यर्थात् । पृथुसिन्दूरपूर

५३. कहं for कधं K1. K2. N.; ससभ° for ससंभ° K1; °णेअ for °णेक्क B. Bh. K1. K2. N.; मंगला° for मण्डला° O.; °दोज्जल Bh. K2. °दाज्जलं K1. °दुज्जलन्त N. for °दुज्जल; कणअ for कणअ Bh.; C. K2. O. om. कणअ.

५४. धौद B. धोअ Bh. O. धौअ K1. K2. N. for हौअ; पङ्कु A. D. K1, K2. टंकवत्त Bh. पंकपत्त O. for वत्त; N. om. वत्त; Bh. om. विचित्तवेत्त; चित्त for विचित्त C. N. O.; लआ for लदा Bh., खद्द B. खिवत्त K1. for खित्त; इद Bh. रइअअ N. for रइद; K1. om. रइद; दूरादो for दूरदो. N.

५५. N. om. जेव्व; B. Bh. C. K1. have से after जेव्व; संथिदो Bh. संठिदो K1.for संट्ठिदो; O. om. अ; B. om. बहल; बहुल for बहल N.; णिकर for णिअर Bh.; संझा for संज्झा Bh. O.

५६. राणी° for राओ° K2.; °परत्त Bh. D. K1. K2. N. °अरत्त O.for °वरत्त; चडुल after °रत्त A. D.; B. D. om. मुह; मुहं for मुह C.; ग्वालंत for घोलन्त Bh.; कणन्त Bh. K1. कणअ C. for कन्त; O. om. कन्त; णक्खेत्त for णक्खत्त K1.; °हरण for °भरण B.; धार after °रण Bh., °रिणीं A. C. D. N. °रणि Bh. K1. K2. for °रिणि; रजणिं for रअणिं D.

* पङ्कु for पम्र Com.

अणि अलंकरन्ती इदो जेव्व कोदूहलुम्मुहसमत्थलोअदीसन्त-मणुहरा पण्डुरपरिक्खामदेहसोहा पढमचन्दलेहाविब्भमं वह-न्ती किंचि अन्तरं पसरिदा मालदी। (क)

परिजनः। एषा च बहलसिन्दूरनिकरसंध्यारागो*परक्तमुखघूर्ण-त्कान्तनक्षत्रमालाभरणधारिणीं करेणुरजनीमलंकुर्वतीत एव कौतूह-लोन्मुखसमस्तलोकदृश्यमानमनोहरा पाण्डुरपरिक्षामदेहशोभा प्रथ-मचन्द्रलेखाविभ्रमं वहन्ती किंचिदन्तरं प्रसृता मालती।

एव संध्यारागस्तेनोपरक्ता किंचिदारक्ता चटुला चपला घूर्णती लम्बमा-ना या नक्षत्रमाला सप्तविंशतिमौक्तिकमाला हस्तिप्रसाधनभेदो वा सैवा-भरणं तद्धारिणीम्। रात्रिपक्षे नक्षत्रमाला तारकामाला। करेणुर्हस्तिनी सैव रात्रिस्ताम्। दृश्यमाना चासौ मनोहरा चेति समासः। पाण्डुरा धूसरा परिक्षामातिकृशाङ्गदीप्तिर्यस्याः सा। एतेन चन्द्रकलासाम्यमु क्तम्। दृश्यमानेत्यनेनान्येषां दर्शनमात्रं तव परमुपभोगो मालत्या इति सूचितम्। पाण्डुरेत्यादिना मालत्यामान्तर उद्वेग उक्तः। किंचिदन्तरं कियद्दूरम्। प्रसृतागता कलधौतटङ्कपत्रेति पाठे टङ्कपत्रं पट्टिकेत्यर्थः।

---

५७. °रेन्ती Bh. °रोन्ति D. °रन्दी K1. K2. for °रन्ती; हलोम्मुह Bh. K1. °हलो-म्मुह K2. °हलुप्फुलमुह N. °हलुफलमुह O. for हलुम्मुह; समच्छ A. समत्थ K1. स-मत्त K2. N. समूह O. for समत्थ.

५८. मणहरा Bh. K1. N. O. मणोहरा K2. for मणुहरा; पाण्डुर A. Bh. K1. K2. पंडु O. for पण्डुर; क्खम for क्खाम A.; देहा for सोहा Bh.; विभाविआणंगवेअ-णा after सोहा N.; पुढम N. प्पढम O.; पढमुग्गअचन्द B. C.; अन्द for चन्द A. C.

५९. हसंती for वहन्ती O.; किंचिद् Bh. K1. किं पि B. किं वि C. O., for किं चि; दूरं for अन्तरं B.; परिसरिदा K2. पाविदा N. प्पसरिदा O. for पसरिदा; मालदिचि for मालदी Bh. K1. O.

* रागोपरक्तचटुलघूर्णत. Com.

मक० । वयस्य पश्य पश्य ६०

इयमवयवैः पाण्डुक्षामैरलंकृतमण्डना
कलितकुसुमा बालेवान्तर्लता परिशोषिणी ।
वहति च वरारोहा रम्यां विवाहमहोत्सव-
श्रियमुदधिनीमुद्गाढां च व्यनक्ति मनोरुजम् ॥

कथं निषादिता गजवधूः । ६५

माध० । सानन्दम् । कथमवतीर्य भगवतीलवङ्गिकाभ्यां समन्वितः प्रवृत्तैव ।

६१-६५. इयमित्यादि । इयं वरारोहा प्रशस्तश्रोणिका विवाहमहोत्सवसंपत्तिं प्रकृष्टां रम्यां च वहति सहजरमणीयत्वात् । उद्गाढां प्रबलां चित्तपीडां च प्रकाशयति । कीदृशी । पाण्डुक्षामैरङ्गैरलंकृतभूषणा । अतिरम्यतयामीभिरेव भूषणान्यलंक्रियन्त इति भावः । अन्तरभ्यन्तरे परिशोषिणी । अत एवाङ्गानां पाण्डुक्षामत्वम् । कलितं परिहितं कुसुमं यया सा । बाला षोडशवर्षवयस्का । अवयवैरित्यनेन सर्वाङ्गीणं पाण्डुत्वायुक्तम् । लतेव । यथा लता नवा वसन्तादिप्रभावात्सपुष्पापि कुतश्चिद्धेतोरन्तःपरिशोषं वहति तथेयमपीत्यर्थः । निषादिता उपवेशिता । अवतारणार्थमिदम् ।

---

६०. K1. K2. om. one पश्य.

६१. क्षामै° for क्षामै° B.; मण्डला for मण्डना D.

६२. °कुमा बालेवान्तर् B. °सुमजातेवान्तर् Bh. °सुमजातेवान्तर् O. for °सु-न्तर्.

६३. वहति for वहति K1.; रम्या for रम्यां B.

६४. उद्गूता for उद्गाढां N.

६५. Bh. om. कथं-धूः

६६. Bh. om. सानन्दं; मालती before लव° B. C. K1. K2.; Bh. K1. om. समम्; सहिता for समम् B.

६७. एव after इतः instead of after प्रवृत्ता B. C.

ततः प्रविशति कामन्दकी मालती लवङ्गिका च ।

काम० । सहर्षमपवार्य ।

विधाता भद्रं नो वितरतु मनोज्ञाय विधये
विधेयासुर्देवाः परमरमणीयां परिणतिम् ।
कृतार्था भूयासं प्रियसुहृदपत्योपयमने
प्रयत्नः कृत्स्नोयं फलतु शिवतातिश्च भवतु ॥

६९-७५ सहर्षमित्यभीष्टसंपादनादिति भावः । विधातेत्यादि । नोस्माकं मनोज्ञाय हृदिस्थाय विधये व्यापाराय प्रकृतविवाहाय भद्रं कुशलमविघ्नं विधाता ददातु ॥ विधय इत्यत्र तादर्थ्ये चतुर्थी । क्रियार्थोपपदस्येति वा ॥ वृत्तेपि कार्ये राजविरोधादनिष्टमाशङ्क्याह । परमरमणीयामविरोधिनीं परिणतिमुत्तरविशुद्धिं देवाः कुर्वन्तु । स्वस्यापि फलमाह । अहं कृतकृत्या भूयासम् । यतो मालतीमाधवयोर्विवाहे समस्तोयं प्रयत्नः फलतु । उत्तरकालशुद्ध्या फलदायी भवत्विित्यर्थः । परिणतिशुद्ध्या शिवदायी भवतु । कल्याणकरोस्त्वित्यर्थः । शिवतातिश्च भवत्विति पाठे शिवतातिः शिवकरः ॥ सर्वदेवात्तातिलित्यनुवर्तमाने शिवशमरिष्टस्य कर इति तातिल् ॥ अत्र मरणमेव सर्वदुःखनाशकतया निर्वाणं मोक्षस्तस्यान्तरमवसरः । यद्वा । मरणमेव निर्वाणं निर्वृतिः सुखम् ॥ निर्वाणं निर्वृतौ मोक्ष

६८. °शान्ति for शाति B.; ताः for काम—च B.; लवङ्गिकामालती for मा—का K1. K2.

६९. Bh. om. काम°; D. om. सह°—र्यं; आत्मगतं for अपवार्य Bh. K1. K2.

७०. नो भद्रं for भद्रं नो Bh. K1. K2.

७२. कृतार्थां for कृतार्था A. Bh. D.; सुहृदमात्योपयमने K2. सुहृदि यत्नैरभिमतः N. for सु—मने.

७३. प्रयासः for प्रयत्नः Bh.; द्यायी for तातिः A.

माल० । स्वगतम् । केण उण उवाएण संपदं मरणणिव्वाणस्स अन्तरं संभावइस्सं । मरणंपि मन्दभाअधेआणं अहिमदं त्ति७५ दुल्लहं होदि । (क)

लव० । स्वगतम् । अदिकिलम्मिदा क्खु पिअसही एदिणा अणुऊलविप्पलम्भेण । (ख)

प्रविश्य पेट्टालकहस्ता प्रतीहारी । भअवदि अमच्चो भणादि

(क) केन पुनरुपायेन सांप्रतं मरणनिर्वाणस्यान्तरं संभावयिष्ये । मरणमपि मन्दभागधेयानामभिमतमिति दुर्लभं भवति ।

(ख) अतिक्रामिता खलु प्रियसख्येतेनानुकूलविप्रलम्भेन ।

इति विश्वः । अन्तरमवसराध्यात्मसदृशेष्विति मेदिनीकरः ॥ संभावयिष्ये सम्यक्प्राप्स्यामि ॥ भू प्राप्तावित्यस्यात्मनेपदिनो रूपम् ॥ साँप्रतमित्यनेन माधवालाभान्नन्दनलाभविलम्बनाचेति दर्शितम् । मन्दभाग्यतया माधवप्राप्तिवन्मरणमपि न स्यादिति भावः ।

७७–९१. अत्र क्लामिता क्लमं श्रमं प्रापिता । अनुकूलेन माधवेन सह विप्रलम्भो विरहस्तेन । यद्वा । अनुकूलो नन्दनस्तस्य विप्रलम्भेन

७४. B. om. स्वगतं; N. O. om. उण; अन्तरेण B. उवायेण O. for उवाएण.

७५. अन्दरं for अन्तरं B.; °वयिस्सं for °वइस्सं K2. O.; वि for पि A. C. D. N.; भाग° for भाअ° O.; °हेआणं A. धेयाणां K1. °हेआए N. °धेयाणं O. for °धेआणं; O. om. अहिमदं त्ति; अभि° for अहि° Bh. K1.; ति for त्ति K1. K2.

७६. सु before दुल्ल° A.

७७. अति for अदि A. C.; किलमिदा B. किलामिदा Bh. K2. O. किलम्मदि K1. for किलम्मिदा; N. om. क्खु; खु for क्खु Bh. K1. K2. O.; प्रिय for पिअ°. O.; B. om. एदिणा; एदेण for एदिणा N.

७८. कूल for °ऊल Bh. C. D. K2. O.; विप for विप्प K2.

७९. पेटक A. D. K2. पिट्टालक Bh. पीटलक K1. पेटालक O. for पेट्टालक; प्रतीहारी twice Bh. K1. K2.; अमच्चो भअवदीं A. D. अमच्चो भअवदि Bh. K2. (K2. छायाः —°वर्ती); अमच्चो भअवदि K1. अमच्चो भयवदिं O. for भअ°—°च्चो; विण्णवेदि for भणादि A. K1. K2.

:० एदिणा णरिन्दाणुप्पेसिदेण विवाहणेवच्छेण देवदापुरदो अत्तं-
करिदव्वा मालदित्ति । (ग)

काम० । युक्तमाहामात्यः । माङ्गलिकं तत्स्थानमतो दर्शय ।

प्रती० । एदं दाव धवलपट्टंसुअचोलअं एदं च उत्तरीअं रत्त-
वण्णंसुअं इमे अ सव्वङ्गिआ आहरणसंजोआ अअं च मोत्ति-

(ग) *भगवति अमात्यो भणत्येतेन नरेन्द्रानुप्रेषितेन विवाहनेप-
थ्येन देवतापुरतोलंकर्तव्या मालतीति ।

(क) एतत्तावद्धवलपट्टांशुकचोलकमेतद्धोत्तरीयं †रक्तवर्णांशुक-

वञ्चनया । पेटकं मञ्जूषा ॥ पेटकं पुस्तकादीनां मञ्जूषायां कदम्बक
इति मेदिनीकरः ॥ पेटकग्रहणं तु नन्दनप्रसाधनार्थम् । [प्रती० वा०]
अत्र नेपथ्यं प्रसाधनम् । युक्तमिति । एतत्प्रसाधनेन मकरन्दमलंकृत्य
मदयन्तिकां विवाहयिष्यामीति भावः । माङ्गलिकं मङ्गलहेतुः । अत्र
धवलं यत्पट्टसूत्रमयमंशुकं तेन निर्मितश्चोलकः कूर्पासकः ॥ चोलः
कूर्पासकोस्त्रियामित्यमरः ॥ उत्तरीयरूपं रक्तांशुकं सिन्दूरीवस्त्रम् ॥

---

८०. एदेण for एदिणा N ; णरेन्दा° B. N. णरिंदा° Bh. णरिंद O. णलिन्द्रा° A. C D. for णरिन्दा°; प्पेसि° for °णुप्पेसि° O.; विआह for विवाह Bh. K1. K2.; णेपछेण Bh. णेवत्थेण B. C. णेपत्थेण K1. णेपेत्तणे K2. for णेवत्थेण.

८१. °कारि for °करि; °दीत्ति D. दिति K2. for दित्ति.

८२. N. om. अमात्यः; हि after °लिकं K2.; एतत् for तत् A. Bh. K1. K2.; इतो D. N. यतो O. for अतो.

८३. इदं A. B. एवं K1. O. for एदं; Bh. K1. om. दाव; धवलं for धवल K2. वट्टसुअ A. पट्टांसुअं D. N. पट्टांसुअं K1. पट्टसु K2. पट्टांसुय O. for पट्टंसुअ; चोलअं A. D. चेलअं Bh. जुयलं O. for चोलअं; N. om. चोलअं; अ for च Bh. K1. K2. N.; K2. om. उत्तरीअं; रीअ K1. N. रीयं O. for रीअं; N. om. रत्त; रत्तंसुअं B. K2. चेलअं Bh K1. for र-अं.

८४. सव्वाङ्गिआ K2. सव्वंगिक O. for सव्वङ्गिआ; आभरण Bh.N. °हरण C. °भरण K1. K2. रयण O. for आहरण; संयोआ K1. संयोया O. for संजोआ; O. om. अअं च; इमे Bh. K1. N. मे K2.; for अअं; अ for च Bh. K. K2. N.

* Com. with A. D. † Com. om. वर्ण.

आहारो चन्दणं सिदकुसुमापीडो अ । (क) ८५

काम० । अपवार्य । रमणीयं हि वत्सममरन्दमवलोकयिष्यति मदयन्तिका । प्रकाशम् । गृहीत्वा । भवत्वेवमित्युच्यताममात्यः ।

प्रती० । तथा । इति निष्क्रान्ता ।

काम० । लवङ्गिके प्रविश त्वमभ्यन्तरं वत्सया सह ।

लव० । अध भअवदी उण कहिं । (ख) ९०

---

* मिमे च सर्वाङ्गिका आभरणसंयोगा † अयं च मुक्तिकाहारश्चन्दनं ‡ सितकुसुमापीडश्च ।

(ख) अथ भगवती पुनः क ।

आपीडः शेखरोक्तियामिति मेदिनीकरः ॥ भवतीति संबोधनम् । गुरुसमक्षं मालत्यनुरागानुभवो माधवस्य न स्यादत उक्तं प्रविश त्वमिति । विविक्ते विजने ।

---

८५. मुत्तिया K1. मुत्तिआ K2. मोत्तिअ N. मोत्तिय O. for मोत्तिआ; हारा for हारो Bh. K1. K2. N.; एदं before चन्दणं A. Bh. D. K1. K2 N.; एस च D. K2. एदं N. before सिद; सिर Bh. K1. सित D. N. O. °पीडं Bh. K1. K2. N. °वीडो O. for °पीडो; त्ति for अ N. O.

८६. आत्मगतं Bh. K1. स्वगतं K2. for अपवार्य; Bh. K1. K2. N. om. हि; °मालोकयिष्यति K1. °मालोकयिष्ये K2. for ° मवलोकयिष्यति.

८७. जनः for मदयन्तिका N. O.; तद् before गृहीत्वा O.; भवति for भवतु N.; ओम् for एवं B. C. D. A. K1. K2. om. इति.

८८. Bh. K1. K2. N. om. तथा इति; तथा ought to be तह, तहा, or तधा.

८९. वत्से before लव° A. D.; प्रविश्य for प्रविश K1.; O. om. त्वम्; A. C. D. have मालत्या after वत्सया.

९०. Bh. K1. K2. N. om. अधं; अह for अध O.; कहिं भयदी प्पडिदा for भअ°—कहिं O.; °वदीए for °वदी Bh.; N. om. कहिं.

* एते for इमे Com. † एष for अयं Com. ‡ इदं चन्दनं एष च सितकुसुमापीडः Com.

काम० । अहमपि तावद्विविक्तेलंकरणरत्नानां प्राशस्त्यं शाश्वतः परीक्षिष्ये । इति निष्क्रान्ता ।

माल० । स्वगतम् । लवङ्किआमेत्तपरिवारम्हि संवुत्ता ।(क)

लव०। एदं देवदामन्दिरदुवारं पविसम्ह । इति प्रविशतः ।(ख)

मक० । वयस्य इतः स्तम्भापवारितौ तिष्ठावः । तथा कुरुतः ।

लव० । सहि अअं अङ्गराओ इमाओ कुसुममालाओ । (ग)

(क) लवङ्किकामात्रपरिवारास्मि संवृत्ता ।

(ख) एतद्देवतामन्दिरद्वारं प्रविशावः ।

(ग) सखि *अयमङ्गराग इमाः कुसुममालाः ।

९३–९८. (मा० वा०) हृद्गतमरणावकाशप्राप्त्या सानन्दोक्तिरियम् । (ल० वा०) बाह्यसंवेदनाभावान्मालती न पश्यतीति भावः । अपवारितं व्यवहितम् । अत्राङ्गरागः कुङ्कुमादिः । तत्प्रयोजनमपश्यन्तीवाह । ततः किं मयानेन कर्तव्यमित्यर्थः । अत्र पाणिग्रहणेति

---

९३. B. om. तावत्, विविक्त तावदलं° for तावद्विविक्तेलं° O., B. om. अलंकरण, °कार for °करण Bh. K1. K2.

९३. K2. om. शाश्वतः

९३. आत्मगतं for स्वगतम् N.; Bh. K1. K2. om. स्वगतम्; कथं before लव°; A. Bh. D. K1. K2.; °ङ्किआ for °ङ्किका K2. O.; °वारा संवुत्तम्हि Bh. K1. °वारा संवृत्तास्मि O. for र-त्ता; परिअणस्सि for परिवारस्मि B.; प्रकाशम् after संवुत्ता N.

९४. N. om लव°; इदं A. C. D. इमं O. for एदं; दुआरं for दुवारं Bh. K1. K2.; ता before पवि° A. Bh. K1. K2.; B. D. O. om. पविसाम; पविसीअदु Bh. पविसदु पिअसही N. for पविसाम; B. Bh. N. om. इति; उभे for इति O.

९५. K1. K2. N. om. वयस्य, इतः twice Bh.; B. C. have तावत् after इतः; °वारितशरीरौ for °वारितौ A. D. K2; पश्यतः for तिष्ठावः N.

९६. इमे for अअं N.; रओ K2. राआ N. for राओ; इमाइं B. इमा K1. K2. for इमाओ; कुसुमाइं B. कुसुममालाए K1. K2. for कुसुममालाओ.

* एष for अयं Com.

माल०। तदो किं। (क)

लव०। सहि इमस्सिं पाणिग्गहणमङ्गलारम्भे कल्लाणसंपत्ति-णिमित्तं देवदाओ पूजेहि त्ति अम्बाए अणुप्पेसिदासि। (ख)

माल०। कीस दाणिं दारुणसमारम्भदेव्वदुव्विलासपरिणाम- १००
दुक्खणिद्दह्यमाणसं पुणो पुणो मम्मच्छेददूसहं मं मन्दभाइणिं दूमावेसि। (ग)

(क) ततः किम्।

(ख) सखि अस्मिन्पाणिग्रहणमङ्गलारम्भे कल्याणसंपत्तिनिमित्तं देवताः पूजयेत्यम्बयानुप्रेषितासि।

(ग) किमिदानीं दारुणसमारम्भदैवदुर्विलासपरिणामदुःखनिर्दग्ध-मानसां पुनः पुनर्मर्मच्छेददुःसहं मां मन्दभागिनीं दुनोषि।

सामान्योक्त्या माधवनन्दनयोर्विवाहश्लेषेण नर्मस्फोटोयं भावः। यदाह।

श्लेषेणोक्तिस्तु भावानां नर्मस्फोट इतीरितः।

१००—१०७. अत्र दुर्विलासपरिणामः प्रियत्यागाप्रियप्राप्तिलक्षणः। दुःसहमिति क्रियाविशेषणम्। अनया श्लिष्टं मद्वचो न ज्ञातमत इयमेव वदत्वित्यत आह (लवङ्किकाथ किमित्यादि)। अत्राभिनिवेशिना

---

९८. B. om. सहि; इदस्सिं for इमस्सिं C.; °ग्गहणा° for °ग्गहणमङ्गला° B. C. D. N. for ग्गग्गहण; कल्याण for कल्लाण Bh. K1.

९९. अचेहि Bh. K1. K2. N. O. पूजेसि C. for पूजेहि; अणुप्पेसि° C. K2. अपेसि° K1. for अणुप्पेसि°; °दासि for °दासि K2.

१००. सनिर्वेदं K2. स्व° N. after मालती; किं for कीस A.; दाणीं for दाणिं B. C. D.; दुव्वार before देव्व Bh. K1.; दुव्विलसिद for दुव्विलास B.

१०१. णिब्भाजिद A. णिज्झाविद Bh. णिज्जीविद C. णिद्धाविद K1. णिश्चिद K2. णिद्दलिअ N. णिरूक्खविद O. for णिद्दह; B. D. K1. om. one पुणो; वि after पुणो A. B. C. D. मम्मच्छेअ A. णिव्वेद for मम्मच्छेद B. C.; दुःसहं for दूसहं A.; Bh. C. K1. K2. N. om. मं; °इणीं A. B. C. D. K1. K2. इणी Bh. for इणिं.

१०२. दुणेवेसि B. दुम्मिज्झामि Bh. दुणावेसि C. दुण्णोसि K1. दूमीआसि K2. दूमिज्जेदि N. for दूमावेसि.

लव० । अह किं सि वत्तुकामा । (क)

माल० । जं दाणिं दुल्लहाहिणिवेसमणोरहविसंवदन्तभाअ-
१०५धेओ जणो मन्तेदि । (ख)

मक० । सखे श्रुतम् ।

माध० । श्रुतमसंतोषस्तु हृदयस्य ।

माल० । लवङ्किकां परिष्वज्य । परमत्थबहिणि पिअसहि लव-

(क) अथ *किमसि वक्तुकामा ।

(ख) यदिदानीं दुर्लभाभिनिवे†शमनोरथविसंवदद्भागधेयो जनो मन्त्रयते ।

(ग) ‡परमार्थभगिनि प्रियसखि लवङ्किके एषेदानीं ते प्रियसख्य-

मनोरथेन विसंवादं प्रतिकूलं भाग्यं यस्य सः । माधवे दुर्लभां वाञ्छां मत्वाह सखे श्रुतमिति । श्लिष्टे वचस्यनिष्टाशङ्कितमाहासंतोष इति ।

१०८–११३. अत्र परमार्थेत्यादिना विश्वासपात्रत्वमुक्तम् । वि-
[illegible] उपचितः । सदृशं यथा तथा परिष्वज्येत्यन्वयः । अनुवर्तनीयो-
पकर्तव्या । सममसौभाग्यपदेनारविन्दस्पर्धिनी शोभोक्ता । यदाह ।

---

१०३. अइ A. अयि D. सहि K1. K2. अध O. for अह; N. om. अह; पि for सि Bh.; वत्तुकामासि for सि—मा K1. K2.; सि after कामा Bh.

१०४. किं for जं N.; दाणीं for दाणिं C.; दुस्सहा° for दुल्लहा° K2; अभि for अहि D. N. O.; °णिवेसि A. D. °णिवेसिअ Bh. °णिवेसी O. for °णिवेस; मण° for मणो° N.; रहे for रह Bh.; विसंवादन्त for विसंवदन्त K1.

१०५. हेओ D. N. °धेओ Bh. for °धेओ; मंतदि for मन्तेदि Bh.

१०६. श्रूयताम् for श्रुतं B. C. D.

१०७. K2. om. माध०, श्रुतम्; अतोषः B. सन्तोषः K1. for असंतोषः; च for तु A. B. D.; हृदयेस्याः Bh. हृदये D. for हृदयस्य.

१०८. ता A. C. D. K2. हा Bh. O. ही K1. before परम°; °रमच्छ for °रमत्थ O.; बहिणिए Bh. भइणि N. for बहिणि; प्रिय for प्रिअ O.

* Com. with A. D. † °निवेशि or निवेशित for °निवेश Com.; विसंवाद for विसंवदत् Com. ‡ तत्पर° Com.

ट्ठिए एसा दाणिं दे पिअसही अणाहा मरणे वट्टमाणा आगब्भ-
णिग्गमणिरन्तरोवआरोवरूढवीसम्भसरिसं परिस्सइअ ११०
पत्थेदि जइ दे अहं अणुवट्टणीआ तदो मं हिअएण धारअन्ती
समग्गसोहग्गलच्छीपरिग्गहेक्कमङ्गलं माहवसिरिणो मुहार-
विन्दं आणन्दमसिणं अवलोअइस्ससि । (क) इति रोदिति ।

नाथा मरणे वर्त्तमानागर्भनिर्गमनिरन्तरोपकारोपरूढ*विस्रम्भसदृशं परिष्वज्य प्रार्थयते यदि तेहमनुवर्तनीया ततो मां हृदयेन† धारयन्ती समग्रसौभाग्यलक्ष्मीपरिग्रहैकमङ्गलं माधवश्रियो मुखारविन्दमानन्दमसृणमवलोकयिष्यसि ।

उत्तमैर्युवतिभिः स्पर्धा या सा शोभा प्रकीर्तिता ।
मां हृदये धारयन्तीत्यनेन परंपरया ममापि दर्शनं स्यादित्युक्तम् ।
माधवश्रिय इत्यत्र प्राकृते पूर्वनिपातानियमाच्छ्रीमाधवस्येत्यर्थः ।
आनन्दमसृणत्वेन स्निग्धा दृष्टिरुक्ता ।

---

१०९. °ट्ठिके for °ट्ठिए O.; दाणीं B. D. देणिं Bh. for दाणिं; O. om. दे; प्रियं for पिअ O.; अणाधा for अणाहा K2.; वत्तमाणा for वट्टमाणा Bh. O; आरब्भ for आगब्भ Bh.

११०. D. om. णिग्ग—द; णिग्गम णिम्मिद णिर° A. B. C.; निरन्त° for णिरन्त° K1.; °न्तरोपआरविरूढ A. °न्तरोपआर B. °न्तरोवआरं विरूढ K1. °न्तरोवआरविरूढ K2. °न्तरोपारूढ N. for °न्तरोव—ढ; विसम्भ K2. विस्सम्भ N. for वीसम्भ; Bh. om. परिस्सइअ; मरि° for परि° B.; °स्सजिअ K1. °सज्जइ K2. °स्सजीअ N. °स्सइय O. for °स्सइअ.

१११. A, B, C, D, have तुमं before पत्थेदि; परिअत्थेइ Bh. पच्छेदि K1. अम्भत्थेदि N. पच्छेमि O. for पत्थेदि; अइ Bh. जदि K2. N. O. for जइ; वत्तणीआ Bh. K1 K2. वादिणीआ D. वत्तणीया O. for वट्टणीआ; हिअए for हिअएण Bh. C. K1. K2.; धारयन्ती K1. O. धारन्ती K2. N. for धरिअन्ती.

११२. लच्छी for लच्छी O.; Bh. om. लच्छीपरिग्ग°; °ग्गहीक्क for °ग्गहेक्क K1. माहवस्स for माहव N.; सिसिनो Bh. सिरि N. for सिरिणो.

११३. N. om. आणन्दमसिणं; पुलेएसि Bh. पुलोएसि C. D.; पलोअसि K1. पलोइदि K2. पलोएसु N. °पलोकयसि O. for अवलोअइस्ससि; त्ति for इति Bh. K1, O.

* कारविरूढ Com. † हृदये Com.

माध० । वयस्य मकरन्द

११५ म्लानस्य जीवकुसुमस्य विकासनानि
संतर्पणानि सकलेन्द्रियमोहनानि ।
आनन्दनानि हृदयैकरसायनानि
दिष्ट्या मयाप्यधिगतानि वचोमृतानि ॥

११५–११८. म्लानस्येत्यादि । वचांस्येवामृतानि मयापि दिष्ट्या निर्णीतानि । त्वया श्रुतमित्यादिना निर्णीतानि मया त्वधुनेत्यपिपदार्थः । अमृततुल्यत्वमाह । म्लानस्य प्रत्याशाभङ्गज्ञानेन संकोचितस्य जीवपुष्पस्य प्रकाशनानि । अमृतेपि सर्वप्रकाशकतया म्लानपुष्पप्रकाशकत्वम् । संतर्पणानि तृप्तिकरणानि । अमृतेप्येवम् । संतर्पणे सति बाह्येन्द्रियतर्पकानि । अमृतेप्येवम् । आनन्दनान्यन्तर्मोदकानि । आत्मत आनीयतेनेनेत्यायनम् । रसस्यायनं रसायनम् । वचसां चित्तोल्लासकत्वेन नवत्वजननादिवामृतस्य जरादिनाशकत्वेन नवत्वजननादिदमिति भावः । यद्वा । अमृतपदेन जलमोक्षपीयूषाण्युच्यन्ते । तत्राद्यपदेन जलसाम्यम् । मोक्षसाम्यार्थमितरपदत्रयम् । मोक्षे हि सम्यक्तृप्तिविषये निराकाङ्क्षतैव । इन्द्रियमोहोपि विषयमहाभावात् ।

आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितम् ॥

इति श्रुतेरानन्दमयता मोक्षे । यद्वा । आद्यपदाभ्यां जलसाम्यमितरपदाभ्यां मोक्षसाम्यम् । पीयूषसाम्यार्थं शेषपदम् ॥ अमृतं मोक्षपीयूषसलिलेषु घृतेपि चेति धरणिः ॥

---

११५. विकाशनानि A. Bh. C. विकाशकानि O. for विकासनानि.

माल० । जहा तस्स जीविदप्पदाइणो जणस्स अवसिदत्ति मं सुणिअ संतप्पमाणस्स तं तहाविहं सरीररअणं ण परिहीअदि १२० जधा अ लोअन्तरगदं पि मं उद्दिसिअ सो जणो सुमरणसंकधा-मेत्तपरिसेसं कालन्तरे लोअजत्तं ण सिढिलेदि तहा करेसु।

(क) यथा *तस्य जीवितप्रदायिनो जनस्यावसितेति मां श्रुत्वा संतप्यमानस्य तत्तथाविधं शरीररत्नं न परिहीयते यथा च† लोकान्तरगतामपि मामुद्दिश्य स जनः ‡स्मरणसंकथामात्रपरिशेषां

११९-१२८. अत्रावसिता मृता । तथाविधमनिर्वचनीयम् । न परिहीयते न नश्यति तथा करिष्यसीत्यन्वयः। लोकयात्रा गार्हस्थ्यम्-[स्थ्यं स?]पत्नीकत्वं वा। माधवाग्निप्रत्याशानाशादेवमेवेत्यवधारणम्। हन्तानुकम्पायाम्। करुणमिति। आलस्यादिसमुत्थो निरपेक्षभावः करुण औत्सुक्यचिन्तासमुत्थः सापेक्षभावो विप्रलम्भ इत्यनयोर्भेदः।

---

११९. जधा K2. जह N. for जहा; अ Bh. K1. च O. before तस्स; °प्पहा° K1 °प्पदा° K2. °ध्वदा° O. for °प्पदा°; °यिणो for °इणो K2. O.; Bh. K1. K2. Nr. om. जणस्स; °सिदेत्ति A. C. K1. K2. सिदंति Bh. सीदंतीं N. °सिदं B. for सिदत्ति; मां for मं K1.

१२०. मं after °णिअ Bh.; असतप्प° for संतप्प° Bh.; N. om. तं; जहा C. तह D. तधा O. for तहा; °विधं for °विहं K1. O.; सरीरं for सरीर N.; °ररत्तणं° B. रअणं K1. K2. for °ररअणं; N. om. रअणं; °हीअभि K1. °हीयदि O. for °हीअदि; जहा Bh. D. K1. O. जह N. for जधा.

१२१. N. om. अ; परलोअ A. लोयंतरं O. for लोअन्तर; अदं A. गअं N. for गदं; वि A. C. N. अपि K2. for पि; K1. om. पि; म for मं Bh.; उद्दिसि for उद्दिसिअ K2.; N. om. सो जणो; सम्हण Bh. संभरण C. K1. O. संसुमरण K2. for सुमरण; कधा A. D. संकहा K1. N. O. for संकधा.

१२२. परिससां K2. परिग्गहेण N. for परिसेसं; कालंतरेण Bh. K2. O. कालंदरेण N. for कालन्तरे; पि B. वि; A. C. before लोअ; लोग for लोअ O.; अत्तां K2. अत्तं N. for जत्तं; सिहि° for सिढि° K2.; °लीकरेदि Bh. °लीकरोदि K1. °लेइ N. for °लेदि; तधा Bh. K1. तह C. N. for तहा; करेसि A. Bh. D. K1. K2. N. करेहि O. for करेसु.

* यथा च तस्य Com. † परलोकगतामप्यु° Com. ‡ संस्मरणकथा. Com.

एवं जेव्व पिअसहीए पसादादो मालदी किदत्था भोदि । (क)

मक० । हन्त अतिकरुणं प्रस्तुतम् ।

१२५ माध० । नैराश्यकातरधियो हरिणेक्षणायाः
श्रुत्वा निकामकरुणं च मनोहरं च ।
वात्सल्यमोहपरिदेवितमुद्वहामि
चिन्ताविषादविपदं च महोत्सवं च ॥

कालान्तरे लोकयात्रां न शिथिलयति तथा कुरुष्व* । एवमेव प्रियसख्याः† प्रसादान्मालती कृतार्था भवति ।

अत एव निरपेक्षपदोपलक्षितनैराश्यमाह माधवः । नैराश्येत्यादि । नैराश्येन प्रत्याशानाशेन कातरा विसंष्ठुला धीर्यस्या हरिणनेत्रायाः । वात्सल्यं प्रियविश्लेषे प्राणत्यागेच्छा । मोहो भ्रमः सप्रत्याशत्वेपि नैराश्याभिमानः । ताभ्यां यत्परिदेवितं विलपनं वृत्तवर्तमानभाव्यर्थचिन्तनमतिकरुणं मनोज्ञं च श्रुत्वा चिन्तया यो विषादस्तेन विपत्तिमुद्वहामि । चिन्ताविषादरूपां वा विपत्तिं महोत्सवं चोद्वहामि । चकारो मिथोविरुद्धरसयोजने । इह हेतुफलभावेनान्वयः । तथा हि । नैराश्यकातरबुद्धित्वाद्वात्सल्यम् । ततः परिदेवनम् । तच्छ्रुत्वा मनोविषादः । तथा हरिणेक्षणत्वेनापहृतचित्तस्य ममालाभान्मनोज्ञपरिदेवितं श्रुत्वा महोत्सवः ।

---

१२३. एव्वं for एवं Bh. K1.; N. om. जेव्व. पिअ for पिअ O.; सहा Bh. सही K1, K2. सहीए N. सहि तए O. for सहीए: पसादादो A. सआसादो B. Bh. C. K1. K2. सयासादो O. for पसादादो; N. om. पसादादो; मालई for मालदी N.; K1. om. मालती (but gives it in the छाया); अणाहा after मालई N.; कदत्था A. C. K1. कदथाण Bh. सकामा N. किदच्छा O. for किदत्था; भोदु B. भविस्सादि D. होइ N. होदि O. for भोदि.

१२४. B. om. अति; वर्तते for प्रस्तुतं A. B. C. D. K2. प्रस्तुतमनया N.

१२५. वैराग्य for नैराश्य K1.

१२८. चिंतावसान B. चिंतावसाद C. for चिन्ताविषाद.

*करिष्यसि Com. †सखीप्रसा° Com.

लव० । अह पडिहदं दाणिं दे अमङ्गलं । ण अदो वि अवरं सुणिस्सं । (क)

१३०

माल० । सहि पिअं क्खु तुम्हाणं मालदीजीविदं ण उण मालदी । (ख)

लव० । किं एव्वं भणिदं भोदि । (ग)

(क) अयि प्रतिहतमिदानीं तेमङ्गलम् । नातोऽप्यपरं* श्रोष्यामि ।
(ख) सखि प्रियं खलु युष्माकं मालतीजीवितं न पुनर्मालती ।
(ग) किमेवं† भणितं भवति ।

स पुनः क्रन्दनैर्मोहैः प्रलापैः परिदेवनैः ।
देहायासाभिघातैश्च करुणाभिनयो भवेत् ॥

इति भरतः ।

१२९–१३२. अत्रामङ्गलप्रतिघातो विवाहादिति बाह्यम् । माधवसंनिधानादित्यान्तरम् । बाह्यार्थमाकलय्याह [सखि प्रियमिति]। अत्र तच्छरीरावच्छिन्नात्मा मालती जीवनं त्ववृष्टविशेषकारितदेहात्मसंयोग इति जीवनमालत्योर्भेदः । जीवनस्य सुखहेतुतया प्रियत्वं तत्त्वेह दुःखसंततिजनकमतस्त्याज्यमेव भवतीति भावः ।

---

१२९. B. C. O. om. अइ; परि for पडि O.; B. C. om. दाणिं; णादो Bh. D. K1. K2. N. नादो O. for ण अदो; पि for वि K2.; N. om. वि; अहिअदरं B. अधिअं D. अधि अदरं A. C. वरं N. for अवरं. *D. ends here.*

१३१. K1. om. सहि (but gives it in the छाया); प्पियं for पिअं O. खु for क्खु Bh. K1. K2. O.; Bh. om. जीविदं; N. om. उण.

१३२. सहि before किं N.; किन्ति Bh. किं त्ति N. for किं एव्वं; भणिदेण C. भणिदे E. O. for भणिदं; होदि for भोदि Bh. K1. K2. N. O.

* नातोऽधिकं Com. † किमेव Com.

माल० । आत्मानं निर्दिश्य । जेण पच्चासाणिबन्धणेहिं वअ-
१३५णसंविहाणएहिं जीआविअ इमं महाबीभच्छारम्भं अणुभावि-
दम्हि । संपदं उण मणोरहो मे एसो जेव्व जं तस्स देवस्स परके-
रअत्तणेण अणवरद्धं अत्ताणअं परिच्चइस्सं त्ति । ता इमस्सिं पओ-

(क) *येन प्रत्याशानिबन्धनैर्वचनसंविधानकैर्जीवयित्वेमं †महा-
बीभत्सारम्भमनुभावितास्मि । सांप्रतं पुनर्‡मनोरथो मे एष एव
यत्तस्य देवस्य ¶परकीयत्वेनानपराद्धमात्मानं**परित्यक्ष्यामीति ।
तदस्मिन्प्रयोजने प्रियसखी मेपरिपन्थिनी भवतु ।

१३४–१३८. अत्रान्यजनेत्यत्रान्यपदेन माधवाभिधानम् । नन्द-
नापेक्षयान्यत्वात् । दुर्लभत्वेन परकीयत्वारोपाद्वा । बीभत्सामिह नन्द-
नविवाहार्थमङ्गलस्यानिष्टस्य दर्शनात् । अनपराद्धमितीपदर्थे नञ् ।
आनन्दनविवाहपर्यन्तस्थायित्वे महापराधो यतः । अन्यस्य संभो-

---

१३४. N. om. आत्मानं निर्दिश्य; उद्दिश्य for निर्दिश्य O.; C. om. जेण; अण्णजण after जेण A. E. K2.; बन्धणेहि A. निबन्धणेहिं K1. for णिबन्धणेहिं.

१३५. विलअणेहिं B. विण्णसेहिं C. E. विधाणेहिं K1. K2. संविहाणेहिं A. Bh. for संविहाणएहिं; जीवावि K1. जीवाविअ K2. जीवावियं O. for जीआविअ; एअत्तकालं संपइं उणं after °विअ Bh.; ईदिसं for इमं Bh. K1. K2.; ज्जेव्व after इमं A. E.; °भत्सारंभं B. C. K1. K2. °भच्छआरंभं N. °भत्समारंभं O. for °भच्छारंभं.

१३६. मम A. मह E. before मणोरहो; मम Bh. K1, K2. after मणोरहो for मे; B. C. om. मे; एत्तिअं N. एत्तिको O. for एसो; K2. om. एसो; B. om. जेव्व; एव्व for जेव्व N.; महाभाअस्स for देवस्स O.; Bh. K1. N. om. देवस्स; परोक्खगु-णकित्तणेण A. C. परोक्खगुणसंकित्तणेण B. परोक्खगुणकित्तणेण E. परकेरन्तणेण K1. परकीरत्तणेण K2. परोक्खगुणकेरत्तणेण O. for परकेरअत्तणेण.

१३७. अणवरदं B. अनवरद्धं K1. K2. अवरद्धं N. O. for अणवरद्धं; अत्ताणं for अत्ताणअं A. K2. N.; परिच्चइस्सदि B. Bh. परिच्चस्सं K1. परिच्चइअ णिब्भुदा भविस्सं N. परिचयामि O. for परिच्चइस्सं; °स्सन्ति for °स्संत्ति K2.; Bh. K1. N. om. त्ति; सहि for ता N.; एदस्सिं for इमस्सिं N.; °प्पओ for °पओ O.

* येनान्यजनप्रत्या° Com.; † °त्वेयमेवाहं Com.; ‡ °भत्समनु° Com.; § पुनर्मम मनो Com.; ¶ पराधीनत्वेनानपराद्धम् Com.; ** परित्यजामि Com.

अणे पिअसही मे अपरिपन्थिणी होदु । (क) इति पादयोः पतति ।

माध० । सैषा सीमा स्नेहस्य । लवङ्गिका माधवं संज्ञया समाह्वयति । १४०

मक० । वयस्य उपसृत्य लवङ्गिकास्थाने तिष्ठ ।

माध० । परवानस्मि साध्वसेन ।

मक० । इयमेव नेदीयसां प्रकृतिरभ्युदयानाम् ।

माधवः स्वैरं लवङ्गिकास्थाने तिष्ठति ।

गादेरभावादेष एवेत्युक्तम् । अपरिपन्थिन्यविरोधिनी । एतदात्मत्यागरूपम् ।

१३९–१४७. संज्ञया संकेतेन । परवाननायत्तः । साध्वसेन जडतया । अत्यभीष्टलाभादियम् । नेदीयसां निकटानाम् । स्वैरं शनैः । [माल० वा०] अत्र मर्तुं स्वीकुर्वित्यर्थः । माधवस्य संस्कृतभाषया लवङ्गिकाभ्रमो न स्यादिति भाषासमावेशेनाह । सरले इत्यादि । साहस आत्मनिरपेक्षकार्ये रागमनुरागं परिहर । रम्भोरु कदलीसमोरुदेशे हे संरम्भं मरणे त्वरां त्यज । जीवन्त्यां प्रत्याशापि स्यादिति भावः । विरसं रसशून्यं तव विश्लेषदुःखं सोढुं मे चित्तमक्षमं यतः । अतोयं बलभस्त्वयि दक्षोतस्त्यज मरणाभिनिवेशमिति लवङ्गिकाभिप्रायः ।

---

१३८. प्पिय for पिअ O.; B. om. मे; °पन्थिनी for पन्थिणी K1.; होइ C. भोदु K1. for होदु; Bh. K2. N. om. इति; त्वे for इति K1.

१३९. स एव for सैषा N. O.; सीमांतः for सीमा O.; व्याहरति Bh. व्यवहरति K1. आह्वयति K2. N. O. for समाह्वयति.

१४१. उपसृत्य वयस्य for व–स्य K2.; माधव after वयस्य O.; N. om. उपसृत्य; लवङ्गिकायाः for लवङ्गिका A. C.

१४२. वयस्य before पर० A. C. E.

१४३. नेदीयसी for नेदीयसां B.

१४४. उपसृत्य after स्वैरं K2.; लवङ्गिकायाः for लवङ्गिका C.

१४५ माल०। सहि करेहि अणुऊलदाए पसादं। (क)

माध०। सरले साहसरागं परिहर रम्भोरु मुञ्च संरम्भम्।
विरसं विरहायासं सोढुं तव चित्तमसहं मे ॥

माल०। अलङ्घणीओ दे मालदीप्पणामो। (ख)

माध०। सहर्षम्।

१५० किं वा भणामि विच्छेददारुणायासकारिणि।
कामं कुरु वरारोहे देहि मे परिरम्भणम् ॥

(क) सखि कुर्वनुकूलतया*प्रसादम्।

(ख) †अलङ्घनीयस्ते‡ मालतीप्रणामः।

अत एव सरले अज्ञे ऋजुप्रकृतिके वा। माधवपक्षे सरले अजानति हे तव विरहायासं सोढुं मे चित्तमसहमतस्तव समीपमागतोस्मि तन्मरणं त्यज। इतरत्सममेव। तदिह संस्कृतप्राकृतयोः साम्यात्प्राकृतसमकम्।

१५०-१५१. किं वेत्यादि। किं वा भणामि। त्वदारम्भनिषेधं न करोमीत्यर्थः। हे विरहदुःसहकष्टकारिणि सुभ्रोणि काममभीष्टं कुरु। यद्येवं तदा ममालिङ्गनं देहीति लवङ्गिकापक्षे। माधवपक्षे तु किं वा

---

१४५. अनु° for अणु° Bh.; °कूल° for °ऊल° Bh. K1. K2. N. O.; प्पसादं for पसादं O.

१४७. विरसा° for विरहा° Bh.; वोढुं for सोढुं B. C. E.

१४८. सहि A. B. K2. सहि twice K1. before अलङ्घ°; अवज्ञणीओ B. अलंघणिज्जो Bh. K1. K2. O. अवज्ञणीओ C. E. for अलङ्घणीओ; A. B. C. E. have जेव्व before दे; मालती for मालदी Bh.; पणामो for प्पणामो Bh. K2. N.

१४९. N. Om. सहर्षम्.

१५०. त्वां for वा B. C. E.; °कारिणीं for °कारिणि C. E.

* °तायै Com.; † सखि अल° Com.; ‡ अयं before ते.

माल०। सहर्षम्। कधं अणुगहीदम्हि। उत्थाय। इअमालिङ्गामि। दंसणं उण पिअसहीए बाहुप्पीडेण णिरुद्धं ण लब्भीअदि। आलिङ्ग्य सानन्दम्। सहि कठोरकमलगब्भपम्हलो अण्णारिसो जेव्व दे अज्ज णिव्वावेदि मं सरीरप्फंसो। सान्त्रम्। किं च। १५५

(क) कथमनुगृहीतास्मि। इयमालिङ्गामि। दर्शनं पुनः प्रियसख्या बाष्पोत्पीडेन* निरुद्धं न लभ्यते। सखि कठोरकमलगर्भपक्ष्मलो†न्यादृश एव तेन निर्वापयति मां शरीरस्पर्शः।‡किं च। मौलिविनिवेशि-

भणामि किं वक्तव्येन कामं कामव्यापारं कुरु। अतः परिरम्भणं देहि॥ आरोहः श्रेणिकाययोरिति धरणिः॥ श्लोकद्वयमिदं सौरसेन्या। यदाह।

स्पष्टार्थं लक्षणं प्रोक्तं सौरसेन्याः प्रपञ्चतः।
लक्षणं त्वेकमेवास्याः संकृताद्यदनूनता॥

१५३-१६७. अत्र उत्पीडः प्रबलीभूय निर्गमः। उत्पीडः समूहो वा। अपश्चिमं चरमम्। प्रियस्पर्शादाह्लादात्सहर्षम्। कठोरमरालगर्भो बीजकोशः। पक्ष्मलो रोमाञ्चयोगात्। समाधिना सुकुमारः। अन्यादृश

१५२. B. om. सहर्षम्; कहं for कधं K1. O.; गिहिदम्हि Bh. गहिदम्हि K1. मदम्हि N. O. for गहीदम्हि; इयमा° for इअमा° Bh. K1. K2. O.; °लिङ्ग्यामि for °लिङ्गामि K1. K2.

१५३. Bh. E.K1.K2. om. पिअसहीए; बाहुप्पपील A. बाहुप्पाडणेण B. बाहप्पीडेण Bh. K1.O. बाहुप्पल C. बाहुप्पीडलेण F. बाह्वापीडेण K2. for बाहुप्पीडेण; O. om. णिरुद्धं; अपच्छिमं A. पिअसहीए अपच्छिमं Bh. K1. K2. पच्चरुखं N. प्रियसहीए अवछिण्णं O. before ण; लहेइ B. लभेमि Bh. लभेदित्ति C. लभेइत्ति E. लब्भइ K1. K2. लब्भेदि O. for लब्भीअदि.

१५४. इति before आलि° B. O. (O in margin); आलिंगति for आलिङ्ग्य B.; N. om. सानन्दम्; B. C. om. गब्भ; अणारिसो for अण्णारिसो Bh. K1.

१५५. एव्व for जेव्व N.; B. om. अज्ज; णिव्वादेदि B.C. णिव्वावेहि Bh. णिव्वावेइ N. for णिव्वावेदि; B. C. om. मं; मे for मं Bh.; संतप्यमाणं पिअसहीए A. K1. तप्यमाणं Bh. after मं; फंसो for प्फंसो Bh.; सहि before किं च N.; K2. O. om. किंच; अ for च C. N.

* °पीडनेन निरुद्धं प्रियसख्या अपश्चिमं न Com. † पक्ष्मलसुकुमारोन्या° Com. ‡ तथान्यच्च for किंच Com.

मउलिविणिवेसिदञ्जली मह वअणेण विण्णवेहि तं जणं ण मए मन्दभाइणीए विअसन्तपुण्डरीअलच्छीविलासहारिणो मुहचन्द-मण्डलस्स दे सच्छन्ददंसणेण संभाविदो चिरं लोअणमहूसवो । मुहामणोरहेहिं अ अविरदविअम्भमाणदुव्वारुव्वेअव्वइअ-

---

ताञ्जलिर्मम वचनेन विज्ञापय*तं जनं †न मया मन्दभाग्यया ‡विकस-त्पुण्डरीकलक्ष्मीविलासहारिणो मुखचन्द्रमण्डलस्य §ते स्वच्छन्ददर्श-नेन संभावितश्चिरं लोचनमहोत्सवः सुधामनोरथैश्चाविरतविजृम्भ-

---

एवानुभूतसखीस्पर्शविधर्मा श्मशानानुभूतस्पर्शतुल्यः । निर्वापयति तापं शमयति तथा । तादृशः स्पर्शः शङ्कात्रिषयोऽप्यत्र नेति निर्वेदात्सा-श्रुता । अत्र विकसन्ति शतं पत्राणि यस्य तत् । अन्यथेदं व्यर्थं स्यात् । मण्डलपदं संपूर्णत्वार्थम् । चिरमित्यनेन स्वाधीनभर्तृकात्वमुक्तम् ।

सुरतादिरसैर्यस्या बद्धः पार्श्वगतः प्रियः ।
सामोदगुणसंप्राप्ता भवेत्स्वाधीनभर्तृका ॥

---

१५६. मौलि N. मौलि O. for मउलि; विनि° Bh. णि° K2. for विणि°; °श्रिअंजली Bh. °सिअंजली C. E. N. °सिदाञ्जली K2. for °सिदञ्जली; मम for मह A. Bh. K1. K2.; विण्णवेसि A. Bh. विण्णवेसि K1. विण्णवेस K2. विण्णवेसु O. for विण्णवेहि; जमं for जणं K2.; अधा A. जह N. before ण मए.

१५७. °भाअए N. °भायणीए O. for °भाइणीए; तस्स after °णीए O.; पप्फुल्ल Bh. K1. विस्फुटन्त K2. विसट्ट N. for विअसन्त; सदवत्त K2. सयवत्त O. before पुण्ड°; सदपत्त for पुण्डरीअ N.; °रीक for °रीअ K2.; संपुण्णचन्दमण्डलाहिरामस्स मुहस्स for मुह-लस्स A.; अन्द A. B. Bh. C. E. यदं O. for चन्द.

१५८. मण्डणस्स for मण्डलस्स K2.; B. O. om. दे; महूसवो लोअणाणं A. B. C. E. लोअणस्स महूसवो K1. for लोअणमहूसवो; णोअण for लोअण K2.; महोसवो N. for महूसवो.

१५९. मुधा A. B. C. E. महा O. for मुहा; च for अ O.; K1. K2. N. om. अ; विरह Bh. अणवरद K2. अविरअं N. अविरल O. for अविरद; विजंभ° B. विइंभ° N. वियम्ह O. for विअम्भ°; °रोव्वेग K2. °रदुव्वल N. °रुव्वेल O. for °रुव्वेअ; वइअ° B. Bh. K1. K2. N. वइय° O. for व्वइअ°.

* विज्ञापयिष्यसि Com. † यथा न मया Com. ‡ विकसच्छतपत्रपुण्डरी° Com. § Com. with A.

रुव्वत्तमाणबन्धणं धारिअं हिअअं । गमिआ अ वारं वारं सवि- १६०
सेसदूसहारम्भदूमाविअसहीअणा सरीरसंदावा । कधं वि अदि-
वाहिदा अ चन्दादवमलअमारुदप्पमुहा अणत्थपरंपरा । संपदं
उण णिरासम्हि संवुत्तेति । तुए वि पिअसहि सव्वदा सुमरि-

माणदुर्वारोद्वेगव्यतिकरोद्वर्तमानबन्धनं धारितं हृदयम् । गमिताश्च वारं वारं सविशेषदुःसहारम्भदाविते*सखीजनाः शरीरसंतापाः । कथमप्यतिवाहिता च चन्द्रातपमलयमारुतप्रमुखानर्थपरंपरा । सांप्रतं

निवेद्य दुःखं सुखी भवेदिति पूर्वानुभूतदुःखं निवेदयति । अविरतेत्यादि । उद्वर्तमानमुन्मूलितं बन्धनं स्थैर्यं यस्य तत् । बन्धनं स्वस्थानावस्थानं तस्योद्वर्तनमुन्मूलनारम्भ इति पाठान्तरव्याख्या । गमिताश्चेत्यादिना व्याध्यवस्थोक्ता । अतिवाहितातिक्रान्ता । चन्द्रातप इति तापकारित्वादातपः । एतेषामनर्थत्वमाह भरतः ।

संभोगे ये सुखं कुर्युस्ते दुःखं विरहे भृशम् । इति ।

---

१६०. °रुव्वित्तमाण A. °रुवत्तमाण K1. °रोव्वत्तमाण K2. for °रुव्वत्तमाण; धारिदं for धारिअं Bh. K2. O.

१६१. विसेस before दूसह Bh.; A. om. दूसहारम्भ; °हाआस for °हारम्भ N.; दूमण्णाइअ A. दूनाविद Bh. दूमाविद K1. K2. O. for दूमाविअ; जणा N. for अणा ; कथं K1. कहं N. O. for कधं; पि for वि K2.

१६२ A. K1. N. om. अ; °हव for °दव K1.

१६३ पुण for उण N.; °रासाम्हि A. K1. °रासेम्हि Bh. °रायासम्हि O. for °रासम्हि; B. C. E. om. म्हि and have णिरासा; संवत्ते संवुत्त° K1. K2. for संवुत्ते°; तए for तुए K2.; पिअ for पिअ O.; सहीए A. सही N. for सहि; सव्वधा Bh. O. सव्वहा E. N. for सव्वदा; अहं before सुम° O.

* दुर्मनायित for द्राविते Com.

दव्वम्हि । एसा अ माहवसिरीसहत्थणिम्माणमणुहरा वउलमाला
१६५ मालदीणिव्विसेसं पिअसहीए दट्ठव्वा सव्वधा हिअए धारणी-
एत्ति । (क) स्वकण्ठादपनीय माधवस्य हृदि विन्यस्यन्ती सहसा-
पसृत्य साध्वसोत्कम्पं नाटयति ।

पुनर्निराशास्मि संवृत्तेति । त्वयापि प्रियसखि सर्वदा स्मर्तव्यास्मि । एषा च श्रीमाधवस्वहस्तनिर्मागमनोहरा बकुलमाला मालतीनिर्विशेषं प्रियसख्या द्रष्टव्या सर्वथा हृदये धारणीयेति ।

स्मर्तव्येत्यनेन करुणव्यभिचारिभावं स्मरणमाह । यदाह । व्यभिचारिणोस्य

निर्वेदो ग्लानिमरणव्याधिदैन्यभ्रमादयः ॥

नैराश्याच्च मरणोदयः । यदाह ।

सर्वैरेतैः प्रतीकारैर्यदि नास्ति समागमः ।
कामाग्निना प्रदीप्ताया जायते मरणं ततः ॥

विप्रलम्भकरुणानन्तरं स्थायिनः शृङ्गारस्योपक्रममाह । एषा चेति । साध्वसं भयम् ।

---

१६४ °व्वाह्मि for °व्वम्हि E. N.; वि for अ N.; सिरिमाहव for मा-री A.; सिरि for सिरी Bh. K1. K2. O.; B. om. सिरी; हत्थ for सहत्थ K1. K2. N. O.; मणो B. K1. मण Bh. K2. N. O. for मणु; बहुल for वउल K1.

१६५ जीविद for मालदी B.; जीविद after मालदी A. Bh. C. E. K1. K2.; °सेसा Bh. K1. °(से?)सेण K2. for सेसं; पिय for पिअ O.; K1. K2. om. दट्ठव्वा; सव्वदा K1. K2. सव्वहा N. O. for सव्वधा; K1. om. हिअए; हिअएण for हिअए N.; °अत्ति Bh. K1. K2. °यत्ति O. for °एत्ति.

१६६ बकुलमालाम् after कण्ठाद् N.; अवतीर्य B. उन्मुच्य N. O. for अपनीय; हृदये for हृदि Bh. C. K1.; न्यस्य for विन्यस्यन्ती N.; °सोप° for °साप° A. B. C. K1. K2. N.

माध० । अपवार्य । हन्त ।

एकीकृतस्त्वचि निषिक्त इवावपीड्य
निर्भुग्नपीनकुचकुड्मलयानया मे । १७०
कर्पूरहारहरिचन्दनचन्द्रकान्त-
निःस्यन्दशैवलमृणालहिमादिवर्गः ॥

माल० । स्वगतम् । अहो लवङ्गिआए मालदी विप्पलद्धा । (क)

माध० । अयि स्वचित्तवेदनामात्रनिवेदिनि परव्यथानभिज्ञे इयमुपालभ्यसे । १७५

(क) अहो* लवङ्गिकया मालती विप्रलब्धा ।

१६८—१७२. हन्त हर्षे । एकीत्यादि । अनया मालत्या कर्पूरादिवर्ग एकीकृतः सन्नालिङ्ग्य मे त्वचि निषिक्त इव । स्पर्शस्य त्वगिन्द्रियग्राह्यतया त्वचीत्युक्तम् । निर्भिन्नौ निरन्तरावलग्नौ पीनौ स्तनकुड्मलौ यस्यास्तया । हरिचन्दनं चन्दनविशेषः । निःस्यन्देन द्रव्याभिधानम् ॥ कृदभिहितो भावो द्रव्यवत्प्रकाशत इति न्यायात् ॥ निःस्यन्दीति पाठे निस्यन्दिनः सरसाः शैवालादय इत्यर्थः । अनेन प्रशान्तो मे कामजस्ताप इत्युक्तम् । बहूपमेयम् ।

१७४—१७९. आत्मानुरागप्रकाशनायानुभूतवेदनामाह । अयीति ।

१६८. N. om. हन्त.

१६९. °स्त्वति for °स्त्वचि O.; निषक्त for निषिक्त A. B. K1.; उपपीय for अवपीय C.

१७० निर्भिन्न for निर्भुग्न Com. K2.; कुड्डल for कुड्मल B. Bh. E. O.

१७२ निस्यन्द K1. O. निष्यन्द K2. for निःस्यन्द; शैशाव Bh. शेवल K2. for शैवल

१७३ Bh. K1. K2. N. O. om. स्वगतं; अम्हे for अहो N.; मालती for मालदी N.; विप्पलंभप्पमादो Bh. विप्पलंभप्पसादो K1. K2. विप्पलंभो पउन्नो N. विप्पलंभिदा O. for विप्पलद्धा.

१७४ आत्म for स्व Bh. K1.; A. om. चित्त; वेदिनि Bh. N. वादिनि K1. for निवेदिनि; चित्तवेदना for व्यथा N.

१७५ इदमु° for इयमु° Bh. K1. K2.

* लवंगिकाया मालतीविप्रलंभप्रसादः Com.

माल० । हा हदम्हि । कण्णआअणविरुद्धं किं पि एसा
१९० उवण्णस्सदि । (क)

प्रविश्य कामन्दकी । पुत्रि कातरे किमेतत् । मालती कम्पमाना कामन्दकीमालिङ्गति ।

काम० । तस्याश्चिबुकमुन्नमय्य ।

पुरश्चक्षूरागस्तदनु मनसोनन्यपरता
१९५ तनुग्लानिर्यस्य त्वयि समभवद्यत्र च तव ।

(क) हा* हतास्मि । †कन्यकाजनविरुद्धं किमप्येषोपन्यस्यति ।

भीष्टाः संभोगादयः फलन्तु ॥ कङ्कणं भूषणे सूत्र इति विश्वः ॥ अत्राग्रतिहतः परिगृहीतः । अयं जनो मालतीं । स्वयमेवास्याः करं गृह्णात्वित्याशयः । अत्र अम्मका कुलकन्यका । विरुद्धमिति कुलकन्यकाविवाहा दैवार्षब्राह्मा एव शुभा दृश्यन्त इति भावः ।

१९१–१९७. स्वयंग्राहविवाहं कर्तुमनर्हमिति मन्यमानां मालतीमाह । पुत्रीति ॥ अत्र गौरादित्वान्ङीषित्यवधेयम् ॥ कातरे विह्वले । करग्रहभयेन तदङ्गस्पर्शेन माधवस्य दर्शनहर्षेण च मालत्याः कम्पः । यदाह ।

---

१८९. A. Bh. C. E. K1. K2. add स्वगतम् before हा; हद्धी हद्धी after हा A.; हा हदाम्हि K2. अद्धिटं N. हद्धी O. for हा हदम्हि; कणआ K1. अम्मआ K2. अङ्कणा N. कण्णका O. for कण्णआ; जण for अण B. K2. N.; Bh. K1. om. अण; K1. om. किं पि; वा for पि N.; N. om. एसा.

१९०. उवण्णसदि A. B. C. E. K2. उवादिसदि Bh. K1. for उवण्णस्सदि.

१९१. कामन्दकी twice Bh. K1.; N. om. पुत्रि—हा अम्ब (l. 203); वत्स माधव &c. after कामन्दकी N.; क्रन्द° for कम्प° Bh.

१९३. मालत्याः for तस्याः Bh. K1 K2.

१९४. वत्से before पुरः N.; पुरा for पुरः K1. K2. O.

१९५. तनू for तनु Bh.; म्लानिर्यस्य B. N. ज्या (corrected into ग्ला in marg.) निर्यस्य O. for ग्लनिर्यस्य; तव च for च तव B.

* हा धिक् हा धिक् after हा Com. † अम्मका for कन्यका Com.

युवा सोयं प्रेयानिह सुवदने मुञ्च जडतां
विधातुर्वैदग्ध्यं विलसतु सकामोस्तु मदनः ॥

लव०। भअवदि कसणचउद्दसीरअणीमसाणसंचारणिव्वत्ति-

शीतभयहर्षरोषस्पर्शजरासंभवः कम्पः।

नर्मस्फोटोयम्। यदाह।

नर्मस्फोटस्तु भावानां देहस्थानां प्रकाशनम्।

चिबुकमुन्नमय्यौष्ठाधः प्रदेशमुत्तोल्य॥ अधः स्याच्चिबुकमित्यमरः॥ पुरावृत्तं संकलय्याह। पुर इत्यादि। प्रथमं नेत्रप्रीतिरथ मनसस्तद्गतत्वं शरीरग्लानिश्च त्वद्विषये यस्याभूद्यद्विषये तवाप्येतादृशा अभूवन्हे सुमुखि सोयं युवा प्रेयान्प्रियतमः। अतो जडतां कार्याप्रतिपत्तिं त्यज गान्धर्वविवाहपरा भवेत्याशयः। तेन धातुः प्रयत्नो विलसतु। कामः पूर्णेच्छो भवतु। आत्मव्यापारस्त्वनौद्धत्याय नोक्तः। इह चक्षूरागादिकं कामावस्था। यदाह।

चक्षुःप्रीतिर्मनःसङ्गः संकल्पोत्पत्तिरेव च।
निद्राच्छेदस्तनुत्वं च व्यावृत्तिर्विषयान्तरात्॥
लज्जानाशो उन्मादो मूर्च्छामरणमेव च॥ इति।

मनसोनन्यपरतया मनःसङ्गसंकल्पोत्पत्ती उक्ते। ग्लानिरित्यनेन निद्राच्छेदादयो मूर्च्छान्ता उक्ताः। तेषां ग्लानिहेतुत्वात्। अत्र च पुरस्तदन्वित्यादिना हेतुफलभावः सूचितः। युवत्वप्रियत्वे प्रवृत्तिहेतू उक्ते। प्रियश्च

यो विप्रियं न कुरुते न चायुक्तं प्रभाषते।
तथार्जवसमाचारः स प्रियः परिकीर्तितः॥

इति भरतोक्तः॥ तत्रापि प्रकर्ष इयसुन्॥ जडताप्रियदर्शनात्।

१९८–२११. अत्र कृष्णरजनी कृष्णपक्षचतुर्दशीरात्रिः। विष-

---

१९८. N. om. भअवदि; किसण for कसण N. O.; °द्दसीए B. °द्दसि Bh. K1. K2. for °द्दसी; B. om. रअणी; रअणि for रअणी Bh. K1. K2.; म्मसाण for मसाण K1.; संचरण for संचार A. B. C. E.; णिव्व° for णिव्व° A. Bh. C. E.; °द्दिद Bh. °द्दिद K1. K2. for °त्तिद.

दविसमव्ववसाअणिव्वापिअचण्डपासण्डपअण्डदोद्दण्डसाहसो
२०० साहसिओ क्खु एसो । अदो पिअसही उक्कम्पिदा । (क)

मक० । स्वगतम् । साधु लवङ्गिके साधु । अवसरे खल्व-
नुरागोपकारयोर्गरीयसोरुपन्यासः ।

माल० । हा तात हा अम्ब । (ख)

(क) भगवति कृष्ण*चतुर्दशीरजनीश्मशानसंचारनिर्वर्तितवि-
षमव्यवसायनिर्वापित†चण्डपाखण्डप्रचण्डदोर्दण्डसाहसः साहसिकः
खल्वेषः । अतः‡ प्रियसख्युत्कम्पिता ।

(ख) हा तात हा अम्ब ।

मव्यवसायो महामांसविक्रयः । निष्ठापितो निहतः । पाखण्डोघोरघ-
ण्टः । साहसं स्त्रीवधरूपम् । साहसिकाद्धि भयं भवत्येव । तथा च
प्राणदानेन माधवक्रीतमात्मानं कथं न समर्पयसीति भावः । [मा०
वा०] साहसविवाहारम्भाद्दुर्जनभयात्पित्रादिवियोगाशङ्कनाच्च खेदे हा-
शब्दः ॥ उत्संसः कर्णपूरे च शेखरे च प्रकीर्तित इति विश्वः ॥

---

१९९. वव° for ववव° Bh. C. K1. K2. N.; वेअ B. साहसो N. after °साअ; णिट्ठापिअ A. णिछाविद Bh. णिट्ठविदK1. N. निट्ठाविद K2. णिट्ठविय O. for णिव्वापिअ; B. om. पासण्ड; C. K1. K2. N. om. पअण्ड; प्पयंड for पअण्ड O.; C. om. दोद्दण्ड; दंड for °द्दण्ड Bh.; K1. K2. om. साहसो; °हसे for° हसो Bh.

२००. N. O. om. साहसिओ; °सिको for °सिओ B. C.; खु for क्खु Bh. K1. K2. O.; मे after अदो K2.; प्पिय for पिअ O.; णुक्कंपिदा for उक्कम्पिदा Bh.

२०१. B. K1. K2. N. om. स्वगतं; स्थाने for अवसरे N.

२०२. रागो° for अनुरागो° B. C. E.

२०३. स्वगतम् after माल० N.; N. om. हा तात.

* Com. om. चतुर्दशी. † निष्ठापित Com. ‡ अतोमे Com.

काम० । वत्स माधव ।

माध० । आज्ञापय । २०५

काम० । इयमशेषसामन्तमस्तकोत्तंसपरागरञ्जितचरणाङ्गुलेरमात्यभूरिवसोरेकमपत्यरत्नं मालती भगवता सदृशसंयोगरसिकेन वेधसा मन्मथेन मया च तुभ्यं दीयते । इति रोदिति ।

मक० । फलितं नस्तर्हि भगवतीपादप्रसादेन । २१०

माध० । तत्किमिति बाष्पायितं भगवत्या।

काम० । चीवराञ्चलेन नेत्रे प्रमृज्य । विज्ञापयामि कल्याणिनम् ।

अङ्गुलिपदेन चरणाग्रे प्रणामादधृष्यतोक्ता । अन्योन्यदर्शनेन धात्रा । प्रीतिजननात्कामेन । चोरिकाविवाहान्मयेत्याशयः । बाष्पायितमुद्गतबाष्पं वृत्तम् । मातृवत्स्नेहेनेदमुपपन्नम् ।

---

२०४. B. C. E. om. माधव.

२०६. भुवन after अशेष B.; °न्तको° for °न्तमस्तको° Bh.

२०७. °लिर° for °लेर° Bh.; °रेकापत्य° for रेकमपत्य° B. Bh.; K1. K2. om. मालती; नाम after मालती B.; वस्तु for संयोग N.

२०८. च before मया Bh. C. K2.; प्रदीयते for दीयते A.; N. om. इति–ति.

२१०. हि after फलितं A. K2. N. O.; E. N. om. नः; समीहितं after नः K2.; °वत्याः for °वती N.; Bh. K1. K2. N. om. पाद.

२११. Bh. N. O. om. माध० । but O. has it in margin; इव for इति Bh. O.; आनतं before भग° N.; °वत्याः for °वत्या N.

२१२. चीर for चीवर C. K2. N.; आनतं for नेत्रे O.; परिमृज्य A. B. Bh. K1. K2. अपमृज्य O. for प्रमृज्य; वत्स किमपि for विज्ञापयामि N.

२१३. त्वां वक्तुकामास्मि after °णिनम् N.

माध०। नन्वाज्ञापय।

२१५ काम०। परिणतिरमणीयाः प्रीतयस्त्वद्विधाना-
महमपि तव मान्या हेतुभिस्तैश्च तैश्च।
त्वदिह सुवदनायां तात मत्तः परस्ता-
त्परिचयकरुणायां सर्वथा मा विरंसीः॥

इति नन्तुमिच्छति।

२१५—२२०. परिणतीत्यादि। त्वद्विधानां कुलादिमतां प्रीतयः परिपाकरम्या भवन्ति। अधुनावश्यत्वेन परिणतिपदम्। तैस्तैर्हेतुभिः पितृबन्धुत्वोपदेशकत्वादिभिरहं तव मान्या। हेतूनां बहुत्वेन वीप्सा। तत इह मालत्यां मत्तः परस्तान्मत्परोक्षे परिचयरूपकरुणायां मा विरंसीर्मा विरतो भविष्यसि। करुणाया इति पाठे जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति पञ्चमी॥ तातेति सर्वं ततं व्याप्तमनेनेति तात व्यापक हे। यद्वा। तातो विधेयः॥ तातो विधेये जनक इति विश्वः॥ विरंसीरित्यत्र माङि लुङिति भविष्यति लुङ्॥ वात्सल्यात्प्रपन्नानुकम्पातः। अतिक्रमोन्यथात्वम्। अत्र माला नाम नाट्यालंकारकथनम्। यदाह।

---

२१४. B. N. om. नन्.

२१५. °स्तद्वि° for °स्त्वद्वि° K2.

२१६. वयं for अहं N.

२१७. परस्मात् for परस्तात् N.

२१८. °णायाः for °णायां N.

२१९. Bh. K1. K2. O. om. इति but O. gives it in margin; N. om. इति—°च्छति; पादयोः पतितुम् A. Bh. K1. K2. गन्तुम् O. for नन्तुम्.

माध० । वारयन् । अहो वात्सल्यादतिक्रामति प्रसङ्गः । २२०

मक० । भगवति

श्लाघ्यान्वयेति नयनोत्सवकारिणीति
निर्व्यूढसौहृदभरेति गुणोज्ज्वलेति ।
एकैकमेव हि वशीकरणं गरीयो
युष्माकमेवमियमित्यथ किं ब्रवीमि ॥ २२५

काम० । वत्स माधव ।

माध० । आज्ञापय ।

काम० । वत्से मालति ।

माला बहूनां हेतूनां निर्देशः साध्यसिद्धये ॥ इति ।

२२२—२२५. श्लाघ्यान्वयेत्यादि । उज्ज्वलकुला । चक्षुःप्रीतिजननी रूपवती । उपचितसौहार्दातिशयानुरक्ता । गुणोज्ज्वला शीलादिमती । एतत्सर्वं वशीकरणमस्त्येव गुरुतरम् । एवं सति युष्माकमियमिति हेतोरनन्तरं किं ब्रवीमि । अतः परं न वाच्यमस्तीत्यर्थः । इतिकारचतुष्टयं स्वरूपोपदर्शनाय । तथा च त्वदभ्यर्थना सहजसिद्धैवेति भावः । इह प्रसिद्धिनामा नाटचालंकारः । यदाह ।

वर्णने वस्तुनो यत्तु गुणस्योत्कीर्तनं भवेत् ।
प्रसिद्धिरिह सा ज्ञेया नाटके कथिता बुधैः ॥ इति ।

---

२२०. मक° for माध° N. ; निवारयन् A. धारयन् O. for वारयन् ; B. N. om. वारयन् ; B. K2. O. om. अहो; क्रमादति before प्रसङ्गः N.

२२३ °मयीति N. दर्शेति O. for भरेति.

२२५ काम°। वत्स माधव । माध°। आज्ञापय । काम°। स्वीक्रियतामियम् । माल°। हद्धी हद्धी अज्जगाजणविरुद्धं किं उण उवण्णस्सदि । and पुत्रि कातरे-अम्ब (the portion previously omitted, ll. 191-203) after ब्रवीमि N.

२२६. B. C. E. om. माधव.

२२८. B. C. E. om. मालति; मालति लवङ्गिके Bh. K1. मा-तील-के K2. O. for मालति.

माल० । आणवेदु भअवदी ।(क)

२२० काम० । प्रेयो मित्रं बन्धुता वा समग्रा
सर्वे कामाः शेवधिर्जीवितं वा ।
स्त्रीणां भर्ता धर्मदाराश्च पुंसा-
मित्यन्योन्यं वत्सयोर्ज्ञातमस्तु ॥

मक० । अथ किम् ।

२२५ लव० । जधा तुम्हे आणवेध । (ख)

काम० । वत्स मकरन्द त्वमनेनैव वैवाहिकेन मालतीनेप-

(क) *आज्ञापयतु भगवती ।
(ख) †यथा यूयमाज्ञापयथ ।

२३०—२३३. प्रेय इत्यादि । वत्सयोर्मालतीमाधवयोरन्योन्यमेतद्विदितमस्तु यत्स्त्रीणां भर्ता प्रेयः प्रियतमं वस्तु मित्रं सुहृद्बन्धुता बन्धुसमूहः सर्वे ईप्सिताः समग्रा मिलिता शेवधिर्निधिर्जीवनं च । पुरुषाणां धर्मदाराः पाणिगृहीताः प्रेय इत्यादि ॥ बन्धुतेत्यत्र ग्रामजनबन्धुसहायेभ्यस्तलिति समूहे तल् ॥ निधिर्नो शेवधिरित्यमरः ॥ अनेन गान्धर्वविवाहो दर्शितः । स चानुरागमूलत्वाच्छ्रेष्ठः । यदाह ।

अनुरागात्मकत्वेन गान्धर्वः श्रेष्ठतां गतः । इति ।

२३७—२५४. परिवर्तस्व परिवृत्य गच्छ । जवनिका पिधानप-

---

२२९. लव° । A. N. उभे । Bh. K1. K2. O. for माल° ।; °वती for °वदी Bh.
२३१. संपदो for शेवधिः N. O. च for वा A. Bh. C. E.
२३४. माध° for मक° N.
२३५. भअवदी C. E. भअवदि A. B. before जधा; जह B. N. जहा Bh. K1. for जधा ; B. C. E. om. तुम्हे; आणवेदि for आणवेध C. E.
२३६. B. om. मकरन्द ; N. om. त्वं ; B. K1. om. एव ; वैवाहिकनैपथ्येनापवारितः प्रवर्तस्व परिणयाय आत्मनः for वैवा–त्मानं N.; K1. K2. om. मालती.
* Com. has लव° वा° before this. † Com. with A.

थ्येन प्रसाधितः परिणाययात्मानम् । इति पेट्टालकमर्पयति ।

मक० । यथाज्ञापयति भगवती । यावदितश्चित्रजवनिकामन्तर्धाय नेपथ्यं धारयामि । तथा करोति ।

माध० । भगवति सुलभबहुनर्थमतिसंकटमिदं वयस्यस्य । २४०

काम० । आः कस्त्वमस्यां चिन्तायाम् ।

माध० । एवं भगवत्येव जानाति ।

टः । तत्रान्तर्धानम् । स्त्रीणाममे स्त्रीवेषादिकरणेनौचित्यात् । मालत्यस्मि संवृत्त इत्यनेन वैमूढकनामा भाव उक्तः । यदाह ।

वैमूढकं तु लास्यं स्यात्पुंसः स्त्रीवेषधारणम् ॥ इति ।

सस्मितमिति क्रियाविशेषणम् । मुहूर्तमित्यनेनानन्तर एव विच्छेद उक्तः । कामयिष्यत इत्यनेन परावृत्तावतारः कृतः । अनुपलम्भार्थमाह । वृक्षगहनेनेति । गहनेन वनेन विषमेन वा ॥ गहनं विषमे त्रिष्विति विश्वः ॥ उद्वाहमङ्गलं विवाहार्थं कर्म । गाढेत्यादि । तद्भुवो भागा उद्यानवाटिकायाः प्रदेशा वां युवयोः श्रेयः शृङ्गारादिकं विधास्यन्ति शृङ्गारस्योपवनविहरणजन्यत्वात् । यदाह ।

उपवनगमनविहारैः शृङ्गाररसः समुद्भवति ॥

---

२३७. °धितशरीरः for °धितः E.; परिवर्तस्व after प्रसाधितः K2; परिणय for परिणायय A. Bh. C. E. K1. K2. O.; N. om. इति; पेट्टालम् A. पिट्टालकम् B. Bh. पट्टालकम् C. पेटलकम् K1. K2. पटलकम् N. पेटालकम् O. for पेट्टालकम्.

२३८. यदा° for यथा° A. K1. K2. N.; °यसि for °यति N.; N. om. भगवती; एतत् for इतः Bh.; यवनिका° for जवनिका° N.; °कायाम् for °काम् Bh. K1.

२३९. °धाय्य for °धाय N.; नैपथ्यं for नेपथ्यं N.; रचयामि for धारयामि B.; °रोमीति निष्क्रान्तः for °रोति Bh.

२४०. सुलभमपि वञ्चनं व° Bh. सुलभमपि वचनं व° K1. K2. सुलभमपि व° N. O. for सु-व°; Bh. K1. K2. om. अनर्थम्; Bh. K1. K2. N. om. अति; Bh. K1., K2. N. om. इदं; इति after वयस्यस्य. B.

२४१. N. O. om. आः.

२४२. Bh. K1, K2. O. om. एव.

प्रविश्य मकरन्दः । विहसन् । वयस्य मालत्यस्मि । सर्वे स-कौतुकं पश्यन्ति ।

२४५ माध० । मकरन्दं परिष्वज्य सोपहासम् । भगवति कृतपुण्य एव नन्दनो यः प्रियामीदृशीं कामयिष्यते ।

काम० । वत्सौ मालतीमाधवौ इतो निर्गत्य वृक्षगहनेन गम्यतामुद्वाहमङ्गलार्थमस्मद्विहारिकायाः पश्चादुद्यानवाटः ।

कीदृशाः । ताम्बूली पर्णलता तासां समूहैः पिनद्धा वेष्टिताः फलिनाः फलयुक्ता अत एवानता क्रमुकवृक्षा येषु ते ॥ सापेक्षकत्वेपि गमकत्वात्समासः ॥ कीदृशैः । गाढोत्कण्ठा यस्याः सा च कठोरा तृतीययौवनवयाः केरलदेशवधूस्तस्याः कपोलवदवपाण्डुरीषद्धूसरश्छदः पत्रं येषां तैः ।

रतिसंभोगे दक्षा प्रतिपक्षासूयिका गुणाढ्या च ।
अनिभृतगर्वितचेष्टा सा विज्ञेया तृतीया तु ॥

इति भरतः । अत एवोत्कण्ठाधिक्यम् । केरलदेशजत्वेन गौरत्वमुक्तम् । अतः पीतिमसंबन्धाच्छ्वेत ईषत्पाण्डुरत्वम् । यदाह ।

सितपीतसमायोगादीषत्पाण्डुरिति स्मृतः

पिनद्धेति वष्टि भागुरिरलोपमित्यलोपे रूपम् । फलिन इति फलवर्हा-

---

२४३. मालतीविशेषधारी before मक° C.; विहस्य for विहसन् Bh. K1. N.; B. om. विहसन् ; N. O. om. वयस्य : संवृत्ता B. संवृत्तः Com. after अस्मि.

२४४. °विस्मयं च for °कौतुकम् N.; सकौतुकस्मितं for स-कं O.

२४५. Bh. K1. K2. N. O. om. मकरन्दं ; Bh. K1. K2. N. O. om. सोपहासम् .

२४६. एष for एव K1. K2.; यतः for यः N.; प्रियवयस्यमीदृशं for प्रियामीदृशीं N. O.; एतादृशीं for ईदृशीं Bh. K1. K2.; मनसा मुहूर्तमपि A. N. मनसापि O. before काम°; °ष्यति for °ष्यते A. B.

२४७. गहनं B. गहने Bh. C. K1. K2. for गहनेन.

२४८. निर्गम्यताम् for गम्यताम् A.; अस्ति च तत्र विहाराय for अस्म-याः N.; वाटिकायाः A. वाटिकायां B. for विहारिकायाः.

सुविहितं तत्र वैवाहिकं द्रव्यजातमवलोकितया । भूयश्च

गाढोत्कण्ठकठोरकेरलवधूगण्डावपाण्डुच्छदै- २५०
स्ताम्बूलीपटलैः पिनद्धफलितव्यानम्रपूगद्रुमाः ।
कङ्कोलीफलजग्धिमुग्धविकिरव्याहारिणस्तद्भुवो
भागाः प्रेङ्खितमातुलुङ्गवृतयः प्रेयो विधास्यन्ति वाम् ॥

गत्वा च तत्रैव मकरन्दमदयन्तिकागमनं यावत्स्थातव्यम् ।

भ्यामिनञ्मत्वर्थीयः ॥ तथा कक्कोलीफलस्य जग्ध्या भक्षणेन मुग्धाः प्रीता ये विकिराः पक्षिविशेषास्तेषां व्याहार उक्तिर्येषु ते ॥ कक्कोली बदरी कोलीत्यनेकार्थः ॥ भूमिं नखैर्विलिख्य ये चरन्ति ते विकिराः ॥ नगौको वाजिविकिरविष्किरपतत्रय इत्यमरः ॥ अदो जग्धिः ॥ व्याहार उक्तिर्लपितामित्यमरः ॥ तथा प्रेङ्खिता वातेन चालिता मातुलुङ्गवृतिर्वेष्टनं येषु ते । तथा चैवंविधनानागुणवनगमनेन सर्वमनोरथसिद्धिस्ते भविष्यतीति भावः । मातुलुङ्गश्छोलङ्गवृक्षः ॥ रुचकौ मातुलुङ्गक इत्यमरः ॥

२५५–२६२. कल्याणान्तरावतंसा मकरन्दविवाहकल्याणभूषणा माधवविवाहसंपत्तिः । कलहंसकवाक्ये [दिष्ट्येत्यादि] । मकरन्दवि-

---

२४९. संविहितं Bh. संनिहितं C. विहितं E. संविहितः K1. सुविहितः K2. सुसंविहितं O. for सुविहितं ; च before तत्र B. C. E. ; एव after तत्र A. K2. N. ; B. om. वैवाहिकं ; °हिक for °हिकं A. ; मङ्गल for द्रव्य K1. K2. ; सर्व संपादितमास्ते after °तया. A. Bh. K1. K2.

२५१. फलिन for फलित A. Bh. E. ; व्यानद्ध for व्यानम्र Bh.

२५२. कक्कोली Bh. Com. तङ्कोली N. for कङ्कोली.

२५३. भोगाः for भागाः O. ; मातुलङ्ग A. मातुलिंग B. C. E. K1. O. for मातुलुङ्ग ; श्रेयो for प्रेयो B. Bh. K1. K2. O.

२५४. अतः N. यतः O. for गत्वा : Bh. K1. N. O. om. च ; B. om. एव, मदयंतिकामकरंदयोरागमनं for मक-मनं N. ; मंगल for आगमनं. B. E.

२५५ माध० । सहर्षम् । कल्याणावतंसा हि कल्याणसंपदुपरिष्टाद्भवति ।

कल० । दिट्ठिआ एव्वं पि णो भविस्सदि । (क)

मक० । कथं संदेह एवात्र भवतः ।

लव० । सुदं पिअसहीए । (ख)

२६० काम० । वत्स मकरन्द भद्रे लवङ्गिके इत इतः प्रतिष्ठामहे ।

(क) दिष्ट्या एवमपि नो भविष्यति ।

(ख) श्रुतं प्रियसख्या ।

वाहेनाप्यस्माकं प्रमोदः स्यादित्यर्थः । संभोगार्थं विजनकरणाय कर्तव्यमकरन्दविप्रलम्भार्थं च सर्वेषां निष्क्रमणमाह वत्स इत्यादि । [माल० वा०] सखि त्वयापि गन्तव्यम् । एकाकिन्या मयात्र कथं स्थातव्यमिति भावः । [ल० वा०] सांप्रतं खलु वयमत्रावशिष्यामहे । यूयं सर्व एव स्वार्थं चलिता इत्यर्थः ।

२६५–२६८. आमूलेत्यादि । अस्या रम्यं हस्तं हस्तेन गृह्णामि । यथा सरस्या ईषद्रक्तपद्मं मनोज्ञं हस्ती करेण स्थूलहस्तेन गृह्णाति तथे-

---

२५५. Bh. K1. K2. N. O. om. सहर्षं ; N. O. om. कल्या-हि ; °णान्तरावतं° A. K1. K2. °णान्तरवत Bh. for °णावतं° ; °दुपर्युपरि for उपरि° Bh. K1. K2.

२५७. दिट्ठिआ K1. O. कहं N. for दिट्ठिआ ; एदं A. Bh, K1. K2. एवं O. for एव्वं ; B. Bh. E. K1. om. णो भोदि for भ-दि C.

२५८. माध° for मक° A. ; असंदेह for संदेह O. ; N. om. एवात्र ; भगवत्याः for भवतः O.

२५९. तुए for पिअसहीए B. ; पिय for पिअ O.

२६०. वत्से for भद्रे A. B. C. E. ; N. O. om. one. इतः ; प्रविशामः for प्रतिष्ठामहे Bh.

माल० । सहि तुए वि गन्तव्वं । (क)

लव० । विहस्य । संपदं क्खु अम्हे एत्थ उवराम । (ख)

इति निष्क्रान्ताः कामन्दकीलवङ्गिकामकरन्दाः ।

माध० । अयमहमिदानीम् ।

आमूलकण्टकितकोमलबाहुनाल- २६५
मार्द्राङ्गुलीदलमनङ्गनिदाघतप्तः ।

(क) सखि त्वयापि गन्तव्यम् ।

(ख) सांप्रतं खलु वयमत्रावशिष्यामहे ।

त्यर्थः । कोमलाङ्ग्याः कर ईषद्रक्त एवेति साम्यम् । कीदृशम् । आमूलं कक्षादेशपर्यन्तं कण्टकितो रोमाञ्चितः कोमलो बाहुरेव नालं यस्य तम् ॥ कण्टकः क्षुद्रशत्रौ च रोमाञ्चेपि च दृश्यत इति विश्वः ॥ आर्द्राङ्गुल्य एव दलानि पत्राणि यस्य तम् । रोमाञ्चितत्वार्द्रत्वे सात्त्विकभावात् । अहं कीदृशः । अनङ्ग एव ग्रीष्मस्तेन तप्तः । तथा च कामतापप्रशान्त्यर्थं करग्रहणमित्यर्थः । पद्मस्याप्युद्भूततया तस्य कण्टकितकोमलनालत्वमार्द्रपत्रत्वंच भवति । गजोपि ग्रीष्मतप्तः । पद्मपक्ष आमूलं कन्दपर्यन्तम् । तदनेनानन्तरकर्तव्यताध्यवसायस्य धैर्यमुक्तम् ।

---

२६१. लवंगिए before तुए Bh. K1. K2.; गंदव्वं for गन्तव्वं B. Bh. K1.

२६२. O. om. क्खु; खु for क्खु Bh. K1. K2.; वअं for अम्हे A.; उवचरामो A. तुवरामो B. E. K1. K2. उचरामो C. O. अवसरामो N. for उवराम.

२६३. O. om. इति; निष्क्रान्ता काम-रन्दश्च B. C. E.

२६४. इदानीमहं for अहमिदानीं O.

अस्याः करेण करमाकलयामि कान्त-
मारक्तपङ्कजमिव द्विरदः सरस्याः ॥

इति निष्क्रान्ताः सर्वे ।

२७० ॥ चोरिकाविवाहो नाम षष्ठोऽङ्कः ॥

सूते स्म यं रत्नधरः पवित्रः पवित्ररूपा दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेऽङ्कः षष्ठोगमद्भव्यरसाधिवासः ॥

॥ इति षष्ठोऽङ्कः ॥

---

२६९. N. om. सर्वे.

२७०. मालतीमाधवे चोरिकाविवाहो नाम A. मालत्युपहारो नाम B. मालतीमाधवे मालती-स्वयंवरो नाम Bh. श्रीमालतीमाधवे नाटके चोरिकाविवाहो नाम K2. for चोरि-म; C. E. N. O. om. चोरिकाविवाहो नाम ;] समाप्तः after अङ्कः C.

॥ सप्तमोऽङ्कः ॥

ततः प्रविशति बुद्धरक्षिता ।

बुद्ध० । अम्महे सुसिलिट्ठमालदीणेवच्छलच्छीविप्पलद्धणन्दणकिदकरग्गहो अमच्चभूरिवसुमन्दिरे भअवदीवअणसंविहाणेहिं खेमेण गोवाइदो मअरन्दो । अज्ज अम्हे पि णन्दणावासं

(क) अम्महे सुश्लिष्टमालतीनेपथ्यलक्ष्मीविप्रलब्धनन्दनकृतकरग्रहोमात्यभूरिवसुमन्दिरे भगवतीवचन*संविधानैः क्षेमेण गोपायितो मकरन्दः । † अद्य वयमपि नन्दनावासमुपगताः । ततो भगवती नन्दनमापृच्छ्य गतावसथम् । अयं च नववधूगृहप्रवेशविरचिताकाल-

---

अधुना मालतीरूपधारिणा मकरन्देन कथं नन्दनविप्रलम्भो मदयन्तिकाहरणं च कृतं भवेदिति प्रबन्धाभिधानाय नियुक्तैव तत्र मयेत्यादिना प्रथमाङ्कसूचितबुद्धरक्षिताप्रवेशः ।

२-१४. अत्र माधववविवाहनिर्वाहाद्धर्षाश्चर्येम्महेशब्दः । सुश्लिष्टत्वं मकरन्दस्य गौरत्वाददमभुलत्वादिना मालतीसाम्यात् । भगवतीति

---

१. प्रविश्य for ततः प्रविशति. N.

२. अम्महे for अम्महे K1. O.: सुसलिड for सु-ट्ठ Bh.; मालती for मालदी O.: °वन्थ C. K1. K2. °पन्थ B. °पच्छ N. for °वच्छ; लक्ष्मी for लच्छी Bh. O.

३. Bh. N. om. किद; N. om. अमच्च; °वदीए for °वदी N.; °हाणेण A. N. °धाणेहिं. K1. K2. °हाणएहिं O. for °हाणेहिं.

४. खेमेण for खेमेण B.; गोपा° for गोवा° E.; अज्ज after गोवाइदो N.; मकरन्द for मअरन्दो K2.; C. om. मअरन्दो; नृत्यति A. इति नृत्यति Bh. K1. K2. before अज्ज; अम्होहि for अम्होपि N.; Bh. K1. K2. O. om. अम्हि, इमं A. Bh. K1. K2. O. समं N. before णन्दणा°.

* संविधानेन Com. † अथच वयमिमं नन्दनावसथमुप° Com.

५ उवगदा । तदो भअवदी णन्दणमापुच्छिअ गदा आवसहं । अअं च णववहूघरप्पवेसविरइदाकालकोमुदीमहूसवप्पउत्तिपज्जाउलासेसपरिअणो पदोसो अणुऊलइस्सदि अज्ज णो ववसिदं । संपदं तुवरन्तकामो कामिणिं कामेदुं बहुसो सपादवन्दणं

कौमुदीमहोत्सवप्रवृत्तिपर्याकुलाशेषपरिजनः प्रदोषोनुकूलयिष्यत्यद्य नो व्यवसितम् । *सांप्रतं त्वरमाणकामः कामिनीं कामयितुं बहुशः सपादवन्दनमभ्यर्थ्य पुनरपि बलात्कारेणाभिद्रवन्मकरन्देन निष्ठुरं प्रति-

---

भगवत्यैवालंकृत्य प्रहित इत्यर्थः । क्षेमेण कुशलेन । एतत्तु केनाप्यनुपलम्भात् । गोपायितो गुप्तीकृतः । आपृच्छ्य संवादं कृत्वा । तत्र नन्दन गृहं गच्छामीति तद्भवाननुमन्यतामिति संवादः । आपृच्छिः संवादार्थ इति शाब्दिकाः । अत एवापृच्छस्व प्रियसखममुमिति मेघदूतादौ टीकाकृता तथैव विवृतमित्यवधेयम् । आवसथं गृहम् । कौमुद्याश्चिनपूर्णिमात्रतम् । यद्वा । कार्तिक्यां चन्द्रमण्डलपूजा कौ-

---

५. गआ N. उपणदा O. for उवगदा; तत्थ after °गदा Bh.; भ-दी तदो for त-दी Bh. N.; आउच्छिअ Bh. K1. आउच्छिआ K2. आउच्छिय O. for आपुच्छिअ ; णिअवासं गआ for ग-हं N. ; गदा after आव° instead of before, O. ; °सधं for °सहं. Bh. K1. K2. O.

६. अण्णं for अअं A. B.; N. om. च; वधू for वहू K1.; गिह A. B. C. E. घर O. for घर; °इआ for °इदा N.; O. om. महूसव; पमत्त Bh. C. K1. K2. N. for प्पउत्ति.

७. °व्याउला° for °ज्जाउला° K2.; एसो after परिअणो B.; पउसो Bh. पओसो K1. K2. पओसो N. प्पदोसो O. for पदोसो; अणुकूल° K1. O. °णुकूल° K2. for अणुऊल°; °यिस्सदि for °इस्सदि K2 ; Bh. K1. K2. om. अज्ज; K1. K2. om. णो; व्यव° for वव्व° A. E.

८ क्खु A. खु Bh. K2. O. after संपदं; O. om. कामिणिं-सो; Bh. E. K1. N om. कामिणिं; °णीं for °णिं A. C. K2.; कामेद्धं for कामेदुं K1.; वहुसो Bh. वहुस K2. for वहुसो; N. om. वहुसो; वाद for पाद B. E. K1 K2.; पडनं Bh. पडणं N. वडणं O. for वन्दणं.

*Com. with A.

अब्भत्थिअ पुणो वि बलामोडिअ अहिहवन्तो मअरन्देण णिहुरं पडिहदो जामादा। तदो सो क्खु अधिअवेलक्खखलन्तअक्खरो १०
रोसणिब्भरदुःक्खिदो मदप्पप्फुरन्तणअणो ण मे संपदं तुए

हतो जामाता*। ततः स खल्वधिकवैलक्ष्यस्खलदक्षरो रोषनिर्भरदुःखितो मदप्रस्फुरन्नयनो न मे सांप्रतं त्वया कौमारबन्धवया प्रयोजन-

---

मुदीव्रतम्। तदुभयं च ग्रीष्मे प्रवृत्तमित्यकालकौमुदीत्युक्तम्। यद्वा। जननयनानन्दकत्वेन कौमुदीव कौमुदीति रूपकम्। कौमुदी चन्द्रज्योत्स्ना यथाकालसंभवा संध्याकालीना वर्षर्तुभवा जनानन्दाय तथेयमपीत्यर्थः। अः केशवस्तस्य कालो वर्षाकालः संध्याकालश्च॥ प्रदोषो रजनीमुखमित्यमरः॥ व्यवसितं मदयन्तिकाविवाहरूपम्। अन्यकार्यव्यावृत्ते जने तदप्रत्यूहं निर्वहेदिति भावः। त्वरमाणेति विलम्बासहकामावेश इत्यर्थः। तिरस्काराद्वैलक्ष्येण स्खलन्नक्षरैः सह स्वरो यस्य सः। रोषेण निर्भरं व्याप्तम्। खुलुङ्क्तिमिति पाठे

---

९ अभ° for अब्भ° Bh.; °छिअ Bh. °च्छिअ C. °च्छिय O. for °त्थिअ; Bh. N. O. om. वि; वला° for बला Bh.; °मोडिआ K2. °मोडिएण N. for °मोडिअ; अभि for अहि Bh. K2. N. O.; दवन्तो for हवन्तो A. C.; णिद्दुर for णिहुरं A.

१०. अहि° N. अभि° O. for पडि°; जामाता Bh. जामादरा C. for जामादा; A. Bh. N. om. तदो; स for सो A. K2.; अ A. K2. खु Bh. O. for क्खु; K1. N. om. क्खु; Bh. N. om. अधिअ; दर after अधिअ A. K2.; वैलख्ख B. K2. N. विलख्ख O. for वेलक्ख; खलदक्षरवैलक्ख for वे-क्खरो Bh.; रोस after °लक्ख B. E. K1. K2.; N. O. om. खलन्तअक्खरो; °न्तक्खरसुरो for °न्तअक्खरो K2.

११. B. C. E. have सरोस for रोस; °रदुखिदो Bh. °रोखुत्ताङ्किदओ K2. °रोवरुद्ध O. for °रदुक्खिदो; रुदिअ A. रुण Bh. र(रु?)ण्ण K2. रुद्दद N. for मद; O. om. मद; पप्फु° A. B. C. K2. N. पफु° Bh. प्फु° K1. O. for प्पप्फु°; वअणो Bh. K2. N. वयणो O. for णअणो; सरोसणिब्भरदुक्खिदो मदप्पफुरंतणअणो in margin, O.; तुए संप्पदं for सं-ए O.; तुमए A. इमाए N. for तुए;

* जामाता। स चाधिकतरवैलक्ष्यस्खलदक्षरस्वरो रोषनिर्भरसंशुष्यितारुदितप्रस्फुरद्वदनो Com.

कौमारबन्धईए पओअणं त्ति ससवहं पइण्णं काउण वासभवणादो णिग्गदो त्ति। एदिणा पसङ्गेण मदअन्तिअं आणीअ मअरन्देण सह संजोजइस्सं। (क)

इति निष्क्रान्ता। प्रवेशकः।

इति सशपथं प्रतिज्ञां कृत्वा वासभवनान्निर्गत इति। एतेन प्रसङ्गेन मदयन्तिकामानीय मकरन्देन सह संयोजयिष्ये।

खुलुङ्कितं मौनम्। खुलुङ्कितमाहुर्मुखसंकोचं च काव्यविद इत्यभिधानात्। कौमारबन्धकी वेश्या। माधवानुरक्तत्वात्। तदत्र नन्दनस्य विवाहदिन एव बलादभिद्रवणेनाधार्मिकत्वम्। कामशास्त्राविज्ञत्वं च दर्शितम्। यदाह।

सुकुमाराः पुरूषाणामाराध्या योषितः सदा।
अनिच्छया प्रवृत्तश्चेच्छृङ्गारं नाशयेद्रसम्॥

बन्धकीति परुषवाक्येन दुराचारत्वमप्यस्य। यदाह।

ताडनं बन्धनं वा यो न विमृश्य समाचरेत्।
ब्रूते परुषवाक्यं च दुराचारः स उच्यते॥

प्रसङ्गेन संविधानकेन। एतेन सूचनात्प्रवेशः।

---

१२. बन्धइए for बन्धईए Bh.; प्पओ° for पओ° O.; पडअणित्ति for प-त्ति Bh.; ति for त्ति K1. O.; °सवधं Bh. °सपहं N. for °सवहं; पडिण्णं B. K1. पडिण Bh. पडिण्णां K2. प्पदिण्णं O. for पइण्णं; कदुअ B. काऊण Bh. K1. K2. कदुय O. for काउण.

१३. विणिग्ग° Bh. विण्णोग्ग° K1. for णिग्ग°; N. om. त्ति; ता एदेण for एदिणा N.; प्पसंगेण for पसङ्गेण O.; °अन्दिअं for °अन्तिअं K2.; आणिअ Bh. K1. K2. आणिय O. for आणीअ.

१४. सयं for सह N. O.; संजोइस्सं B. जोजइस्सं K1. जोजयिस्सं K2. संयोजइस्सं O. for संजोजइस्सं; त्ति after °इस्सं N.

१५ N. O. om. इति; परिक्रम्य after इति Bh. K1. K2.

ततः प्रविशति शय्यागतो मालतीवेशो मकरन्दो लवङ्गिका च।

मक०। लवङ्गिके अपि नाम बुद्धरक्षितासंक्रान्ता भगवतीनीतिर्विजेष्यते।

लव०। को संदेहो महाभाअस्स। किं बहुणा जहा एसो २० मञ्जीरसद्दो सुणीअदि तहा जाणामि तेण ववदेसेण

(क) कः संदेहो महाभागस्य*। किं बहुना यथैष मञ्जीरशब्दः श्रूयते तथा जानामि† तेन व्यपदेशेनानीता बुद्धरक्षितया मद-

---

१६–२३ सुप्रस्य प्रवेशो भरतनिषिद्ध इति शय्यागत इत्युक्तम्। भगवतीनीतेरव्यभिचारित्वेप्याश्रयभेदात्तदाशङ्क्याह। अपीति संभावनायाम्। अव्यभिचारित्वमेवाह। लवङ्गिकावाक्ये। कः संदेहोत्र महानुभावस्य। मदयन्तिकापरिणयोवश्यं भावीति भावः।

---

१६ गत for गतो K2.; Bh. N. om. मालतीवेशो; °वेषो for °वेशो K1 K2. O.

१७. उपविष्टा Bh. उपविष्टा च K1. K2. before लव°; K1. K2. om. च at end.

१८. B. om. लवङ्गिके; इयं after नाम B.; K1. om. भगवती.

१९. °तिरविपर्येष्यति A. °तिर्विजेष्य Bh. °तिर्न विपर्येष्यते C. °तिर्विपर्येष्यते E. °तिः संपत्यते O. for °तिर्विजेष्यते.

२०. कहं for को N. O.; A. B. C. E. have एत्थ before महा;° °णुभाअस्स A. B. °णुभावस्स C. E. °भागस्स K2. भाअ N. for °भाअस्स; सा क्खु निपुणा for किं बहुणा N.; बहुना for बहुणा K2.; जदा K2. जधा O. for जहा; Bh. K1. om. जहा.

२१. एस for एसो Bh. K1. K2. O.; सुणि° for सुणी° K1. K2.; तह K1. K2. तधा O. for तहा; तर्केमि for जाणामि A. Bh. K1. K2.; तेण तेणाव° for तेण वव° Bh.; व्यव° for वव° A. E. K2. O.

* महानुभावस्य Com. † तर्कयामि Com.

आणीदा बुद्धरक्खिदाए मदअन्तिआ त्ति । ता उत्तरीआववारिदो पसुत्तलक्खणो चिट्ठ । (क) मकरन्दस्तथा करोति ।

ततः प्रविशति मदयन्तिका बुद्धरक्षिता च ।

२५ मद० । सहि सच्चं जेव्व परिकोविदो मे भादा मालदीए । (क) बुद्ध० । अध इं । (ख)

यन्तिकेति । तदुत्तरीयापवारितः *प्रसुप्तलक्षणस्तिष्ठ ।

(क) सखि सत्यमेव †परिकोपितो मे भ्राता मालत्या ।

(ख) अथ किम् ।

अत्र किं बहुना भणितेनेत्यर्थः । मञ्जीरो नूपुरम् । व्यपदेशेन मालतीप्रबोधच्छलेन । उत्तरीयेत्युपरिवासः पिहिताङ्ग इत्यर्थः । लक्षेण व्याजेन । इह नर्मगर्भा कैशिकीवृत्तिः । यदाह ।

कार्यकारणतो यत्र नायको गोपयेत्तनुम् ।
नर्मगर्भः स कथितो नाटचवेदिभिरुत्तमः ॥

---

२२. आणिदा for आणीदा B. Bh. C. K1. K2. O.; °आए for °दाए N.; अंत्तिअं Bh. °अंतिए° C. E. K1. K2. °यंतिए° O. for °अन्तिआ; B. om. त्ति; °रीओवारिदो A. E. °रीअवारिदो B. °रीआवांतारिदो C. °रीयापवारिदो O. for °रीआववारिदो.

२३. Bh. om. प-णो; सुत्त for पसुत्त N. O.; लख्खणो A. C. N. लक्खो E. लच्छणो B. Bh. लख्खेण O. for लक्खणो; चिट्ठदु A. चिष्ट Bh. for चिट्ठ.

२४. °ज्ञातो for °ज्ञाति O.; बुद्ध° मद° for मद° बुद्ध° K1. K2.; °क्षिते for °क्षिता O.; O. om. च.

२५. सच्च for सच्चं Bh. K1.; भ्भादा for भादा O.

२६. अह for अध N.; इ for ई K1.

* सुप्तलक्षेण Com. † Com. om. परि.

मद० । अहो अच्चाहिदं । ता एहि वामसीलं मालदिं निब्भच्छेम्ह । (क) परिक्कामतः ।

बुद्ध० । इदं वासभवणदुवारं । (ख) प्रविशतः ।

मद० । सहि लवङ्गिए जाणीअदि पसुत्ता दे पिअसही त्ति । (ग) १०

लव० । एहि मा णं पडिबोधेहि जदो एसा चिरं दुम्मणा-

(क) अहो अत्याहितम्। तदेहि वामशीलां मालतीं निर्भर्त्सयावः।

(ख) *इदं वासभवनद्वारम् ।

(ग) सखि लवङ्गिके† ज्ञायते प्रसुप्ता ते प्रियसखीति ।

(घ) ‡ एहि मैनां प्रतिबोधय §यत एषा चिरं दुर्मनायमानेदानीमे-

२७-२९ अत्रात्याहितमतिक्रमः । निर्भर्त्सयाम इति ।

त्रिरात्रं नायकं ज्ञात्वा वाचा हीनं तु कन्यका ।
पश्यन्ती स्तम्भवच्छन्नं निर्विशेत ततः परम् ॥

इति भरतानुरोधेन कन्याविस्रम्भपरे मे भ्रातरि व्यर्थमियं रुष्टेति निर्भर्त्सनमस्या इति भावः । बुद्धरक्षितावाक्ये । एतद्वासभवनद्वारम् । तत्प्रविशेति शेषः ।

३१-४० अत्र कथमस्माद्दुराचारात्स्थास्यामीति चिन्तया दौर्मनस्याच्चिन्ता । यदाह ।

---

२७. Bh. om. अहो; णं before वाम° KI. K2.; °शीलं A. C. E. सीलां B. for सीलं; निब्भच्छिअ before माल° N.; °दीं for °दिं C.; णिब्भछेम्ह Bh. K1. णिब्भत्थेम्ह K2. गच्छम्ह N. णिब्भच्छेम्ह O. for निब्भच्छेम्ह.

२८. इति before परि° Bh. K1. K2.

२९. एदं K1. एमं K2. इमं O. for इदं; °वणं for °वण Bh. K1. K2. N.; Bh. K1. K2. N. om. दुवारं; दुआरं for दुवारं O.; ता सहि प्रविसह after °वणं K2.; इति A. C. E. उभे K1. K2. N. before प्रविशतः

३०. जाणीहि दाव for जाणीअदि A.; सुत्ता for पसुत्ता O.; ते for दे B.; प्रिय for पिअ O.; °सहि for °सही Bh. O.; न वे° before त्ति A.; E. K1.K2. om.त्ति.

३१. सहि before एहि A. K1. K2. N.; सहि for एहि Bh. O.; एणं for णं K2.; पडिबोधिस्ससि Bh. पडिओधेहि E. पडिवेधेहि K1. प्पडिबोधायिस्सादि O. for पडिबोधेहि; Bh. N. om. जदो; हि before चिरं K2.; दुमाणा° for दुम्मणा° Bh.

* एतद् for इदं Com. †Com. with A. ‡सखि before एहि Com. §प्रतिबोधयिष्यसि एषा हि चिरं Com.

अन्ती दाणिं जेव्व ईस मण्णुं उज्झिअ पसुत्तेत्ति । तदो स-
णिअं इध जेव्व सअणुद्धन्ते उवविस । (घ)

मद० । तथा कृत्वा । सहि दुम्मणाअदि इअं वामसीला।(क)

३५ लव० । कहं णाम णववहूविस्सम्भणोवाअजाणुअं लडहं

वेषन्मन्युमुज्झित्वा*प्रसुप्तेति । ततः शनैरिहैव शयनो †र्ध्वान्त उपविश ।
(क) सखि दुर्मनायत इयं वामशीला ।
(ख) कथं नाम नववधूविस्रम्भणोपायज्ञातारं मनोहरं विदग्धम-

आलस्यदौर्मनस्यक्लेशश्रमचिन्तनस्वभावेभ्यः ।
रात्रौ जागरणादपि निद्रा मनुजे दिवापि संभवति ॥

तथा च दुःखहानाय निद्रयापि क्षणं नयत्वियमित्याशयः।अत्र विस्रम्भणं विश्वासमुत्पाद्य वशीकरणम् । लडहं मनोहरम् । विदग्धं कलाभिज्ञम् । नववधूविस्रम्भणोपायस्ताम्बूलादिदानम् । यदाह । बाला ताम्बूलमालाफ-लरससुरसाहारसंमानहार्येत्यादिकः सुप्रसिद्ध एव । प्रकृते तूपालम्भप-

---

३२. इदाणीं A. C. E. दाणीं K1. K2. for दाणिं; N. om. जेव्व; एसा K2; ईसि N. O. for ईस; माणं Bh. मण्णं K1. दण्णुं K2. मण्णे N. O. for मण्णुं; Bh. N. om. उज्झिअ; परिच्चइअ K1. परिच्चजइ K2. for उज्झिअ; °सुं° for °सु° O.; °त्तेति A. B. E. K1. °त्ताति Bh. °त्ता इति K2. for त्तेत्ति; इदो C. अदो N. for तदो; N. om. सणिअं.

३३. °रिअं for °णिअं Bh.; इह B. इद K2. एदस्सिं N. इदो O. for इध; N. om. जेव्व; अणुप्पन्ते B. सअणीअद्धन्ते Bh. K2. सअणुप्पन्ते A. C. सअणुप्पंतं E. सहणीअद्धंते K1. सअणद्धम्मि N. for सअणुद्धन्ते; उप for उव C.

३४. Bh. K1. N. O. om. सहि; कधं after सहि A.; °यदि for °अदि K2.; कधं Bh. कथं K1. किं N. after °अदि; K1. om. इअं.

३५. कधं A. O. कथं Bh. for कहं; ण before णव B.; वधू for वहू Bh. K1.; वीस° Bh. O. विस° K1. K2. for विस्स°; °म्भिणो° for °म्भणो°. K2.; °वाय for °वाअ K2.; जाणअं B. C. K2. ज्जाणुअं Bh. ज्जाणअं K1. जाणयं O. for जाणुअं; मनोहरं B. लडुहं C. लटह K2. for लडहं.

* त्यक्त्वा Com. † शयनीये Com.

विअड्ढमहुरभासिणं ससिणेहं अरोसणं अ दे भादरं भत्तारं समासादिअ सही ण दुम्मणाइस्सदि । (ख)

मद० । बुद्धरक्खिदे पेक्ख विप्पदीअं अम्हे वि उवालम्भीआमो । (क)

धुरभाषिणं सस्नेहमरोषणं च ते भ्रातरं भर्तारं समासाद्य* सखी न दुर्मनायिष्यते ।

(क) † बुद्धरक्षिते प्रेक्षस्व ‡विप्रतीपं वयमपि उपालभ्यामहे ।

रत्वाद्विपरीतार्थकत्वमिति भावः । विप्रतीपं विपरीतम् । पादपतितनन्दनाननुवर्तनान्मालत्येवोपालभ्या तदकरणाद्विपरीतत्वमिति भावः । पादपतनेनानुवृत्तौ भरतः ।

व्रीडायुक्तापि या योषिदतिरुष्टापि या भवेत् ।
पादे पतन्तं पुरुषमनुवर्तेत सर्वदा ॥

बुद्धरक्षितावाक्ये । विप्रतीपं न वा विप्रतीम् । तच्चित्तानुवर्तनेन स्वीकृतंयुक्त्या निराकरणेन न वैपरीत्यमिति भावः ।

---

३६. विअढ Bh. विअड्ढ K1. N. विरुद्ध K2. वियद्ध O. for विअड्ढ; B. om. विअड्ढ; महुरालाव N. महुरा° O. for महुर; भासणं for भासिणं C. O.; A. Bh. K1. K2. N. om. ससिणेहं; च for अ B.; अकाअरं दे for अ दे N.; दे भाअरं A. दे भ्भादरं O. for दे भादरं; दे after °दरं K2.; पाविअ for समासादिअ Bh. K1. K2.

३७. पिअ before सही A. Bh. E. K1. K2.; N. om. सही; E. om. ण; णो for ण B. O.; दुव्वाइस्सदि Bh. दुम्माइस्सदि K1. दुम्मणायिस्सदि K2. for दु-दि; मे पिअसही after °इस्सदि N.

३८. कहं before बुद्ध° N.; पेक्ख Bh. K1. K2. पेख्ख O. before बुद्ध° instead of after; °रक्खिदे for °रक्खिदे Bh. K1.; पेक्ख पेक्ख for पेक्ख A. B.; °दीतं B. °दीवं Bh. N. O. °देवं K1. K2. for °दीअं; K1. N. om. अम्हे वि; उआलंभीआमो C. उपालम्भीआमो K2. उवालद्धस्सि N. उवालंभणीआमो O. for उवालम्भीआमो.

*समासाद्य मे प्रियसखीं Com. † सखि before बुद्ध° Com. ‡ पश्य पश्य वयमेव Com.

४० बुद्ध० । विप्पदीअं ण वा विप्पदीअं । (क)
मद० । कधं विअ । (ख)
बुद्ध० । जं दाव चलणपडिदो भत्ता ण बहुमाणिदो एत्थ लज्जादोसेण एसो जणो उआलम्भणिज्जो । जं पिअसहि णव-

(क) विप्रतीपं न वा विप्रतीपम् ।
(ख) कथमिव ।

४२–४८ स्वाभिप्रायं गोपायितुं साधारणोक्त्या स्ववचो वदति [बुद्ध०] । अत्रेयमिति वक्तव्ये जन इत्यभिधानं मालतीमकरन्द-साधारण्यार्थम् । नववध्वा लज्जयातिक्रमेण दोषः । यदाह ।

नवपरिणीता योषिद्यत्नादपनीय साध्वसं सद्यः ।
विविधविनोदकथाभिर्विश्वासं नीयते सरसैः ॥

रभसोपक्रमः सहसा प्रवृत्तिः स च विरुद्धः । यदाह ।

सहसा वाप्युपक्रान्ता कन्याचित्तमविन्दता ।
साध्वसं त्रासमुद्वेगं सद्यो द्वेषं च विन्दति ॥
सा प्रीतियोगमप्राप्य तेनोद्वेगेन दुःखिता ।
पुरुषद्वेषिणी वा स्याद्विद्विष्टा वा ततोन्यगा ॥

४०. °दीतं B. °दीवं Bh. K1. N. O. °देवं K2. for °दीअं in both places; वा before ण Bh., at end E. N.; वि for वा A.; C. om. वा.

४१. कथं K1. कहं N. O. for कधं.

४२. °णपडिओ A. E. K1. °णोपणदो Bh. °नोपडिओ K2. °णाणदो N. °णणदो O. for °णपडिदो; वि after पडिदो A. B. C. E.; O. om. बहु; म-णिदो Bh. मण्णिदो N. for माणिदो; Bh. om. एत्थ-उज्झादो.°

४३. सो for एसो O.; ण after जणो A. C. E. N. O.; उवा° for उआ° Bh. K1. K2. N. O.; णं for जं O.; पि after जं A. C. E. K1.; प्पिय for पिअ O.

वहूविरुद्धरहसोवक्कमक्खलणवेलक्खविच्छडिदमहाणुभावत्तणस्स भादुणो दे वाआगदं किं वि अपरिट्ठाणं तेण तुम्हेत्ति। ४५
किं च। कुसुमसधर्माणो हि योषितः सुकुमारोपक्रमाः। तास्त्वनधिगतविश्वासैः प्रसभमुपक्रम्यमाणाः सद्यः संप्रयोगाविद्वेषिण्यो भवन्ति। एवं किल कामसुत्तआरा आमणन्ति। (क)

(क) यत्तावच्चरणपतितो भर्त्ता न बहुमानितोऽलज्जादोषेणैष जन उपालम्भनीयः। यत्प्रियसखि नववधूविरुद्धरभसोपक्रमस्खलनवैलक्ष्यविच्छर्दितमहानुभावत्वस्य भ्रातुस्ते वाचागतं किमप्य*परिस्थानं तेन यूयमिति। एवं किल कामसूत्रकारा आमनन्ति।

स्खलनमुपक्रान्तानिर्वाहः। विच्छर्दितं विशीर्णम्। अपरिस्थानकमपरिस्थितिः। अधैर्यमिति यावत्। यूयमुपालभ्या इति मदयन्तिकां प्रति वचनम्। भ्रातृपक्षप्रवेशात्। अस्मे इति पाठे बुद्धरक्षिता मदयन्तिकया सह स्वाभेदं मन्यमाना वयामित्याह। शिल्पकारित्वात्संस्कृताश्रयणम्। यदाह।

४४. साहसो° B. C. E. रभसो° N. for रहसो°; °पक्कम for °वक्कम K2. N. O.; विलक्ख for वेलक्ख° O.; विछडिअ Bh. K1. विच्छन्दिअ K2. विच्छंदिअ N. विभट्टिय O. for विच्छडिद; °भाअत्त° for °भावत्त° B. Bh.

४५ भादुणो for भादुणो O.; व° for वाआ° K2.; गयं B. गअं K2. N. for गदं; पि for वि B. Bh. K1. K2. O.; N. om. वि; अपडि° N. अवरि° O. for अपरि°; °ट्ठाणं Bh.. °त्थाणं K1. for ट्ठाणं; Bh. om. तेण तुम्हे त्ति; वि C. जाणीअदि अवरद्धा वि E. जाणीअदि किआवराहा N. जाणीयदि अवरद्धा O. after तेण; वअं B. अम्हे N. O. for तुम्हे; त्ति C. ति K1. O. for त्ति.

४६. अ N. य O. for च; संस्कृतमाश्रित्य before कुसुम° A. N.; कुसुमध° B. कुसुमसमध° N. for कुसुमसध°.

४७. E. om. तास्तु; च for तु A. Bh. K1. K2. O.; अधि° for अनधि° Bh.; प्रसभम् after उप° instead of before, O.; संप्रयोगे A. संयोग Bh. प्रयोग K2. for संप्रयोग; E. K2. O. om. वि.

४८ °रिपुर्दयद्वेषिण्यो after °षिण्यो N.; किर for किल Bh.; °आरो for °आरा Bh. K1. K2.; भणंति A. C. E. मंतेदि Bh. K1. K2. आमणंदि N. मंतंति O. for आमणन्ति.

* अपरिस्थानक Com.

लव० । सात्रम् । घरे घरे पुरिसा अम्मकाओ समुव्वहन्ति
५० ण क्खु को वि लज्जापराधीणं अणवरद्धं मुद्धलडहसहावं कुल-
कुमारीअणं पहवामि त्ति वाआणलेण पज्जालेदि । एदे क्खु दे हिअअसल्लणिक्खेवा आमरणं संभरिज्जन्तदूसहा पादिघरणिवास-

(क) गृहे गृहे पुरुषाः कुलकन्यकाः समुद्वहन्ति न खलु कोपि लज्जापराधीनमनपराद्धं मुग्धमुकुमारस्वभावं कुलकुमारीजनं *प्रभवामीति वाचानलेन प्रज्वालयति । एते खलु ते हृदयशल्यनिक्षेपा आमरणं

दिव्याया गणिकायाश्च शिल्पकार्यास्तथैव च ।
विदग्धायाः स्त्रिया भाषां संस्कृतेनापि योजयेत् ॥

यद्वा । कामसूत्रानुकरणात्संस्कृतभाषा । सधर्माणस्तुल्याः । उपक्रम आरम्भः । प्रसभं हठात् । संप्रयोगः सुरतम् । किल प्रसिद्धौ । कामसूत्रकारा मन्त्रयन्ते ।

५२–५६. अत्र निक्षेप आरोपणम् । जुगुप्सन्ते निन्दन्ति । दुःशीला

४९. पुरुसा for पुरिसा B. N.; कुलकण्णकाओ A. K2. कण्णआओ B. K1. कण्णकाओ Bh. अम्हगाओ N. for अम्मकाओ; उव्व° for समुव्व° Bh. K1. K2. O.

५०. हुं B. C. अ Bh. K1. K2. N. य O. for क्खु; पि for वि Bh.; वराधीणं B. पसाहणं Bh. N. पराहीणं C. प्पसाहणं O. for पराधीणं; °रद्धं B. °रद्ध Bh. °लद्धं E. for °रद्धं; A. om. मुद्ध; लड B. लडुह C. लड्ड E. for लडह; N. om. लडह.

५१. °रिआअणं Bh. K1. K2. °रीणं C. °रियाजणं O. for °रीअणं; पहरामीति A. पहवदि त्ति E. पहवामित्ति O. for प-त्ति; अणले for °णलेण B; प्पजालेदि Bh. पत्ताकुलेअदि N. प्पज्जालेदि O. for पज्जालेदि; खु for क्खु Bh. K1. K2.; E. om. दे; °न्देभि K1. ते O. for दे.

५२. निक्खेवा for णिक्खेवा A. B. N.; असरणं Bh. आमरण K2. N. for आमरणं; सुमरिज्जन्त A. Bh. समरिण्णंत B. संस्मरिज्जन्त K2. for संभरिज्जन्त; दुःसहा A. B. C. E. दुस्सहा K2. for दूसहा; आसा after °हा N.; Bh. om. पादि; पर for पदि B. C. E. K1. K2. O.

* प्रहरामीति Com.

वैरग्गकारिणो महापरिभवा जाणं कदे इत्थिआजम्मलाहं जुगुच्छन्ति बान्धवा । (क)

मद० । बुद्धरिक्खदे अदिदुम्मिदा पिअसही लवङ्किआ । ५५
महन्तो को वि मे भादुणा वाआवराधो कदो । (क)

बुद्ध० । अध इं । सुदं अम्हेहिं जधा ण मम तुए संपदं कौमारबन्धईए पओअणं त्ति । (ख)

---

*संस्मर्यमाणदुःसहाः पतिगृहनिवासवैराग्यकारिणो महापरिभवा येषां कृते स्त्रीजन्मलाभं जुगुप्सन्ते बान्धवाः ।

(क) †बुद्धरक्षिते ‡अतिदूना प्रियसखी लवङ्किका ।§महान्कोपि मे भ्रात्रा वाचापराधः कृतः ।

(ख) ¶अथ किम् । श्रुतमस्माभिर्यथा मम न त्वया सांप्रतं कौमारबन्धक्या प्रयोजनमिति ।

कन्या मा जायतामिति भावः । [मद० वा०] कथमन्यथात्युद्विग्नेयमि-

---

५१. °आरिणो for °कारिणो N.; °रिहवा B. K1. K2. O. °रिचा Bh. for °रिभवा; किदे B. किए N. भयेण O. for कदे; इत्ति° for इत्थि° K2.; जणाणं ज° B. °आणं ज° A. C. अणज° E. for °आज°; लावं for लाहं K2.

मद० । सहि मालदि विबुद्धासि । विलोक्य सहर्षसाध्व-
सम् । अम्मो अण्णं जेव्व किं पि एदं वट्टदि । (क)

न्दनं निर्भर्त्स्य सपादपतनमभ्यर्थ्य मालत्या उपर्यनुकूलयिष्यामि ।

(क) सखि मालति विबुद्धासि । अम्मो अन्यदेव किमप्येत†द्वर्तते ।

[बुद्ध० वा०] स्मरिष्यसीदं वचनम् । अत्र ॥ नाडी कालेपि षट्क्षण इत्यमरः ॥ षट्क्षणावच्छिन्नः कालो नाडी । द्वितीया नाडी द्वादशक्षणात्मकः कालः । मदयन्तिकामकरन्दसंघट्टनविषयस्य समाप्निपटहोयमित्यर्थः । यद्वा । द्वितीयनाडी द्वितीयभगिनी मालती तया सह विच्छेदो वियोगो यथोपक्रान्तसंबन्धविघटनमित्यर्थः । गृह्णाति मदयन्तिकामित्यर्थः । अत्राम्मो इति स्वच्छन्दप्रलपितस्वाभिप्रायानुतापे ।

---

१९४. Bh. O. om. ता; णं for णन्दणं Bh. N.; णिब्भवात्थिअ A. णिब्भच्छिअ Bh. णिब्भच्छिय O. for णिब्भच्छिअ; सपाअपडणं A. से पादपडणं B. C. E. सवादवडणं Bh. सपादवडणं O. for स-णं; वा K1. N. O. अ K2. after °डणं; अब्भछिअ Bh. अब्भथिअ K1. for अब्भत्थिअ.

१९५. अ after उवरि K1.; °कुऊलइस्सं Bh. °कूलइस्सं C. E. K1. O. °कूलयिस्सं K2. for °ऊलइस्सं; इति उत्थातुमिच्छति A. उत्थातुमिच्छति Bh. N. O. for इत्यु-ति.

१९६. हस्ते B. N. हस्तमस्याः Bh. K2. for हस्तेन.

१९७. विप्पबुद्धासि B. E. पबुद्धासि. Bh. प्पबुद्धासि C. विउद्धासि K1. K2. O. किं पडिबुद्धासि N. for विबुद्धासि; सहर्षं ससाध्वसं च for स-सम A. N.

१९८. अहो A. अम्मे Bh. अम्मो N. अम्महे O. for अम्मो; अण्णं for अण्णं Bh.; एव्व for जेव्व N.; Bh. om. जेव्व; किं वि for किं पि N.; एत्थ वसदि for ए-दि O.; A. B. Bh. om. एदं; वट्टइ for वट्टदि N.

* Com. om. एतत्.

मक० । रम्भोरु संहर भयं क्षमते विसोढु-
मुत्कम्पितं स्तनभरस्य न मध्यभागः । २००
इत्थं त्वयैव कथितप्रणयप्रसादः
संकल्पनिर्वृतिषु संस्तुत एष दासः ।

बुद्ध० । मदयन्तिकामुखमुन्नमय्य संस्कृतमाश्रित्य ।
प्रेयान्मनोरथसहस्रवृतः स एष
सुप्तप्रमत्तजनमेतदमात्यवेश्म । २०५

१९९–२०२ रम्भेत्यादि । हे रम्भोरु भयं त्यज । यतस्तव स्तनभारस्योत्कम्पं सोढुं मध्यभागो न क्षमते समर्थो न भवति । अतिकृशो मध्यदेशः कुचयोर्भयकम्पस्य भारं न सहत इति भावः । भयमिहापरिचितदर्शनात् । विकारमिति पाठे तव सकम्पस्य स्तन-भारस्य विकारं मध्यभागो न क्षमते । संकल्पसुखेष्वनेनोक्तप्रकारेण त्वयैव कथितप्रार्थनासंपत्तिरेषोहं संस्तुतः परिचितो दासो विधेयः । प्रणयः प्रेम तद्रूपो वा प्रसादः ।

२०४–२०७ प्रेयानित्यादि । प्रेयान्प्रियतमो मनोरथसहस्रैर्वृतः प्रार्थितो यस्त्वया संकल्पादिष्वनुभूतः स एष सोयमित्यर्थ इति प्रागनुरागोद्भेदः । अतः कृतज्ञतया पूर्वोपकारस्य स्मरणेनैव भद्रमभीष्टं

---

१९९. K2. om. मक°; विकारं Bh. N. O. न सोढुं C. for विसोढुं.

२००. उत्कम्पनं A. उत्कम्पिनः Bh. K2. N. उत्कंठितं C. उत्कम्पित K1. O. for उत्कम्पितं; च for न C.

२०२. संस्कृत for संस्तुत Bh.

२०३. लवंगिका for बुद्ध° B. Bh. C. E. K1. K2.; °काया मुखं for °कामुखं Bh. C. E. Kl. K2.; Bh. O. om. सं-त्य; अवलंब्य for आश्रित्य N.

प्रौढं तमः कुरु कृतज्ञतयैव भद्र-
मुत्क्षिप्तमूकमणिनूपुरमेहि यामः ॥

मद० । सहि बुद्धरक्खिदे कहिं उण अम्हेहिं गन्तव्वं। (क)

बुद्ध० । जहिं जेव्व मालदी । (ख)

मद० । किं णिव्वुत्तसाहसा मालदी । (ग)

(क) सखि बुद्धरक्षिते क्व पुनरस्माभिर्गन्तव्यम् ।

(ख) यत्रैव मालती ।

(ग) किं निर्वृत्तसाहसा मालती ।

विवाहरूपं कुरु । तत्र सामग्रीमाह । एतदमात्यगृहं केचित्क्षुप्राः केचित्प्रमत्ता जना यत्र तादृशम् । गाढं तमः । अन्धमिति पाठेन्धं करोतीत्यन्धम् । तम इत्यर्थः । उत्क्षिप्तमुत्क्षोलितमत एव मूकमशब्दं मणिप्रधानं नूपुरं यथा तथैहि यामः । विवाहसंपादनायेति भावः। तत्र क्षुप्रादिना गृहलोकानामदर्शनं प्रौढान्धकारतया बहिर्लोकानामदर्शनम् । नूपुरस्याप्यशब्दतया परवितर्काभाव इति गमनमप्रत्यूहं स्यादिति दर्शितम् ॥ प्रमत्त इति रदाभ्यां निष्ठातो न इति नत्वं न भवति न ध्याख्यापृमूर्छिमदामिति निषेधात् ॥

२०८-२१३ [मद० वा०] अत्रानेन मकरन्दसंमतिमाह । यत्रैव मालती । वर्तत इति शेषः । एतेनागामिनोङ्कस्यावतारः सूचितः ।

२०६. मनः for तमः O.; कृत for कुरु Bh.; एक for एव A.

२०७. उत्क्षिप्य for उत्क्षिप्त E.

२०८. Bh. O. om. सहि; °क्खिए for °क्खिदे N.; K1. om. कहिं उ°; ख्खु B. दाणिं O. for उण; N. om. उण; अम्हेहिं for अम्होहिं K1.; गंदव्वं A. B. O. गतव्वं K1. for गन्तव्वं.

२०९. पुव्वं before जेव्व A.; एव्व for जेव्व N.

२१०. C. O. om. किं; णिव्वुत्त for णिव्वुत्त Bh. K1. K2. O.

बुद्ध० । अध इं । अण्णं च । तुमं भणासि का अहं इमस्स (क) इत्यादि पठति । मदयन्तिकाश्रूणि पातयति ।

बुद्ध० । महाभाअ दिण्णो क्खु अत्ता पिअसहीए । (ख)

मक० । अद्योर्जितं विजितमेव मया किमन्य-
दद्योत्सवः फलवतो मम यौवनस्य २१५

(क) अथ किम् । अन्यच्च । त्वं भणसि काहमस्य ।

(ख) महाभाग दत्तः खल्वात्मा प्रियसख्या ।

[मद० वा०] अत्र पितृनैरपेक्ष्येण मालत्यात्मनिवेदनं यदि तदा ममापि तत्स्यादित्याशयः । [बुद्ध० वा०] अत्र च तथा प्रागेव मत्समक्षं त्वया मकरन्दायात्मा दत्तः । इदानीं कुतस्तेपास्यमित्याशयः । स्वगृहत्यागदुःखादश्रुपातेन सूचितात्मदानां मदयन्तिकामाह [बुद्धरक्षिता] । अत्र तुभ्यमिति शेषः ।

२१४–२१८ अद्येत्यादि । अद्योर्जितं सातिशयं कृत्वा मया विजितम् । सर्वकार्यसंपादनात् । सफलस्य मम यौवनस्याद्योत्सवः । अत एवान्यत्किम् । अपि तु न किमपि । साध्यमस्तीति शेषः ।

---

२१३. लव° for बुद्ध° C. O ; अथ किं Bh. अह इं N. for अध इं; मदयन्तिका before अण्णं K2.; अणं for अण्णं K1.; अ for च C. K2. N.; भणामि for भणासि A. C. E. K2. O.; C. E. om. अहं.

२१३. N. om. इमस्स; Bh. om. पठति.

२१३. महाणुभाअ C. महाभाग K2. O. for महाभाअ; दिण्णं for दिण्णो B. Bh. C. N. O.; खु for क्खु Bh. K1. K2. O. अत्ताणअं Bh. C. अत्ताणं N. अत्ताणयं O. for अत्ता; जलपुब्बं पिय for पिअ O.; गेण्ह C. पडिवज्जस्स. N. after सहीए.

२१४. सहर्षं Bh. सातिशयं K1. K2. after मक°; अति for अद्य A. B. Bh. C. E.; एतद् for अन्यद् O.

२१५. नव for मम O.

यस्य प्रसादसुमुखेन समुद्भृतेयं ।
देवेन बान्धवधुरा मकरध्वजेन ॥
तदनेन पक्षद्वारेण निर्गत्य साधयामः। निभृतं परिक्रामन्ति।
मक० । अहो निशीथनिःसंचाररमणीयता राजमार्गस्य ।
२२० तथा हि संप्रति
प्रासादानामुपरि वलभीतुङ्गवातायनेषु
भ्रान्त्वावृत्तः परिणतसुरागन्धसंस्कारगर्भः ।

यस्य मम बान्धवधुरा मित्रकृत्यं कामदेवेन सम्यग्धृता । प्रसन्नतया सुमुखेन । एवकारोप्यत एव । यदि माधवसंगतेयं स्यात्तदा मया सर्वाकारं जितं न स्यादिति भावः। कन्यावरणे बान्धवा एव भवन्ति।

यदाह ।

कन्याया वरणे माता पितरौ बान्धवा अपि ॥

पक्षद्वारं खडिक्किका ॥

२१९–२२४ अर्धरात्रनिशीथौ द्वावित्यमरः ॥ प्रासादानामिति । अयं वायुस्तरुणानां नूतनस्त्रीसमागमं प्रकाशयति। अनेन मदयन्ति-काग्रोत्साहनमुक्तम् । कीदृशः । उक्तस्थानेषु भ्रान्त्वावृत्तः । आदौ

---

२१९. यन्मे for यस्य N.; समुद्भृतैव A. समर्पितेत्थं B. Bh. समर्पितेयं C. E. ममोद्भृतेयं K1. K2. समुद्भृतेत्थं O. for समुद्भृतेयं.

२१८. निनिर्गत्य for निर्गत्य A. C.; समीहितं before साध° E. K1. K2.; साधयामि सर्वं for साधयामः O.; इति before निभृतं K2.; इति for निभृतं Bh. °मति for °मन्ति

२१९. B. om. मक°; निशीथिनीसंपातरमणीयता for निशी-ता N.; संचार for निः-सचार K1. K2.; A om. राज.

२२०. अपि च संप्रति हि for त-ति O.; A. om. तथा हि; अपि च for तथाहि Bh.; संप्रति हि for हि-ति N.

२२१. जाल for तुङ्ग N. O.

२२२. भ्रांत्यावृत्तः E. प्राप्तामोदः N. भ्रांतावृत्तिः O. for भ्रान्त्वावृत्तः; परिचित for परिणत A. संभार for संस्कार B. K2. O.

माल्यामोदी मुहुरुपचितस्फारकर्पूरवासो
वायुर्यूनामभिनववधूसंनिधानं व्यनक्ति ॥

इति निष्क्रान्ताः सर्वे । २२१

॥ नन्दनविप्रलम्भो नाम सप्तमोऽङ्कः ॥

भ्रान्तः पुनरावृत्त आयातः । अनेन मन्दत्वम् । भ्रान्त्या भ्रमणेनायात इति वा । परिणतपुष्परसगन्धसमूहबन्धुः । पुष्पस्रजा हृष्टः सुर-भिर्वा । मुहुरुपचितोत्यर्थं प्रवृद्धः । स्फारो दीर्घतया बृहत्तरः । क-र्पूरसंपर्की च । पश्चात्कर्मधारयः । यद्वा । कर्पूरविशेषणमेव द्वयम् । एभिरतिसौगन्ध्ये ध्वनिते यतोतिमनोहरोत एव स्त्रीसांनिध्यकर इति भावः । उपहितम्लानेति पाठेपि कर्मधारयः ।

प्रासोष्ट यं रत्नधरो द्विजेशो द्विजेशवन्द्या दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेङ्कोगमन्मनोहारिणि सप्तमोयम् ॥

इति सप्तमोङ्कः ।

---

२२१. प्राज्या° for माल्या° K1.; उपरितस्फार Bh. अपचितस्फार K1. उपहित-स्फार O. उपहिताम्लान noticed by Com. for उपचितस्फार.

२२४. वातो यूनामभिमत N. वायुर्यूनामभिमत O. for वा-नव.

२३६. K1. N. O. om. नन्द°-नाम; मालतीमाधवे A. E. मालतीमाधवे मदयंतिका परिणयो Bh. श्रीमालतीमाधवे नाटकप्रवरे K2. for नंद°-नाम; समाप्तः after अङ्कः K1.

अष्टमोऽङ्कः ।

ततः प्रविशत्यवलोकिता ।

अव°। वन्दिदा मए णन्दणावासपडिणिउत्ता भअवदी । ता जाव मालदीमाहवसआसं गच्छामि । परिक्रम्य । एदे दे णिव्वत्तिदगिम्हदिअहावसाणमज्जणा दीहिआतडसिलादलं अलंकर-

(क) वन्दिता मया नन्दनावासप्रतिनिवृत्ता भगवती । तद्यावन्मालतीमाधवसकाशं* गच्छामि । एतौ तौ निर्वर्तितग्रीष्मदिवसावसान-

तदेवं मदयन्तिकामादाय मकरन्दे माधवान्तिकं चलिते मालतीमादाय निर्गतस्य माधवस्य कामन्दकीगृहस्थितस्य वार्ताप्रस्तावनायावलोकिताप्रवेशः । सूचनं च पूर्वाङ्के । जहिं जेव्व मालतीति वचनेन मालतीमाधवयोरेकत्र वासः सूचितः । तत्र च यद्यपि तयोरेव प्रवेशोर्हति तथापि कन्याप्रलोभने सख्यानुकूल्ये तत्प्रवेश इति पूर्वाङ्के कृतमेव ।

४–१४ अत्र सरो वापी तु दीर्घिकेत्यमरः ॥ दलयतीत्यादि । अयं

१. प्रविश्याव° for प्रविशत्यव° O.

२. O. om. अव°; जाव after मए A.; णंदणवास for ण-स Bh.; °णिवुत्ता Bh. K1. K2. °णिअत्ता C. °णिवत्तमाणा N. °णिवत्ता O. for णिउत्ता; देवी before भअ° B.

३. मालती for मालदी Bh. O.; माधव for माहव K1. K2. O, °स्सआसं for सआसं K1. ज्जेव before गच्छामि A; गछामि Bh. O. वच्चामि K2. for गच्छामि; अवलोक्य च Bh. K2. अवलोक्य N after परिक्रम्य; एदे खु मालदीमाहवा णिव्वुत्त for ए-द N.; A om. एदे दे; एते for एदे K2; एदे अ ते for एदे दे O.; ते for दे C.; णिवुत्त Bh. O. णिक्कन्दि K1. णिवन्दि K2. for णिव्वत्तिद.

४ Bh. om. गिम्ह; दिअसा° Bh. K2. दिवसा° N. O for दिअहा;° मज्जण Bh. महणा K1. for मज्जणा; मज्जणाए मालदीए सह दीहि° for म-हि° K2; जल before दीहि° O.; सिलातलं A. N. शिलायलं O. for सिलादलं; °करेन्ति Bh. °करेंदि C. °करोदि K1. °करेदि K2; °करंदि N. °करेन्ति O. for °करान्ति.

* सकाशमेव Com.

न्ति मालदीमाहवा। ता जाव उवसप्पिस्सं। (क) निष्क्रान्ता। ५
प्रवेशकः।

ततःप्रविशत उपविष्टौ मालतीमाधवावावलोकिता च।

माध०। सानन्दम्। वर्तते हि मन्मथप्रौढसुहृदो निशीथस्य यौवनश्रीः। तथाहि।

दलयति परिशुष्यत्प्रौढतालीविपाण्डु-
स्तिमिरनिकरमुद्यन्नैन्दवः प्राक्प्रकाशः। १०
वियति पवनवेगादुन्मुखः केतकीनां
प्रचलित इव सान्द्रो माकरन्दः परागः॥

मज्जनौ दीर्घिकातटशिलातलमलंकुरुतो मालतीमाधवौ* । तद्यावदुपसर्प्स्यामि†।

चान्द्र उद्द्योत उद्गच्छत एव शुष्यत्प्रगल्भतालीपत्रवत्पाण्डुरस्तिमिरसंघं खण्डयति। प्रथमतो व्योम्नि वायुवेगेनोर्ध्वमुखीभूय प्रचलितो घनः केतकीपराग इव। इन्दोरयमैन्दवः। मन्दमन्दमिति प्रचलनक्रियाविशेषणम्। उपावर्तये संमुखीकरोमि।

---

५. Bh. O. om. माल–स्सं; A. K1. K2. om. मालदीमाहवा, N. has it above; A. om. ता; B. N. om. जाव; उप° for उव° C. E.; उपसप्पामि N. इह द्विदा ज्जेव उपसप्पणावसरं पडिवालइस्सं K2. for उ–स्सं; इति A. E. K1. इति परिक्रम्य Bh. K2. before निष्क्रान्ता; N. om. निष्क्रान्ता.

७. प्रविष्टौ for प्र-ष्टौ A.

८. स्वगतं before सानन्दम् A. K2.; स्वगतं for सानन्दम् Bh. O.; K1. N. O. om. हि; निशीथिनीनाथस्य for निशीथस्य B.; K1 om.° शीथ–प्राक्प° (Line 11).

९. Bh. om. यौवन.

१०. शुष्क for शुष्यत् E.

११. कीतकीनां for केतकीनां K1.

१३. मन्दमन्दः A. मंदमंदं B. Bh. for माकरन्दः

* Com. om. मालतीमाधवौ; † उपसर्पामि Com.

स्वगतम्। तत्कथं वामशीलां मालतीमुपावर्तये। भवत्वेवं ता-
१५ वत्। प्रकाशम्। प्रिये मालति प्रत्यग्रसायंतनस्नानसविशेषशी-
तलामत्रभवतीं निदाघसंतापशान्तये विज्ञापयामि। तत्किमि-
त्यद्यानिमित्तमन्यथैव संभावयसि।

निश्चोतन्ते सुतनु कबरीबिन्दवो यावदेते
यावन्मध्यः स्तनमुकुलयोर्नार्द्रभावं जहाति।
२० यावत्सान्द्रप्रतनुपुलकोद्भेदवत्यङ्गयष्टि-
स्तावद्गाढं वितर सकृदप्यङ्कपालीं प्रसीद॥

१८-२१ निश्चोतन्त इत्यादि। हे सुशरीरे यावदेते कबरीजलबिन्दवः स्रवन्ति यावत्कुचकलिकयोर्मध्य आर्द्रतां न त्यजति यावच्च निबिडत्वापि रोमाञ्चं प्रकाशयन्ती काययष्टिस्तावद्गाढं यथा तथा सकृदपि मेङ्कपालिं क्रोडप्रदेशं देहि। अतः प्रसीद। तदिह निदाघतापशान्तये जलबिन्दवः। कुचार्द्रता पुलकोद्भमश्च सर्वाङ्गशैत्यापत्तये। यावत्तावच्छब्दावव्ययौ॥ सान्द्रेत्यादिपदे कर्मधारयमत्वर्थीयाद्बहुव्रीहिरेवेष्टो लघुत्वादिति न्यायेन बहुव्रीहिसंभवे कथं मत्वर्थीय इति न देश्यम्।

---

१४. A B. Bh. O. om. स्वगतम्; हि before वाम K2.; Bh. om. मालतीम्; अनुवर्त्ते for उपावर्तये O.; Bh. om. तावत्.

१५. विशेष for सविशेष A.

१६. भगवतीं for अत्रभवतीं K1.; निदाघतापशान्तये A. E. निदाघशांतये B. C. N. for निदाघसंतापशान्तये; किंचित् before विज्ञा° N.; तत्किमिव for तत्किमिति K2.; तत्किमिति नित्यमन्यथैव मां संभावयसि A. Bh. तत्किमित्यन्यथैव मां संभावयसि N. तत्किमिति नित्यमेव मामन्यथैव संभावयसि O. for तत्कि-सि.

१७. अपि after अथ C.; सम्भावयामि for संभावयसि K1.

१८. निश्चो° N. न श्चो° O. for निश्चो°.

१९. युगुलयोः A. कलशयोः O. for मुकुलयोः; रार्द्रभावं for °नार्द्रभावं K2. N.

२०. प्रतत for प्रतनु B. Bh. E. K1.

२१. अङ्कपालिं for अङ्कपालीं N.

अयि निरनुरोधे

जीवयन्निव समूढसाध्वसस्वेदबिन्दुरधिकण्ठमर्प्यताम् ।
बाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः ॥

अथवा दूरे तावदेतत् । कथमालापसंविभागस्याप्यभाजन- २५
मय जनो भवत्याः ।

दग्धं चिराय मलयानिलचन्द्रपादै-
र्निर्वापितं तु परिरभ्य वपुर्न नाम ।

एतद्वचनस्य प्रायिकत्वात् । तथैव नानाप्रयोगदर्शनादिति दिक् ॥ पालिः पङ्क्तिप्रदेशयोरिति शाश्वतः ॥

२३–२६ जीवयन्नित्यादि । बाहुः कण्ठेर्प्यताम् । कीदृशः । समूढं सद्योजातं पुञ्जितं वा यत्साध्वसं भयं तेन स्वेदबिन्दुर्यत्र सः । अननुभूततया भयम् । चान्द्रकरस्पृष्टोत एव स्यन्दी क्षरन्बालचन्द्रकान्त-हारस्तत्तुल्यः घर्मविघातकत्वात् । अत एव सौहित्याज्जीवयन्निव ॥ समूढः पुञ्जिते भुग्ने सद्योजाते सुनिश्चित इति विश्वः ॥ ससाध्वसश्रमेति पाठे ससाध्वसो भयवान्यः श्रम इत्यर्थः । संविभागो भेदः । अभाजन-मस्थानम् । अजहल्लिङ्गोयम् । अयं जन इत्यनेन दीनतोद्भावनेनानुकूल्यं स्वीयमाह । भवत्या इत्यनेन नायिकोत्तेजनम् ।

२७–३० दग्धमित्यादि । चिरं दक्षिणवायुचन्द्रकरैस्तापितं मे वपुरालिङ्ग्य न चेन्निर्वापितमतन्नीकृतं तदा समदकोकिलरवपीडिता मे भुतिः कर्णौद्येदानीं हृद्यां वाचं पिबतु । सादरं शृणोत्वित्यर्थः । अत एव

---

२१. मालति after अयि N.
२४. मयूष for मयूख Bh.; स्यन्द for स्यन्दि Bh.
२५. B. om. एतत्; अथ मालापाशात्वस्यमप्य° for क-प्य° Bh.
२८. च for तु O.; Bh. om. परिरभ्य; पुनर् for वपुर् Bh.

आमत्तकोकिलरुतव्यथिता तु हृद्या-
३० मद्य श्रुतिः पिबतु किंनरकण्ठि वाचम् ॥

अव० । उपसृत्य । अइ अणिव्वहणसीले जं दाणिं मुहूत्तंतरिद-माहवा दुम्मणाअन्ती मम पुरदो भणासि चिराअदि अज्जउत्तो अ-

---

(क) अयि अनिर्वहनशीले यदिदानीं* मुहूर्तान्तरितमाधवा दुर्म-नायमाना मम पुरतो भणसि चिरयत्यार्यपुत्रोपि नाम† कियच्चिरेण

वाङ्माधुर्यद्योतनाय किंनरकण्ठि इति संबोधनम् । किंनरस्येव कण्ठः स्वरो यस्यास्तादृशि हे ॥ स्वरे कण्ठःप्रकीर्तित इति रत्नकोशः । अङ्गकण्ठगात्रेषूपसंख्यानान्ङीष् ॥ पूर्वार्धे तुशब्दो यद्यर्थः । द्वितीये पुनरर्थः । यदि नालिङ्गनं देयं तदा मधुरमालपेति भावः । नाम संभावनायाम् । आलिङ्गनादानं संभाव्यते यतः । त्वयि वदन्त्यां कलकोकिलरवोपि कर्णकटुरित्यनुरागाधिक्यमात्मन उक्तम् । इहाद्यपदमिदानीमर्थे । अन्यथा निशीथवर्णनेद्यास्मिन्नहनीत्यस्यानर्थक्यापत्तेः । एवं चाद्यास्मिन्नहनीति व्युत्पत्तिः प्रायिका ।

३१—४० अत्र यदिदानीमिति वाक्यभूषायाम् । भणनस्वरूपमेवाह

---

२९. °तापि Bh. °ता तु B. E. for °ता तु.

३०. °न्यद्य श्रुतिः पिबतु वर्णरसायनानि B. °मद्य श्रुतिः पिबतु कर्णरसायनानि Bh.

३१. N. om. उपसृत्य; अवि for अइ C.; अणिव्वहणासीले B. आणिव्वहणसीले Bh. णिव्वहणसीले K1. अणिव्वहासीले K2 for अणि-ले; तदाणिं for जं दाणिं O.; मुहुत्तमेत्तन्तरिअ Bh. मुहुत्तमेत्तन्तरिद K2. for मु-द; अदिट्ठ A. °दरिद B. °तरिअ N. for °तरिद.

३२. माहवे for माहवा Bh. E.; वि after माहवा N.; दुम्मणअन्ती Bh. उम्मणाअन्ती C. for दु-न्ती; मह for मम C. K1. N.; भणसि C. K1. भणन्ती आसि K2.; चिरअति K2. चिरयति O. for चि-दि; वि णाम कियत् चिरेण B. अइरेण O. for अवि-रेण.

* मुहूर्तमात्रान्तरितमाधवेपि Com. † कियता चिरेण Com.

वि णाम केच्चिरेण पेक्खिस्सं जेण विच्छडिआसेससज्झसा विसुमरिदणिमेसविग्घं आलोअअन्ती एव्वं भणिस्सं विउणवेढपरिरम्भेण संभावअसि त्ति तस्स दे संपदं अअं परिणामो । (क) मालती १५
सास्रयमिव तां पश्यति ।

माध० । स्वगतम् । अहो भगवतीप्रधानान्तेवासिन्याः सर्व-

प्रेक्षिष्ये येन विच्छर्दितशेषसाध्वसा विस्मृतनिमेषविघ्नमालोकयन्त्येवं भणिष्यामि द्विगुणवेष्टपरिरम्भेण संभावयेरिति तस्य ते सांप्रतमयं परिणामः ।

चिरयतीति सभावयेरितीत्यन्तम् । सांप्रतमिति शिरश्चालनकाकौ । चिरयति विलम्बते । विच्छर्दितं त्यक्तम् । विघ्नमिति क्रियाविशेषणम् । परिणाम इति । या त्वं चिरविरहमसहमाना माधवार्थिनी सा कथमधुना तत्र वाग्यमनमालम्बस इति भावः । असूया गुणेषु दोषारोपः । सा चेह रहस्यनिवेदनादिति भावः । सर्वतोमुखं सर्वतोगामि । सुभाषितान्येव रत्नानि तेषां कोषः पात्रम् ॥ कोषोस्त्री कु-

---

१३. अइरादो तं पेक्खे for के-स्सं N.; केच्चिरे Bh. किच्चिरेण K2. for केच्चिरेण; विच्छडिआ° A. विछडिअ Bh. विछड्डिआ° E. विसज्जिया° O. for विच्छडिआ°; °आसिसज्झसा for °आ-सा Bh.; सज्झसा A. B. K1. K2. सज्झसं N. for सज्झसा.

१४. °रिअ for °रिद B.E. K1. N; णिमेसावि आलोअंती B. निमेसणिविघ्घमवलोकयंती O for णि-न्ती; विग्घं K1. विघ्नं K2. for विग्घं; विग्घमवलोअअन्ती for वि-न्ती A.; अवलोअअन्ती Bh. विलोअंती N. for आ-न्ती; एवं for एव्वं Bh. K2. O.; तथा before वि° Bh.; द्विउणवेड्ढन A. दुउणवेढ° B. विउणवेढ Bh. K2. णिआदिढ N. विउलावेढ O. for वि-ढ; वेढण C. वेड्ढ E. for वेढ.

१५. संभावएत्ति A. संभावइस्सत्ति (or त्ति) Bh. सम्भावएमित्ति K1. संम्भावयिस्सामीति K2. संभावइस्संत्ति N संभावयिस्स इति O. for सं-त्ति; संपदं before तस्स A. N.; तस्सि A. ता K2. for तस्स; Bh. K2. N. om. दे; B. C. E. om. संपदं; संपदं after अअं K1.

१६. Bh. om. तां.

१७. आत्मगतं Bh. अपवार्य N. for स्वगतम्; भगवत्याः प्रधाना° for भ-ना° N.

तोमुखं वैदग्ध्यमक्षयः सुभाषितरत्नकोषः । प्रकाशम् । प्रिये सत्यमवलोकिता वदति । मालती मूर्धानं चालयति ।

४० माध० । शापितासि मम लवङ्गिकावलोकितयोश्च जीवितेन यदि वाचा न कथयसि ।

माल० । णाहं किं वि जाणामि । (ख) इत्यर्धोक्ते लज्जां नाटयति ।

माध० । अहो अनवसितार्थमन्थरस्य वचसश्चारुता । सहसा ४५ निरूप्य । अवलोकिते किमेतत् ।

(ख) नाहं किमपि जानामि ।

ङ्मले पात्र इति मेदिनीकरः ॥ प्रियेत्यादि प्रश्नवाक्यम् । मूर्धकम्प उक्तनिषेधाय । शापितासि शपथीकृतासि ।

४४–४९ अनवसितेनिश्चितः । किमेतदिति वक्ष्यमाणवाक्यार्थस्य प्रश्नः । बाष्पेत्यादि । हरिणाक्ष्या एष कपोलो बाष्पजलेन

---

३८. अक्षयश्चसु० A. अक्षयं सुभाषितसंस्करणं Bh. अक्षय्यं सुभाषितरत्नसंस्करणं E. अक्षयं सुभाषितरत्नसंस्करणं K1.; संभार: for कोषः O.; B. C. om. अक्ष-षः; अपि K I. अयि K2. before प्रिये; अपि after प्रिये N.

३९. °कितां for °किता K1; तिर्यग् before मूर्धानं A. K1. K2. O.

४०. मया for मम A.; Bh. om. मम; °तयोर्जीवितेन for °त-न A. Bh.

४१. Bh. N. om. वाचा; न वाचा for वाचा न K1. K2.

४२. नाहं Bh. O. ण अहं C. E. K1. for णाहं; किंपि जा° Bh. C. O. किंचिज्ज° K2. for किं वि जा°; जणामि K1. जानामि O. for जाणामि; अर्धोक्तौ B. अर्धोक्तेन Bh. for अर्धोक्ते.

४४. B. Bh. om. अहो; °सितार्थस्य वचसः B. °सितार्थरम्यश्चारुता Bh. °सितार्थ-मंदश्चर्षवचसः N. for °सि-चसः; प्रिया before वचसः O.; Bh. om. सहसा.

४५ अवलोक्य for निरूप्य B.

बाष्पाम्भसा मृगदृशो विमलः कपोलः
प्रक्षाल्यते सपदि राजत एष यस्मिन् ॥
गण्डूषपेयमिव कान्त्यमृतं पिपासु-
रिन्दुर्निवेशितमयूखमृणालदण्डः ॥

अव०। सहि किं दाणिं उच्छलिदबाहुप्पीलमन्थरं रो- ५०
दिसि। (क)

माल०। सहि केचिरं पिअसहीए लवङ्गिआए असंणिधा-

(क) सखि किमिदानीमुच्छलितबाष्पोत्पीडमन्थरं रोदिषि।
(ख) सखि कियच्चिरं प्रियसख्या लवङ्गिकाया असंनिधान-दुःखमनुभविष्यामि। प्रवृत्ति*लाभोप्यस्या दुर्लभः।

सपदि प्रक्षाल्यते। अत एव विमलः। किमेतत्। यत्र चन्द्रो राजते। कीदृक्। गण्डूषेण मुखपूरणेन पातव्यं दीप्यमृतं पातुमिच्छुरिव निहितः किरण एव मृणालदण्डो येन सः। किरणरूपमृणाललतिकया पातुमिच्छतीत्यर्थः। अनेन कपोलस्य चन्द्राधिककान्तिमत्त्वमुक्तम्॥ गुण्डूषो मुखपूर्तौ स्यादिति शाश्वतः॥

५०–५३ अत्रोच्छलितो बहुलीभवन्। मन्थरमिति क्रियावि-

४७. मज्जत for राजत K1. K2.; एव for एष Bh. N.

४९. मयूष for मयूख Bh.

५०. दाणि for दाणिं Bh.; उच्चडिद B. उछलिद Bh. O. उच्छलित K1. for उच्छलिद; उच्चलिअबाहुप्पीडमंथरा रोदिति for उ-सि N.; बाहूप्पील A. बाहुप्पीड B. बाहुप्पीड Bh. बाह्वोपीलं K2. for बाहुप्पील; K2. om. मंथरं; मंथरा A. मंथर Bh. for मन्थरं; रोदेसि B. रोदीआदि Bh. रोइसि O. for रोदिसि.

५२. जनान्तिकं after माल° A.; A. om. सहि; कचिरं Bh. किचिरं K2. कियचिरं O. for केचिरं; पिय for पिअ O.; सही for सहीए K2.; लवंगिकाए for ल-ए E. O.; असणिद्धाण Bh. असन्निधाण K2. O. for अ-ण; °हाण for °धाण N.

* लंभोपितस्या दुर्लभ इति Com.

णदुःखं अणुभविस्सं । पउत्तिलम्भो वि से दुल्लहो । (ख)

माध० । अवलोकिते किं नाम ।

५५ अव० । तुह जेव्व सवधोवण्णासेण एसा लवङ्किअं संभरिअ ताए पउत्तिणिमित्तं उत्तम्मदि । (क)

माध० । नन्विदानीमेव तत्र मया कलहंसकः प्रेषितः प्रच्छन्नमुपगम्य नन्दनावासप्रवृत्तिमुपलभस्वेति । साशंसम् । अवलोकिते अपि नाम बुद्धरक्षितापयत्नः सफलोदर्क एव मदयन्तिकां
६० प्रति स्यात् ।

(क) तवैव शपथोपन्यासेनैषा लवङ्किकां स्मृत्वा तस्याः प्रवृत्तिनिमित्तमुत्ताम्यति ।

शेषणम् । अत्रासंनिधानदुःखमसंगमेन जनितक्लेशम् । प्रवृत्तिलम्भो वार्तालाभः । वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाख्य इत्यमरः ॥

---

५३. °हविस्सं for भविस्सं N.; °पउत्ति for पउत्ति O.; पि for वि Bh.; मे for से B. C. K1.; सुदुल्लहो त्ति A. दुल्लहो त्ति Bh. C. E. K1. K2. O. for दुल्लहो.

५४. किं हि नामैतत् for किं नाम N.

५५. तुहु for तुह K1.; एव्व for जेव्व N.; सवहो° B. सपधो° C. वंअणो° N. वयणो° O. for सवधो°; °पण्णासेण Bh. ° पण्णासे सा (°पन्यासेन in छाया) K2. for °व-ण; °ङ्किआं for ङ्किअं K2.; सुमरिअ A. N. संभरंती O. for संभरिअ.

५६. तए for ताए K1. पउत्तिलंभणिमित्तं for प-त्तं N.; उत्तमिद Bh. उत्तमदि K2. O. for उ-दि.

५७. हि after एव K1. K2. O.; कलहंसकस्तत्र मया for त-कः Bh.; A. om: तत्र; हि तत्र N.; मया तत्र for तत्र मया K1. K2. O.; कलहंसः for क-कः N.; प्राहितः for प्रेषितः A. Bh.; गच्छ त्वं before प्रच्छन्न N.; प्रछन्नं° for प्रच्छन्नं°Bh.; प्रछन्नः सन्निपत्य नन्दनावासं प्रवृत्ति° for प्र-त्ति° A.

५८. उपगत्य for उपगम्य A. B. E.; नंदनावासं प्रवृत्ति° for न-त्ति E.; उपालभस्वेति for उपल-ति B.; साशंकं for साशंसं C; B. om. अवलोकिते.

५९. प्रयत्नफलोदर्कां for प्र-कं Bh.; सफलोदय E फलोदर्कं K1. K2. N. for स-कं.

अव०। कुदो संदेहो महाणुभाअस्स। महाभाअ पढमं जेव्व सहूलणहरालंकिदस्स मअरन्दस्स मोहविराममहूसवं णिवेदअन्तीए भअवदीए णिउत्तेण भवदा मालदीए जीविदेण समं पसादीकिदं हिअअं। जइ को वि तुमं संपदं मदअन्तिआलम्भेण वड्ढावेदि किं दाणिं तस्स पारितोसिअं भविस्सदि। (क) ६१

(क) कुतः संदेहो महानुभावस्य। महाभाग प्रथममेव शार्दूलनखरालंकृतस्य मकरन्दस्य मोहविरामम्महोत्सवं निवेदयन्त्यै भगवत्या नियुक्तेन भवता* मालत्यै जीवितेन समं प्रसादीकृतं हृदयम्। यदि कोपि त्वां† सांप्रतं मदयन्तिकालाभेन वर्धापयति किमिदानीं तस्य पारितोषिकं भविष्यति।

६२—७२ अत्र निवेदयन्त्या मालत्या इत्यन्वयः। मालत्या इति षष्ठ्यन्तम्। मालत्याः कृत इत्यर्थः। अनुयुक्तः पृष्टः। स्वकीयहृदयालोकनमागमिश्लोकस्थरसद्योतनाय। प्रसवः पुष्पम्। प्रेम्णेत्यादि। या

६१. B. Bh. N. O. om. कुदो-भाअस्स; महाभाअ कुदो संदेहो for कु-भाअस्स E.; K1. K2. om. म-स्स; मयभाअ K2. महाभाग O. for महाभाअ; पढम Bh. पडम K2. for पढमं; पुढमं तस्स एव्व सहूलणहरालेखिदस्स for प-किदस्स N.

६२. °रालखियस्स for °रा-स्स O.; मोहविरामुछवं णिवेद° Bh. मोहविरहूसवं णिवेद° C. E. मोहविरामूसवं णिवेद° K2. मोहविच्छेदिअं णिवेद° N. मोहविरमूसवं णिवेद° O. for मो-द°

६३. B. om. भअ–वदा; भअवदी for भ-ए Bh.; भअवदा for भवदा A. C. E.; °लतीए for लदीए O.; समं before and after जीविदेण B.; समं जीविदेण for जी-मं Bh. K1. K2. O.; हिअअं पसादीकदं Bh. हियय पसादीकिदं O. for प-अं.

६४. अ after °किदं C.; ता before जइ N.जदि for जइ C. E. K1. K2.; O. om. कोवि तुमं; Bh. K2. N. om. तुमं; सम्पड for संपदं K2.; जेव्व Bh.C. E. K1. ज्जेव्व K2. तस्स एव्व N.तस्स ज्जेव O. after संपदं; मदअंतिआए लंभेण C. E. मदअन्तिकालम्भेण K2. मदयंतियालाहेण O. for म-ण; वड्ढापदि A. वड्ढावेदि B. K2. O. वड्ढादि Bh. for व-दि.

६५. तदा B. C. E. तधा K1. before किं; तस्स किं दाणिं Bh. K2. तस्स दाणिं किं O. for किं-स्स; A. om. दाणिं; °दोसिअं N. °ओसियं O. for तोसिअं; करेसि त्ति for भविस्सदि B. C. E.

* भगवता for भवता Com. † सांप्रतमेव मद° Com.

माध० । अनुयोक्तव्यमनुयुक्तोस्मि । हृदयमवलोक्य । इयमस्ति मालतीप्रथमदर्शनाभिषङ्गसाक्षिणः कामकाननालंकारस्य लक्ष्मीवतः केसरतरोः प्रसवमाला ।

प्रेम्णा मद्ग्रथितेति या प्रियसखीहस्तोपनीतानया
विस्तारिस्तनकुम्भकुड्मलभरोत्सङ्गेन संभाविता ।
संप्राप्ते त्वथ पाणिपीडनविधौ मां प्रत्यपेताशया
या मय्येव लवङ्गिकेत्यवगते सर्वस्वदायीकृता ॥

माला प्रियसख्या लवङ्गिकया हस्तेनोपनीता मद्ग्रथितेति हेतोः प्रेम्णानया मालत्या पीनकुचघटमुकुलस्य भरो यत्र तेन क्रोडेन सह संभाविता संभावनां नीता ततो नन्दनेन सह विवाहे संप्राप्ते मां प्रति निरस्तप्रत्याशया लवङ्गिकेयमित्यधिगते मय्येव यया सर्वस्वदानं कृतम् । अनेन पूर्वानुरागकथनेन नायिकाविस्रम्भ उक्तः । विस्तारः परिणाहः । कुम्भपदेनोन्नतता कुड्मलपदेन मृदुता भरशब्देन प्रौढिरुक्ता । पाणिपीडनं विवाहः । दीयत इति दायः ।

---

६६. अनया before अनुयोक्तव्यं A. Bh.; °क्तव्यमेवानु° for °क्त-नु N.; °क्तोसिः for °क्तोस्मि O.

६७. अभिष्वंग for अभिषङ्ग Bh. C. K1. K2. O.; °लंकारभूतस्य for लंकारस्य N.

६८. प्रसून for प्रसव.

६९. वा for या N. O.; नीता यया C. नीतेति वा N. O. for नी-या.

७०. कुड्मल for कुड्मल B. Bh. E. O.

७१. मय्येवं हि for या मय्येव E.; दायः कृतः for दा-ता B. Bh. K1. K2. N.

अव०। सहि मालदि वल्लहा क्खु दे इअं वउलमाला । तदो अवहिदा भव मा दाणिं एसा सहसजेव्व परहत्थगदा भविस्सदि त्ति । (क) ७५

माल० । पिअं पिअसही मे उवदिसदि । (ख)

अव० । कधं पदसद्दो विअ । (ग)

माध० । नेपथ्याभिमुखमवलोक्य । अये कलहंसकः प्राप्तः ।

माल० । दिट्ठिआ वड्ढसि मदअन्तिआलम्भेण । (घ)

(क) सखि मालति वल्लभा खलु ते इयं बकुलमाला । *ततोवहिता भव मेदानीमेषा सहसैव परहस्तगता भविष्यतीति ।

(ख)† प्रियं प्रियसखी म उपदिशति ।

(ग) कथं पदशब्द इव ।

(घ) दिष्ट्या वर्धसे मदयन्तिकालाभेन ।

७३–९१. अत्र येनैव मकरन्दस्य मदयन्तिकालाभः कथनीयस्तेनैवेयं प्राप्या । अतस्त्वमेव तं कथयेति गुप्त्या माधवेन सहात्मानं संभावयेत्याशयः । [माल० वा०] तथा चाहमेव कथयामीति

---

७३. मालतीमुद्दिश्य before अव° । O.; खु for क्खु K1. K2. N. O.; एसा for इअ Bh.; जदो for तदो N. O.

७४. ओलोएसि after अवहिदा N.; N. om. भव मा-दित्ति; होहि. C. भविस्ससि E. भवेसि O. for भव; B. Bh. om. मा; जधा for मा A. एसा दाणिं for दा-सा Bh; सहसंज्जेव्व A. सहज्जेव Bh. सहजेव्व K1. सहसैव K2. for स-व्व; ण after गदा A

७५. B. Bh. O. om. त्ति.

७६. प्पियं for पिअं O.; सहि मं उवहसति for पिअं-सदि N.; पिअसहि A. E. प्पियसहि O. for पिअसही; मे पिअसहि for पि-मे K1. K2.; Bh. om. मे; उवदिसासि A. E. उवहसादि B. Bh. for उवदिसदि.

७७. कहं for कधं N.; पाद for पद B.

७८. अए कलहंसस्संप्राप्तः for अ-तः N.

७९. वड्ढसे K1. वड्ढसि K2. for वड्ढसि; मदयंतिका for म-आ O.; लम्भेन K2. लाहेण N. for लम्भेण.

* अतः for ततः Com. † सखि प्रियं मे उपदिशसि Com.

८० माध० । सहर्षं परिष्वज्य । प्रियं प्रियं नः । आत्मनः कण्ठादवतार्य बकुलमालां ददाति ।

अव० । णिव्वूढो क्खु भअवदीए संभावणाभारो बुद्धरक्खिदाए । (क)

माल० । सहर्षम् । अम्महे पिअसही लवङ्गिआ वि दीसइ ।

८५ (ख) उत्तिष्ठति ।

प्रविश्य संभ्रान्ताः कलहंसकमदयन्तिकाबुद्धरक्षितालवङ्गिकाः ।

(क) निर्व्यूढः खलु भगवत्याः संभावनाभारो बुद्धरक्षितया ।

(ख) अम्महे प्रियसखी लवङ्गिकापि दृश्यते ।

भावः । [अव० वा०] अत्र भूयत इति भावः । [माल० वा०] अत्र मकरन्दस्य मदयन्तिकाविवाहेनेत्यर्थः । इदं वचनं मालत्या माधवं प्रति । प्रियं न इति । आलापलाभेनातिप्रियमित्यर्थः । अत्र निर्व्यूढो निर्वाहं नीतः । खलु निश्चये । संभावना प्रतिष्ठा । अत्र

---

८०. प्रियं before परिष्वज्य C.; B. E. K1. om. परिष्वज्य; A. om. one प्रियं; प्रियं नः प्रियं नः N. प्रियतमे प्रियं नः O. for प्रियं प्रियं नः; Bh. om. नः; K2. om. आत्मनः; Bh. N. O. om. आत्मनः—तार्यं (supplied in margin of O.).

८१. कण्ठे before ददाति Bh. E. N.

८२. N. om. क्खु; खु for क्खु Bh. K1. K2. O.; °अवदी Bh. °यदी O. for °अवदीए; संभावणभारो for सं-रो B. C. E.; °रक्खि° for °रक्खि° Bh.

८४. B. Bh. E. om. सहर्षम् ; N. om. अम्महे; अम्हहे for अम्महे K1. O.; Bh. E. N. om. वि; दीसदि Bh. O. दीसदइ K1. K2. for दीसइ.

८५. सर्वे उत्तिष्ठन्ति A. K1. K2. इत्युत्तिष्ठति N. for उ-ति; Bh. om. उत्तिष्ठति.

८६. ततः प्रविशन्ति A. Bh. ततः प्रविशति K2. N. for प्रविश्य; B. om. संभ्रान्ताः; संभ्रान्तः कलहंसकः मदयन्तिका बुद्धरक्षिता लवङ्गिका च K2. संभ्रांतः कलहंसकः बुद्धरक्षिता मदयंतिका लवंगिका च N. for सं-काः; कलहंस for क-क A. E. O.

लव० । परित्ताअदु परित्ताअदु महाभाओ । अद्धमग्गे क्खु णअररक्खिपुरुसाभिओओ मअरन्दस्स जादो तदो तक्काल-मिलिदेण कलहंसएण सहिदा अम्हे अणुप्पेसिदाओ त्ति । (क)

कल० । जधा इदोमुहागदेहिं पि महन्तो कलकलो सुदो अम्हेहिं तथा तक्केमि अण्णं पि पारक्कअं बलं उवगदं त्ति । (ख)

(क) परित्रायतां परित्रायतां महाभागः । अर्धमार्गे खलु नगर-रक्षिपुरुषाभियोगो मकरन्दस्य जातस्ततस्तत्कालमिलितेन *कलहंस-केन सहिता वयमनुप्रेषिता इति ।

(ख) यथेतोमुखागतैरपि महान्कलकलः श्रुतोस्माभिस्तथा तर्कया-म्यन्यदपि पारक्यं बलमुपगतमिति ।

अम्महे विस्मये । [सर्ववा०] अत्राभियोगो अवस्कन्दः । [कल० वा०] अत्र पारक्यं परकीयम् ।

८७. सर्वा: Bh. Com. बुद्ध° N. for लव°; K2. O. om. लव°; N. om. one परित्ताअदु; परित्तारअदु परित्तारअदु K1. परितायदु परित्ताअदु K2. for परित्ताअदु परित्ताअदु; अधम्मगो for अ-ग्गे K1.

८८. खु for क्खु K1. K2. N.; णअरवरपुरिसाओ Bh. णअररक्खअपुरुसोहिं अहि ओओ N. for ण-ओओ; णयररक्खक for ण-क्खि O.; पुरिसा° for पुरुसा° C. E. K1. K2.; मकरंदस्स for म-स्स C.; जदो K1. संजादो N. for जादो; जदो after जादो K2.; Bh. N. om. तदो.

८९. °केण for °एण O.; सम्मं N. सह O. for सहिदा; B. om. अम्हे; °सिदा इति for सि-त्ति O.; N. om. त्ति.

९०. जदा for जधा K1.; जह इदोभिमुहगदेहिं अम्महिं आओधणकलकलो सुदो तहा K2. जह एत्तोमुहं आअदेहिं अम्हेहिं वि कलकलो सुदो तह N. जधा एत्तोमुहं गदेहिं पि आउध-कलकलो सुदो तधा O. for ज-तथा; अत्तोमुहगदेहिं अम्हेहिं for इ-हिं Bh.; एदो for इदो E.; वि for पि E. K1.; A. B. Bh. om. पि; जोध before कल° A.; °अलो for °कलो Bh. E. K1.

९१. Bh. om. अम्हेहिं; तधा for तथा Bh. K1.; तक्केम for तक्केमि B.; अणं for अण्णं Bh.; वि for पि Bh. E. K1. N. मुहवगदत्ति Bh. उवगअं आरक्खिअजालं ति N. आगदं रक्खियबलं ति O. for पा-त्ति, पारेक्कं C. E. पारेक्क K1. परक्केअ K2. for पा-अं; उवागदं B. उअगदं K1. for उ-दं; ति B. दन्ति त्ति (इति in छाया)° K1. for त्ति.

*कलहंसकेन सम वयमन्वानु° Com.

मालत्यवलोकिते । हद्धी हद्धी समं जेव्व हरिसुव्वेअसंभेदो उवणदो । (क)

माध० । सखि मदयन्तिके स्वागतमेह्येहि । अनुगृहीतमस्मद्दूहं भवत्या । ननु स एवासौ किमित्यस्वस्था भवती । एका- किनो बहुभिरभियोग इति यत्किंचिदेतद्वयस्यस्य ।

हरेरतुलविक्रमप्रणयलालसस्याहवे
स एव भवति क्षणत्क्ररुहप्रचण्डः सखा ।

(क) हा धिक् हा धिक् *सममेव हर्षोद्वेगसंभेद उपनतः ।

९४-१०१ स्वागतं कुशलम् । स एव प्रसिद्धपौरुषः । असौ मक- रन्दः । यत्किंचिदिति न गणनीयमित्यर्थः । हरेरित्यादि । हरेः सिंहस्य स उक्तगुणः कर एव सखा द्वितीयो भवति । विक्रमे कर्तव्ये । नान्य- मत्रापेक्षत इत्यर्थः । करः कीदृशः । अतिपराक्रमप्रश्रये सतृष्णः । शब्दायमाननखैः प्रचण्डः । स्फुटतः करटस्य गण्डस्थलस्य मध्यास्युतेन मदजलेन सिक्तमुखहस्तिराजमस्तकस्थितास्थिविदारणे श्रेष्ठवीरः ।

---

९२. माल० । अवलोइदे हद्धी; &c. for मा—द्धी &c. A. B. Bh. C. E.; O. om. one हद्धी; समकालं for समं A.; एव्व for जेव्व N.; एहरिसो° for हरिसु° O.; एहरिसु- सभहिओओ for हरि-दो Bh.; °सोव्वेग for °सुव्वेअ K2.; संभेओ for संभेदो N.

९३. उवगदो A. उअणदो B. उअगदो Bh. उवणतो O. for उ—दो.

९४. B. om. सखि; सहि for सखि Bh.; Bh. N. om. एह्येहि; अस्मद्दूहिणी for अ-हं N.

९५. भवत्याः for भवत्या A.; भवत्यः स्वस्था भवंतु Bh. O. स्वस्था भवतुं भवत्यः N. for स—ती; मा भूत् परिभवोद्वेगः after असौ A; तत्र B. E. तत् C. before किमिति; तत्किम् for किमिति K1. K2.; भगवती for भवती K1.; K2. om. एका-स्यस्य.

९६. °किना Bh. °किनोपि N. for °किनो; योग for अभियोग B.; न for यत् A. Bh.; B. om. एतद् ; पश्य after °स्यस्य A.

९७. °क्रमः for क्रम Bh.; °सः साहसे for °स—वे Bh. K1. K2.

९८. एष for एव A. क्षणं for क्षणत् Bh.

* समकालमेव for सममेव Com.

स्फुरत्करटकोटरस्खलितदानसिक्तानन-
द्विपेश्वराशिरःस्थितास्थिदलनैकवीरः करः ॥ १००

तदहमपि विक्रान्तश्रुतं विलसतः प्रियसुहृदः प्रत्यनन्तरो भवामि । इति विकटं परिक्रम्य कलहंसकेन सह निष्क्रान्तः ।

अवलोकितालवाङ्किकाबुद्धरक्षिताः । अवि णाम अणाहदा पडिणिअत्तिस्सन्ति एदे महाणुभावा । (क)

माल० । सहिओ अवलोइदाबुद्धरक्खिदाओ तुरिदं गदुअ १०५

(क) अपि नामानाहतौ प्रतिनिवर्तिष्येते एतौ महानुभावौ ।
(ख) सख्यौ अवलोकिताबुद्धरक्षिते त्वरितं गत्वा भगवत्या एतं*

तथा च सखा मकरन्दः सिंह इव साहसे द्वितीयानपेक्ष इत्यर्थः ॥ काकेभगण्डौ करटावित्यमरः ॥ निष्कुहः कोटरं वा नेत्यपि ॥ विक्रा-

---

९९. स्फुटत् for स्फुरत् C. E. K1. K2.

१००. स्थिर for स्थित N.; कदनस्थिरैकः for दलनैकवीरः B.

१०१. विक्रमानुरूपं A. विक्रान्तिपूर्व K2. O. for विक्रान्तश्रुतं; विक्रांतिपूतं विलसित for विक्रा-तः Bh.; विक्रांतिपूतः सुहृदः प्रत्यंतरी° for विक्रा-रो N.; प्रियस्य for प्रिय O.; प्रथमं before प्रत्य° Bh.; प्रत्यनन्तरी° for प्र-रो A. Bh. C. K2. O.

१०२. Bh. N. om. इति; निकटं for विकटं Bh.; परिक्रामन् for प-म्य A. °हंसेन for °हं-न N.; C. om. सह; समं for सह O.

१०३. वृद्ध-तालव-ङ्किकाः for ल-ताः K1. O.; °क्षिताश्च Bh. °क्षिता K2. for °क्षिताः; एदे after णाम K2.; अख्खदा Bh. अणहा K2. अप्पडिहदा N. अणहया O. for अणाहदा.

१०४. णिवत्तिस्संति for प-न्ति N.; °णिवत्ति° for °णिअत्ति° B.; K2. om. एदे; ते for एदे B.; °णुभआ A. B. Bh. °णुआ K1. °णुभावाः K2. O. °णुहावा N. for °णुभावा.

१०५. सहीओ for साहिओ Bh. K1. K2. O.; B. om. अव-ओ; E. has lost the portion beginning with अवलोइदा and ending with पोरलोअस्स हा महा (ll. 131—2); वृद्धरक्खिदाअवलोइदाओ for अ-ओ Bh. O.; °लोकिदा° for °लोइदा° K2.; तुरिअं for तुरिदं A. Bh. N.; ठादुअ for गदुअ B.

* इमं for एतं Com.

भअवदीए एदं वुत्तन्तं कहेध । तुमं पि लवङ्गिए तुरिदं विण्णवेहि अज्जउत्तं जइ दाव तुम्हाणं अम्हे अणुकम्पणीआ तदो अप्पमत्ता परिक्कमेध त्ति । (ख)

निष्क्रान्ता लवङ्गिकाबुद्धरक्षितावलोकिताः ।

११० माल० । हद्धी हद्धी ण आणीअदि कधं वेला गमिअदु त्ति ।

वृत्तान्तं कथयतम् । * त्वमपि लवङ्गिके त्वरितं विज्ञापयार्यपुत्रं यदि तावद्युष्माकं वयमनुकम्पनीयास्ततोऽप्रमत्ताः परिक्रामतेति ।

(क) हा धिक् हा धिक् न ज्ञायते कथं वेला गम्यतामिति† । भवतु

न्तस्य वीरस्य श्रुतं गतिविशेषम् । विलसतः कुर्वतः । प्रत्यनन्तरो द्वितीयः ।

---

१०६. इमं A. Bh. K2. एमं G. for एदं; णिवेद तुवं पिअसहि लव° (निवेदयतं त्वमपि &c. in छाया) for कहे-लव° K2.; णिवेदह A. णिवेदेह Bh. N. O. कधेध C. णिवेदेध G. कधेधा K1. for कहेध; Bh. om. पि; वि for पि A. K1. N.; पिअसहि A. Bh. K1. सहि O. before लव°; अज्जउत्तं तुरिदं विण्णवेहि K1. अज्जउत्तं तुरिदं तुरिदं विण्णवेहि K2. for वि-तं; तुरिअं N. तुवर तुवर O. for तुरिदं; B. C. om. तुरिदं; विणवेहि for वि-हि B. Bh. C. E.

१०७. जदि for जइ Bh. K1. K2. O.; ताव for दाव A. O.; °णीआओ for णीआ Bh. N.; तदा for तदो G.; अप्पमत्तं for अप्पमत्ता G.

१०८. परिक्कमेत्ति A. परिक्कामध त्ति K1. परिक्कमध (इति added in the छाया) K2. for प-त्ति.

१०९. लवं° । जं पिअसहि आणवेदि त्ति इति before निष्क्रान्ता K2.; मालतीमदयंतिकावजं सर्वे निष्क्रान्ता; for निष्क्रा-ताः N.; इति निष्क्रान्ता Bh. निष्क्रान्ताः O. for निष्क्रान्ता; Bh. O. om. ल-ताः; °कावलोकिताबु-ताः for °काबु-ताः K1. K2.

११०. G. om. हद्धी हद्धी; A. O. om. one हद्धी; आणीएआदि B. आणीयदि K2. आणिअदि N. for आ-दि; लवङ्गिआ किं चिराअदि A. कधं एत्तिअं लवंगिआ चिराअदि B. after आणिअदि; B. om. क-त्ति; कहं Bh. N. कहि O. for कधं; एत्तिआ before वेला A. C. K1. K2.; गमीअदु Bh. K1. K2. गमिआदि G. N. ममीयदु O. for ग-दु.

* त्वमपि प्रियसखि लवंगिके गत्वा त्वरितं विज्ञा° Com.

† न ज्ञायते लवंगिका किं चिरयाति कथमेतावती वेला Com.

भोदु पिअसहीए लवङ्गिआए पडिणिवुत्तिमग्गं अवलोअअन्ती चिट्ठिस्सं । परिक्कामति । सातङ्कम् । फुरिदं क्खु मे वामेदरेण लोअणेण । (क) उपविशति ।

प्रविश्य कपालकुण्डला । आः पापे तिष्ठ ।

माल० । सत्रासम् । हा अज्जउत्त । (ख) इत्यर्धोक्ते वा- ११५
क्स्तम्भं नाटयति ।

---

*प्रियसख्या लवङ्गिकायाः प्रतिनिवृत्तिमार्गमवलोकयन्ती स्थास्यामि †स्फुरितं खलु मे वामेतरेण लोचनेन ।

(ख) हा आर्यपुत्र ।

११२-१२२ अत्र वाममनिष्टम् । अवामो दक्षिणः । दक्षिणाक्षिस्फुरितं स्त्रीणामनिष्टसूचकमिति भावः । अनेन कपालकुण्डलाप्रवेशोपि सूचितः । त्वदित्यादि । ननु हे स त्वत्प्रियः क्व वर्तते । तापसजनस्याघोरघण्टस्य घातकः कन्याया विटोतिकामुकोसौ त्वां रक्षतु ।

---

१११. होदु for भोदु N.; पिअसहि मदअन्तिए before पिअ A.; प्पिय for पिअ O.; सही Bh. सहि G. for सहीए; °काए for °आए O.; णिडत्ति A. B. Bh. G. K1. K2. णिवुत्ति O. for णिवुत्ति; मग्गमणुगमिस्सं A. मग्गं अणुगमिस्सं G. मग्गे ओलोअंती चिट्ठिस्सं N. for म-स्सं; °लोअंती Bh. °लोयंती O. for °लोअअन्ती.

११२. इति before फुरि G. K2.; मद° before सातङ्कम् A. B. Bh. C. G. K1. K2. O.; साशंकं for सातङ्कम् N. कहं before फुरिदं N.; फुडिदं for फुरिदं O.; खु for क्खु K1. K2.; N. O. om. क्खु; B. om. क्खु मे; वाम Bh. वामं अवामेण N. for वा-रेण.

११३. °दर B. G. °अरेण C. K1. K2.; °यर O. for °दरेण; णअणेण for लो-ण B.; इति before उप° Bh.; G. om. उपविशति.

११४. ततः प्रविशति for प्रविश्य G. N.; क-ला twice Bh. K1.; मालति before तिष्ठ N.; तिष्ठ twice Bh. K2.

११५. A. om. हा; °उत्त for °उत्त K2.; N. om. अर्धोक्ते; °द्धोक्तेन for °र्धोक्ते Bh. G.; Bh. G. O. om. वाक्.

* प्रियसखि मदयंतिके before प्रियसख्य Com. † मद° । स्फुरितं मे वाममवामलोचनेन Com.

कपा० । सक्रोधहासम् । नन्वाक्रन्द ।

त्वद्वत्सलः क्व स तपस्विजनस्य हन्ता
कन्याविटः पतिरसौ परिरक्षतु त्वाम् ।
१२० श्येनावपातचकिता वनवर्तिकेव
किं चेष्टसे ननु चिरात्कवलीकृतासि ॥

यावच्छ्रीपर्वतमुपनीय लवशो लवश एनां निकृत्य दुःखमरणां करोमि । इति मालत्या सह निष्क्रान्ता ।

अत एव पातीति पतिः । याचिराय कवलितासि किं चेष्टसे वनवर्तिकेव । श्येनः सैवान इति ख्यातः पक्षी तस्यावपातोतिवेगस्तेन त्रस्तारण्यवर्तिका यथेत्यर्थः ॥ वर्तको वर्तिकादय इत्यमरः ॥ अत्र वनग्रहणेन वर्तिकायाः स्वकुलवेष्टितत्वमुक्तम् । एतस्यास्तद्वैपरीत्यमितिभावः । यद्वा । वनेनारक्षितत्वेन वर्तिकाया अतिभीरुत्वमुक्तम् । यद्वा । वनावस्थानेन वर्तिकाया एकाकिनीत्वमुक्तम् । अत एव मालत्यपि तथेति साम्यम् । नववर्तिकेत्यपि पाठः । लवशो लवशोनेककणान्कृत्वा । आक्षिप्य गृहीत्वा ।

---

११७. सक्रोधं for स-सम् A.; G. om. स-सम् ; A. Bh. C. K1. K2. O. repeat नन्वाक्रन्द.

११८. वल्लभः for वत्सलः Bh.; नु for स Bh. K1. K2. N.

११९. कन्यां for कन्या Bh. रक्षति A. रक्षिता C. for रक्षतु.

१२०. नव for वन G. O.; चर्चिकेव for वर्तिकेव K1.

१२१. प्रेक्षसे for चेष्टसे Bh.

१२२. उत्तीर्य B. C. उपगत्य G. उपगम्य K1. K2. for उपनीय; B. K2. om. one लवशः; पर्वशस्तिलश Bh. G. O. तिलशः twice N. for लवशो-शः; यनीकृत्य for एना-त्य Bh.; निःकृत्य C. निष्कृत्य G. K1. for निकृत्य.

१२३. मरणं B. Bh. C. मारणी N. for मरणां ; N. O. om. इति; मालतीमादाय Bh. N.; मालतीमाक्षिप्य C. मालत्या सर्मं K1. K2. for मालत्या सह.

मद० । अहं पि मालदिं जेव्व अणुगमिस्स । परिक्रम्य। सहि मालदि । (क) १२५

प्रविश्य लवङ्गिका। सहि मदआन्तिए लवङ्गिआ क्खु अहं।(ख)

मद० । अवि संभाविदो तुए महाभाओ। (ग)

लव० । णहि णहि सो क्खु उज्जाणवाडोवणिग्गमादो जेव्व कलअलं सुणिअ साधिक्खेवं दूरणिक्खेवाविद्धविअडोरुदण्ड-

---

(क) अहमपि मालतीमेवानुगमिष्यामि । *सखि मालति ।

(ख) सखि मदयन्तिके लवङ्गिका खल्वहम् ।

(ग) अपि संभावितः खलु त्वया महाभागः ।

(क) न हि न हि स खलूद्यानवाटोपनिर्गमादेव कलकलं श्रुत्वा

१२७–१३५ अत्रापि प्रश्ने । संभावितो लब्धः । अत्र उपनिर्गमः सभीपगमनम् । एतेन मार्गस्य शून्यत्वमुक्तम् । अवक्षेपोवहेला । अपविद्धमाक्रान्तम् । विशालोरुयुगुलदण्डाभ्यां निर्भरं गाढ

---

१२४. वि for पि K2. N.; °दीं for °दिं A. B. C. K2.; जेव्व Bh. एव्व N. for जेव्व; G. om. जेव्व; उत्थाय Bh. इति K2. before परि°; प्रविश्य लवंगिका । सहि मालदि सहि मालदि । मद° । सहि लवंगिए मदअंतिआ अहं । अवि संभाविदो सो महाभाओ तुए after परिक्रम्य instead of the above, N.

१२५. पिअ before सहि A.

१२६. लवंगिका twice Bh. K1.; K1. K2. om. सहि; °यन्तिए K2. °यन्तिके O. for °अन्तिए; लवंगिका for ल-आ Bh. O.; खु for क्खु K1. K2. O.

१२७. क्खु after °विदो B. C.; O. om. तुए; °णुभाओ A. Bh. G. °भागो O. for °भाओ.

१२८. G. om. one णहि; नहि नहि for णहि णहि N. O.; Bh. om. सो क्खु; खु for क्खु K1. K2. O.; °णवाडोपडिणिग्ग° B. °णवाडोपणिग्ग° Bh. G. O. °णावरोहणिग्ग° N. for °ण-ग्ग°; एव्व for जेव्व N.

१२९. °कलं A. °अं K1. for °अलं; सुणिस्सं for सुणिअ B.; सावलेवदूर for सा-र N.; सावक्खेवावविद्धविकटो° A. सावक्खेवावविद्धविअडो° Bh. साधिक्खेवाविद्धविअडो° G. साधिक्खेवावविद्धविअडो° K1. K2. सावक्खेवाविद्धविअडो° (corrected into साधिक्खेवं दूर-डो°) O.

* प्रियसखि Com.

११० णिहुरं पधाविअ पराणीअं पविट्ठो। तदो पडिणिवुत्तम्हि मन्दभाइणी। सुणामि अ घरे घरे गुणाणुराअणिब्भरस्स पोरलोअस्स हा महाणुभाव माहव हा मअरन्द हा साहसिअ त्ति परिदेवणाओ। महाराओ वि किल मन्तिधीआणं विप्पलम्भवुत्तन्तं सुणिअ संजादमच्छराधिक्खेवो तक्खणविसज्जिदाणेअप्पोढपाइक्कणि-

*साधिक्षेपं दूरनिक्षेपाविद्धविकटोरुदण्डनिष्ठुरं †प्रधाव्य परानीकं प्रविष्टः। ततः प्रत्तिनिवृत्तास्मि मन्दभागिनी। शृणोमि च गृहे गृहे गुणानुरागनिर्भरस्य पौरलोकस्य हा महानुभाव माधव हा मकरन्द हा साहसिक इति परिदेवनाः। महाराजोपि किल मन्त्रिदुहित्रोर्विप्रलम्भवृ-

यथा तथा धाविरित्वेत्यर्थः। अनीकं सैन्यम्। धिआ दुहिता। विप्रलम्भो वञ्चनम्। चन्द्रातपश्चन्द्रप्रकाशः। मालत्या वियोगदशायां तापकत्वेनानुभवादातप इत्युक्तम्। मन्यते पौरलोकेनैव।

११०. णिब्भरं A. G. N. O. णिद्धुरं B. Bh. K2. for णिहुरं; पधाविअ N. °धाविय O. for प-अ; °णीयं for °णीअं K2. O.; पइट्ठो Bh. विट्ठो (प्रविष्टः in छाया) K1. °प्पविट्ठो O. for पाविट्ठो; तदा for तदो C.; °णिउत्ताम्हि A. B. °णिअत्ताम्हि Bh. C. G. K1. K2. °नियत्तम्हि O. for °णि-म्हि.

१११. N. om. अ; गुणानु for गुणाणु° Bh. °राग for °राअ K2.; काअरस्स A. कादरस्स G. for णिब्भरस्स; पौल A. पौर Bh. O. पउर K2. for पोर.

११२. N. om. महाणुभाव; माहव महाभाअ Bh. माहव माहव महाभाअ K2. माधव हा महाभाग O. for म-हव; °णुभाअ A. °णुहाव E. भाअ K1. for °णुभाव; हा before माहव A. Bh. K1. K2.; N.O. om. the हा before साहं supplied in margin of O.; °सिएत्ति E. °सिकेति O. for °सिअत्ति; परिदेवणा B. K1. परिदेवणं C. पलिदेवणं E. for प-ओ.

११३. Bh. om. म-ओ; °भाओ C. °राजो K2. for °राओ; पि for वि A.; विकलिमादि बहूआणं दुं for वि कि-दुं° Bh.; एदाणं after किल A. K1.; मतिदुहिदाणं K2. क्षुद्रदाणं N. for म-णं; दुहिदु° E. दुहिदाणं K1. धीराणं O. for धीआणं.

११४. संजाअ A. N. संजात O. for संजाद; मत्स° for मच्छ° K1. मछराविअ Bh. मत्सरो विय O. for म-वो; °धेसः K2. °धेओ N. for °धिक्खेवो; °आ for °हा E. N.; °ज्जिदपौढपाइक्क A. °ज्जिअपोढपाइक्क Bh. °ज्जिअपौढपाइक्क K2. for °ज्जिदक्क; N. om. प्पौढ; पोढ C. पौढ K1. for प्पोढ; पआत्ति for पाइक्क E. णिवहो for णिवहो O.

* सावक्षेपापविद्धविकटो° Com. † निर्भरं for निष्ठुरं Com.

वहो चन्दादवेण सोहसिहरट्ठिदो पेक्खदि त्ति मन्तीअदि । (क) ११९

मद० । हा हदम्हि मन्दभाइणी । (क)

लव० । सहि मालदी उण कहिं । (ख)

मद० । सा क्खु पढमं जेव्व दे मग्गं अवलोइदुं पसरिदा । पच्छादो अहं ण तं पेक्खामि । अवि णाम उज्जाणगहणं पविट्ठा भवे ।(ग) १४०

त्तान्तं श्रुत्वा संजातमत्सराधिक्षेपस्तत्क्षणविसर्जितानेकप्रौढपद्मातिनिवहश्चन्द्रातपेन सौधशिखरस्थितः प्रेक्षत इति मन्यते ।

(क) हा हतास्मि मन्दभागिनी ।

(ख) सखि मालती पुनः क्व ।

(ग) सा खलु प्रथममेव ते मार्गमवलोकयितुं प्रसृता । पश्चादहं न तां प्रेक्षे* । अपि नामोद्यानगहनं प्रविष्टा भवेत् ।

१३८-१३९ अत्र प्रसृता निर्गता । अहं प्रसृतेत्यन्वयः । अपीत्यादि शङ्कायाम् ।

---

११५. °तपेण B. °तवेण E. for °दवेण; दवसोध for द-ह N.; सौह A. सोध C. K1. O. सौध K2. for सोह; सोआसिअरट्ठिओ for सोदो E.; सिहरदो B. सिहरट्ठिओ K1. for सि-दो; एव्व before पेक्खदि N.; पेख° for पेक्ख° Bh.; मंति for मन्ती° N.

११७. °दि for °दी K1.; वत्तदि after कहिं K2.

११८. खु for क्खु K1. K2. O. पुढमं N. प्पढमं O. for पढमं; मग्गमेव for मं ग्गं-व्व K2.; एव्व for जेव्व N.; ते for दे B.; आलोइदुं for अ-दुं N.; B. om. अ-दुं; पडत्ता E. प्पसरिदा O. for प-दा.

११९. पाछादो Bh. पुणो N. पछादो O. for पच्छादो; अ B. Bh. C. K1. K2. थ O. before तं; तां for तं. A.; पेक्खामि for पेक्खामि O.; N. om. अवि; सा for अवि K2; णं for णाम N.; गहणे for गहणं A. Bh. C. K1. K2. O.

१४०. पणट्ठा for पविट्ठा K2. हवे for भवे N.

* पश्यामि Com.

लव०। सहि तुरिदं अण्णेसम्ह। अदिकादरा मे पिअसही। उवट्ठिदाणत्थे इमस्सिं अवसरे सा ण धारेदि अत्ताणअं। त्वरितं परिक्रम्य। सहि मालदि णं भणामि सहि मालदि त्ति (क)

इतस्ततः परिक्रामतः।

१४५ प्रविश्य प्रहृष्टः कलहंसकः। दिट्ठिआ कुसलेण अम्हे णिग्गदा संघट्टदुग्गमादो। (ख)

(क) सखि त्वरितमन्विष्यावः। अतिकातरा मे* प्रियसखी। उपस्थितानर्थेस्मिन्नवसरे सा† न धारयत्यात्मानम्। सखि मालति ननु भणामि सखि‡ मालति इति।

(ख) दिष्ट्या कुशलेन वयं निर्गताः संघट्टदुर्गमात्।

---

१४३ अत्र नन्वहम्। अव्ययत्वादनेकार्थत्वम्। तथा चा मद्-
चनमपि न शृणोषीत्यर्थः।

---

१४१. तुवरिदं E. तुरिअं N. for तुरिदं; तुरिदं twice O.; अण्णेसह C. अण्णेसम्ह K2. for अण्णेसह; अति for अदि K2.; काअरा A. कातरा O. for कादरा; खु before मे E.; णो for मे A.; प्रिय for प्रिअ O.; उअवण्णं after सही E.

१४२. तं णत्थि भविदव्वं जं सहसा ण करेदि B. उपवणट्ठिदं इमस्सिं अवसरे सा ण-करेदि N. तं ण्णत्थि जं इमस्सिं अवसरे ण करेदि O. for उव-णअं; A. om. उवट्ठिदाणत्थे; उववणट्ठिदा for उ-त्थे Bh. K2.; °णत्थ for °णत्थे K1.; एदस्सिं for इमस्सिं E.; अवत्थले for अवसरे E.; ट्ठिदा before सा E.; K1. om. सा; अप्पाणं ण धारेदि for सा-णअं A.; ण सा for सा ण Bh.; अत्ताणं for अ-अं E. K1. K2.; तण्णत्थि भविदव्वं &c. as in B. after अत्ताणं E. उभे before त्वरितं Bh.

१४३. परिक्रामंत्यौ। उभे। सहि मालदि मालदि इतीतस्ततः C. परिक्रामन्त्यौ। सहि मालदि मालदित्ति इतस्ततः K2. for परि-स्ततः; परिक्रामतः। उभे। सहि for परिक्रम्य सहि N.; परिक्रामंत्यौ for प-म्य Bh. K1. O.; मालदि twice K1.; ण भणासि Bh. णं भणामो K1. O. for णं-मि; K1. om. second सहि.

१४४. E. om. इ-मतः; °क्षमत : for °क्रामतः O.

१४५. E. om. प्रवि-क-; Bh. N. om. प्रहृष्टः; हृष्टः for प्रहृष्टः B. O.; कलहंसकः twice Bh. K1.; कुश° for कुस° Bh.; B. om. कुसलेण; वयं for अम्हे E.; N. om. अम्हे; णिग्गदो for णिग्गदा N.

१४६. समर A. E. सङ्कर K2. before संघट्ट; संकडग्गमादो Bh. संकटादो N. for सं-दो.

* मः for मे Com. † Com. om. सा. ‡ Com. om. सखि.

हीमाणहे पेक्खामि विअ णिम्मलणिरन्तरुद्धूदधोदतरवारिधा-
रापरिप्फुरिदचन्दकिरणुज्जलविडुरिच्छदंसणं मदलीलाकलिद-
कामवालविअडभुअदण्डाविद्धहलहेलाविक्खुभिदुव्वेल्लिदतरंग-

(क) हीमाणहे प्रेक्ष* इव निर्मलनिरन्तरोद्धूतधौततरवारिधारापरि-
स्फुरित†चन्द्रकिरणोज्ज्वल‡रमणीयभीषणदर्शनं मदलीलाकलितका-
मपालविकटभुजदण्डाविद्धहलहेला§विक्षुभितोद्वेल्लिततरंगकलिन्दत-

१४७–१५२ अत्र हीमाणहे इति हे मातरितिवत्सीचस्य हर्षार्थे । पश्यामीव परबलमित्यन्वयः । धौतो निशितः । तरवारिः खड्गः । विडुरिच्छं भीषणम् । कलितः स्वीकृतः ॥ कलिवली कामधेनू इति शाब्दिकाः । कामपालो हलायुध इत्यमरः ॥ आविद्धा वक्रं प्रेरिता । हेला क्रीडा । 'कलिन्दतनया यमुना । सैनिभमिति यथा बलेन हलाकृष्टा यमुना प्रतीपमागता तथा परबलमपीति भावः ।

---

१४७. सहर्षं before हीमा° Bh. K2.; हीहीमाणहे C. हेमाणहे K2. हीमाणहि N. for हीमाणहे; पेक्खामोE. पेक्खामि O. for पेक्खामि; वअ K1. अ K2. N. for विअ; °रुद्धुअतुंगकरवालधारापडिहलिअचंद for °रु-चन्द N.; °रुद्धत A. C. °रुद्धअ E. °रुद्धत K1. रुद्धय O. for °रुद्धूद; धौतर K2. धौअत Bh. for धो-र; धौत A. धोत B. धौद C. K1. धोय O. for धौद; वार for वारि E.

१४८. परिक्खलियविप्पदिवयंद for परि-न्द O.; पडिफलिद A. Bh. K1. K2. परिप्फुडिद B. for प-द; B. om. चन्द; चंड for चन्द C.; °ज्जलं for °ज्जल O. °ज्जलरमणीयभीसणदं° B. °ज्जलविंदुरिच्छदं° Bh. °ज्जलदुरिदं° C. °ज्जलंतपिंजरिअदं° N. for °ज्ज-दं°; मरव for मद K1.; कलि Bh. कलल N. for कलिद.

१४९. करवाल for कामवाल O. पाल for वाल A.; विअट्ट for विअड A.; भुज for भुअ A. C.; दंण्डोण्णामिद for द-द्ध Bh.; दलहेहा for ह-ला K2.; विललिदु° for वि-दु° K1.; विब्भलिदुव्वेल्लदुदोलिद A. विक्खुभिद B. विरिल्लिद Bh. विरल्लिदुव्वेल्लिदतरंग C. विददुव्वेल्लिदतरंग E. विरलिदोद्वेल्लद K2. वक्खंडणतरलुव्वेल्लतरंग N. विरलिदुव्वेल्लिय O. for विक्खु—ग; तरंगकलिन्द left out in K1.

* पश्यामीव Com. † प्रतिफलित for परिस्फुरित Com. ‡ उज्ज्वलित Com. § विक्षलित one MS. Com. विच्छुरित another.

१५० कालिन्दतणआसोतसंणिहं विअडविसङ्कलुप्पडिदणिहआमन्द-
मअरन्दव्वइअरक्खोहविअलपडिजोहपरिवत्तणुग्गदसमत्थगअ-
णङ्गणावआसओसरन्तकलअलं पाइक्कसमूहं । (क)

नद्यास्रोतःसंनिभं विकटविशृङ्खलोत्पतित*निर्दयामन्दमकरन्दव्यति-
करक्षोभविकलप्रतियोधपरिवर्तनोद्भूतसमस्तगगनाङ्गनावकाशावस-
र†कलकलं पदातिसमूहस्‡ ।

विस्तारेण वा बलस्य तादृग्यमुनासाम्यम् । विकटं विस्तीर्णं यथा तथा । विशृङ्खलः स्वच्छन्दः । आपतितः संमुखागतः । निर्दयो निष्करुणः । अमन्दः सत्वरः । व्यतिकरेण मिलनेन क्षोभः । परिवर्तनेन पलायनेन । उद्भूत उत्थितः । विशङ्कलितो व्याप्तः ॥ दोर्दोषा भुजा भुज इति शब्दप्रकाशः ।

---

१५० कालिंद for कलिन्द Bh.; तणयासोत्त K1. O. कण्णआगत्त N. for तण-त. सोत्त for सोत Bh.; संकुलं for संणिहं B. C.; विअट A. विकड B. विअड K1. for विअड; Bh. K2. N. om. विअड; °संखलुखलिद Bh. °संखलपडिद E. °संखलुप्पदिद K2. °संखलोवइअ N. for स-द; णिहअ A. N. णिहया° K1. K2. for णिहआ°; N. om. मन्द.

१५१. °रंदावेयव° for र-व्व O.; वइ° for व्वइ° A. C. E. K1. K2. N.; विअड for व्वइअर Bh.; °अहक्खो° B. N. °यहक्खो° O. for °अरक्खो°; क्खोभ A क्खीभ N. for क्खोह; विअड A. Bh. विहल K2. N. O. for विअल; पडि° for पडि° O.; °जोध A. B. जोध Bh. for °जोह; प्पडिणिवुत्तणुग्गअगणंगणेवआसविहंत for पडि-त्त N.; पडि for परि A. B.; °णुमद Bh. णोग्गअ K2.; समत्थं for समत्थ O.

१५२ °णाङ्गणा° for °णङ्गणा° K2.; °णोवासवासइत्त Bh. °णोवआसवीसइंत O. for °आ-न्त; विअसद् A. ओसरंत C. विसइंत E. वसंत K1. वेसटन्त K2 for ओसरन्त; कलकलं for कलअलं A.; पारक्कबलं A. K2. पारेक्क C. E. पारेक्कबल K1. for पाइक्क.

* आपतित Com. †विशंकालित Com. for अवसर, ‡ पारक्यबलसमूहं one MS. Com. पारक्यबलं another.

सुमरामि अ भीसणभुअवज्जजज्जरिदपञ्जरोवसण्णसुहडहत्थावलुत्तविविहाउहोपमद्दसमोसारिअसेणिअणिअरं पाइक्करिक्कमग्गसंचारणिव्वत्तिदविसमसमरसाहसं णाहमाहवं । (क) १५५

(क) स्मरामि च भीषणभुज*वज्रजर्जरित†पञ्जरोपसन्नसुभटहस्तावलुप्तविविधा‡युधोपमर्दसमवसारितसैनिकनिकरं पदातिरिक्तमार्गसंचारनिर्वर्तितविषमसमरसाहसं नाथमाधवम् ।

१५३–१५४ जर्जरितपञ्जरा अत एवापसृताः पलायिताः । ओअल्लोपसृतः । हस्तेभ्योवलुप्त आच्छेदितः । विकटो विषमः । अपसारः पलायनम् । रिक्तः शून्यः ।

---

१५३. अविअ before सुमरामि A.; A. om. अ; आसि for अ Bh. C. O.; भुआ for भुअ O.; वत्थ before जज्जरिद O.; वज्जपंजरजज्जरिअवज्जंतसुभटसत्थपमुक्क for वज्ज—लुत्त N.; Bh. om. जज्जरिद; पञ्जरापसदिदसुभडहत्था A. पंजरपल्लत्थसुभहडसत्थ Bh. पंजरावसण [सु ?] हडहत्था E. for प-त्था; °रासण्ण K1. K2. रोव O. for. °रोवसण्ण; ओअल्लो for उवसण्ण Com.

१५४. °त्थपमुक्क for °त्थावलुत्त Bh.; °हाउहणिअहघातिदासेसरिउसेणाहदविअडापसारपाइक्कसूण्णमग्गसञ्चारणिअत्तिद for °हाउ-त्तिद A.; पमरघातितासेसरिपुजूणं पाइक्क B.°पमंदउसारिअसेणविअडोपसारवइरिक्क Bh. पउहासेसरिउसेण्णदिण्णविअडापसारसुण्ण K2. पमरं ओसारिअसेणविअडापसारवइरिक्क N. °वमद्दसमोसरियरिपुसेण्णदिण्णणियरं सारपायिक्क O. for पम-रिक्क; सरोसरिअ for स-रिअ K1.; सार before पाइक्क C. K1.; K1. om. रिक्क.

१५५. °रणिम्माविद E. °रिम्मविद K1. °रणिम्मिद K2. °रानिम्मिय O. for °र-द; णिम्मिद्दवसाअ for णि-मर N.; णिम्मविवहववसाअसाहणं for णि-सं Bh.; O. om. समर; णाहं Bh. N. णाध C. E. for णाह.

* भुजवज Com. † पंजरापसृतसुभट Com. ‡ °युधनिवहघातितासेषरिपुसैन्यदत्त विकटत्वरितापसारपदातिशून्यमार्गं Com.

अहो गुणाणुराओ णरिन्दस्स जं दाणिं सोधसिहरंतरिदावदि-
ण्णपडिहारविणओवण्णासपडिसामिदविरोहसंकडो उवणीदमा-
हवमअरन्दमुहचन्दे वारं वारं संचारिअसिणिद्धलोअणो कलहंस-
आदो अहिअणं जाणिअ णिव्वत्तिदमहग्घगुरुभबहुमाणो पप्फुर-

(क) अहो गुणानुरागो नरेन्द्रस्य यदिदानीं सौधशिखरान्तरिता-
वतीर्णप्रतीहारविनयोपन्यासप्रतिशामितविरोधसंकट उपनीतमाधवम-
करन्दमुखचन्द्रे वारं वारं संचारितस्निग्धलोचनः कलहंसकादभिजनं
ज्ञात्वा निर्वर्तितमहार्घगुरुबहुमानः प्रस्फुरन्मत्सरवैलक्ष्यमसीमलिनित-

१५६–१६२ सौधेति । प्रतीहारेण सौधाग्रादवतीर्य तयोः स्व-
रूपं ज्ञात्वा तदुपन्यासः कृत इत्यर्थः । अभिजनो वंशः । बहुमानः
[illegible]

१५६. °णानु° for °णाणु° Bh. K1.; °रागो for °राओ K2.; णरिन्दस्स A. णरिं-
दस्स N. for णरिन्दस्स; दंडदाणिसाध for जं-ध Bh.; B. om. जं; जो for जं O.;
दाणीं for दाणिं E.; सोह for सोध A.; सिहरट्ठिदावत्तिण्ण A. सिहरट्ठिदो B. सिहरत्थिदो
Bh. सिहरंतरावदिण E. सिहरंतरिदोहिण्ण K1. सिहरन्तरिदो दिण्ण K2. सिहरंतरोवदिण्ण
O. for सि-ण्ण.

१५७. विणओपण्णास A. विण्णवोवण्णास B. K1. विणवोवणास Bh. विणवोवणास C.
E. वओणोवण्णास K2. for वि-स; °समिद A. °सामिअ N. for °सामिद; K2. om.
विरोह; विरोधो संकडोवणीद; B. विरोधस्सोम्मक्करसो उवणीद Bh. विरोहसंकधो उवणद
E. विरोहो सोमेक्करसो उवणद N. विरोधसोम्मीकिदोवणीद O. for वि-द्द; सङ्कडोवणीद
for स-द्द A. संकधो for संकडो K1.; माध° for माह° O.

१५८. मुहारविंदं B. Bh. N. मुहचंद C. for मु-न्दे; पलोइअ वारंवारं वारिअणिअलो
अकलअलो अभिजणं जाणिअ सबहुमाणं णिव्वत्तिअपसाओ फुरंत for वारंवारं-रन्त N.;
वारिदलोअणो कलअलादो असिजाणं for सं-णं Bh.; सञ्चारिदसिणिह A. सञ्चारिद-
णिसिद्ध K2. for सं-द्ध; °हंससभासादो C. °अंसआदो K1. °हंसकादो O. for
°हंसआदो.

१५९. अभिजणं A K2. O. आहिजणं B. for अहिअणं; आणिअ for जाणिअ C.;
णिवत्तिअ Bh. णिव्वतिदा K1. णिव्वडिअ K2. णिवत्तिद O. for णिव्वत्तिद; Bh.
om. महग्घगुरुअ; A. om. गुरुअ; गहअ E. K2. गहय O. for गुरुअ; फुरिद A.
फुरन्त Bh. प्पफुरंत O. for पप्फुरन्त.

न्तमच्छरवेलक्खमसीमइलिदमुहे भूरिवसुणन्दणे महुरोवण्णासे- १६०
ण किं दाणिं तुम्हाणं भुअणाभोअभूसणेहिं महाणुभाएहिं णवदं-
सणगुणाहिरामेहिं जामादुकेहिं अपरितोसो त्ति पडिबोधिअ
गदो अब्भन्तरं राआ। इमे वि माहवमअरन्दा आअच्छन्ति।
अहं पि भअवदीए इमं वुत्तन्तं णिवेदेमि त्ति। (क) निष्क्रान्तः।

मुखे भूरिवसुनन्दने *मधुरोपन्यासेन किमिदानीं युवयोर्भुवनाभोगं†
भूषणाभ्यां महानुभावाभ्यां ‡नवदर्शनगुणाभिरामाभ्यां जामातृभ्याम-
परितोषः§ इति प्रतिबोध्य गतोभ्यन्तरं राजा। ॥इमावपि माधवमकरन्दा-
वागच्छतः। अहमपि भगवत्या इमं वृत्तान्तं निवेदयामीति।

संमानः। तावानीय दृष्ट्वा तयोः सापराधयोरपि गुणानुरागादतिगौर-
वमेव राज्ञा कृतमिति भावः। न परितोष इति नः शिरश्चालने।

१६०. मच्छ for मच्छर Bh.; °रोन्मिच्छवे° for °रवे° K2.; वेलक्खमसीमलिणिअ A. वेलक्खमइल B. वेलक्खमसिमइलिअ Bh. वेलक्खमसिमअलिद K1. वेलक्खमसिमइलिअ K2. वेलक्खामरिसमुडलिअणिअ N. for वे-लिद; मलिण for मइलिद O.; मुहे य for मुहे O.; °रवअणोवण्णा° for °रोवण्णा° A. Bh.

१६१. किदि before किं K1.; भुआ° B. भुवणा° C. O. for भुअणा°; °भोग for °भोअ O.; °सण for °सणेहिं Bh. C. E. N.; °भावेहिं A. Bh. K1. K2. O. °हाणहिं N. for °भाएहिं; अभिअण A. पडर B. E. अभिणव Bh. for णव; अंद before °दंस K1.

१६२. °सणाहिरा° for °स-रा° K1.; °भिरा° B. Bh. K2. N. °णुरा° C. for °हिरा°; णवचन्दंसणरमणीएहिं after °रामेहिं A.; °दुएहिं for °दुकेहिं A. Bh. K2. N.; परितोसो A. परिदोसो E. अपरिदोसो K1. O. अपरिओस K2. अपरितोस N. for अ-सो; °बोहिअ for बोधिअ A. Bh.

१६३. गदो Bh. गओ K2. N. O. for गदो; गदोभ्भंतरं B. गदोअब्वन्तरं K1. for रा-रं; राजा for राआ Bh.; B. om. राआ; अ for वि N.; Bh. om. वि; मकं° for मअं° K2.; °च्छन्दि B. °हंति Bh. छंदि O. for °च्छन्ति.

१६४. वि for पि A. E. K2. N.; भयदीए for भ-ए O.; एदं for इमं A. N.; वुत्तंतं Bh. वुत्तन्तं K1. for वुत्तन्तं; णिवेदइस्सं C. णिवेदइस्सं E. for णिवेदेमि; Bh. K1. K2. N. om. त्ति; इति before निष्क्रा° Bh. K1. K2. N.; न्ताः for न्तः Bh. K1. K2.

* मधुरवचनोप° Com. † भुजाभोग for भुवनाभोग Com. ‡ अभिजन for नव Com. § न परितोष for अपरितोष Com. ॥ एतावपि Com.

१६५ ततः प्रविशतो माधवमकरन्दौ ।

मक० । अहो प्रेयसः सर्वपुरुषातिशायि निर्व्याजमूर्जितं तेजः । तथा हि ।

दोर्निष्पेषविशीर्णसंचयदलत्कङ्कालमुन्मथ्नतः
प्राग्वीरानुपत्य तत्प्रहरणान्याच्छिद्य विक्रामतः ।
१७० उद्वेल्लद्धनरुण्डखण्डनिकरार्कीर्णस्य संख्योदधे-
र्द्वैधास्तम्भितपत्तिपङ्क्तिविकटः पन्थाः पुरस्तादभूत् ॥

माध० । नन्वनुशयस्थानमेतत् । पश्य

१६६-१७१ प्रेयसः प्रीतस्य । मकरन्दस्येत्यर्थः । निर्व्याजं वास्तवम् । ऊर्जितं बलवत् । दोरित्यादि । प्रेयसो युद्धार्णवस्य पन्था अग्र एवमभूत् । द्वेधा पार्श्वद्वये स्तम्भितया पत्तिपङ्क्त्या भयंकरः । प्रेयसः कीदृशस्य । बाहुसंचूर्णनत्रुटितसंधिस्फुटत्कङ्कालं यथा तथा प्रथमं वीरानुन्मथ्नतोभिभवतः । इतरत्र तदीययुधानि गृहीत्वा पराक्रमं कुर्वतः । इदं विशेषणद्वयं योग्यतया प्रेयस इत्यस्य । संख्योदधेः कीदृशस्य । स्फुरन्नरमुण्डखण्डसमूहव्याप्तस्य ।

---

१६५. मकरंदमाधवौ for मा–न्दौ.

१६६. माध° । for मक° । K1.; मे after अहो B. O.; °शायिनो for °शायि O.; मूर्त्ति for °मूर्जितं Bh.

१६७. पि for हि Bh.

१६८. संचर for संचय O.; गलत् K2. चलत् O. for दलत्.

१६९. °नुतत्य B. °ननरत्न Bh. °नपरत्र C. °नुपात्य N. for °नुपत्य.

१७०. उद्वेलश्नरि° A. उद्वेलद्भुन Bh. K1. उद्वेलन्नर K2.; रुद्ध Bh. तुंड C. K1. मुंड K2. N. for रुण्ड; उदये for उदधेः N.

१७१. °वैंग for °द्वैधा K2.; विटपः for विकटः Bh.

१७२. मक° । for माध° । K1.; वयस्य before नन्वनु° N.; °नय (corrected in margin into °शय) for °शय O.; A. om. पश्य.

अद्यैवेन्दुमयूखखण्डखचितं पीतं निशीथोत्सवे
यैर्लीलापरिरम्भदायिदयितागण्डूषशेषं मधु ।
संप्रत्येव भवद्भुजार्गलगुरुव्यापारभग्नास्थिभि- १७५
र्गात्रैस्ते कथयन्त्यसारविधुरान्प्रायेण संसारिणः ॥

स्मर्तव्यं तु सौजन्यमस्य नरपतेर्यदपराधिनोरप्यनपराद्धयोरिव नौ सांप्रतं चेष्टितवान् । तदेहि मालतीसमक्षमधुना मदयन्तिकाहरणवृत्तान्तं विस्तरतः कथ्यमानं श्रोतुमिच्छामि । तथा च

१७३–१७६ अद्येत्यादि । यै राज्युत्सवे चन्द्रकिरणखण्डखचितं क्रीडालिङ्गनदातृवनितागण्डूषावशिष्टं मधु पीतमद्यैव ते संप्रत्येव लोकान्बाहुल्येन तुच्छविकलाङ्गशरीरैः कथयन्ति । कीदृशैः । त्वदीयभुजार्गलप्रबलताडनाच्चुटितास्थिभिः । तथा च । क्षणदृष्टनष्टमुग्धचेष्टिताः प्राक्तनकर्मायत्ता जना इति भावः ।

---

१७३. निमेषोत्सवे for नि–वे K2.

१७४. गाढूष for गण्डूष O.

१७६. तैः for ते B.; विकरान् for विधुरान B.

१७७. नरपतेरस्य सौजन्यं for सौ–तेः Bh.; यपराधयोरप्यपराध° for य–द्ध° Bh.; पर for यद् B. O.; °राद्धयोरप्य° for °राधिनोरप्य° N.; °राधयोरिव A. K1. K2. O. °राधिनोरिव C. for °राद्धयोरिव.

१७८. कृतोपसंवेदनं before सांप्रतं O.; सांप्रातं for सांप्रतं K1. कृतप्रसादमधिष्ठितवान् A. कृतोपसादनां चेष्टितवान् Bh. कृतोपसदनं चेष्टितवान् N. for सां–न् ; मकरंदः। before तदेहि Bh.

१७९. °काथाः कलहंसेन रण° for °काहरण A.; कलहंसकेन before कथ्य° O.; अनुभवावः Bh. O. अनुभवामः N. for श्रोतुमिच्छामि; अन्यच्च for तथा च A.; Bh. N. O. om. तथा च.

१८० कथयति त्वयि सस्मितमालतीवलितलोलकटाक्षपराहतम् ।
वदनपङ्कजमुल्लसितत्रपास्तिमितदृष्टि सखी नमयिष्यति ॥

इति परिक्रामतः । अयमसावुद्यानवाटः । प्रविशतः ।

माध० । कथं शून्य एव दीर्घिकाप्रदेशः ।

मक० । वयस्य नूनमस्मद्व्यतिकरोद्वेगपर्याकुलत्वादितस्ततः
१८५ परिभ्रमन्त्य आत्मनोत्रैवोद्यानगहने विनोदयन्त्यो भविष्यन्ति ।
तदेहि पश्यावः । उभौ परिक्रामतः ।

१८०-१८२ कथयतीत्यादि । त्वयि कथयति सति वदनपद्मं सखी मालत्या एव मदयन्तिका नमयिष्यति । कीदृशम् । सहासमालतीचञ्चलपक्ष्मकटाक्षैः पराहतम् । उद्गतलज्जानिश्चलदृष्टि च । मदयन्तिकानिमित्तयुद्धश्रवणेन मालत्या हासः ।

---

१८०. चलित for वलित C. E.; चलितपक्ष्म for व-ल K1. K2.

१८१. °मुल्लसितभ्रमन् स्तिमित Bh. °मुल्लसितभ्रु तत्स्तिमित N. for °मु-त्त; सखी for सखी Bh.

१८२. तदेहि पश्यावः । परिक्रामतः O. परिक्रम्य B. E. for इ-तः; Bh. N. om. इति परिक्रामतः; C. om. अ-टः; K1. K2. om. अ-त; O. om. प्रविशतः; प्रवेशं नाटयतः for प्रविशतः N.; माधवमकरंदौ after प्रविशतः A.

१८३. O. om. माध° । N. om. this speech and the following; शून्या एव प्रदेशाः A. शून्या इदानीं प्रदेशाः C. शून्या इदानीं भवेशाः K1. शून्या इमे प्रदेशाः K2. शून्य एवायं [दीर्घिका in margin] प्रदेशः O.; प्रवेशः for प्रदेशः B.

१८४. व्यतिरेक for व्यतिकर A. Bh.; एव after °स्ततः B.

१८५. °मेत्यात्मानं for म-त्मनः Bh.; आत्मानं for आत्मनः A. C. E. K1. K2. O.; विनोदयिष्यति A. Bh. विनोदयं [त्यो भविष्यं in margin] ति O. for वि-न्तिः; अयमसावुद्यानवाटः after °न्ति C. K1. K2.

१८६. C. om. त-तः; प्रविशावः for पश्यावः C. E.; B. om. उभौ परिक्रामतः; प्राविशतः for प-तः C. K1. K2.

लवङ्गिकामदयन्तिके । सहि मालदि । सहसावलोक्य । दिट्ठिआ पुणो वि एदे अणाहदा महाणुभाआ दीसन्ति । (क)

माधवमकरन्दौ । भवत्यौ क्व मालती ।

उभे । कुदो मालदी पदसद्देण अम्हे विप्पलद्धाओ मन्द-१९० भाइणीओ । (ख)

माध० । भवत्यौ कथं कथमपि सहस्रधैव विध्वंसते नो हृदयमतः स्पष्टमभिधीयताम् ।

(क) सखि मालति । दिष्ट्या पुनरप्येतावनाहतौ महानुभावौ दृश्येते ।

(ख) कुतो मालती पदशब्देनावां विप्रलब्धे मन्दभागिन्यौ ।

१९०–१९७ अत्रानेनावाभ्यां समर्थिता मालती । अधुना तु युवयोरवलोकनेनावां वञ्चिते इत्यर्थः । कथमिति त्रासे । कथमप्य-निर्वचनीयेन रूपेण ध्वंसते स्थितिं न बध्नाति । ममेत्यादि । यतोयं

---

१८७. लव । सहि मदअन्तिए मालदि for ल–लदि A.; सहि मालदि twice N.; मालदि twice Bh.; °सा विलोक्य for °सावलोक्य K1. K2. O.

१८८. N. om. एदे; एदे supplied in margin. O.; A. B. Bh. N. om. अणा-हदा; अणहा (corrected into °अणहदा) O.; अणहाभाआ for अ–आ K2.; °णुभावा Bh. O. °भाआ K1. for °णुभाआ.

१८९. मकरन्दमाधवौ for मा–न्दौ Bh. O.; B. om. भवत्यौ; क्व सा मा° A. Bh. K1. K2. O. क्वासौ मा° N. for क्व मा°.

१९०. B. om. कुदो; Bh. om. अम्हे; अम्मे for अम्हे B.; विप्पलद्धम्ह for वि-द्धाओ Bh.; मंदभाइणीओ विप्पलद्धाओ for वि–णीओ O.; Bh. om. म–ओ.

१९२. A. Bh. om. भवत्यौ; °त्यौ कथमिव सहसैव ध्वंसते for कथं–ते N.; E. N. om. one कथं; कथं । त्रासे । कथमपि for कथं–पि C.; A. Bh. om. सहस्रधैव; °धेव for °धैव K2.; मे for नो A. Bh. N.; O. om. नो.

१९३. N. om. अतः; A. Bh. om. स्पष्टम्; स्फुटं for स्पष्टं N.; समभि° A. समाभि° Bh. for अभि°.

मम हि कुवलयाक्षीं प्रत्यनिष्टैकबुद्धे-
१९९ र्भृशमयमनुबध्नोत्कम्पएवान्तरात्मा ।
स्फुरति च खलु चक्षुर्वाममेतच्च कष्टं
वचनमिह भवत्योः सर्वथा हा हतोस्मि ॥

मद० । ताए इदो णिग्गदे महाणुभावे अवलोइदं बुद्धर-
क्खिदं अ भअवदीसआसं विसज्जिअ अप्पमादणिमित्तं
२०० विण्णवेहि अज्जउत्तं त्ति लवङ्गिआ अणुप्पेसिदा । तदो

(क) *तयेतो निर्गते महानुभावे†वलोकितां बुद्धरक्षितां च भगव-
तीसकाशं विसृज्याप्रमादनिमित्तं विज्ञापयार्यपुत्रमिति ‡लवङ्गिकानु-

ममान्तरात्मात्यर्थमनुगतोत्कम्प एवास्ति । कीदृशस्य । पद्माक्षीं प्रत्यनिष्टैकमतेः । मम वामं चक्षुः स्फुरति च । इह भवत्योर्वचनं कष्टमेतद्दुःखदायि । हा कष्टे । सर्वथा हतोस्मि । अन्तरात्मनोशकुनस्य भवद्वचनस्य चैकमत्यादिति भावः ।

१९५. °द्रैवति हृदयमन्तर्भृश्यती° for °भृ—ती° A. B. Bh. C. E. °रविरतमनुबद्धो-त्कंपएवांतरात्मा N. भृशमयमनुबध्यात्कंपमेवांतरात्मा O.; भ्रश्यति for भ्रश्यति A. Bh.

१९६. हि खलु चक्षुः स्पष्टमेतच्च वामं A. हि खलु वक्षः स्पष्टमेतच्च वामं Bh. for च खलु–ष्टं; मम for खलु K2.

१९७. °नमपि for °नमिह N.

१९८. तदो for ताए Bh.; तदा क्खु इदो A. तदा खु इदो K1. K2. O. ता ए ख्खु इदो N. for ताए इदो; B. om. ताए; °णुभाए B. °णुहावे N. for °णुभावे; °लोइदादुदिआं बुद्धरक्खिदां B. °लोइदा बुद्धरक्खिदा अ उभे C. E. for °लो–अ.

१९९. °क्खिअं for क्खिदं N.; च for अ Bh. O.; उभे after °क्खिदं अ. K1.; °वदीए for °वदी A. Bh.K2. N.; पेसिअ for विसज्जिअ A. Bh. N.; °मत्त for °माद A.

२००. अप्पउत्तं विण्णवेहि for वि–त्तं Bh.; विण° for विण्ण° K1. K2. O.; अय्य for अज्ज° K2.; ति for त्ति K1. O.; लवंगिकां for ल–आ O.; अ before अणु° K1.; °सिअ K2. °सिय O. for °सिदा; K2. om. तदो.

* तदा खल्वितो Com. † बुद्धरक्षितामवलोकितां चोभे भग° Com. ‡ लवङ्गिकामनुप्रेष्य Com.

उत्तम्ममाणा एदाए मग्गं अवलोइदुं अग्गदो पसरिदा। पच्छादो अम्हे ण तं पेक्खामो। तदो अम्हेहिं जाव विडवन्तराइं विचिणिदाइं ताव तुम्हे दिट्ठत्ति। (क)

माध०। हा प्रिये मालति

किमपि किमपि शङ्के मङ्गलेभ्यो यदन्य- २०५
द्विरमतु परिहासश्चण्डि पर्युत्सुकोऽस्मि।

प्रेषिता। तत उत्ताम्यमानैतस्या मार्गमवलोकयितुमग्रतः प्रसृता। पश्चादावां न तां प्रेक्षावहे*। तत †आवाभ्यां यावद्विटपान्तराणि विचितानि तावद्युवां दृष्टाविति।

२०२–२१२ अत्र पश्चादावां प्रसृते इत्यन्वयः। विचितान्यन्विष्टानि। किमपीत्यादि। मङ्गलेभ्योन्यदनिष्टं किमप्यनिर्वचनीयं यद्यस्मात्परिहासादहं शङ्के स परिहासो विरमतु। परिहासेन तव निह्नवेनिष्टं शङ्केतस्तं मुञ्चेति भावः। हे चण्डि कोपने समुत्सु-

---

२०१. उत्तम° for उत्तम्म° O.; K2. om. एदाए; एताए A. अताए Bh. ताए N. for एदाए.; अग्गदो विलोइदुं K1. अवलोइदुं अगदो विलोइदुं K2. for अव-दो; आलोअइदुं for अ-दुं N.; परिट्ठिदा A. परिदा Bh. परिगदा K2. ओसारिआ N. प्पसरिदा O. for पसरिदा.

२०२. पच्छादे अहं ण अ तं पेक्खामि A. पछादो हं ण अ तं पक्खामि Bh. पछादो अहं ण अ तं पेक्खामि K2. पचादो अहं तं ण पेक्खामि N. पच्छादो अहं न य तं प्पेखामि O. for प-मो; अ after ण E. K1.; अम्हे वि for अम्हेहिं K1.; एत्थ before जाव A. K1.; एत्थ Bh. O. इत्थ K2. for जाव; मग्गिदाइं एत्थ विडवंतराइं जाव तुम्हेहिं ण दिट्ठत्ति for जा-त्ति N.; °डवा° for °डव° K2.

२०३. °न्तराणि for °न्तराइं A.; जाव after °राइं Bh.; विचुणिदाणि A. विचिणदाइं C. विविदाइं K1. विचिआइं K2. विविचिदाइं O. for वि-इं; दाव B. जाव K2. O. for ताव; तुम्ह दिट्ठेत्ति for तु-त्ति Bh.; दिट्ठेत्ति A. ट्ठंति B. दिट्ठंति C. O. दिट्ठेति K1. दिट्ठन्ति K2. for दिट्ठत्ति.

२०४. Bh. om. हा.

२०५. किमपि मनसि for किमपि किमपिं K2.

* पश्यावः Com. † आवाभ्यामिह विहरन्तीभ्यां यावद्वि° Com.

कलयसि कलितोहं वल्लभे देहि वाचं
भ्रमति हृदयमन्तर्विह्वलं निर्दयासि ॥

वल्लभे । हा पिअसहि कहिं सि । (क)

२१० मक० । वयस्य किमित्यविज्ञाय वैक्लव्यमवलम्ब्यते ।

माध० । सखे त्वमपि किं न जानासि माधवस्नेहदुःखिता-यास्तस्याः कातर्यचेष्टितानि ।

मक० । अस्त्येतत् । किं तु भगवतीपादमूलगमनमप्याशङ्क्यते । तदेहि तत्र तावत्पश्यावः ।

२१५ उभे० । एवं पि संभावीअदि (ख)

(क) हा प्रियसखि क्वासि ।

(ख) *एवमपि संभाव्यते ।

कोस्मि यतः । तथा च कोपेनापि निह्नवं माकुर्वित्याशयः । अथ मामनेन प्रकारेण कलयसि जिज्ञाससे तर्हि कलितो ज्ञातोहम् । हे वल्लभे वाचं देहि । त्वमेव मे वल्लभा । अतो वदेत्यर्थः । विह्वलमधीरं सन्मम चित्तमन्तर्भ्रमति स्थितिं न लभते । अत एव सोपालम्भमाह निष्करुणासि । वैक्लव्यं दुःखित्वम् । कातर्यं कातरत्वं तेन चेष्टितानि प्राणत्यागादीनि ।

---

२०७. कलय वि° K1. K2. O. कथय वि° N. for कलयसि.

२०९. N. om. this speech; प्रिय for पिअ O.; गदा after कहिं A. Bh. K1. K2.

२१०. B. N. om. वयस्य; किमित्यविज्ञाय वयस्य for व-य Bh.; अवज्ञाय for अ-य B. N.; वैकल्य° for वैक्लव्य° K1.; आलंब्यते for अ-ते C. E.

२११. किं त्वमपि for त्व-किं Bh.; O. om. किं; दुस्थिता° for दुःखिता° N. O.

२१२. तन्व्याः for तस्याः B.

२१३. K2. om. मूल.

२१४. तत्तावत् for तत्र तावत् O.; B. om. तत्र; गच्छावः for पश्यावः N.

२१५. एवं वि सम्भावेअदि K2. एदं वि संभाविअदि N. for ए-दि; एदं Bh. इदं O. for एवं, K1. om. पि; सम्भावअदि for सं-दि K1.

* एतत् for एवं Com.

माध० । एवं नामास्तु । परिक्रामन्ति ।

मक० । विचिन्त्य स्वगतम् ।

याता भवेद्भगवतीभवनं सखी नो
जीवन्त्युपेष्यति न वेत्युपशङ्कितोस्मि ।

२१८-२२१ यातेत्याहि । अस्माकं सखी भगवतीगृहं यदि गता भवेत्तदा जीवन्ती समागमिष्यति । न वा गता तदा नागमिष्यतीत्याशङ्कितोस्मि । तत्र हेतुः । बन्धुजनमित्रप्रियाणां संगम आदौ यस्य तत्सौख्यं बाहुल्येन विद्युत्स्फुरणचञ्चलमेव भवति । तदिह भगवतीपादमूलेति साधारणपदोल्लेखेन मालत्या भविष्यत्सौदामिनीपार्श्वगमनस्य सूचनेन नवमाङ्कावतारोपि सूचितः । अत एवाङ्कावतारोयम् । यदाह ।

समाप्यमान एकस्मिन्नङ्के न्यस्य च सूचनम् ।
समासतो हि नाट्यज्ञैरङ्कावतार उच्यते ॥

सुहृन्मित्रम् । प्रियं प्रीतिविषयं मनोज्ञं वस्तु ।

---

२१६. N. om. नाम; भवतु for अस्तु A. Bh. N.; सर्वे परिक्रामन्ति A. Bh. K2. परिक्रामति N. B. C. E. K1. om. परिक्रामन्ति.

२१७. B. om. मक°; N. om. विचिन्त्य; आत्म for स्व A. Bh.; C. om. स्वगतम् .

२१८. नु तद्भग° for भवेद्भग° K2.; सदनं for भवनं N.; वो for नो K1. K2.

२१९. जीवन्त्यथैष्यति न चेत्यभिशङ्कितोस्मि A. जीवत्यथेष्यति न चेत्यभिनांकितोस्मि Bh. जीवन्त्यथैष्यति न वेत्यभिशंसितोस्मि N. for जी-स्मि; °न्त्यपे° for °न्त्युपे°, K1.; वेति वि° for वेत्युप° K1. K2.

२२० प्रायेण बान्धवसुहृत्प्रियसंगमादि
सौदामिनीस्फुरणचञ्चलमेव सौख्यम् ॥

इति निष्क्रान्ताः सर्वे ।

॥ मालत्यपहारो नामाष्टमोङ्कः ॥

सूते स्म यं रत्नधरोतिमान्यो मान्यातिमान्या दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेङ्को गतोष्टमोयं रसरम्यरूपः ॥

॥ इत्यष्टमोङ्कः ॥

---

२२१. °मनी for °मिनी K2.

२२२. इति मालतीमाधवे A. मालतीमाधवे C. K2. for माल-नाम; Bh. E. N. O. om. माल-नाम; °तीहरणं for °त्यपहारो K1.

॥ नवमोऽङ्कः ॥

ततः प्रविशति सौदामिनी ।

सौदा० । एषास्मि सौदामिनी भगवतः श्रीपर्वतादुत्पत्य पद्मावतीमुपाश्रिता । तत्र मालतीविरहिणः संस्तुतप्रदेशदर्शनासहिष्णोः संस्त्यायं परित्यज्य सह सुहृद्वर्गेण बृहद्द्रोणीशैलकान्तारप्रदेशमधितिष्ठतो माधवस्याधुनान्तिकं प्रयामि । भोस्तथाहमुत्पतिता यथा सकल एष गिरिनगरग्रामसरिदरण्यव्यतिकरश्चक्षुषा परिक्षिप्यते । पश्चाद्विलोक्य । साधु साधु ।

१–११ अधुना पूर्वसूचितसौदामिन्या मालतीजीवननिवेदनेन माधवप्रत्युज्जीवनाय प्रवेशमाह । तत इति । नानासिद्धिस्थानत्वेन देवतात्मकतया भगवत्पदं श्रीपर्वते । संस्तुतः परिचितः । द्रोणी नद्या मध्यम् । तथेत्यनेनोत्पतनस्य दूरत्वमुक्तम् । व्यतिकरः समूहः ।

---

१. Bh. om. ततः; प्रविश्य for प्र–ति Bh.

२. Bh. om. सौदा° ।; B. C. om. एषास्मि सौदामिनी; उपेत्य A. B. Bh. C. K2. O.

३. उपसृत्य A. B. C. E. K1. K2. उपसृत्य Bh. O. उपश्रित्य N. for उपाश्रिता, the text उपाश्रिता with G.; A. B. C. E. om. तत्र; °हिणो माधवस्य संस्तु° for °हि–स्तु° Bh. N.; °तादर्शना° for °त–ना° B.

४. स्थानं A. संस्त्यानं B. संस्थानं यं Bh. संस्थायं C. संस्त्ययं O. for संस्त्यायं; सुप सह for सह सु–ण Bh.; ब्रह्मद्रोण N. ब्रहद्रोण O. for बृ–णी; सैलकटकान्तर for शैलकान्तार K1.

५. °रप्रवेशं परिभ्रमतो माधवस्याधुनान्तिकमुपयामिति A. °रप्रवेशो माधवस्य तदंतिकमनुप्रयामीति B. °रप्रवेशमधुनातदंतिकमनुप्रयामि Bh. °रप्रवेशो माधवस्याधुना तदंतिकमनुप्रयामीति C. E. °रप्रवेशं परिभ्रमतो माधवस्याधुनान्तिकमनुप्रथामि K1. °रप्रवेशं परिभ्रमतोमाधवस्याधुनान्तिकमनुप्रयामि K2. °रमुपसृत्याधुनातदंतिकं प्रयामि N. °रप्रदेशं माधवस्यतदंतिकमनुप्रयामि O. for °र–मि, the text with G. परिक्रम्य before भो° K1. K2.

६. °मुत्या° for °मुत्प° K1.; °लगिरि for °ल एष गिरि B.

७. Bh. N. om. साधु साधु; O. om. one साधु.

पद्मावती विमलवारिविशालसिन्धु-
पारासरित्परिकरच्छलतो बिभर्ति ।
उत्तुङ्गसौधसुरमन्दिरगोपुराट्ट-
संघट्टपाटितविमुक्तमिवान्तरिक्षम् ॥
अपि च । सैषा विभाति लवणा ललितोर्मिपङ्क्ति-
रभ्रागमे जनपदप्रमदाय यस्याः ।
गोगर्भिणीप्रियनवोलपमालभारि-
सेव्योपकण्ठविपिनावलयो विभान्ति ॥

परिक्षिप्यत इव नेत्रमण्डले प्रविष्टीक्रियत इव । पद्मावतीत्यादि । पद्मावती पुरी गगनमिव धारयति । विमलवारिरच्छजला महती सिन्धुश्च पारा च सरितौ तयोः परिकरो वेष्टनं तद्व्याजात् । उच्छ्रित-प्रासाददेवकुलपुरद्वाराट्टालिकानां घर्षणेनादौ विदीर्णे ततो विशेषेणो-भयतस्त्यक्तम् । उत्तुङ्गसौधादय आकाशं पाटयित्वा निर्गताः । अथ नदीच्छलेन तदाकाशं पतितमिवेत्यर्थः ।

१२-१७ सैषेत्यादि । सैषा लवणा नदीभेदो विभाति । मनो-ज्ञकल्लोलावलिः । वर्षासु यस्या गवां गर्भिणीनां प्रिया नवा योलपमाला

---

८. विपुल for विमल E.

९. °वांपी for पारा N.; °द्यति° for °त्परि° K2. O.; °सर for °कर C.; °श्चलतो for च्छलतो Bh.

१०. पुरगोपुरमंदिराट्ट for सु-ट्ट N.

११. °रीक्षं for °रिक्षम् A.

१२. ललितावलयो° (corrected in margin into लवणा ललितो°) for लव-तो° O.: वरदा for लवणा N.; चलितो° Bh. वलितो° K2. for ललितो°.

१४. निवोलपलासभारी for न-रि Bh.

१५. सव्यो° for °सेव्यो° Bh. भवन्ति for विभान्ति B. Bh. Q. (corrected in margin into विभान्ति])

अन्यतोवलोक्य । अयमसौ भगवत्याः सिन्धोर्दारितरसातलस्तटप्रपातः ।

यत्रत्य एष तुमुलध्वनिरम्बुगर्भ-
गम्भीरनूतनघनस्तनितप्रचण्डः ।
पर्यन्तभूधरनिकुञ्जविजृम्भमाणो
हेरम्बकण्ठरसितप्रतिमानमेति

तृणविशेषराजिस्तां बिभ्रति ॥ ताच्छील्ये णिनिः ॥ अत एव सेव्याः परिशीलकसुखदाः समीपवनपङ्क्तयो लोकहर्षाय भवन्तीति । सैषेत्यनेन पूर्वदृष्टत्वमुक्तम् । अपो बिभर्तीत्यब्भ्रम् । अभ्रति गच्छति वेत्यभ्रम् । अतो बकारयुक्तं तद् । अयुक्तं चेदं पदमित्यवधेयम् ॥ चतुष्पादो गर्भिण्येति समासः । उलपो नाम तृणान्तर इति मेदिनीकरः मालभारीत्यत्रेष्टकेषीकामालानां चिततूलभारिष्विति ह्रस्वः ॥ रसातलतटः पृथ्वीतटः । तलशब्दः स्वरूपे । प्रपातोतटम् । यद्वा । तटे प्रपातोतिशयितं पतनम् ।

१८–२७ यत्रत्येत्यादि । यदीय एष महाध्वनिः सिन्धोः पर्यन्तगिरिकुञ्जेषु वर्धमान [नो?] विघ्नेशगलध्वनिसाम्यं गच्छति । तस्य गजास्यत्वेन गभीरध्वनित्वात् । कीदृशः । जलपूर्णगभीरनवमेघध्वनिवत्प्रचण्डः ॥ तुमुलो महति स्मृत इति विश्वः ॥ चन्दनं रक्तचन्दनं देवदारुर्वा । उपचारात् । अन्यथास्य मलयजत्वविरोधात् ।

---

१६. °त्रं विलोक्य for °तोवलोक्य O.; स एष Bh. एष K1. K2. O. for अयमसौ.
१७. प्रायस्तट A. तट C. for °स्तट; Bh. om. °स्तट.
१८. तुमुलो for तुमुल A. C. E.
२० विजृम्भमाण A. विजृंभणेषु B. C. E. K1. K2. O. विजृंभणेन Bh. for वि-णो.
२१. रणित for रसित N.

एताश्च चन्दनाश्वकर्णकेसरपाटलाप्रायतरुगह्वनाः परिणत-
मालूरसुरभयोरण्यगिरिभूमयः स्मारयन्ति खलु तरुणकदम्ब-
जम्बूवनावनद्धान्धकारगुरुनिकुञ्जगम्भीरगह्वरोद्गारगोदावरीमु-
२५ खरितस्निग्धविशालमेखलाभुवो दक्षिणारण्यभूधरान् । अयं
च मधुमतीसिन्धुसंभेदपावनो भगवान्भवानीपतिरपौरुषेयप्रति-
ष्ठः सुवर्णबिन्दुरित्याख्यायते । प्रणम्य ।

अश्वकर्णो वृक्षभेदः । प्रायःशब्दः प्रभूत्यर्थो बाहुल्यार्थो वा । परिणतं पक्वम् । मालूरं बिल्वफलम् । तरुणो वृक्षभेदः । अवनद्धो धृतः । उद्गारः प्रतिशब्दः । गोदावरी नदीभेदः । मेखला नितम्बः । भूधरान्मलयादीन् । सौदामिन्या दक्षिणदेशवासित्वेन स्मरणम् । मधुमतीसिन्ध्वोर्नद्योः संभेदः संगमस्तस्य पावनः पावित्र्यहेतुः । स्वयंभूसंनिधानस्य महातीर्थहेतुत्वादपरिमिताज्ञाता पुरुषकृता प्रति-
ष्ठा स्थितिर्यस्य । एतेन स्वयंभूत्वमुक्तम् । आख्यानं प्रसिद्धिः ।

---

२२. एताश्चन्दनाश्वकर्णसरलपाटल A. Bh. N. एताश्च चंदनाश्वकर्णसरलपाटल E. एताश्चन्दनाश्वकर्णकरञ्जकेसरकदलीपाटला K2. for ए-ला; सरस for केसर O.; कदली before पाटला K1.; °णामाललर for °णतपालूर N.

२३. K1. K2. N. om. गिरि; स्मर° for स्मार° B. Bh.E. O.; B. N. om. खलु; तांस्तरुण Bh. N. मां वरण K2. for तरुण.

२४. अवनद्ध for अवनद्ध N. O.; °कारि for °कार B. C.; गुरुगिरिनिकुंजगुंजग्रं-भीरगह्वरोद्गारघोरघोषणगोदावरीरवमुखरितविशाल for गु-ल N.;-निकुंजपुंजगंभीरगह्वरोद्गार B. निकुञ्जगुञ्जग्रभीरगह्वरोद्गार K1. K2. निकुंजगुंजग्रंभीरगह्वरोदार° O. for नि-द्गार; गभीर for गम्भीर A. गह्वरोद्गार for गह्व-र Bh.; °रोदार for °रोद्गार° C.; °रीरवमु° for °रोमु° A. Bh.

२५. A.Bh. K1. K2. om. स्निग्ध.

२६. °दे पार्वतीभवानीपति° for °द-ति C.; °हृधी (?) य for °हृवेय K1. प्रतिष्ठ for प्रतिष्ठः N.

२७. स्वर्ण for सुवर्ण N.; Bh. E. om. इति.

जय देव भुवनभावन जय भगवन्निखिलवरद निगमनिधे ।
जय रुचिरचन्द्रशेखर जय मदनान्तक जयादिगुरो ॥

गमनमभिनीय । ३०

अयमभिनवमेघश्यामलोत्तुङ्गसानु-
र्मदमुखरमयूरीमुक्तसंसक्तकेकः ।
शकुनिशबलनीडानोकहस्निग्धवर्ष्मा
वितरति बृहदश्मा पर्वतः प्रीतिमक्ष्णोः ॥

२८–२९ अदृष्टार्थं शिवनुतिमाह । जयेति । भुवनानां कार्यजातानां भावन उत्पादक । दीव्यतीति देव द्युतियुक्त । भगवन् भगं तत्त्वज्ञानं तद्युक्त । तथा च रागद्वेषादिरहित इत्यर्थः । स्तुतिफलमाह । अखिलवरान्भुक्तिमुक्त्यादीन्ददाति तादृशो निगमो वेदस्तन्निधे तत्कर्तः । यद्वा । निगम आविर्भावस्तदाश्रय । तथा च । वेदद्वाराविर्भावेन जगदुपकारक इत्यर्थः । मनोज्ञचन्द्रभूषण । तथा च वेदकारणाय कृतशरीरपरिग्रह इत्यर्थः । तर्हि पौरुषेयत्वाद्वेदाप्रामाण्यं स्यादित्यत आह । मदनेति । सर्वदोषनिधेः कामस्य नाशन निर्दोष । अत एव भगवन् । तथा च नोक्तदोषः । आदौ सर्गादौ गुरो । ब्रह्मादीनामित्यर्थात् । तथा च वेदस्य भगवत्कर्तृत्वमायाति ।

३१–३४ अयमित्यादि । अयं गिरिर्नेत्रयोर्हर्षं ददाति । कीदृशः । नवीनमेघश्यामतुङ्गसानुः । हर्षप्रीतमयूरस्त्रीकृता संसक्ता मि-

---

२८. सकलभुवनपावन for दे–न Bh.; निखिल B. Bh. E. N. K2.; for अखिल A. B. Bh. C. E. N. om. वरद; वाङ्निगम for निग-धे B.; वेद for निगम C.

२९. शेषर for शेखर Bh.; जय जगदादि A. जय जयादि E. for जयादि.

३०. °धाय for °नीय Bh.

३२. मयूरा° Bh. चकोठी C. for मयूरी.

३३. नीला° for नीडा° B. Bh. O.; वर्त्मा for वर्ष्मा K2.

३४. समहीयान् for बृहदश्मा O.

३९ अपि च । दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्थानमम्बूकृतानि ।
शिशिरकटुकषायः स्यायते सल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥

ऊर्ध्वमवलोक्य ।

४० कथं मध्याह्नः । तथाह्यत्र संप्रति

लिता केका मयूरवाणी यत्र सः । शकुनिभिः पक्षिभिः शबलाः कर्बुरा ये नीडानोकहाः पक्षिवासवृक्षास्तैः स्निग्धं वर्ष्म शरीरं यस्य सः । तरूणां पक्षिव्याप्तत्वेनाशेषपक्षिणो नीड एव वसन्तीति भावः । बृहदद्मा विपुलशिलः ॥ केका वाणी मयूरस्येत्यमरः । शबलैताश्च कर्बुर इति च । कुलायो नीडमस्त्रियामिति च । अनोकहः कुटः शाल इति च । शरीरं वर्ष्म विग्रह इति च ॥

३९-३८ दधतीत्यादि । अत्र गिरौ गुहावासिनां तरुणभल्लूकानामम्बूकृतानि सश्लेष्मकघूत्कारध्वनयोनुरासितेन प्रतिरवेण स्थूलानि स्थानं घनतां दधति । शल्लकीनां वृक्षभेदानां गजखण्डितविस्तीर्णसंधिपर्वनिर्गतगन्धः स्यायते निबिडीभवति । निष्यन्दः स्पर्शाच्छिशिरः शीतो रसतः कटुः कषायः । स्थानमिति भावप्रधानो निर्देशः ॥ अम्बूकृतं सनिष्ठीवमित्यमरः ॥

---

३९. C. N. om. अपि च; °जां मत्त for °जामत्र A. Bh. E.

३७. कषाव for कषायः Bh.; °यस्ताय° K2. °यस्तन्य° O. for °यः स्न्याय°; शल्ल° for सल्ल° A. E.

३८. °मित Bh. मद K1. for °मिभ; विशीर्ण for विकीर्ण N.; विष्यंदी for निष्यन्द Bh.

३९. K1. K2.; N. O. om. ऊर्ध्वमवलोक्य.

४०. अये before कथं N.; Bh. N. om. अत्र; E. om. संप्रति.

काश्मर्याः कृतमालमुद्गतदलं कोयष्टिकष्टीकते
तीराश्मन्तकशिम्बिचुम्बिनमुखा धावन्त्यपः पूर्णिकाः।
दात्यूहैस्तिनिशस्य कोटरवति स्कन्धे निलीय स्थितं
वीरुन्नीडकपोतकूजितमनुक्रन्दन्त्यधः कुक्कुटाः॥

४१–४४ काश्मर्या इत्यादि। गम्भार्याः सकाशात्कृतमाल-मारग्वधवृक्षमुद्भूतपत्रम्। घनच्छायामिति यावत्। कोयष्टिकः कोवा इति ख्यातः पक्षी टीकते गच्छति। गम्भार्या अल्पपत्रत्वात्। यद्वा। कृता संपन्ना माला वृक्षपङ्क्तिर्यत्र तं प्रदेशं गच्छतीत्यर्थः। तीरस्थो-ऽश्मन्तकस्तीराश्मन्तकः। शाकपार्थिवादिः। अश्मन्तकोल्लकोला इति ख्यात आम्रातको वा वीरणं वा। तस्य शिम्बिः शिखा लताभेदो वा तस्याश्चुम्बिनं चुम्बनकरणं मुखं यासां तादृशाः पूर्णिका पक्षजातयोपः पानीयानि धावन्ति। ग्रीष्मतप्तास्ता नीडं विहाय जलमनुगच्छन्तीत्यर्थः। यद्वा। तीराश्मन्तकं तीरवर्तिवीरणमपः-पूर्णिका कुम्भीरमक्षिका धावन्ति व्रजन्ति। ग्रीष्मतप्तजलं त्यक्त्वा तीरवीरणादिच्छायामनुसरन्तीत्यर्थः। यद्वा। अश्मन्तकं शिंशि-पावृक्षस्तस्य शिम्बिरभिरित्यर्थः। तिनिशस्यातिमुक्ताख्यवृक्षस्य च्छिद्रवति स्कन्धे प्रकाण्डे च्छायासेवनार्थं दात्यूहैः पक्षिभेदैः कोण्डाडाडक इति ख्यातैर्निलीय स्थितम्। वीरुल्लता नीडं वासो

४१. काश्मीर्याः B. C. काश्मर्यात् N. for काश्मर्याः; °टांकते for टीकते Bh.

४२. तीराश्मांतक Bh. तीरार्श्विक C. for ती-क; तीराश्मांतरकच्छविचुंबनपरा for ती-खा N.; चुंबन B. चुंबित Bh. C. E. K1. K2. for चुम्बिन; चुंबनमुखो for चु-खाः O.; अधः for अपः B. K2.

४३. तिलि° E. तिमि° N. for तिनि°; कोटिरवती for को-ति Bh. स्कन्दे for स्कन्धे K1.

४४. अदः K2. अतः O. for अधः; कुक्कुभाः for कुक्कटाः E. K1. O.

४५ तद्भवतु माधवमरकन्दावन्विष्य यथाप्रस्तुतं साधयामि ।

इति निष्क्रान्ता । विष्कम्भकः ।

ततः प्रविशतो माधवमकरन्दौ ।

मक० । सकरुणं निःश्वस्य ।

.यस्य कपोतस्य पाण्डुनामपक्षिणः शब्दितं लक्षीकृत्य कुक्कुभा अधस्तरूणां रुदन्ति । ग्रीष्मतापात्कपोता निजनीडवासिनः कुक्कुभाश्च तृषार्ता रुदन्तीत्यर्थः । जातिस्वभाव एवासौ । यद्वा । कुक्कुभाः क्रन्दन्त्याह्लादयन्ति । अहो कपोतरुतमित्यभिलषन्तीत्यर्थः ॥ गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिकेत्यमरः । आरग्वधे राजवृक्षशम्याकचतुरङ्गुलाः । आरेवतव्याधिघातकृतमालसुवर्णका इति च । कोयष्टिकष्टिट्टिभक इत्यपि । आम्रातकेम्लिकायामदमन्तको वीरणेपि च । शिंशिपादमन्तकं प्राहुरिति धरणिः । शिम्बिः शिखा लतामेद इति विश्वः । नासाच्छिद्यां तु पूर्णिकेति च । पूर्णिका पक्षीति ख्याता पतत्रिङ्केति ख्याता वा । अपःपूर्णिका कुम्भीरमक्षिकेत्यपि धरणिः । हाल्यूहः कालकण्टक इत्यमरः । तिनिशे स्यन्दनो नेमी रथक्षुरतिमुक्तक इति च । अस्त्री प्रकाण्डः स्कन्धः स्यादिति च । तित्तिरिः कुक्कुभो लाव इति च ॥ मयूरप्रमाणोयं पक्षी । तदित्युपसंहारे । विष्कम्भक इति । शुद्धविष्कम्भकोयम् । यदाह ।

शुद्धो मध्यमपात्रेण संस्कृतोक्त्या निबध्यते ॥ इति ।

---

४५. यावत् for भवतु B.; °वेषान्वि° for °वन्वि° K1. K2. O.; सान्त्वयामि A. Bh. संपादयामि C. K2 सम्भावयामि K1. for साधयामि.

४६. O. om. इति; ततो for निष्क्रान्ता Bh.; शुद्धविष्कंभः for वि-कः N.

४७. °शति माधवो मकरन्दश्च for °श-दौ A. Bh. N.

४८. मक° after निः श्वस्य instead of before सकरुणं K1.; B. om. सकरुणं; निःश्वसन् B. निश्वस्य K2. for निःश्वस्य; E. om. निःश्वस्य.

न यत्र प्रत्याशामनुपतति नो वा रहयति
प्रविक्षिप्तं चेतः प्रविशति च मोहान्धतमसम् । ५०
अकिंचित्कुर्वाणाः पशव इव तस्यां वयमहो
विधातुर्वामत्वाद्विपदि परिवर्तामह इमे ॥

माध० । हा प्रिये मालति क्वासि । कथमविज्ञाततत्त्वमद्भुतं झटिति पर्यवसितासि । नन्वकरुणे प्रसीद संभावय माम् ।

४९–५२ न यत्रेत्यादि । यैरस्माभिस्तादृशं राजसैन्यं जितमि-मे वयं स्रष्टुर्वाम्यात्विपत्तौ पुनः पुनर्वर्तामहे । यत्र विपत्तौ चित्तम् ॥ कर्तृ ॥ प्रत्याशां नानुगच्छति न वा त्यजति । अन्वयव्यतिरेकानिश्चयात् । तथा च सा जीवति न वेति न ज्ञायत इति भावः । रहत्यागे स्वार्थे णिच् ॥ प्रतिक्षिप्तं पुनःपुनः प्रेरितं सच्चेतः पुनर्मोहरूपगाढान्धकारं प्रविशति । किं कर्तव्यमिति न जानीम इति भावः । अत एव कामप्यर्थक्रियामकुर्वाणाः पशव इव ।

५३–५९ यत एवाविज्ञातं तत्त्वमत एवाश्चर्यम् । पर्यवसिता समाप्तिं गता । संभावयाश्वासय । प्रियेत्यादि । हे प्रियमाधवे मयि किमस्निग्धासि । माधवान्यशङ्कामपनयति । ननु हे अहमेव स यं पूर्वं तव

---

४९. बाहयति च for वा-ति E.

५०. प्रंति° for प्रवि° B. E. K1. K2.; तु for च E. N. O.; °मसे for मसम् Bh.

५१. तस्या A. यस्यां K2. for तस्यां.

५२. मोहा° (corrected in margin into वर्त्ता°) for वर्ता O.

५३. O. om. मालति; प्रयच्छ मे प्रतिवचनं after क्वासि B. O. (in margin); °ज्ञाता त्वम° for °ज्ञाततत्त्वम° O.; A. om. अद्भुतं; प्रिये B. च N. after अद्भुतं.

५४. झगिति for झटिति O. उपसृता B. प्रक्रांता Bh. अपक्रांता N. for पर्यवसिता.

५९ प्रियमाधवे किमसि मय्यवत्सला
ननु सोहमेव यमनन्दयत्पुरा ।
स्वयमागृहीतकमनीयकङ्कण-
स्तव मूर्तिमानिव महोत्सवः करः ॥

वयस्य मकरन्द दुर्लभः पुनर्जगति तावतः स्नेहस्य संभवः ।

६० सरसकुसुमक्षामैरङ्गैरनङ्गमहाज्वर-
श्चिरमविरतोन्माथी सोढः प्रतिक्षणदारुणः ।

करःस्वयमनन्दयत् । तथा च माधवान्यशङ्कामपि मा कृथा इति भावः । आगृहीतमीषद्गृहीतं सात्त्विककम्पादिना चपलतया मनोज्ञसुखं येन सः । यद्वा । आगृहीतमभिगृहीतं करसमर्पणात् । अत एव मूर्तिमान्कृतदेहपरिग्रहो महोत्सव इव । सोपि गृहीतमण्डनो नन्दकश्च भवति । उद्गृहीतमिति पाठ उच्चैर्गृहीतमित्यर्थः ॥ कङ्कणं मण्डने सूत्र इति विश्वः ॥ तादृशस्येत्यनुस्मृतिः करग्रहणमहोत्सवानुध्यानस्वास्थ्यात्तदभ्यासाद्वा । यदाह ।

स्वास्थ्याभ्यासमसमुत्था श्रुतिदर्शनसंभवानुस्मृतिः ॥ इति ।

६०-६२ सरसेत्यादि । तया काममहाज्वरोवस्थादशको बहुकालं सोढः । अनङ्ग एव महाज्वर इति वा । नवपुष्पमृदुभिरङ्गैः । कीदृशः । संततमर्मव्यथाकारी । अत एव प्रतिमुहूर्तमुन्मूलनोद्यतः । एतेन दुःसहत्वमुक्तम् । ततः प्राणांस्त्यक्तुं तया मनो विशेषेण निरपेक्षतया धृतम् । अत एव तृणमिव । सारमाह इतः करार्पण-

---

५७. अयमुद्गृहीत A. E. अयमागृहीत Bh. N. for स्व-त.

५९. पुनस्तादृशस्य for पु-तः B. तावतः स्नेहस्य जगति for ज-स्य Kl.; सखेर्द after संभवः Bh.

६०. सरल for सरस N.

६१. °रलो° for °रतो° O.

तृणमिव ततः प्राणान्मोक्तुं मनो विधृतं तया
किमपरमतो निर्व्यूढं यत्करार्पणसाहसम् ॥
अपि च । मयि विगलितप्रत्याशात्वाद्विवाहविधेः पुरा
विकलकरुणैर्मर्मच्छेदव्यथाविधुरैरिव । ६५
स्मरसि रुदितैः स्नेहाकूतं तथा व्यतनोदसा-
वहमपि यथाभूवं पीडातरंगितमानसः ॥

साहसादपरं किमस्ति । अपि तु न किमपीत्यर्थः । यत्करस्यार्पणं स्वयमेव दानं तदेव साहसं निर्व्यूढं निःशेषेण दोषमपहाय वृत्तम् । कुलकन्यकानां तन्निषेधात्साहसत्वम् । तृणमिवेत्यत्र लिङ्गवचनभेदे नोपमादोषो भवति । रसान्तर्गतत्वेन धीमतामनुद्वेगात् । यत्रोद्वेगो न धीमतामिति दण्डिवचनात् ।

६४–६७ मयीत्यादि । सखे असौ प्रिया स्नेहेङ्गितं रुदितैस्तथा विस्तारयामास यथा पीडाचपलचित्तोहमप्यभूवं भूतोस्मीति स्मरसि । इतिरध्याहार्यः । अन्यथा कर्माप्राप्तिः । रुदितस्य करुणजन्यत्वात्करुणहेतुमाह । विवाहविधेः पूर्वं मयि नैराश्याद्विकलानि स्वविषयव्यावृत्तानि करणानीन्द्रियाणि तैर्लक्षिता । अनेन मोह उक्तः । लक्षणे तृतीया । कीदृशैः । मर्मच्छेदव्यथयादीनैरिव । अनेन निःश्वासवत्त्वमुक्तम् । निःश्वासेन मर्मच्छेदोन्नयनात् । तथा च निःश्वासरुदितमोहैः करुणरस उक्तः । यद्वा । विकलकरणैर्व्यतनोद्रुदितैरिव । इतरत्समम् ।

६२. तथा for तया K1.
६३. इतो for अतो Bh. Com.; तत् for यत् E.
६५. करणैर्मं° A. N. O. कर्णैर्मं° K1. for करुणैर्मं°; °दैर्म्यथामधुरैरिव for °दव B.; °रपि for °रिव O.
६६. स्मरति B. श्वसित K1. for स्मरसि; स्मरविलसितैस्ने° for स्म-स्ने° N. यथा for तथा B.
६७. तथा° for यथा° N.; भूतं for °भूवं Bh.

सावेगम् । अहो नु खलु भोः ।

दलति हृदयं गाढोद्वेगं द्विधा तु न भिद्यते ॥
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसा-
त्प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥

६८–७२ अहो नु खलु भो इत्याश्चर्ये । दलतीत्यादि । मम हृदयं दलति विदीर्यते । सवेदनत्वात् । दृढोद्वेगम् । नैव द्विधा भिद्यते द्विधा भिन्नं न भवति । स्फुटिते पीडोपशान्तिरिति भावः । तुशब्द एवार्थे पुनरर्थे वा । पुनर्न भिद्यत इत्यर्थात् ॥ भिद्यत इति कर्मकर्तरि तङ् ॥ अथ च दलति तच्च भिद्यत इति विरोधाभासः । एवमुत्तरत्रापि । विह्वलः कायो मोहं दधाति न तु चेतनां त्यजति । पुनश्चैतन्ययोगात् । स्थिरे मोहे दुःखाज्ञानात्कृतार्थः स्यामिति भावः । तदिहाध्यात्मिकविपद्वयमुक्तम् । अन्तर्दाहः शरीरं दीपयति न भस्मसात्करोति । कात्स्न्र्येन भस्मरूपं न करोतीत्यर्थः ॥ सातिः कात्स्न्र्ये ॥ तथात्वे दुःखाज्ञानमेव स्यादित्याशयः । अनेनाधिभौतिकी विपदुक्ता । तदिह व्याधिदशायां मोहादय उक्ताः । यदाह ।

मनःसंमोहसर्वाङ्गदाहाधृत्यादिभिस्तथा ।
शिरसो वेदनाभिश्च व्याधेरभिनयो भवेत् ॥ इति ।

इह कायावच्छिन्न आत्मा कायपदेनोक्तः । अन्यथा मोहस्यात्मधर्मतया कायेसंभव इत्यवधेयम् ॥ स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः ।

६८. सोद्वेगं for सावेगम् Bh.; B. om. अहो–भोः. E. om. न
६९. भज्यते for भिद्यते E.
७०. नूनं for मोहं B.
°दीप्तं for °दाहः O.

मक०। वयस्य निरवग्रहं दहति दैवमिव दारुणो विवस्वान्। इयं च ते शरीरावस्था। तदस्य पद्मसरसः परिसरे मुहूर्तमास्यताम्। अत्र हि ७९

उन्नालबालकमलाकरमाकरन्द-
निष्यन्दसंवलनमांसलगन्धबन्धुः।
त्वां प्रीणयिष्यति पुरःपरिवर्तमान-
कल्लोलशीकरतुषारजडः समीरः॥

परिक्रम्योपविशतः। ८०

७३–७९ जडतानिवृत्त्यर्थं माधवमन्याचित्तं कर्तुमाह। वयस्य इति। निरवग्रहं निष्प्रतिबन्धं यथा। उपवेशनफलमाह। उन्नालेत्यादि। समीरो वायुरिह त्वां प्रीणयिष्यति प्रीतं करिष्यति। तद्योग्यतामाह। ग्रीष्मान्तेत्पोदकतयोद्गतनाला। बाला ये पद्मसंघास्तेषां पुष्परसक्षरणेन यन्मिश्रणं तेन मांसलः पुष्टो यो गन्धस्तन्मिश्रम्। अग्रे दोलायमानकल्लोलशीकरैः शीतलो जडो मन्दः। यद्वा। शीकरा एव तुषारास्तैर्जडः शीत इत्यर्थात्॥ आकरो निवहोत्पत्तिस्थानश्रेष्ठेषु कथ्यत इति मेदिनीकरः। माकरन्दः॥ तस्येदमित्यण्॥

---

७१. माधव A. E. K2. N. माधवं Bh. after वयस्य; दाव इव for दैवमिव N.; °णोयं वि° for °णो वि° O.; अस्मान् after विवस्वान् C. K1.

७४. B. om. इयं-था; तटे for परिसरे B.

७५ यत्र B. अथ N. for अत्र.

७६. उत्ताल C. E. उल्लोल (in margin) O. for उन्नाल.

७७. सञ्चलन for संवलन A.

७८. प्राण° for प्रीण° N.; पुरा A. पुनः Bh. for पुरः; °मानः for मान C. O.

७९. °डो नभस्वान् for °डः समीरः O.

८०. इति before परि° A. Bh. E.

मक०। स्वगतम्। भवत्येवं तावदाक्षिपामि। प्रकाशम्। वयस्य माधव।

एतस्मिन्मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः।
वाष्पाम्भः परिपतनोद्गमान्तराले
दृश्यन्तामविरहितश्रियो विभागाः॥

माधवः सावेगमुत्तिष्ठति।

८१–८७ आक्षेपोन्यमनस्कता। एतस्मिन्नित्यादि। अत्र सरसि भुवः प्रदेशा दृश्यन्ताम्। अश्रुपूर्णनेत्रतयादर्शनमाशङ्क्याह। एकस्य नेत्रजलस्य परिपतनमन्यस्योत्थानं तयोर्मध्ये। कीदृशाः। हर्षाव्यक्तमधुरराजहंसविशेषपक्षकम्पितचलद्दीर्घनालपद्माः। नीलोत्पलयुक्ताश्च। पूर्वं विशिष्टपद्ममुक्तमिह तु नीलपद्ममात्रमित्यपौनरुक्त्यम्। यद्वा। पूर्वं श्वेतपद्ममुक्तम्। इह तु नीलं तदित्यदोषः। श्वेतश्यामकमलसंवलनेनातिरम्यतोक्ता। अविरहितश्रिय इति पाठे श्रीः शोभा लक्ष्मीर्वा। सरसि तस्याः सततताधिवासात्। तथा च श्रीयुक्ता इत्यर्थः॥ मल्लिनैर्मल्लिकाक्षास्त इत्यमरः॥ मल्लिको हंसभिद्यपीति मेदिनीकरान्मल्लिक आख्या यस्येति ज्ञायते। अनुप्रासश्च नागरागेति समानश्रुत्यापि संभवतीत्यवधेयम्। सोद्वेगं शीतवातादिदुःसहत्वादिति भावः।

---

८१. B. O. om. स्वगतं; °दन्यतः प्रक्षिपामि for °दाक्षिपामि A. E.; B. O. om. प्रकाशम्.

८२. O. om. माधव.

८३. °काख्य A. Bh. E. °काक्षि B. for °काक्ष; पक्षी for पक्ष Bh.

८४. स्फुटदु° for स्फुरदु° K1.

८५. °श्रता° Bh. °श्रवा° O. for °श्रमा°.

८६. °न्तां कुवलयिनौ भुवौ appears to be the reading of Com.

८७. सोद्वेगमु° for सावेगमु° A. B. K1. K2.

मक० । कथं प्रतिपत्तिशून्यमुत्थायान्यतः प्रवृत्तः । निःश्व-
स्योत्थाय च । सखे प्रसीद । पश्य पश्य

वानीरप्रसवैर्निकुञ्जसरितामासक्तवासं पयः
पर्यन्तेषु च यूथिकासुमनसामुज्जृम्भितं जालकैः ।

८८-९३ प्रतिवाक्यप्रदानादिभुत्थालोकनवर्जनम् ।
तूष्णींभावो विचेतस्त्वं जडतायां भवन्ति हि ॥

इति जडताचिह्नं माधवे सचमत्कारमाह । कथमिति । निरूप्य नेयं जडता किं त्वनुस्मृतिरित्याह शून्यमिति । शून्यं निर्लक्षमन्यतो गमनेनानुस्मृतिः । यद्वा । अन्यतः शून्यं मालतीव्यतिरिक्तवस्त्व-ज्ञानात् । अत एव प्रश्नेषादन्यकार्याणां कथितानुस्मृतिरिति । अप्र-तिपत्तिशून्यमिति पाठेनवधानेन चैतन्यविरहो यथा तथोत्थायेत्यर्थः । वानीरेत्यादि । सखे कुञ्जसंबन्धि नदीनां पयः पश्य । वेतसपुष्पै-र्लग्नसौरभम् । तासामेवोपान्तेषु च यूथिकाकुड्मलानां जालकैः कोर-कैर्विकसितम् । यद्वा । यूथिकाश्च सुमनसश्च तासां जालकैः । यूथिका जूहीति प्रसिद्धा । सुमनसो जात्यः ॥ सुमना मालती जातिरित्यमरः ॥ तथा गिरेः सानुनैकदेशानालम्ब्येह प्राग्भारेषु शिखरेषु वर्तमानैर्मेघैर्वितानाय्यते । वितानाचारः क्रियते । मयूर-नृत्यविधाननिमित्तम् । निमित्तसप्तमीयम् । कीदृशेषु । विकस-त्कुटजपुष्परूपहासवत्सु । तदिह मयूरनृत्यार्थं मेघैर्वितानं कुटजै-र्हास इति यत्तत्पश्येत्यर्थः । एवं च कुटजवृक्षा द्रष्टारो मयूरा

८८. कथमप्रति° for क-ति° C. K1. K2. कथमप्रतिपत्तिरेवं शू° for क-शू°. O; निश्व° for निःश्व° Bh. K2.

८९. उत्थाप्य for उत्थाय A.; C. N. om. च; B. N. repeat प्रसीद; A. B. N., om. one पश्य.

९०. नीवार for वानीर B.

उन्मीलत्कुटजप्रहासिषु गिरेरालम्ब्य सानूनितः
प्राग्भारेषु शिखण्डिताण्डवविधौ मेघैर्वितानाय्यते ॥
अपि च । जृम्भाजर्जरडिम्बडम्बरघनश्रीमत्कदम्बद्रुमाः
९५ शैलाभोगभुवो भवन्ति कुकुभः कादम्बिनीश्यामलाः ।

नर्तका मेघो वितानमिति नृत्यसामग्री । ध्वनिस्तु शिखण्डिपदेन पञ्चचूडोपेतशिरस्कत्वेन विदूषक उक्तः । प्राग्भारपदेन च प्राञ्चतीति प्राक्प्रकृष्टज्ञानवान्भारो दुःसहो यस्य स मूर्खो द्रष्टोक्तः । तस्य च हास उचित एव । यद्वा । शिखण्डिपदेन त्रिशिखण्डयोगितया बाल उक्तः । तस्य च नृत्ये मूर्खो हसत्येव ।

बालानामपि कर्तव्यं त्रिशिखण्डविभूषणम् ॥

इति बालानां शिखण्डित्वे मानम् ॥ वानीरवञ्जुला इत्यमरः । क्षारको जालकं क्लीबे कलिका कोरकः पुमानिति च ॥ वितानमाचरतीत्यर्थे क्यङन्ताद्यकि वितानाय्यत इति रूपम् ॥

९४-९७ जृम्भेत्यादि । सखे शैलपर्यन्तभूमयो जृम्भया विकासेन जर्जरः पृथग्भूतो यो डिम्बो गोलकस्तस्य डम्बरेणाडम्बरेण श्याना अत एव श्रीमन्तो नीपवृक्षा यत्र तादृश्यो भवन्तीति यत्तत्पदेयेर्थः । एवं सर्वत्र दिशो मेघमालाश्यामा भवन्ति । यद्वा । कादम्बानां कलहंसानां स्त्रियः कादम्बिन्यस्ताभिः श्यामाः । नदीप्रवाहानां कच्छाः कूलान्युच्यद्भिर्विकसितैः कन्दलैर्नवाङ्कुरैः कान्ता मनोज्ञा ये केतकवृक्षास्तद्वारका भवन्ति । यद्वा । उद्यन्कन्दलः कन्दो यस्य कान्तकेतकस्येत्यर्थः । यद्वा । उद्यन्यः कन्दलो मञ्जीवृक्षस्तं कान्तकेतकं च बिभ्रतीत्यर्थः । वनानां मालाविर्गन्धानि

---

९२. प्रहासिनि for प्रहासिषु C.; °निह A. °न्यतः O. for °नितः

९३. प्राग्भारेषु Bh. प्राग्भागेषु E. प्राग्भागे तु N. for प्राग्भारेषु; वितानायते B. E. K1. K2. N. वितनिष्यते Bh. for वितानाय्यते.

९४. जर्जर for जर्जर N.; डिंब for डिम्ब O.

उद्यत्कन्दलकान्तकेतकभृतः कच्छाः सरिस्रोतसा-
माविर्भूतशिलीन्ध्रलोध्रकुसुमस्मेरा वनानां ततिः ॥
माध० । सखे पश्यामि किं तु दुरालोकरमणीयाः संप्रत्य-
रण्यगिरिभूमयः । तत्किमेतत् । सान्नम् । अथवा किमन्यत् ।
उत्फुल्लार्जुनसर्जवासितवहत्पौरस्त्यझञ्झामरु- १००
त्प्रेङ्खोलस्खलितेन्द्रनीलशकलस्निग्धाम्बुदश्रेणयः ।

व्यक्तीभवत्सौरभानि यानि शिलीन्ध्रलोध्रकुसुमानि तैः स्मेरा सहासेव । मनोज्ञा वा ॥ शिलीन्ध्रं कन्दलीपुष्पमिति विश्वः ॥ शिलीन्ध्रं स्थूल [स्थून] इति ख्यातम् । वनमिह पद्मं जलं विपिनं वा ॥ जृम्भा विकासजम्भयोरिति विश्वः । डिम्बोण्डेपि च गोलक इति धरणिः । डम्बरोल्ली समारम्भ इति विश्वः । कादम्बिनी मेघमाला कादम्बली च कथ्यत इति शाश्वतः । कन्दलः कलहे कन्दे मह्या-मङ्कुरसंघयोरिति मेदिनीकरः । पुंसि कच्छस्तथाविध इत्यमरः । वनं नीरेम्बुजे क्लीबं काननेप्यालये वनमिति मेदिनीकरः ॥

१००–१०३ उत्फुल्लेत्यादि । अधुना त एते दिवसाः प्राप्ता ये मनोराज्येन मया धृता इत्यर्थः । इह त एत इति सर्वनामभ्यां दिवसानामत्युत्कण्ठाहेतुत्वं ध्वनितम् । कीदृशाः । उत्फुल्लाभ्यामर्जुन-शालाभ्यां वासितः सुरभीकृतोवहन्पौरस्त्यः प्राच्यो यो झञ्झानिलः

---

९९. B. has lost the part from उद्यत्कन्दल to स्निग्धाम्बुदश्रेणयः; केतन for केतक Bh.

९७. °भाविर्भूतसिलिन्ध्र K2. °भाविर्गैधशिलीन्ध्र N. O. Com. for °भा-न्ध्र; रोध्र for लोध्र K2. O.

९८. दूरालोक for दुरालोक B.; °त्यारण्य for °त्यरण्य N.

९९. A. N. om. गिरि; साभ्री for सान्नं Bh.

१००. मर्जरा° Bh. सार्जवा° C. for सर्जवा°; झञ्झानिल for झञ्झामरुत् A. Bh. E.

१०१. प्रेंखोलस्खलितेंदु Bh. प्रेंखोलत्स्खलितेन्द्र N. प्रेंखोलबलितेंद्र O. for प्रे-न्द्र; °तेंद्रशेखरमणिस्निग्धा° for °ते—न्धा° C.; निवय for शकल E.

धारासिक्तवसुंधरासुरभयः प्राप्तास्त एतेधुना
घर्माम्भोविगमागमव्यतिकरश्रीवाहिनो वासराः ॥
हा प्रिये मालति
१०५ तरुणतमालनीलबहुलोन्नमदम्बुधराः
शिशिरसमीरणावधूतनूतनवारिकणाः ।

प्रचण्डवायुः प्रावृषेण्यवातो वा तस्य प्रेङ्खेल आन्दोलनं तेन स्खलिताः स्वस्थानच्युता इन्द्रनीलमणिखण्डा इव श्यामा मेघपङ्क्तयो येषु ते । अत्रार्जुनग्रहणेपि द्वितीयतरोः सर्जस्य ग्रहणं कदम्बाद्युपलक्षणार्थम् । तथा ग्रीष्मोष्मतप्तमहीसेकसौरभवन्तः । ईषद्वृष्टौ तदुद्गमात् । घर्मस्य ग्रीष्मस्य विगमोपगमोम्भस आगम आगमनं तयोर्व्यतिकरः संबन्धस्तेन श्रियं शोभां वोढुं शीलं येषां ते । यद्वा । घर्माम्भसः स्वेदजलस्य यौ विगमागमौ तयोर्व्यतिकरः संभेदः । वर्षारम्भ इत्यर्थः । तस्य श्रीः संपत्तिस्तद्वाहिन इत्यर्थः ॥ पौरस्त्य इति पुरस्त्यक् ॥ झञ्झा ध्वनिविशेषे स्यादिति मेदिनीकरः ॥ तदन्वितोनिलो झञ्झानिलः । यद्वा । झञ्झानिलःप्रावृषेण्य इति रत्नकोशः ॥ अत्र वास्यमानेति कर्तव्ये संपूर्णक्रियात्वपरनिष्ठाप्रत्ययान्तवासितपदोपादानात्समस्तपुष्पसौरभसंक्रान्तिर्वायोर्ध्वनिता । अत एव मलयानिलाज्झञ्झानिलोत्कर्षः कटाक्षितः । उन्मादावस्थो माधवः । उन्मादश्चेष्टवियोगात् । यदाह ।

इष्टजनस्य वियोगादुन्मादो विभवनाशाच्च ।

१०५–१०९ तरुणेत्यादि । कथमधुना दिशोहमवलोकयेयम् । तरुणतमालाश्चीलास्तद्वद्वा नीलाः प्रचुरा उद्गच्छन्तो मेघा यासु

---

१०२. एवाधुना for एतेधुना A. E. N.
१०३. वाहिणी for वाहिनो B. C.
१०५. °ग्रदर्भंबु for °ग्रमदम्बु Bh.
१०६. °णाविधुत for °णावधूत N.

कथमवलोकयेयमधुना हरिरेतिमती-
मदकलनीलकण्ठकलहैर्मुखराः ककुभः ॥

शोकार्तिं नाटयति ।

मक० । कोप्यतिदारुणो दशाविपाकः संप्रति वयस्यस्य ।११०
सान्त्वम् । मया पुनर्वज्रायमाणेन विनोद आरब्धः । निःश्वस्य ।

ताः । शीतवातक्षिप्तनवजलकणाः । हरेरिन्द्रस्य हेतिरस्त्रं धनुस्तडितीः ।
मदकलमयूरकोलाहलैःशब्दवतीः ॥ कलहं कलकलेपि चेति विश्वः ॥
सरित इति पाठे प्रतिबिम्बेन मेघवत्त्वम् । हरेः कृष्णस्य हेतिश्चक्रं
तन्नामकपक्षियुक्ताः । दुःखितेनर्तुज्ञानं दुःखमयत्वेनैव । यदाह ।

ऋतून्पश्यति दुःखार्तः सर्वान्दुःखसमाश्रितान् ॥ इति ।

तदमेन प्रबन्धेन वर्षाकाल उक्तः । यदाह ।

कदम्बनीपकुटजैः शाद्वलैः सेन्द्रगोपकैः ।
मेघवातैः सुखस्पर्शैः प्रावृट्कालं प्रदर्शयेत् ॥

शोकेति । मूर्च्छितः पततीति भावः ।

१११–११७ विनोदश्चित्तस्वास्थ्यम् । प्रमुग्धः संज्ञाशून्यः ।
अनुक्रोशोनुकम्पा तद्विपरीतासि । अयेत्यादि । अगणितमात्रादिके हे

---

१०७ °येहमधुना for °येयमधुना E.

१०८ मद for °मैद Bh.; विरुतैः for कलहैः O.; हरितः C. K1. K2. O. सरितः noticed by Com. for ककुभः

१०९. इति before शोकार्तिं B.; शोकार्तं for शोकार्तिं C.

११०. कोप्यतिशय B. कोयमति C. K1. K2. for कोप्यति; अयं after °दृणो O.; °को वयस्यस्य वर्तते for कः—स्यस्य Bh.; C.K1. om. संप्रति; वर्तते after संप्रति N.

१११. वज्रमयेन for व-न A. E.; पुनर्वज्रायमाणेन पुरो विनोदनमारब्धं B. पुनर्वज्रमयेन विनोद आरभ्यः Bh. पुनरज्ञानेन वज्रमयेन किल विनोदनं प्रारब्धं N. पुनर्वज्रमयेन किल विनोद आरब्धः O. for पु-ब्धः; कोपि before विनोद A. E.; निश्वस्य for निःश्वस्य A. Bh. C. E. N.

एवं च पर्यवसितप्रायैव नो माधवप्रत्याशा । सभयं विलोक्य । कथं प्रमुग्ध एव । आकाशे । मालति मालति किमपरं निरनुक्रोशासि ।

११९ अपहस्तितबान्धवे त्वया विहितं साहसमस्य तृष्णया ।
तदिहानपराधिनि प्रिये सखि कोयं करुणोज्झितक्रमः ।

कथमद्यापि नोच्छ्वसिति । हन्त मुषितोस्मि दैवेन ।

मातर्मातर्दलति हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
१२० सीदन्नन्धेतमसि विधुरो मज्जतीवान्तरात्मा

सखि अस्य लोभेन त्वया साहसं कृतम् । तदिह प्रिये प्रीते निरपराधेपि निर्दयः क्रमः कोयम् । केयं परिपाटिस्तवेत्यर्थः । कथमीदृशं पतिं त्यक्त्वा निर्दयासीति भावः । उच्छ्वासः संज्ञालाभः ।

११८–१२२ मातरित्यादि । मातर्मातरित्यावेगः । द्विधा भवति हृदयमिति पीडा । अवयवसंधिः शिथिलीभवतीत्यस्वस्थता । विश्वं शून्यं मन्य इति बाह्यासंवेदना निर्वेदः । अविरतज्वालं यथा तथान्तर्ज्वलामीति चिन्ताजनितो दाहः । अन्तरात्मा निराकुलः सीदन्नवसादं गच्छन्गाढान्धकारे मज्जतीवेति ग्लानिः । विध्वस्तसर्व-

---

११२. A. E. om. च; °प्रायेव for °प्रायैव Bh.; °प्रायैव माधवप्रत्याशा नः B. °प्रायैव नो माधवं प्रत्याशा K1. K2. °प्रायैव नो माधवं प्रति प्रत्याशा A. Bh. C. E. for प्रा-शा.

११३. मुग्ध for प्रमुग्ध Bh.; वयस्यः after एव C. K1. K2.; N. om. आकाशे; सखि A. Bh. E. हा N. before मालति; A. Bh. E. N. om. one मालति; किं परं निरनु° Bh. किं वा निरनु° N. for किन्नु°

११५. साहसमप्यधृष्टया for सा-या Bh. N.

११६. °तः क्रमः for °तक्रमः B. K1. K2. O.

११७. E. om. अपि; E. om. अस्मि; Bh. N. om. दैवेन.

११९. अविकल B. अविरल C. for अविरत.

विश्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥
कष्टं भोः कष्टम् ।

बन्धुताहृदयकौमुदीमहो मालतीनयनमुग्धचन्द्रमाः ।
सोयमद्य मकरन्दनन्दनो जीवलोकतिलकः प्रलीयते॥
हा वयस्य माधव १२९

गात्रेषु चन्दनरसो दृशि शारदेन्दु-
रानन्द एव हृदये मम यस्त्वमासीः ।
तं त्वां निकामकमनीयमकाण्ड एव
कालेन जीवितमिवोद्धरता हृतोस्मि ॥ स्पृशन् ।

तो मोहश्छादयतीति मोहः । मन्दभाग्योहं किं करोमीति दैन्यम् । कथंशब्दः किमित्यर्थे । सर्वनामस्वाज्ञानार्थता ॥ विश्वगित्यत्र सुप-मादित्वात्पत्वम् ॥ परिदेवितमाह । कष्टमिति ।

१२३-१२९ बन्धुतेत्यादि । सोयं बन्धुसमूहचित्तकार्तिक्यु-त्सवो मालतीनेत्रबालचन्द्रो मकरन्दहर्षजनकः सर्वजनतिलकोद्य प्रलयमापद्यत इत्यर्थः ॥ मह उद्धव उत्सव इत्यमरः ॥ गात्रेष्वित्या-दि । यस्त्वं मम काये चन्दनरस आसीः । सुखस्पर्शत्वात् । नेत्रे शरत्कालीनचन्द्रः । आनन्दजनकत्वात् । चित्त आनन्द एव सा-क्षादर्ष एवासीः । तं त्वामतिकान्तमकस्मादेव मम जीवनमिवोद्ध-रतोन्मूलयता कालेन समयेन यमेन वा हृतोस्मि । यथा जीवनो-द्धारेहं हृतस्तथा त्वदुद्धारेपीति भावः ।

---

१२१. विश्वङ्मोहः K1. विश्वं मोहः K2. for वि-हः
१२२. C. om. भोः.
१२३. पूर्ण A. Bh. E. बाल K2. for मुग्ध.
१२४. ज्ञाधवीय for सोयमद्य B.
१२६. हृदि for दृशि Bh.
१२८. तत्त्वां नि° A. तं त्वा नि B. E. ते त्वा प्र° Bh. for तं त्वां नि°.
१२९. °तसियं हरता for त-ता Bh.; गात्रमस्य C. गात्रमस्य सं° K1. K2. before स्पृशन्.

११० अकरुण वितर स्मितोज्ज्वलां दृशमतिदारुण देहि मे गिरम् ।
सहचरमनुरक्तचेतसं प्रियमकरन्द कथं न मन्यसे ॥

माधवः संज्ञां लभते ।

मक० । सोच्छ्वासम् । अयमचिरधौतराजपट्टरुचिरमांसल-च्छविर्नवजलधरस्तोयसीकरासारेण प्रियवयस्यं मे जीवयति ।
११५ दिष्ट्या समुच्छ्वसितस्तावत् ।

१३०–१३३ सोन्मादो विलपति । अकरुणेत्यादि । हे निर्दय हासमनोज्ञां दृशं देहि । हासपूर्वं पश्येत्यर्थः । यद्वा । स्मितेन विकासेनोज्ज्वलां विकसितामित्यर्थः । वचनादानादतिदारुण हे मे वाचं देहि । मिश्रमनुरक्तचित्तं हे प्रियमकरन्द कथं न मन्यसे । कथं नाङ्गीकरोषि । इहावेगादीनां सत्त्वात्करुणो रसः । यदाह ।

इष्टनाशधनापायबन्धुव्यसनताडनैः ।
शापक्लेशोपघातैश्च जायते करुणो रसः ॥
अश्रुतिश्वासवैवर्ण्यस्तापाङ्गैश्च स्मृतिक्षयैः ।
परिदेवितशोकाद्यैरभिनेयः स सूरिभिः ॥

अचिरधौतत्वेन राजपट्टस्य नीलत्वस्निग्धत्वे उक्ते । राजपट्टं खड्डीति ख्यातम् । रुचिरा दीप्तिमती मांसला घना च्छविः कान्तिर्यस्य सः ।

---

११४. सका for मक° Bh.; प्रियं for अयं B.; अचिरल for अचिर O.

११४. चच(?) लधरस्तोय Bh. जलदस्तोय N. for ज-य; सीकरा° for सीकरा° E, N.; °सारवर्षेण for °सारेण B.; मे वयस्यं Bh. O. मे प्रियवयस्यं K1. K2. for प्रि-मे; A. E. om. प्रिय; C. om. मे; संजीवयति for जीवयति Bh. N.

११५. जगदुच्छ्वसितस्तावत् for स-त् A.; उच्छ्वसि° B. यदुच्छ्वसि° C. E. K1. K2. for स-सि°; °सितं तावत् for °सि-त् Bh.; माधवः after तावत् B. O.

माध० । तत्कमत्र विपिने प्रियावार्ताहरं करोमि । विलोक्य । साधु साधु ।

फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलिततनुतरङ्गामुत्तरेण स्रवन्तीम् ।
उपरि विघटमानः प्रौढतापिच्छनीलः १४०
श्रयति शिखरमद्रेर्नूतनस्तोयवाहः ॥

सरभसमुत्थायोन्मुखः कृताञ्जलिः ।

१३६-१४२ वार्ताहारो दूतः । अतिप्रवृद्धकालतया दूतप्रेषणम् । यदाह ।

प्रसह्यमानकामार्तो बहुस्थानसमुत्थितः ।
स्त्रावस्थादर्शनार्थं तु प्रेषयेद्दूतमात्मनः ॥

फलेत्यादि । नवमेघो गिरेरमं श्रयति । फलभारपाकश्यामजम्बूनिकुञ्जात्स्खलनेनाल्पकल्लोलां नदीमुत्तरेण नद्या उत्तरसमीपे ॥ एनपा द्वितीया ॥ कीदृशः । उपरि विघटमान ऊर्ध्वस्थानं त्यजन् । विकासितमालपुष्पान्नीलस्तद्वद्वा नीलः । उपचितघनमालेति पाठ उपचिता घना च माला येषामित्यर्थः । घने नूतनत्वेनातिश्यामता । यद्वा । स्रवन्तीमुपरि विघटमानो विविधप्रकारेण श्रयन् । उत्तरेणोत्तरदेशे ॥ उत्तरेणेति विभक्तिप्रतिरूपको निपातः ॥ किंचिदेवो-

---

१३६. -सावेगं before तत्क° Bh.; तत्कथमत्र A. B. O. तत्किमत्र K2. तत्किमिवात्र N. for त-त्र; E. om. विपिने; प्रियाया for प्रिया C. O.; वार्तामहं for वा-रं O.; हर्तारं E. करं K2. for हरं.

१३७. Bh. om. one साधु.

१३८. मरिणाह for परिणाम N.

१३९. शरीरामु° for तरङ्गामु° N.; श्रवंतीं Bh. स्रवंती C. E. for स्रवन्तीम्.

१४०. उपचितघनमालप्रौढ for उ-ढ A.; मान for मानः Bh. N.

१४२. सादरं for सरभसं A. E.; उन्मुखं for उन्मुखः E.

कच्चित्सौम्य प्रियसहचरी विद्युदालिङ्गति त्वा-
माविर्भूतप्रणयसुमुखाश्वातका वा भजन्ते ।
१४५ पौरस्त्यो वा सुखयति मरुत्साधुसंवाहनाभि-
र्विष्वग्बिभ्रत्सुरपतिधनुर्लक्ष्म लक्ष्मीं तनोति ॥

त्तरणेतिवत्। आश्रयार्थकतया घटेः सकर्मकता ॥ स्रवन्ती निम्न-गापगेत्यमरः ॥ कृताञ्जलिरित्यनेन विनय उक्तः । विनयपूर्वकश्च संदेशः कार्यः । यदाह ।

संदेशं चैव दूत्यास्तु प्रदद्यान्मदनाश्रयम् ।
तस्येयं समवस्थेति कथया विनयेन हि ॥

१४३–१४६ कच्चिदित्यादि । प्रार्थनोचितं सुभगप्रभ्रमाह । हे सौम्य सुन्दर प्रिया वल्लभा सहचरी सतातानुगता विद्युत्त्वामालि-ङ्गति कच्चित् । कथयेत्यर्थः ॥ कच्चित्कामप्रवेदन इत्यमरः ॥ विरहित्वेन कान्ताभिलाषात्प्रथमं कान्तासंगमप्रभः ॥ चारुचन्द्र-जयोः सौम्य इति शाश्वतः ॥ प्रियालिङ्गने सुखं तद्विरहे दुःखमिति त्वमपि जानासीति ध्वनितम् । यद्वा । कच्चिदेवमभिमतं ममेत्यर्थः । उत्पन्नखेदेन सुभगाः सुमुखाश्वातकास्त्वां सेवन्ते । वा समुच्चये । अनेनार्थिसंपत्तिरुक्ता । पुरोवातश्च मृदुप्रेरणाभिस्त्वां सुखयति । अन्योपि सहायश्चरणमुष्टिमर्दनादिरूपसंवाहनां कुरुत इति ध्वनिः । अनेन सहायसंपत्तिरुक्ता । विष्वक्सर्वतो लक्ष्मीं शोभां बिभ्रदिन्द्र-धनुः ॥ कर्तृ ॥ लक्ष्म चिह्नं तव तनोति । अनेन प्रसाधनमुक्तम् । विश्वं बिभ्रदिति पाठे हे विश्वं बिभ्रद्भुवनं दधान । वर्षेण सस्या-

---

१४३. °चरं for °चरी A. Bh.; °ते ता° for °ति त्वा° Bh.

१४४. मुखराः B. O. सुखिताः E. सुभगाः Com. for सुमुखाः

१४५. सांत्र for साधु Bh.

१४६. विष्वग्बिभ्रक् B. विश्वग्बिभृत् K1. विस्वं बिभृत् K2. विष्वग्ब्रीचं M. विश्वं बिभृत् and विवं बिभृत् noticed by Com. for विष्वग्बिभृत्; °क्ष्मीवदेतत् for °क्ष्मीं-ति K2.

आकर्ण्य । अयं प्रतिरवभरितकन्दरानन्दितोत्कण्ठनीलकण्ठक-लकेकानुबन्धिना मन्द्रहुंकृतेन मामनुमन्यते । यावदभ्यर्थये । भगवन् जीमूत

दैवात्पश्येर्जगति विचरन्निच्छया मत्प्रियां चे- १५०
दाश्वास्यादौ तदनु कथयेर्माधवीयामवस्थाम् ।

दिसमृद्ध्या जगदुपकारकत्वमुक्तम् । प्रसाधनमाह । इन्द्रधनूरूपं चिह्नं स्रव शोभां तनोति । बिम्बं बिभ्रदिति पाठे तु बिम्बं मण्डलं शोभां तनोति । कीदृशम् । इन्द्रधनुश्चिह्नं बिभ्रद्धानम् । तदिह जगदुपकारकतया ममाप्युपकारं करिष्यसीति भावः ।

१४७–१५४ गर्जितेनानुमतिमाह । अये इति । प्रतिशब्दभरितकन्दरत्वेनानन्दिता समृद्धोत्कण्ठा यस्य सः । यद्वा । आनन्दिता हृष्टा उत्कण्ठा उद्गीवा इत्यर्थः । मन्द्रं गभीरम् । अनुमन्यते स्वीकरोति । आर्तिवशाद्देवत्वारोपणेन भगवन्निति । अवधारणे यावत् । जीमूत मेघ । दैवादित्यादि । इच्छया जगति विचरंस्त्वं मत्प्रियां यदि दैववशात्पश्येर्द्रक्ष्यसि तदा प्रथमं तां प्रबोध्याथ माधवदशां कथयिष्यसि । अवस्थानिवेदनेन तन्मरणमाशङ्क्याह । कथयता त्वयाशा पुनःसंगमप्रत्याशा सैव तन्तुः ।

---

१४७. अथ किं B. अपि कथं O. before अयं; अये for अयं Bh. K1. K2. Com. °त्कंठनीलकंठेन कांतेन ध्वनिना Bh. °त्कंठितनीलकंठेन कांतेन ध्वनिना N. for °त्क-न; A. om. नीलकण्ठ; K1. K2. om. कल.

१४८. निकाम before मन्द्र O.; A. E. om. मन्द्र; इदमेव तावत् for यावत् B.; अर्थये for अभ्यर्थये A.; अभ्यर्थनीयो भगवान्जीमूतः for अभ्य- त Bh.

१४९. जीमूतनाथ for जीमूत N.

१५०. पश्येज्जगति स भवान् for प-रन् O.; यदि जगति तां मत्प्रियां मालतीं चे° for ज-चे° B.; मालतीं for इच्छया N. O.

१५१ आश्वस्य for आश्वास्य B. E. N.; °येत् for °येः O., माधवस्थाम् for माधवीयाम् Bh. N. O.

आशातन्तुर्न च कथयतात्यन्तमुच्छेदनीयः
प्राणत्राणं कथमपि करोत्यायताक्ष्याः स एकः ॥

सहर्षम् । अये प्रचलितः । तदन्यतः संचरामि । परिक्रामति ।

१५५ मक० । साकूतम् । कथमिदानीमुन्मादोपरागो माधवेन्दुमास्कन्दति । हा तात हा अम्ब हा भगवति परित्रायस्व परित्रायस्व । पश्य माधवस्यावस्थाम् ।

जीवनबन्धहेतुत्वात् । नैवात्यर्थमुच्छेद्यः । चैवार्थे । अत्र हेतुमाह । स आशातन्तुरेकस्तस्याः प्राणत्राणं कष्टाकष्टया करोति नाहमित्यर्थः । इह तावत्कालं सा जीवति न वेति संभावना दर्शनस्य दैवादित्यनेनोक्तम् । प्रसंगतो मत्कार्यमिति जगति विचरन्निति । मन्मियामित्यनेन सुकुमारत्वादिना विरहदुःखासहिष्णुतोक्ता । आदावाश्वासनं वार्ताश्रवणपटुत्वार्थम् । अत्यन्तमित्यनेन मध्यमविधया दशाकथनम् । तेन च तन्नैराश्यनिषेध इत्युक्तम् । कथमपीत्यनेनाशातन्तुमात्रं तद्रक्षणाय कल्पत इत्युक्तम् । आयताक्ष्या इत्यनेन कटाक्षादिस्मरणेन गुणकीर्तनम् । माधवस्येयं माधवीया ॥ वृद्धाच्छः ॥ उन्मादावस्थेयम् । असंबद्धप्रलापात् । सहर्षत्वं मद्वचनमङ्गीकृत्य प्रचलित इति ।

१५५–१६० उपरागो राहुग्रासः । शैशवे संकटप्रदेशे पित्रादीनां स्मरणस्य स्वभ्यस्ततया विरहसंकटेपि तदाह हा तातेति ।

---

१५२. विच्छेदनीय॰ for °मुच्छेदनीयः C.

१५३. भवति for करोति Bh.; °तास्तः for ताक्ष्याः B.; एव C. K1.एवं K2. for एकः

१५४. अहो A. E. अयं K2. for अये; B. om. अये; तावदयं after प्रचलितः B.; अन्यमनुसरामि for अन्य-मि K2.; अन्यत्र for अन्यतः A. Bh. C. E. K1. O.; इति before परि° C. K1. K2.

१५५. सोद्वेगं A. Bh. N. स्वगतं B. for साकूतम्; °द उपराग इव माध° for °दो-ध K1. K2.; °ग इव माध° Bh. °ग एव माध° C. N. O. for °गो माध°

१५६. A. E. om. हा before °भग°; त्रायस्व for परित्रायस्व B.; B. Bh. N. om. one परित्रायस्व.

१५७. माधवावस्थां A. E. माधवीयामवस्थां Bh. माधवस्थामवस्थां N. for मा-म्.

माध० । धिक्प्रमादः ।

नवेषु लोध्रप्रसवेषु कान्तिर्दृशः कुरङ्गीषु गतं गजेषु ।
लतासु नम्रत्वमिति प्रमथ्य व्यक्तं विभक्ता विपिने प्रिया मे । १६०

हा प्रिये मालति ।

मक० । सुहृदि गुणनिवासे प्रेयसि प्राणनाथे
कथमपि सहपांसुक्रीडनप्रौढसख्ये ।

प्रमादोनिष्टम् नवेष्वित्यादि । नूतनलोध्रपुष्पेषु कान्तिः पाण्डिमा गौरत्वं वा । इह नवपदेन स्निग्धतोक्ता । दृशो विलोकितानि हरिणीषु । गमनं हस्तिषु । नम्रत्वं लतासु । इतिशब्द आद्यर्थे । हेला-लीलेत्यमी हावा इतिवत् । प्रमथ्य मारयित्वा मे प्रिया विपिने विभक्ता खण्डखण्डीकृत्य धृता । यद्वा । इतिः प्रकारार्थः । तेन लोध्रप्रसवादिभिर्मे प्रिया विभागीकृता । कान्त्यादिविभागद्वारा प्रिया विभाग एवोच्चैर्यत इत्यवधेयम्। विपिन इति प्राणित्रधस्थानाभिप्रायम्।

१६२-१६८ सुहृदीत्यादि । हे हतहृदय कथमपि विदीर्य द्विधा त्वं न प्रयासि । हतेति निन्दायाम्। मित्रे गुणनिधानेतिप्रेम-वति जीवेश्वरे सहधूलिक्रीडागाढमैत्रे कान्ताविवियोगमनोव्यथाव्याधि-मन्तर्दधाने सति । सुहृदित्यादौ हेतुहेतुमद्भावः ॥ धूलिः स्त्रियां

---

१५८ द्विपदिकया सर्वतोवलोक्य after माध० A.; हा before धिक् K1. K2.

१५९. रोध्र for लोध्र K1. K2. O.; प्रभवेषु for प्रसवेषु C.; °न्ति दृ° for °न्तिर्दृ° K1. K2.; दृशौ कुरंगेषु for दृ-षु N.; कुरङ्गेषु for कु-षु K1. K2. O.; गजेषु यातं for गतं गजेषु A. C. E. K1. K2. O.

१६०. स्फुटं for व्यक्तं K1.; प्रियास्मिन् for प्रियामे A. C. E. K1. K2. O.

१६१. हे for हा K2.; इति मूर्च्छति after मालति A.

१६१. इव A. E. N. O. इह Bh. for अपि; पांसु for पांसु Bh.

प्रियजनविरहाधिव्याधिवेगं दधाने
१६५ हतहृदय विदीर्य त्वं द्विधा न प्रयासि ॥

माध० । सुलभानुकारः खलु जगति वेधसो निर्माणसंनिवेशः । भवत्वेवं तावत् । उच्चैः । अयमहं भोः प्रणिपत्य भूधरारण्यचारिणः सत्त्वान्विज्ञापयामि मां मुहूर्तमवधानदानेनानुगृह्णन्तु भवन्तः ।

१७० भवद्भिः सर्वाङ्गप्रकृतिरमणीया कुलवधू-
रिहस्थैर्दृष्टा वा विदितमथ वास्याः किमभवत् ।

पांसुर्नेत्यमरः ॥ प्रियाविभागाशङ्कां निरस्यति सुलभेति । संनिवेशः प्रकारः । अनुकारः सादृश्यम् । तथा च लोध्रप्रसवादीनि प्रियाकान्त्याद्यनुकारीणि न तु सा विभक्तेति भावः । सत्त्वान्प्राणिनो विज्ञापयामीति सानुनयं वचनम् ।

१७०–१७३ भवद्भिरित्यादि । भवद्भिरिहस्थैः सर्वाङ्गेषु स्वभावरम्या सा कुलवधूर्दृष्टा वा । अथ वास्या भवद्भिः किं वि-

---

१६४. खेदं for वेगं Bh. N. O.

१६५. विशीर्य किं वि[द्वि?]धा किं न यासि for वि-सि C.; विदीर्ण E. विशीर्य K1. O. for विदीर्य.

१६६. आश्वस्योत्थाय after माध° A.; अ (added in marg.) before सुल° O.; B. om खलु; Bh. K1. om. जगति.

१६७. प्रणिपत्य Bh. प्रकाशं K1. K2. for उच्चैः; B. N. O. om. उच्चैः; अयमयं for अ-हं E. O.; Bh. om. प्रणिपत्य.

१६८. भो for भू K1.; भूय एवारण्य for भू-ण्य Bh.; वासिनः for चारिणः B. N. तेभी for मां K1. K2.; ते before मां A. C. E. O.; मां after दानेन instead of before मुहू° Bh.; अवधानेन for अवधानदानेन C. E. K1. O.

१६९. A. C. E. O. om. भवन्तः

१७०. खलु for कुल B. O. (in marg.)

१७१. विहितमिह (मथ in marg.) तस्याः for वि-स्याः O.; विहितम् for विदितम् E.; इह K1. अपि K2. for अथ.

वयोवस्थां तस्याः शृणुत सुहृदो यत्र मदनः
प्रगल्भव्यापारश्चरति हृदि मुग्धश्च वपुषि ॥
कष्टं भोः कष्टम्।
केकाभिर्नीलकण्ठस्तिरयति वचनं ताण्डवादुच्छिखण्डः १७५
कान्तामन्तःप्रमोदादभिसरति मदभ्रान्ततारश्चकोरः।
गोलाङ्गूलः कपोलं क्षुरयति रजसा कौसुमेन प्रियायाः
कं याचे यत्र तत्र ध्रुवमनवसरग्रस्त एवार्थिभावः ॥

दितमभवत्। शुभमशुभं वा किं विज्ञातमित्यर्थः। ननु तस्याः किं वय इत्याह। हे सुहृदस्तस्या वयोवस्थां शृणुत। यत्र वयोवस्थायां हृदि मदनः प्रगल्भव्यापारो वपुषि मुग्धो बालश्चरति। एतेन वयःसंधिरुक्तः। सर्वाङ्गेत्यनेनाभिज्ञानप्रकाशनम्। कुलवधूत्वेन चाञ्चल्याभावः। इहस्थैरित्यनेन परिचयचातुरी। वाकारङ्गयेन दर्शनवृत्तान्तयोः सफलत्वं दर्शयति।

सुरते निःसाध्वसता प्रागल्भ्यं समुदाहृतम् ॥

इति भरतः।

१७५-१७८ केकाभिरिति। किं यत्र तत्र याचे। अपि तु न किमपि प्रार्थये। यतोऽस्तावसरस्तोर्थिभावोर्थित्वम्। अनवसरमाह। नृत्यादुद्धतपिच्छभारो मयूरः केकाभिर्वचनं छादयति। चकोरः पक्षिभेदो मत्ततया भ्रमत्तारकः संश्चित्तहर्षात्प्रियामभिसर-

---

१७२. सुहृदोः B. सुहृदां E. for सुहृदो.
१७४. A. N. om. 2nd कष्टम्.
१७५. स्थगयति for तिरयति N.
१७६. कान्तामत्त for कान्तामन्तः B. C.; रसति for सरति C.
१७७. कौकुमेन for कौसुमेन B.
१७८. किं B. कथं Bh. for कं; तत्र तत्र for यत्र तत्र N. O.; व्यस्त (corrected in marg. to ग्रस्त) for ग्रस्त O.

अयं च । दन्तच्छदारुणिमरञ्जितकान्तदन्त-
१८० मुन्नम्य चुम्बति वलीवदनः प्रियायाः ।
काम्पिल्लकप्रसवपाटलगण्डपालि
पाकारुणस्फुटितदाडिमकान्ति वक्त्रम् ॥

एष प्रियतमास्कन्धविश्रान्तकरः करी । कथमत्राप्यनवसरः ।

ति । गोलाङ्गूलः श्याममुखो वानरः पुष्पजधूल्या कान्तायाः कपोलौ चित्रयति । अतः सत्त्वानामन्यत्रासक्ततयार्थित्वानवसर इति भावः ॥ प्लवङ्गकीशप्लवगगोलाङ्गूलबलीमुखा इत्यमरमाला ॥ कं याच इति पाठे कं प्राणिनं प्रार्थय इत्यर्थः ।

१७९–१८३ दन्तेत्यादि वलीवदनो वनारोयं कान्तायाः मुखमुत्क्षिप्य चुम्बति । कीदृशम् । अधररागेण रक्ता सनोज्ञा दशना यत्र तत् । काम्पिल्लो रोचनीवृक्षः ॥ स्वार्थे कन् । तस्य प्रसवेन पुष्पेण फलेन वा रक्तगण्डप्रदेशः । पाकान्तरमन्तिमपाकस्ततः स्फुटितं विदीर्णं यद्दाडिमफलं तत्कान्तिः । तत्सममित्यर्थः । तदिहाप्यनवसर एव ॥ शाखामृगबलीमुखा इत्यमरः । काम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपीत्यमरः ॥ रोहिणानोकहो रोहणवृक्षः ।

---

१७९. दंतकांत° for कान्तदन्त° N. O.

१८१. कांपिल्यक for काम्पिल्लक Bh. K1. K2. N.; पाली for पालि E. N.

१८२. पाकान्तर for पाकारुण G. Com.

१८३. अग्रतोवलोक्य । अये B. अग्रतो विलोक्य । अये O. before एव; अये अयं च रोहिणानोकह for ए-मा Bh. N., च after एव K2.; विभ्रांत for विश्रान्त C.; रोहिणानोकहस्कन्धविश्रान्तकन्धरः before करी A. E. K1. (स्कन्द) K2.; °मत्यत्रा° K1. °मस्यात्यत्रा° K2. for °मत्राप्य°; अस्य for अत्र B.

कण्डूकुड्मलितेक्षणां सहचरीं दन्तस्य कोट्या लिख-
न्पर्यायव्यतिकीर्णकर्णपवनैरालम्बादिभिर्वीजयन्। १८९
जग्धार्धैर्नवसल्लकीकिसलयैरस्याः स्थितिं कल्पय-
न्धन्यो वन्यमतङ्गजः परिचयप्रागल्भ्यमभ्यस्यति॥

अन्यतोवलोक्य। अयं तु।

नान्तर्वर्तयति ध्वनत्सु जलदेष्वामन्द्रमुद्गर्जितं
नासन्नात्सरसः करोति कवलानार्द्रजितैः शैवलैः। १९०

१८४-१८७ कण्डूत्यादि। अयं सुकृती वन्यहस्त्यस्याः प्रियायाः परिचयप्रागल्भ्यं सुरतनिःसाध्वसतामनुतिष्ठति। कीदृशः। कण्डूतिमुद्रितेक्षणां प्रियां दन्ताग्रेणालिखन्नीषदुल्लिखन्। कण्डूयन्निस्यर्थः। अत एव कण्डूकाले कुड्मलितेक्षणत्वं जातिः। पर्यायेण क्रमेण निःक्षिप्तौ कर्णौ तयोर्वातैः सुखदैर्वीजयन्। कवलितार्धैर्नवशल्लकीपल्लवैरस्याः प्राणधारणं कल्पयन्।

१८८-१९२ नान्तरित्यादि। अयं स्तम्बेरमो हस्ती ताम्यति ग्लानो भवति। नूनं निश्चितं प्रेयसीविश्लेषेण विह्वलः। जलदेषु ध्वनत्सु सत्स्वीषद्गम्भीरमुद्गतकण्ठगर्जनं नान्तर्वर्तयति न करोति। समीप-

---

१८४. गंडू for कण्डू Bh., कुड्म° for कुड्म A. K1. K2. N.; °णामनुचरीं for °णां-रीं A. E. O.

१८५. जीवयन् for वीजयन् C.

१८६. शालकी for सल्लकी A. E.; किशल° for किसल° E.; कारयन् for कल्पयन् N.

१८७. मन्ये for धन्यो B.; प्रारंभ° for प्रागल्भ्य° N.

१८८. A. E. om. अन्यतोवलोक्य; विलोक्य for अवलोक्य Bh.; K1. K2. om. अयं तु.

१९०. कवलान्यार्वर्तितैः A. कवलान्यावर्जितैः E. for क-तैः.

दानज्यानिविषादमूकमधुपव्यासङ्गदीनाननो
नूनं प्राणसमावियोगविधुरः स्तम्बेरमस्ताम्यति ॥

अलमनेनायासितेन । एष सानन्दसहचरीसमाकर्ण्यमानमधुरगम्भीरकण्ठगर्जितध्वनिरपरो मत्तमातङ्गयूथपालः प्रत्यग्रावि-

---

स्थात्सरस आवर्जितैर्मिलितैः शैवलैः कवलान्न करोति । मदहान्या यो विषादस्तेन मूकानां भ्रमराणां व्यासङ्गेनान्यचित्ततया शोच्यमुखः । यद्वा । व्यासङ्गो विशेषेणासङ्ग इत्यर्थः । तदिह मदहानिचिन्तया संतापात् । दीनत्वमधोमुखचिन्तनात् । एतेनानुस्मृतिसंजाता विषयव्यावृत्तिरुक्ता ।

१९३–२०१ अहमिवायमपि कान्तातिरिक्तमन्यन्न वेत्तीत्यत आह । अलमिति । रतौत्सुक्यान्मधुरकण्ठगर्जितश्रवणाद्धा सानन्देति । मातङ्गो हस्ती । संपातः संपर्कः । संगलितो मिलितः । मांसलः पीनः । निष्यन्दो मदः । कषायः सुगन्धिः । करटो गण्ड-

---

१९१. ज्याति for ज्यानि Bh.

१९२. मधुरः for विधुरः E.

१९३. तद् before अलम् C. K1. K2.; मम Bh. अपि N. after अनेन ; अन्यत संचरामि । विलोक्य A. अन्यतोवलोक्य सादरं Bh. अन्यतश्चावलोक्य सादरं K2. सानंदं N. before एष; सानंदं for सानन्द C.; गृह before सह Bh.

१९४. गंभीरधीरकंठध्वनिः प्रवृद्धनवयौवनोन्मादप्रस्तुतामंदसल्लपर्णप्रसूनमकरंदसुंदरमदवारिसंस्वाददत्तचित्तोन्मत्तानुरक्तैदिंदिरानिकरझणझणायमानरणत्करझंकारसंभारश्रवणालंबितकर्णो गोदावरीदीवरवासितामंदमकरंदतुंदिलमलयानिलोल्लासितामलविदलितलालितकमलपरंपरापुंजपरिमलप्राग्भारघ्राणसुखितेंद्रियवर्गोपरोन्मत्तमातंगवर्गपालः for गम्भी-पालः B.; ध्वनि-पालः corrected in margin into ध्वनिः प्रवृद्धम as in B. with प्रसृत for प्रस्तुत, with उन्मत्त omited, with °क्रेदि° for °क्रेदि°, °त्कार for °त्करः, अवलं° for आलं° वास before वासित, सुख before सुखित, °रो मत्त for °रोन्मत्त O.; °रोन्मत्त for °री मत्त C.; अपि after °परो Bh.; °रोपि मत्तमातंगवर्गपालक: for °री-लः N.

कासितकदम्बसंघातसुरभिशीतलामोदबहलसंगलितमांसलकपो- १९९
लनिष्यन्दकर्दमितकरटःसमुद्गलितकमलिनीखण्डविप्रकीर्णपर्ण-
कमलकेसरमृणालबिसकन्दकोमलाङ्कुरनिकरमनवरतप्रवृत्तक-
मनीयकर्णतालताण्डवप्रचलजर्जरितजलतरंगविततनीहारमुक्त-
स्तकुररसारसं सरोवगाह्य विहरति । भवत्वाभाषे । महाभाग
नागपते श्लाघ्ययौवनः खल्वसि कान्तानुवृत्तिचातुर्यमप्यस्ति २००
भवतः । किं तु । सापवादम् ।

देशः ॥ सुरभौ च कषायः स्यादिति शाश्वतः ॥ समुद्गलितमु-
न्मूलितम् । पर्णं पत्रम् ॥ तालो गीतक्रियामाने मध्यमाङ्गुलिसंमित
इत्यमरमाला । नीहारस्तु कुहेलिकेति हारावली ॥ कुररः पक्षिभेदः ।
अनुवृत्तिः सेवा । सापवादं सदोषम् ।

---

१९९. °कसित for °कासित A. E.; संपीत Bh. संपात C. संवादि N. संवाद O. for संघात; मेदुर for ब-सल N.; बहुल A. बल K1. for बहल; संवलित A. C. K1. K2. संकलि[त] E. for संगलित.

१९६. निस्यन्द for निष्यन्द K1. O.; कषायकरटः समुद्° A. तटं समुद्° Bh. कषायसमुद्° C. कषायमुद्° B. N. कपोलतटः समुद्° K1. K2. for क-द; षण्ड प्रकीर्ण for ख-कीर्ण K2.; षण्डप्रकीर्ण for ख-मल N. विकीर्ण A. प्रकीर्ण C. K1. for विप्रकीर्ण; पत्र for पर्ण C.; Bh. O. om. पर्ण.

१९७. B. om. मृणाल; N. om. बिस; बिश for बिस O.; N. om. कोमल; °रमाहरज° A. E. °राविकिरम° B. °रमध्य° Bh. °रमनोहरम° C. K1. °रावकरम° O. for °रनिकरम°; K2. om. निकर; N. om. कमनीय.

१९८. A. E. O. om. कर्ण; तालतांडवकर्ण for क-व Bh.; Bh. K1. K2.; om. प्रचल; बल for प्रचल C.; कर्ण after प्रचल A. B. E. O.; जर्जरित K1. जर्जरिततरल N. for जर्जरित; नल before जल Bh.; तङ्ग for तरंग K1.; °रसमुद्गस्त A. °रै समुच्चस्त C. K1. K2. °रसमुच्चस्त E. for °रै-स्त.

१९९. क्रीडति for विहरति B. Bh. N. O.; एवं A. Bh. एनं E. before आभाषे; आभाषये for आभाषे B.; A. om. महाभाग.

२००. A. Bh. E. K2. N. O. om. किं तु; सावकन्दम् for सा-दं K2.; तु after ° वादम Bh. N. O.

लीलोत्खातमृणालकाण्डकवलच्छेदेषु संपादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः।
सेकः सीकरिणा करेण विहितः कामं विरामे पुन-
२०५ र्न स्नेहादनरालनालनलिनीपत्त्रातपत्त्रं धृतम् ॥

कथमवधीरणानीरसं व्रजति। हन्त मूढ एवास्मि योस्मिन्वनेचरे वयस्यमकरन्दोचितं व्यवहरामि। हा प्रियवयस्य

२०२–२०६ लीलेत्यादि। क्रीडोन्मूलितबिसदण्डकवलसमाप्तिषु विकसत्पद्मसुरभितस्य जलस्य गण्डूषसंक्रान्तयः संबन्धाः संपादिता दत्ताः। पुष्यदिति पाठे पुष्टीभवदित्यर्थः। अम्भःकणवता स्थूलहस्तेन सेकः कृतः। तदिदं द्वयं कामं युक्तमेव। दोषमाह। विरामे सरोवगाहविरतौ गमनकाले पुनरकुटिलनालपद्मपत्त्रच्छत्त्रं न स्नेहादृतम्। एतदयुक्तमित्यर्थः। अतः कान्तानुवृत्तिं न जानासीति भावः॥ पुष्करमम्भोरुहाणि चेत्यमरः॥ मण्डूषपदेन स्वयं पीत्वा जलदानं ध्वनितम्॥ नलिनी पद्मिनी पद्ममित्यमरलता। अरालः कुटिले मत इति मेदिनीकरः॥ आतपात्त्रायत इत्यातपत्त्रमित्युचितं पदम्। चलचित्तत्त्वेन पार्श्वस्थं मित्रमपश्यन्सखेदमाह कथमिति।

---

२०२. खंड for काण्ड B.; संपातिताः for संपादिताः B. C.

२०४. शीक° for सीक° A. E. K1. K2. N. O.

२०५. तद् for न N.; बाल for नाल A. B. E.; रूप for पत्त्र N.

२०६. निरूप्य B. O. विलोक्य K2. before कथम°; नीरसो for नीरसं O.; व्रजसि B. जनयति E. for व्रजति; A. om. अस्मि यः; यद् for यः Bh.

२०७. वन for वने N.; अपि after °चरे N; प्रिय for वयस्य Bh.; न E. कलयन् O. before व्यवह°; A. E. om. प्रिय; मकरंद before वयस्य Bh. मकरंद after वयस्य N.

धिगुच्छ्वसितवैशसं मम यदित्थमेकाकिनो
धिगेव रमणीयतां त्वदनुभावभावादृते ।
त्वया सह न याति योत्र दिवसोपि स ध्वंसतां २१०
प्रमोदमृगतृष्णिकां धिगपरत्र या जायते ॥

२०८-२११ धिगित्यादि । इत्थमेकाकिनो मम यदुच्छ्वसित-वैशसं प्राणधारणदुःखं तद्धिग्वृथा । एकाकित्वमत्र हेतुः । धिगेव रमणीयवस्त्वनुभवान्वृथाभाविन इति मुख्यपाठः । रम्यपदार्थविषयानुभवाच्चिरफलोत्पादशीलान्धिक् । रमणीयवस्त्वनुभवादिति पाठे वृथाभाविनोनुभवाद्रम्यवस्तु धिक् । निष्फलं तज्ज्ञानमित्यर्थः । धिगेव रमणीयतां त्वदनुभावभावादृत इति पाठे मम सौन्दर्यादिकं धिक् । कुतः । तवानुभावः सहभावस्तत्र भावोभिप्रायस्तं विना । यद्वा । अनुभावे वागङ्गसत्त्वाभिनये भावः सत्त्वं तं विना ।

वागङ्गसत्त्वाभिनयेनुभावस्तु स्मृतो बुधैः ॥

इति भरतः । भावादित्यृतेयोगे पञ्चमी ॥ त्वया मकरन्देन तया मालत्या च सह यो दिवसो नास्ति सोपि दिवसो विलीयताम् । अन्यत्र मालतीमकरन्दाभ्यां या प्रमोदमृगतृष्णा मम जायते

---

२०८. °च्छ्वसिमि for °च्छ्वसित° N.; समघटीत्थ° for मम यदित्थ° E.

२०९. धिगेव रमणीयवस्त्वनुभवान्वृथाभाविनः Bh. K2. Com. धिगेव रमणीभवंत्व-(यवस्त्व) नुभवं वृथाभाविनं G. विरोधिरमणीयवस्त्वनुभवाद्विधाभाविनः N. विरोधरमणीयवस्त्वनुभवत् वृथाभावितः (corrected in marg. into the reading of the text) O. for धि-तेः; अनुभवात् noticed by Com. for its own अनुभवान् ; तद् for त्वद् E. K1.

२१०. सहनयस्तर्यं च दिवसः स विध्वंसतां A.E.N. सह न यस्तया च दिवसोपि स ध्वंसतां Bh. न सह यस्तयाच दिवसोपि सर्वःसतां(corrected in marg. into the reading of the text) O.; योपि दिवसोत्र for यो-पि K2.; भाति for याति B.

२११. प्रमोह for प्रमोद N.; या मानुषे A. E. O. (corr. in marg. into या जायते) का मानुषी Bh. का मानुषे N. for या जायते.

मक० । अये उन्मादमोहान्नास्तीयपि मां प्रति कुतश्चिद्व्यञ्जनात्प्रबुद्ध एवास्य सहजस्नेहसंस्कारः । तदसंनिहितमेव मां मन्यते । पुरः स्थित्वा । एष पार्श्वचर एव ते मकरन्दो मन्दभाग्यः ।

माध० । प्रियवयस्य संभावय परिष्वजस्व माम् । प्रियां तु मालतीं प्रति निराशः परिश्रान्तोस्मि । इति मूर्छति ।

मक० । सहर्षम् । एष संभावयामि जीवितेश्वरम् । विलोक्य सकरुणम् । हा कष्टम् । आविर्भूतमत्परिष्वङ्गोत्कण्ठ

तामपि धिक् । युवाभ्यां विना दैवान्मे हर्षोप्याभासीभूत इति भावः । अत एव प्रमोदस्य मृगतृष्णाया रूपकेणालीकत्वमुक्तम् ।

२१२-२२१ उन्माददशायामनिश्चयाद्यतः कुतश्चिदित्युक्तम् । व्यञ्जकात्संस्काराभिव्यञ्जकात् । प्रबुद्ध उद्बुद्धः । संभावय पालय । भ्रमाद्विराग्याद्य मूर्छेत्येतदर्थं निराश इत्युक्तम् । जीवितेश्वरमित्यनेन

---

२१२. अहो for अये; अनुकूलयति for प्रति O.; संप्रत्ययं मां प्रत्यप्रतिकूलः यतः कुतश्चिद्व्यञ्जकात् A. मां प्रत्यविकलः यतः कुतश्चिद्व्यञ्जनात् C. संप्रत्ययं यतः कुतश्चिद्व्यंजकात् E. मां प्रत्यविक यतः कुतश्चिद्व्यञ्जनात् K1. प्रत्ययः कुतश्चिद्व्यञ्जकात् K2. for मां-न्यत् .

२१३. बुद्ध for प्रबुद्ध Bh.; सहजः for सहज K2. तत्संनिहितमेव मां न मन्यते for तद्-ते N.

२१४. पुरतः for पुरः K2. O. स after ते N.; वयस्य before मक० B.

२१५. दैवः for भाग्यः B.

२१६. हा before प्रिय Bh.; परिष्वजस्व संभावय Bh. परिष्वज्य संभावय N. for सं-स्व; मां before परिष्वजस्व instead of after, O.

२१७. B. om. तु; निराशपरिश्रमसंवृत्तोस्मि B. निराशः संवृत्तोस्मि Bh, K1. K2. निराश एव संवृत्तोस्मि N. for नि-स्मि; E. O. om. इति; मूर्छितः पतति for इति-ति B. Bh. om.इति-ति.

२१८. A. N. om. सहर्षम् ; स्थाने before एष N.; एवं for एष A. E.; जीवेश्वरां for जी-रम्. Bh.

२१९. आः for हा Bh.; कष्टम् twice Bh.; कथम् before आविः Bh. N.

एव निश्चेतनः संवृत्तः। तत्कृतमिदानीमाशाव्यसनेन। संवर्धैव २२० मे नास्ति वयस्य इति युक्तः परिच्छेदः। हा वयस्य

यस्नेहसंज्वरवता हृदयेन नित्य-
मावद्धवेपथु विनापि निमित्तयोगात्।
त्वद्व्यापदो गणयता भयमन्वभावि
तत्सर्वमेकपद एव मम प्रशान्तम्॥ २२५

तुल्या जीवनसामग्युक्ता। निश्चेष्टः प्रलययुक्तजनाकृतिः। परिच्छेदो निश्चयः।

२२२-२२५ यदित्यादि। स्नेहरूपसंतापवता हृदा विनापि भयकारणेन सकम्पं भयं नित्यमन्वभाव्यनुभूतं यत्तत्सर्वं मम भयं त्वदीयविपत्तीर्गणयतः संभावयत एकस्मिन्क्षणे परिसमाप्तम्। कदा ते किं स्यादित्यादिभयं प्रकृतदशाया प्रशान्तमिति भावः। एतत्पक्षे गणयतेति पाठे विधिनेत्यर्थात्। यद्वा। त्वद्व्यापदो गणयता हृदा यद्भयमनुभूतं तदधुना गतमित्यर्थः। तथा च त्वन्निमित्तमधुना तु सहेतुकैव विपदिति भावः।

---

२२०. निश्चेष्टः for निः-नः B.; वृत्तः for संवृत्तः A. E.; किम् for कृतम् A. Bh, E.; Bh. om. इदानीं; B. Bh, N. om. एव.

२२१. नास्ति त्रिवयस्यो मम for मे-स्य N.; नास्ति मे for मे नास्ति Bh.; प्रिय before वयस्यः Bh. C.

२२४. त्वव्या° for त्वद्या° A. Bh. E. O.; °यती for °यता B. Kl.; स्वय° for भय° N.

२२५. प्रणष्टं for प्रशान्तम् N.

सखे वरं त एवातिक्रान्ता मुहूर्तास्तथाविधमपि भवन्तं येषु चेतयमानमनुभूतवानस्मि । इदानीं तु

भारः कायो जीवितं वज्रकीलं
काष्ठाः शून्या निष्फलानीन्द्रियाणि ।
कष्टः कालो मां प्रति त्वत्प्रयाणे
शान्तालोकः सर्वतो जीवलोकः ॥

२२६-२३१ वरं मनागिष्टे ॥ मनागिष्टे वरं यत्तु कथिदाह तदव्ययमिति शाश्वतः॥ अव्ययानामनेकार्थत्वादुक्तोर्थः सुलभ एव । चेतयमानं चेतनावन्तम् । भार इत्यादि । कायो भारो धर्तुमशक्यः। धारणाशक्यतया व्याधिः । जीवनं वज्रकीलकमनुच्छेदात् । अनेन मर्मच्छेदः । मर्मच्छेदेन चिन्ता । दिशः शून्या इति जडता । इन्द्रियाणि नेत्रादीन्यफलानि कार्याक्षमाणि । बाह्यविषयामहादैन्यम् । कालः कष्टो दुःखदः । दैन्येन जीवनाक्षमता । संसारः सर्वत्र प्रशान्तदर्शनः । तथा च त्वां विना न मज्जीवनमिति भावः । त्वत्प्रयाणे तव गमने विनाश इति यावत् । सतिसप्तमीयम् । मां प्रतीति सर्वत्र योज्यम् । यद्वा । पृथिव्यादिद्रव्यनवके प्रधानद्रव्यदूषणेन दोषमाह । तत्र काय इति पृथिव्या जीवनमित्यात्मनः

---

२२६. अथवा परतो for स-एव N.; वतावत् before त Bh.; तावन्त for त A. E.; °क्रान्तवन्तः C. °क्रान्तवतो O. for °क्रान्ता; दिवस before मुहूर्ताः B.; येषु before तथा°, instead of after भवन्तं Bh.; C. om. भवन्तं.

२२७. चेत्यमानम° Bh. चेतयानम° N. for चेतयमानम°; अहं for अस्मि C. K1.; B. O. om. अस्मि; मम before इदानीं B.; N. om. इदानीं—लोकः; मम after तु Bh. O.

२२८. शून्यभूतं for वज्रकीलं B. O. (marg.); कीली Bh. कीलः C. K1. K2. O. for कीलं.

२२९. काष्ठा for काष्ठाः Bh.

२३०. काष्ठा for कष्टः Bh.; संप्रति for मां प्रति. Bh.

विचिन्त्य। तत्किं नु खलु माधवास्तमयसाक्षिणा मया भवितव्यमिति जीवामि। भवत्वमुष्माद्गिरिशिखरात्पाटलावत्यां निपत्य माधवस्य मरणाग्रेसरो भवामि। किंचित्परिक्रम्य सकरुणं निवृत्यावलोक्य च। कष्टं भोः कष्टम्। २१५

तदेतदसितोत्पलद्युति शरीरमस्मिन्नभू-
न्ममातिदृढपीडनैरपि न तृप्तिरालिङ्गनैः।

काष्ठा इति दिश इन्द्रियाणीतीन्द्रियाणां काल इति कालस्य लोक इति विषयाणां दोष उक्तः। शान्तालोकोनुपभोग्य इत्यर्थः।

२३२-२३९ अस्तमयो विनाशः। व्याधिदशायामयम्। यदाह।

निर्वेदश्चैव चिन्ता च दैन्यं ग्लानिः श्रमस्तथा।
जडता मरणं चैव व्याधौ तु करुणेपि च॥

पाटलावती नदीभेदः। प्रियदर्शनार्थं निवर्तनम्। मूर्छां दृष्ट्वा सकरुणम्। तादृशं दृष्ट्वा सखेदमाह। तदित्यादि। सखे यत्त्वाङ्गं नीलनलिनश्यामं तदेतत्। अस्मिन्नङ्गे गाढासञ्जनैरप्यालिङ्गनैर्मम

---

२१२. A. B. E. om. विचिन्त्य; न for नु O.; C. om. खलु; Bh. om. °मय; B. N. O. om. मया; भावितव्यं मया for मं-व्ययम् K2.

२१३. °मित्यकस्माद्गिरि (corr. in marg. into the reading of the text) for °भि-रि O.; E. K2. om. इति जीवामि; K1. om. जीवामि। भवतु; अतो after इति N.; E. has lost भवत्व-भवामि; तदस्मात् Bh. तत्तस्मात् N. for भवत्वमुष्मात्; एव A. E. उत्तुङ्ग K1. before गिरि; °खात् for °खरात् K2.; B. om. पात्यां; °वर्ती for °वत्यां N.

२१४. N. om. माधवस्य; माधवमरणस्या° for मा-णा° B.; °णांग्र for °णाग्रे N.; भविष्यामि for भवामि C.; विचिन्त्य K1. इति K2. before किंचित्; A. Bh. E. N. om. किं-न्य.

२१५. परिवृत्य Bh. N. विवृत्य O. for निवृत्य; आलोक्य for अवलोक्य; A. E.; A. E. N; om. च.

२१७. °त्तमाति B. °न्ममापि Bh. O. (corr. into °न्ममाति) for °न्मेमाति; पीडितैः for पीडनैः B. N.; °लिंगितैः for लिङ्गनैः B.

यदुल्लसितविस्मया बत निपीतवस्त्यः पुरा
नवप्रणयविभ्रमाकुलितमालतीदृष्टयः ॥

२४० आश्चर्यम् । एतस्यां तनावचरमे वयसि तावतो गुणस-
माहारस्य संनिवेशः कथमिवाभूत् । सखे माधव

आपूर्णश्च कलाभिरिन्दुरमलो यातश्च राहोर्मुखं
संजातश्च घनाघनो जलधरः शीर्णश्च वायोर्जवात्
निर्वृत्तश्च फलेग्रहिर्द्रुमवरो दग्धश्च दावाग्निना
२४५ त्वं चूडामणितां गतश्च जगतः प्राप्तश्च मृत्योर्वशम् ॥

तृप्तिर्नाभूत् । यदङ्गं नवस्नेहविलासव्याकुलमालतीदृष्टय उपचिताद्भुताः पूर्वं निपीतवस्त्यो नित्यादरेणावलोकितवस्त्य इत्यर्थः । बत खेदे ।

२४०–२४५ अचरमे नूतने । समाहारो मेलकः । आपूर्ण इत्यादि । त्वं संसारस्य चूडामणीभूतश्च मरणं प्राप्तश्च । अत्र तुल्ययोगितया दृष्टान्तमाह । निर्मलश्चन्द्रः कलाभिः पूर्णश्च राहुम-स्तश्च । मेघो घनाघनो वर्षुकाब्दश्च वातवेगाद्विशकलितश्च । द्रुमश्रेष्ठः फलेग्रहिः फलभारवान्निर्वृत्तो जातश्च वनाग्निना दग्धश्च । यथा त्वमपीत्यर्थः ॥ घनाघनो मत्तगजे वर्षुकाब्दमहेन्द्रयोरित्यमरमाला ॥ यद्वा । घनाघनोतिनिबिडः । घनशब्दस्यैवावृत्त्या प्रयोगाद्दावद

---

२३८. विभ्रमं मधु B. E. N. विस्मयं बत Bh. for वि-त.

२३९. न च for नव Bh.

२४०. आश्चर्यं twice Bh. C. एकस्याचरमे A. Bh. एकस्यां तनौ अचरमे B. O. एकत्राचरमे E. for ए-मे; तनावेतावतो for तना-तो N.; वसि for वयसि Bh.; स्थित-स्य for तावतो B.

२४१. Bh. om. सखे माधव; स एष माधवः twice for सखे माधव B.

२४२. संपूर्णः for आपूर्णः K2.

२४४ °ग्रहिर्द्रुमे for °ग्रहिर्द्रुम A. Bh. C.

२४५. गतोहि for गतश्च K1; जगतां for जगतः B.; प्राप्तोसि for प्राप्तश्च A. E.; मुखं for वशं B. C. O.

तत्परिष्वजे तावदेवं गतमपि वयस्यम्। अर्थितश्चानेन संप्रत्येवायमर्थः। परिष्वज्य। हा वयस्य विमलविद्यानिधे गुणगुरो मालतीस्वयंग्राहजीवितेश्वर कामन्दकीमकरन्दानन्द-नमुखचन्द्र माधव अयमत्र ते जन्मन्यपश्चिमः पश्चिमावस्था-प्रार्थितो मकरन्दबाहुपरिष्वङ्गः। सखे संप्रति मुहूर्तमपि २५० मकरन्दो जीवतीति मैव मंस्थाः।

इतिवत्। फलेग्रहिर्निपातनात्। फलानि गृह्णाति धारयतीति फले-ग्रहिः॥ स्यादवन्ध्यः फलेग्रहिरित्यमरः॥

२४६–२५९ एवं गतं मूर्छितम्। अयमर्थ आलिङ्गनरूपः। मया सहेति शेषः। अपश्चिमो दुर्लभः। पश्चिमावस्था शेषावस्था। आजन्मेत्यादि। हे पद्मास्य जन्मन आरभ्य मयैव समं तुल्यगृह-तया मातुः स्तन्यं पीत्वाधुना त्वमेको निवापसलिलं प्रेतोदकाञ्जलिं

---

२४६. विचिन्त्य before तत् A.; ततः for तत् Bh.; अहं after परिष्वजे B. C. O.; एनं before तावद् O.; एनं for तावत् B.; प्रिय before वयस्य N.; प्रार्थित for अर्थितः K1. K2.; एव for च N.

२४७. अयमेव for एवायम् Bh. N.; C. om. हा; प्रिय before वयस्य N.

२४८. हा K1. महा K2. before गुण; हा before गु°, मा°, का° N.; गण after गुण Bh.; हा सौन्दर्यावनिर्जेतरतिरमणच्छाय हा कामिनीहृदयमन्मथ हा बान्धवपयोनिधि शरचन्द्र हा A. E. हा Bh. before काम°.

२४९. °नंदचंद्र B. Bh. नंदनचंद्रमुख C. K1. K2. °नंदमुग्धचंद्रमः N. °नंदचंद्र-मुख O. for °नन्द-न्द्र; N. om. अत्र; स for अत्र B. Bh.; Bh. N. om. ज-मः; B. om. अपश्चिमः; पश्चिमः for अपश्चिमः O.; °वस्थां प्रापितो for °व-तो A. B. E.

२५०. प्रापितो for प्रार्थितो K2.; A. B. Bh. E. om. सखे स एष for संप्रति A. E.; मकरंदो मुहूर्तमपि for मु-दो Bh.

२५१. मैवं A. Bh. K2. O. एवं मा C. K1. for मैव; B. om. एव; कृतः after मंस्थाः N.

आजन्मनः सहनिवासितया मयैव
मातुः पयोधरपयोपि समं निपीय ।
त्वं पुण्डरीकमुख बन्धुतया निरस्त-
मेको निवापसलिलं पिबसीत्ययुक्तम् ॥

सकरुणं विमुच्य परिक्रम्य च । इयमधस्तात्पाटलावती । भगवति आपगे

प्रियस्य सुहृदो यत्र मम तत्रैव संभवः ।
भूयादमुष्य भूयोपि भूयासमनुसंचरः ॥

इति पतितुमिच्छति ।

प्रविश्य सहसा सौदामिनी । वारयित्वा । वत्स कृतं साहसेन ।

बन्धुसमूहेन दत्तं पिबसीत्येतदयोग्यम् । सहपानार्थमहमप्यायच्छामीत्यर्थः ॥ निवापः पितृदेये स्यादित्यमरः ॥ आपगा नदी । प्रियस्येत्यादि । मित्रस्य संभव उत्पत्तिर्यत्र ममापि तत्रैव भूयात् ।

---

२५२. °सतया for °सितया A. O.; सदैव for मयैव B. Bh.

२५३. निपीतं for निपीय N.

२५४. तत् for त्वं N.; विसृष्ट° for निरस्त° K1. K2.

२५६. Bh. N. om. परिक्रम्य च.

२५७. °बन्धौरीपते A. E. °वत्यापगा Bh. for °क-गे.

२५८. प्रिय for प्रियस्य A.; तत्रैव मम for म-व K1. K2.

२५९. अमुष्य for अमुष्य A.

२६१. C. E. N. om. सहसा; °मनी for °मिनी K2.; सौदामिनी twice Bh. K1.; मकरन्दं before वार° K2. वारयंती for वारयित्वा B.; वत्स twice C. K1. K2. O.; कृतं twice N.; अलं for कृतं A. E.

मक० । विलोक्य । अयि कासि । किमहं त्वया प्रतिषिद्धः ।

सौदा० । आयुष्मन् किं त्वं मकरन्दः ।

मक० । मुञ्च स एवास्मि मन्दभाग्यः । २६९

सौदा० । वत्स योगिन्यस्मि मालत्यभिज्ञानं च धारयामि । इति बकुलमालां दर्शयति ।

मक० । सोच्छ्वासं सकरुणम् । आर्ये अपि जीवति मालती ।

सौदा० । अथ किम् । अपि च वत्स किमत्याहितं माधवस्य यदनिष्टं व्यवसितोसीत्याकम्पितास्मि । २७०

अमुत्रापरस्मिंल्लोके पुनरप्यस्यानुचरो भूयासमित्यर्थः ॥ भूयादिस्यादौ प्रार्थनायां लिङ् ॥

२६९–२७० अत्याहितं प्रमोहोभूत् । प्रभञ्जनो वायुः । ध्रुवबोर्माधवमकरन्दयोः ।

---

२६२. अम्ब A. Bh. E. K1. K2. अये B. O. for अयि; किमर्थं for किम् B. Bh. N.; त्वया हंत for अहं त्वया Bh.; प्रतिहतः A. E. O. वारितः B. for प्रतिषिद्धः

२६४. आयुष्मन् after °न्दः instead of before किं O.; Bh. N. om. आयुष्मन्; न before किं B.; अपि for किं Bh. N.

२६५. मुंच twice C. K1. K2.; मां after मुञ्च B.; अहं after अस्मि E.

२६६. सौदामनी for सौदा° K2.; C. om. च; चावधारयामीति A. च जानामि । इति B. चावधारयेति E. for च-ति.

२६७. Bh. N. O. om. इति; इति after व-लां instead of before K2.; च before दर्शं° Bh.

२६८. सोच्छ्वासकरुणं for सो-णम् C. K1. K2. O.; च after °णम् N.; A. Bh. E. N. om. आर्ये; अपि for अपि A. E. Bh.

२६९. सौदामनी for सौदा° K2.; A. Bh. E. N. om. अपि च °मित्या° for °मत्या° K1.; त्वरते मे चेतः after वत्स B.

२७०. °तोसीत्याशंकितास्मि B. °तोसि भीत्याकंपितास्मि C. °तोसीति भीतार्काम्पितास्मि K1. °तं । भीत्याकंपितास्मि O. for °तो-स्मि; A. E. om. इत्या-स्मि; कम्पि° for आकम्पि° K2.; अथ माधवः क्व at the end A. B. E.

मक० । आर्ये तमहं प्रमुग्धमेव वैराग्यात्परित्यज्यागतस्त-
देहि तूर्णं संभावयावः । इति त्वरितं परिक्रामतः ।

माध० । आश्वस्थ । अये प्रतिबोधित एवास्मि केनापि ।
विचिन्त्य । नूनमस्यायमभिनवजीमूतजलबिन्दुवाहिनः प्रभ-
२७५ ञ्जनस्यानपेक्षितास्मदवस्थो व्यापारः ।

मक० । विलोक्य । दिष्ट्या पुनः प्रत्यापन्नचेतनो वयस्यः ।

सौदा० । विलोक्य । संवदत्युभयोर्मालतीनिवेदितः शरी-
राकारः ।

माध० । भगवन् पौरस्त्यपवन ।

२७९–२८३ मूर्छयैव तं सोपालम्भमाह । भगवन्निति । पौरस्त्येत्यनेन भिन्नदेशकथनम् । तेन सहजकृत्रिमवैरशङ्का नि-

---

२७१. भगवति for आर्ये B.; E. om. आर्ये; मधन for तमहं प्र° Bh.; B. om. वैराग्यात् ; N. gives तदेहि &c. to सौदा°.

२७२. त्वरितं for तूर्णं B. O.; A. Bh. E. N. O. om. इति; उपसर्पतः for परिक्रामतः N.

२७३. द्विपादिकया before आश्वस्थ B.; Bh. N. omit this speech here and put it before भगवन् पौरस्त्य; आश्वर्य for आश्वस्थ N.; अर्य for अये; आश्वासित B. बोधित C. for प्रतिबोधित; °धित-स्मि for °धि-स्मि K1.; इवास्मि Bh. °वास्मि N. for एवास्मि.

२७४. उत्थायोपविश्य विलोक्य B. उत्थायोपविश्यावलोक्य O. before विचिन्त्य; A. E. om. विचिन्त्य; च after विचिन्त्य O.; नूनमयमस्य नवजलधरपवनस्यानेक्षितास्मद-वस्थो for नू-स्थो N.; A. E. O. om. अयम्; °नवः for °नव Bh.; वहल before जीमूत B. O.; जलधर for जीमूत Bh.; कण for बिन्दु Bh.; A. E. om. बिन्दु.

२७५. °स्यापेक्षि° for स्यानपेक्षि Bh.; °वस्थोयं for °वस्थो A. E.

२७६. दृष्ट्वा सोच्छ्वासं for विलोक्य B. O.; A. Bh. E. om. विलोक्य.

२७७. अव° for वि° O.; संभवति for संवदति B. O.; अनयोः for उभयोः Bh. N.; वासरा° for शरीरा Bh.

२७९. वायो for पवन N

भ्रमय जलदानम्भोगर्भान्प्रमोदय चातका- २८०
न्कलय शिखिनः केकोत्कण्ठान्कठोरय केतकान्।
विरहिणि जने मूर्छां लब्ध्वा विनोदयति व्यथा-
मकरुण पुनः संज्ञाव्याधिं विधाय किमीहसे ॥

रस्ता। तव विरहिदुःखमेव न कृत्यम्। अपि त्वन्यदपीत्याह। भ्रमयेत्यादि। जलपूर्णान्मेघांश्चालय। कोकिलान्हर्षय। केकयोत्कण्ठानूर्ध्वगलान्तेच्छान्वा मयूरान्कलय नर्तय। कलेरनेकार्थत्वात्। केतकान्केतकीवृक्षान्कठोरय कोरकितान्कुरु। कोरकितत्वेन निम्नोन्नततया कठोरत्वम्। केतक्यामपि केतक इति शब्दभेदः। अत एव केतकाधानहेतोरिति मेघदूते। यद्वा। केतकीपुष्पाणि कठोरय विकासय॥ तत्करोतीति णिच्। अस्मिन्पक्षे लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति लिङ्गव्यत्यय इत्यवधेयम्॥ विरहिजने मूर्छां प्राप्य व्यथां स्फाटयति सति पुनः संज्ञाव्याधिं चेतनारूपं रोगं कृत्वा किं त्वमिच्छसि। महता दुःखितदुःखशान्तिः क्रियते। त्वं प्रबोध्य दुःखयसीत्यनर्हम्। अत एवाकरुण इत्युक्तम्। प्रमोदय चातकानित्यपि पाठः। प्रथमपाठे तु कोकिलप्रमोदो वर्षास्वपि कविसंप्रदाये वर्ण्यत इत्यवधेयम्।

---

२८०. अन्तर् for अम्भो Kl.; Bh. omits the portion from प्रमोदय to अतः स्वागतं भवत्याः; कौकिलान् or मौलिकान् N. कोकिलान् (corr. into चातकान्) O. for चातकान्.

२८१. केतकं for केतकान् N.

मक० । सुकृतमखिलजन्तुजीवनेन मातरिश्वना ।

२८९ माध० । देव वायो तथापि भवन्तमेवं प्रार्थये ।

विकसत्कदम्बनिकुरुम्बपांसुना
सह जीवितं वह मम प्रिया यतः ।
अथ वा तदङ्गपरिवासशीतलं
मयि किंचिदर्पय भवान्हि मे गतिः ॥

२९० कृताञ्जलिः प्रणमति ।

२८४–२८९ मातरिश्वा वायुः । वातीति वायुरित्युचितपदन्यासेन जीवनयोग्यतोक्ता । तथाप्यनिष्टकरणादपि । विकसदित्यादि । मम प्रिया यतो यत्र तं देशं मम जीवितं प्रफुल्लकदम्बसमूहधूल्या सह प्रापय । घटय मे इति वा पाठः । सा विरहदीना म्रियेतातस्तज्जीवनाय मज्जीवितं नयेति भावः । पांशुना सहेत्यनेन परमाणुरूपं मे मनोपि तत्समूहे गमिष्यतीति न ते प्रयासोपि

---

२८४. नूनमनेनाखिलजीवनेन कृतं जीवनं for सु-ना B.; सुकृतमनेन सकल for सु-ल- N.; सुकृतम् for सुवृतम् K1.; निखिल for अखिल O.; °श्वनां for °श्वना K1.; after मातरिश्वना N. adds:—

अपिच । एते कैतकसूनसौरभजुषः पौरप्रगल्भांगना-
व्यालोलालकवल्लरी विलुठनव्याजोपभुक्काननाः ।
किं चोन्निद्रकदंबकुड्मलपुटीधूलीलुठंत्यद्रद-
व्यूहव्याहतिहारिणो विरहिणः कर्षंति वर्षानिलाः ।

२८५. भगवन् before देव B. N.; एतावत् B. एव K1. K2. for एवं; तावत् after एवं O.

२८६. °रम्ब for रुम्ब A. B. O.; पांशुना for पांसुना A. O.

२८७. घटय मे for वह मम N.

२८८. अपि for अथ B. K2. O.

२८९. किंचिदीरय (corr. into किंचिदर्पय) O.; किंचिदीरय भवांश्च मे गतिः for किं-तिः A. E.; मय for मयि K1.; भवांस्तु for भवान्हि N.

सौदा० । सुसमाहितः खल्वभिज्ञानार्पणस्यावसरः । अञ्जलौ मालां मुञ्चति ।

माध० । साकूतविस्मयहर्षम् । कथमियमस्मद्विरचिता प्रियतमास्तनोन्नाहदुर्ललितमूर्त्तिरनङ्गमान्दिराङ्गनबकुलप्रसवमाला । निरूप्य सहर्षम् । कः संदेहः । तथा हि । स एवाय- २९९
मस्याः ।

स्यादित्युक्तम् । नो वा प्रियाङ्गसदावस्थितिहिमं यत्किंचिद्वस्तु मयि तदर्पय देहि । ईरयेति पाठे प्रेरयेत्यर्थः । तदेव मे तापशान्त्यै स्यादिति भावः । अत्र हेतुमाह । यतो मम भवान्गतिराश्रयः । आश्रयस्याश्रितजीवनं युक्तमेवेति भावः । अपि वेति पाठेपिः संभावनायाम् ।

२९१-३००. समाहितो युक्तः । वायुप्रार्थनाप्रकरणात् । प्रियाङ्गसङ्गिमालालोकात्सहर्षत्वम् । यदाह ।

प्राप्ये वाप्यप्राप्ये लब्धेर्थे प्रियसमागमे वापि ।
हृदयमनोरथलाभे हर्षः संजायते पुंसाम् ॥

उन्नाह उत्सेध उपरिवहनं वा । दुर्ललितातिप्रिया । अनङ्ग एव

---

२९९. सुसमीहितः C. समीहितः K1. for सुसमाहितः; अस्ति after खलु O.; °न दर्शनस्याव° A. E. °नस्यार्पणाव° B. for °ना-व°; माधवस्य before अञ्जलौ O.; माधवस्यांजलौ बकुलमालां for अ-लां B.

२९२. बकुलमालामर्पयति for मा-ति N.

२९३. विलोक्य before साकूत B. O.; °तं सविस्मयं सहर्षं च N. °तविस्मयं सहर्षं O. for त-म् ; °स्मया° for °स्मय K2.; स before हर्षम् C.; सा before अस्मद् K1. K2. O.

२९४. प्रियायाः A. E. प्रियतमायाः C. प्रियतमया K1. for प्रियतमा; उद्वेद A. E. उद्वाह K1. K2. उद्वहन N. for उन्नाह; °रांगण A. K1. O. °रांकण N. for °राङ्गन; बाल for बकुल E. पादपकुसुम for प्रसव N.

२९५. सत्वरं B. सम्यङ् N. before निरूप्य; B. N. O. om. सहर्षम् ; एवम् for स-यम् N.; B. om. अयं.

मुग्धेन्दुसुन्दरतदीयमुखावलोक-
हेलाविशृङ्खलकुतूहलनिह्नवाय ।
दुर्न्यस्तपुष्परचितोपि लवङ्गिकाया-
३०० स्तोषं ततान विषमग्रथितोपि भागः ॥

मन्दिरमनङ्गस्य वा मन्दिरम् । मुग्धेत्यादि । अस्या मालायाः स एवायं भागो यो लवङ्गिकाया अपि संतोषमकरोत् । अपिपदान्मालत्या अपीत्यर्थः । विषमं ग्रथितं ग्रन्थना यत्र सः । विषमेण ग्रथित इति वा । अत्र हेतुमाह । मुग्धं मनोज्ञमिन्दुकान्तं यन्मालतीमुखम् । यद्वा । विरहात्क्षामत्वादिना बालेन्दुवत्कान्तं यत्तदास्यं तदालोके सति हेलया शृङ्गारचेष्टया विशृङ्खलं सर्वत्र वर्तमानं यत्कौतुकं तद्गोपनाय दुर्न्यस्तैः पूर्वग्रथनादन्यथा दत्तैः पुष्पै रचितः । एतत्तु प्रथमाङ्क एव व्यक्तम् । ननु हेला स्त्रीविषया । यदाह भरतः ।

यौवने त्रिदश स्त्रीणां विकारा नेत्रपातजाः ।
आदौ त्रयोङ्गजास्तेषां दश स्वाभाविकास्तथा ॥

तत्राङ्गजेषु हावहेलालक्षणम् ।

अक्षिभ्रुवोर्विकाराद्याः शृङ्गारस्य च सूचकाः ।
समीवारेचका भावा हावास्तेभ्यः समुत्थिताः ॥
य एव हावः सैवासौ शृङ्गाररससंभवा ।
समाख्याता बुधैर्हेला ललिताभिनयात्मिका ॥

अतो माधवे हेलेत्युक्तम् । मैवम् । स्त्रीणामित्यस्योपलक्षणत्वात्पुरुषेपि कामावस्थासाम्याद्धेलावचनात् । यदाह ।

२९८. लीला for हेला C.
२९९. रचनो° for रचितो° A. C. E. K1. K2. O.
३००. °तैक A. E. °तो वि G. O. for °तोपि.

सहर्षोन्मादमुत्थाय। प्रिये मालति इयं वीक्ष्यसे। सकोपमिव। अयि मदवस्थानभिज्ञे

प्रयान्तीव प्राणाः सुतनु हृदयं ध्वंसत इव
ज्वलन्तीवाङ्गानि प्रसरति समन्तादिव तमः।
त्वराप्रस्तावोयं न खलु परिहासस्य विषय- ३०५
स्तदक्ष्णोरानन्दं वितर मयि मा भूरकरुणा॥

हेला हावश्च भावश्च व्याजो विस्रम्भभाषणम्।
चाटुः प्रेमाभिसंधानं चकितं च विलासितम्॥

तत्र रागतः सहसा प्रवृत्तौ हेतुश्चित्तोल्लासो हेलेति। यद्वा। अवलोक्यत इत्यवलोकः॥ कर्मणि घञ्॥ इन्दुसुन्दरमालतीमुखेवलोक्या दृष्टया या हेला तया विशृङ्खलं यन्माधवस्य कुतूहलं तद्गोपनायेत्यर्थः।

३०१–३०६ संकल्पलिखितप्रियादर्शनाद्धर्षः। दर्शनाप्राप्त्यापुनराह। नन्विति। अत्राप्यलाभादुपालभ्यतेयीति। परिहासाददर्शनमाशङ्क्य तदनवसरमाह। प्रयान्तीत्यादि। प्राणाः प्रयान्तीव सर्वतःशून्यत्वात्। हे सुतनु मनो ध्वंसत इव। मोहात्। अङ्गज्वलनमतिदाहात्। एतेन व्याधिरुक्तः। सर्वतस्तमः प्रसरतीव। अनेन जडता। सकलेन्द्रियाणामग्रहात्। जडतानन्तरं मरणशङ्कायामाश्वास एव युक्त इत्याह त्वरेति। खलु निश्चये। यत एवं ततो नेत्र-

---

३०१. सहसा सोन्मा° for सहर्षोन्मा° O.; चंडि for प्रिये N.; ननु before इयं B.; विलोक्यसे for वीक्ष्यसे N.; नन्वियं वीक्ष्यसे after वीक्ष्यसे O.

३०२. अये for अयि K1. K2.; प्रिये before मद° K1. K2. मदनाव° for मदव° B.

३०५. प्रिये for त्वरा B. O. (in margin).

३०६. भूदकरुणा for भूरकरुणा N. O. (corrected into भूर°).

सर्वतो दृष्ट्वा सनिर्वेदं । कुतोत्र मालती । बकुलमालामुद्दिश्य । अयि प्रियाप्रणयिनि बकुलमाले उपकारिण्यसि । अतः स्वागतं भवत्याः ।

निष्प्रत्यूहाः प्रियसखि यदा दुःसहाः संबभूवु-
र्देहोद्दाहव्यसनगुरवो मन्मथोन्माथवेगाः ।
तस्मिन्काले कुवलयदृशास्त्वत्समाश्लेष एव
प्राणत्राणं प्रगुणमभवन्मत्परिष्वङ्गकल्पः ॥

सकरुणं निर्वर्ण्य ।

प्रीतिं देहि । स्वं दर्शयेत्यर्थः । मद्विषये निर्दया मा भविष्यसि । यद्वा । अकरुणा मा भूर्न भवसि ॥ माङि लुङिति कालसामान्ये लुङ् ॥ पूर्वकरुणेदानीमपि निर्वाह्यतामित्यर्थः । इवशब्द उत्प्रेक्षायाम्

३१०–३१४. निरित्यादि । यदा मालत्याः पद्माक्ष्याः कामोन्मादोद्वेगा निर्विघ्ना अत्यर्थं दुःसहा अङ्गदाहदुःखमहान्तस्तद्दुःखोपदेशकाराः संबभूवुः संभूयोद्गतास्तत्र काले तस्यास्त्वदालिङ्गनमेव शीघ्रं प्राणरक्षकमभूत । अत एव मदालिङ्गनतुल्यः । उन्माथ उन्मथनमुद्वेग इति यावत् । प्रगुणमिति पाठे प्रकृष्टगुणमित्यर्थः । क्रियाविशेषणं वा । कामदुःखोद्वेगस्य प्रियसङ्गस्यालाभादविघ्नत्वम् ।

---

३०७. इति दिशोवलोक्य for स-द्वा B.; विलोक्य सकरुणं for दृ-म् O.; उपविश्य बकुलावलीम् C. K1. उपविश्य बकुलमालाम् K2. for बकुलमालाम् ; प्रति for उद्दिश्य B. N. O.

३०८. N. om. अयि-भवत्याः; अये for अयि C.

३०९. यतः before अतः A.; यतस्तत् K1. K2. यतः O. for अतः; B. om. अतः C. om. अतः-त्याः

३१०. °त्यूहं for त्यूहाः A.

३११. देहोन्मादप्रथन B. देहे दाहव्यसन E. for दे-न; व्यथन for व्यसन K2. O. noticed by Com.; °न्माद for °न्माथ N.

३१२. त्राण for त्राणं O.; प्रगुणनमभून् A. E. त्वरितमभवन् B. for प्र-वन्.

आनन्दमिश्रमदनज्वरदीपनानि ३१५
गाढानुरागरसवन्ति तदा तदा च।
स्नेहाङ्कनानि मम मुग्धदृशश्च कण्ठे
कष्टं स्मरामि तव तानि गतागतानि॥

इति हृदये निधाय मूर्छति।

मक०। उपसृत्य वीजयन्। सखे समाश्वसिहि समाश्वसिहि। ३२०

माध०। आश्वस्य। मकरन्द किं न पश्यसि कुतोपि सहसैव मा-

मालतीप्रणयित्वात्प्रियसखि इति। दुःसहत्वमधृतिकरणात्। उद्वाह उद्वहतदाहः। व्यसनस्थाने व्यथन इति पाठे व्यथनं पीडा। अधुना मालां विनास्याः कथं जीवनं भविष्यतीति भावः। निर्वर्ण्य निरूप्य।

३१५–३२४ आनन्देत्यादि। मम मालत्याश्च कण्ठे तव तानि गतागतानि स्मरामि। स्मरणस्यातिदुःखदत्वात्कष्टम्। तदा तदा तस्मिंस्तस्मिन्काले। तत्र चोरिकाविवाहात्पूर्वं मालतीकण्ठगतेति गतं लवङ्गिकाबुद्ध्या माधवकण्ठमागतेत्यागतमित्येकम्। चोरिकाविवाहे मालत्या माधवकण्ठे नीतातो गतमथ तन्मुखदर्शनात्स्वकण्ठेर्पितेत्यागतमिति द्वितीयम्। पुनस्तत्र प्रणयवशान्माधवेन मालत्यै

---

३१५. आनंदमंद B. आनंदनानि Bh. N. for आ-श्र.

३१६. च तस्याः for तदा च E.

३१७. स्नेहकराणि A. E. स्नेहाद्वहंति Bh. स्नेहाङ्कानि G. स्नेहोत्कटानि K1. K2. for स्ने-नि; स्नेहाकामिभितमुग्ध for स्ने-ग्ध B.

३१९. A. Bh. E. N. O. om. इति; विधाय E. निदाय K1. for निधाय; मूर्छितः पतति for मूर्छति B.

३२०. वीजयति for वीजयन् B.; वयस्य for सखे B.; K1. om. one समाश्वसिहि.

३२१. निश्चल्योपविश्य B. समाश्वस्य O. for आश्वस्य; Bh. om. आश्वस्य; सखे before मक° B.; वयस्य for मकरन्द Bh. N.; त्वं after पश्यसि B.; K2. om. कुतोपि; Bh. om. अपि; A. E. om. सहसैव.

लतीस्नेहं वहतो बकुलदाम्नो लाभः । तत्कथं नु मन्यसे कुत एतदिति ।

मक० । वयस्य इयमार्या योगीश्वर्यस्य मालत्यभिज्ञान-
३२५ स्योपनेत्री ।

माध० । विलोक्य सकरुणं कृताञ्जलिः । आर्ये प्रसीद कथय जीवति मे प्रियतमा ।

सौदा० । वत्स समाश्वसिहि जीवति सा कल्याणी ।

माधवमकरन्दौ । समुच्छ्वस्य । आर्ये यद्येवं तत्कथय क
३३० एष वृत्तान्त इति ।

दत्तेति गतमिदानीं तु सौदामिन्या मालतीसकाशादानीय दत्तेति त्रीणि गतागतानि । अत एव बहुवचनम् । कीदृशानि । तदृशायामन्तरान्तरा हर्षलाभादानन्दमिश्रितकामतापप्रकाशनानि । दृढानुरागरसयोगीनि । स्नेहस्याकरो येषु तानि । स्नेहं प्रीतिमाकुर्वन्ति व्याकुर्वन्तीति

---

३२२. स्नेहस्य हस्तलाभः A. E. K1. K2. स्नेहस्तलाभः Bh. स्नेहवहलो बकुलमालाधाम्नो लाभः C. स्नेहस्वहस्तस्य लाभः N. for स्ने-भः; तत्कथं मन्ये B. तत्कथं मन्यसे Bh. तत्कथयन्तु मन्यसे K1. तत्कथय त्वमथ मे K2. तत्किं मन्यसे N. for त-से; न for नु A.; O. om. नु; किम् for कुतः A. Bh. N. O.

३२४. B. om. वयस्य; योगे° for योगी° A. B. C. K1. K2.; N. om. अस्य.

३२५. A. om. उप.

३२६. Bh. om. विलोक्य; B. om. सकरुणं; अंजलिं बद्ध्वा for कृ-लिः Bh. N.; N. om. प्रसीद; प्रसीद twice B.; कथं for कथय Bh.

३२७. अपि before जीवति B.; प्रिया for प्रियतमा A. B. E. N.

३२८. सौदामनी for सौदा° K2.; भद्र for वत्स K1. K2.; ननु before समा° K1.; वत्स नन्वाश्वसिह्याश्वसिहि जी° C. वत्स नन्वाश्वसिहि जी° E. O. for व-जी°; O. om. सा; कल्याणिनी for कल्याणी A. Bh. C. E. K1. O.

३२९. माध°। for मा-न्धौ B.; B. om. समुच्छ्वस्य; दृष्ट्वोच्छ्वस्य A. E. समाश्वस्य Bh. for समुच्छ्वस्य; N. om. आर्ये; Bh. N. om. तत्; संवृत्तः Bh. C K1. O. सर्वं नः N. after कथय; कथम् for कः A. E.

३३०. O. om. इति.

सौदा०। पुरा किल करालायतने मालतीमुपहरन्नघोरघण्टः करवालपाणिर्माधवेन व्यापादितः।

माध०। सावेगम्। आर्ये विरम विरम विज्ञातो वृत्तान्तः।

मक०। सखे क इव।

माध०। सखे किमन्यत्। सकामा कपालकुण्डलेति। ३३५

मक०। आर्ये अप्येवम्।

सौदा०। एवं यथा विदितं वत्सेन।

मक०। कष्टं भोः कष्टम्।

खेहाकराणि ॥ कृञो हेत्वित्यादिना टप्रत्ययः ॥ तदा तदा चेति चकारात्कालान्तरपरिग्रहः। आर्या मान्या।

३३५–३४२ सकामा मदपकारेण सिद्धप्रतिज्ञेत्यर्थः। कुमुदेत्यादि। कुमुदसमूहेन यदि शरच्चन्द्रचन्द्रिका सौन्दर्यगुणार्थं संगता प्राप्ता तत्सुकृतं शोभनकरणमस्तु। द्वयोरपि रम्यत्वात्। अयं पुनः कः प्रकारः कुत्सितप्रकारो वा यदकालमेघपङ्क्तिर्व्यर्थयूयुजद्विधो-

---

३३३. सौदामनी for सौदा° K2.; हि before किल B. O.; A. Bh. E. N. om. किल; आहरन् for उपहरन् Bh. N.; नवा after हरन् K1.; कृपाणपाणिरघोरघंटो for अघो-णिर् Bh.

३३४. कृपाण for करवाल N. O.; पाणिना for पाणिर् A. E.

३३५. सोद्वेगं for सावेगम् A.; E. om. सावेगं; अये for आर्ये N.; A. Bh. E. om. one विरम; परिज्ञातो A. ज्ञातो Bh. K1. K2. N. for विज्ञातो; अयं before वृत्तान्तः Bh. K1. K2.

३३४. A. E. om. सखे; कम् for क Bh.

३३५. Bh. om. सखे; सकोपा कराल for सका-ल O.; Bh. om. इति.

३३७. सौदामनी for सौदा° K2.; °था निवेदितं A. E. °दाविदितं K1. °दावेदितं K2. for °था विदितं.

३३८. °भोः कष्टम् B. C. कष्टं भोः Bh. O. कष्टं भोः twice N. for कष्टं भोः कष्टम्.

कुमुदाकरेण शरदिन्दुचन्द्रिका
३४० यदि रामणीयकगुणाय संगता ।
सुकृतं तदस्तु कृतमस्त्वयं विधि-
र्यदकालमेघवितति‍र्व्यधूयुजत् ॥

माध० । हा प्रिये मालति कष्टमतिबीभत्समापन्नासि ।

कथमिव तदाभवस्त्वं
३४५ कमलमुखि कपालकुण्डलाग्रस्ता ।
उत्पातधूमलेखा-
क्रान्तेव कला शशधरस्य ॥

जयामास विच्छेदं कृतवतीत्यर्थः । ध्वनिनात्र कुमुदाकरो माधव-श्चन्द्रिका मालती मेघसंततिः कपालकुण्डलेत्युक्तम् ।

३४३–३४७ अतिबीभत्समिति । उद्वेगहेतुकपालकुण्डला-दर्शनाद्बीभत्सः । यदाह ।

उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति ॥

कथमित्यादि । तत्कवलिता हे पद्ममुखि तदा त्वमपि कथमभवः । भयात्कथं त्वमासीः किं त्वयोक्तं कस्ते त्राताभूदित्यादिज्ञापनाय कथमिति सामान्यनिर्देशः । केतुकवलिता चन्द्रकलेव । एतदुपमया बीभत्सजविषादसंभवा ग्लानिरप्युक्ता । यदाह ।

---

३३९. कुसुमा° for कुमुदा° Bh.
३४०. गुणेन for गुणाय N.; य सागता for °य-ता Bh.
३४१. सुकृते यद् for सु-तद् C.
३४२. °तिर्व्यधूयुजत् B. °र्ति त्वयूयुजत् N. for ति-त्.
३४३. B. om. हा; B. O. om. कष्टमति; कथम् for कष्टम् K1. K2.
३४४. अपि for इव B.; तदा भवेस्त्वं for त-स्त्वं C.
३४६. उत्थान for उत्पात Bh.; रेखा for लेखा N.
३४७. भ्रांतेव for क्रांतेव, B.

भगवति कपालकुण्डले
निर्माणमेव हि तदादरलालनीयं
मा पूतनात्वमुपगाः शिवतातिरेधि । ३५०
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्नमुसलैरवताडनानि ॥

अपस्मारस्तथोन्मादो विषादो मद एव च ।
मृत्युर्व्याधिर्भयं चैव भावा बीभत्ससंभवाः ॥

३४८-३५२ स्त्रीबालं नैव घातयेदिति निजधर्मं जानत्या त्वया सा घातितेति सोच्छ्वासमाह भगवति इति । निर्माणमित्यादि । तन्निर्माणं मालतीरूपादिकमेव तदादरेण रक्षणीयं भवति । रम्यत्वादेव । पूतनात्वं राक्षसीत्वं तन्नाशेन मोपगा मा गमिष्यसि । यद्वा । मांसं मे ततो भक्षयितव्यं किमिति चिन्तकत्वं पूतनात्वम् । पूतनत्वमिति पाठे राक्षसत्वमित्यर्थः ॥ पूतना राक्षसीभेदे हरीतक्यां च पूतनेति विश्वः ॥ शिवतातिः कल्याणकर्त्र्यधि भव । शिव इत्यबोधीरिति पाठे तन्निर्माणं शिवे कल्याणनिमित्तमित्यज्ञासीः । शिवतामुपैतीति पाठेतन्निर्माणम् ॥ कर्तृ ॥ शिवतां कल्याणत्वं गच्छति ।

---

३४८. भवति for भगवति K1. O. (corrected into भग°).

३४९. तदा तव माननीयं A. E. तदा तव लालनीयं N. for त-यं.

३५०. मां for मा K1.; °तनत्व° for °तनात्व° Bh. G. K1. K2.; °मुदगाः शिवतातिरेव for °मु-धि N.; शिवतातिरोधि A. C. E. शिवतातिवेति Bh.; शिव इत्यबोधीः and शिवतामुपैति noticed by Com. for शि-धि.

३५१. °र्गिणी for °र्गिकी Bh.

३५२. मुशलै° for मुसलै° O.; चरणैरवताडनानि A. K1. K2. मुशलैश्च ताडनानि Bh. चरणैरवताडितानि C. for मु-नि.

सौदा० । वत्स अलमावेगेन ।

अकरिष्यदसौ पापमतिनिष्करुणैव सा ।
३५५ नाभविष्यमहं तत्र यदि तत्परिपन्थिनी ॥

उभौ । प्रणम्य । अतिप्रसन्नमार्यापादैः । तत्कथय का पुनस्त्वमस्माकमेवंविधा बन्धुः ।

सौदा० । ज्ञास्यथः खल्वेतत् । उत्थाय । इयमहमिदानीं

अतः पालनमस्य । भद्रवस्तुपुरस्कारः स्वभावादेवेत्याह । मनोहरस्य ख्यातस्य सुगन्धस्य वा पुष्पस्य मस्तके धृतिः स्वभावसिद्धा । न पादैः पीडनानि स्वभावसिद्धानीत्यर्थः ।

३५४-३५६ अकरिष्यदित्यादि । असौ कपालकुण्डला पापं तद्वधरूपमकरिष्यदेव । अतिनिष्करुणा यतः सा । यदि तत्र स्थाने वधे वा तस्या विरोधिनी नाहमभविष्यम् ॥ क्रियातिपत्तौ लृङ् ॥ बुद्धिप्रत्यक्षतयासाविति । अतिप्रसन्नं प्रसादः कृतः ।

३५८-३६० ज्ञास्यथः । युवामित्यर्थात् । गुर्वित्यादि । गुरुचर्या गुरुसेवा गुर्वी चर्या विशिष्टमनुष्ठानम् । तपश्चान्द्रायणादि । तन्त्रं मण्डलवर्तनादि । मन्त्रस्तारादिप्रभृतिदेवीनां तन्त्रस्य वागमस्य वा

---

३५३. सौदामनी for सौदा° K2.; N. O. om. वत्स.

३५४. यतो B. इति K1. K2. for अति; °णैव for °णैव K1.

३५५. मा for ना° A.

३५६. माधवमकरन्दौ for उभौ A. E.; यद् before अति N.; यदि for अति Bh.; चरणैः for पादैः A. E.; Bh. om. तत् ; कथं पुनस्त्वमेवास्माकं बन्धुः for का-न्धु A.; Bh. om. पुनः.

३५७. अकारण B. एव Bh. एवं विधो K2. एक O. for एवं विधा; N. om. विधा.

३५८. सौदामनी for सौदा° K2.; ज्ञास्यथ Bh. C. E. K1. K2. ज्ञास्यते N. for ज्ञास्यथः; स्वल्पेनैतत् for खल्वेतत् K1.; इदानीमहं for अह-नीं Bh. K1. K2.

गुरुचर्यातपस्तन्त्रमन्त्रयोगाभियोगजाम् ।
इमामाक्षेपिणीं सिद्धिमातनोमि शिवाय वः ॥ ३६०

इति समाधवा निष्क्रान्ता ।

मक० । आश्चर्यमाश्चर्यम् ।

व्यतिकर इव भीमस्तामसो वैद्युतश्च
क्षणमुपहतचक्षुर्वृत्तिरुद्भूय शान्तः ।
विलोक्य सभयम् । ३६५

कथमिह न वयस्यस्तत्किमेतत् । विचिन्त्य । किमन्य-
त्प्रभवति हि महिम्ना स्वेन योगीश्वरीयम् ॥

मन्त्रः । योगः समाधिः । एष्वभियोगादभ्यासाज्जातामिमामाकर्षणीं सिद्धिं युष्माकं कल्याणाय विस्तारयामि ।

३६३–३६८ व्यतिकर इत्यादि । मालतीवार्तायां अप्यज्ञानादयं तामसोन्धकारजः । अत एव भीमः । तज्जीवमज्ञानाद्वैद्युतश्चायं विद्युत्संबन्धी । व्यतिकरः संपर्कः । अत एवानन्दाश्रुसंभारेणोपहतनेत्रवृत्तिः । कीदृशः । क्षणमुद्भूय शान्तः । अत एव विद्युद्विद्योतवितर्कः । कथमिहस्थाने वयस्यो माधवोपि नास्ति ।

---

३५९. चर्याभियोगतः C. सिद्धत्र्यभियोगजां N. for योगा-म्.

३६०. °माक्षेपर्णी for °माक्षेपिणीं Bh.; °माक्षेपणीं विद्यामातनोमि A. E. °माक्षेपिणीं विद्यां विदधामि B. °माकर्षिणीं सिद्धिमानतोमि N. for °माक्षे-मि.

३६१. N. O. om. इति; सौदामिनी after समाधवा N.

३६२. Bh. K1. N. om. one आश्चर्यम्.

३६४. °मुपगत for मुपहत N.

३६५. K2. om. विलोक्य सभयम्.

३६६. इव for इह Bh.; एतद्विचित्रम् । विचिंत्य । for एतत् ।—न्यत् B.; K2. om. विचिन्त्य.

३६७. विभ° for प्रभ° O.; किमन्यत्स्वेन योगे° for म-गी° E.; योगे° for योगी° A. B. K1. K2.

सवितर्कम् । किमयमर्थोनर्थ इति संप्रति प्रमुग्धोस्मि ।
अपि च । अस्तोकविस्मयमपस्मृतपूर्ववृत्त-
मुद्भूतनूतनभयज्वरजर्जरं नः ।
एकक्षणत्रुटितसंघटितप्रमोह-
मानन्दशोकशबलत्वमुपैति चेतः ॥

तत्किमिदं क्व गतः केन वा स नीत इति विचिन्त्येत्यर्थः। निर्णयमाह । अन्यत्किम् । यत इयं योगीश्वरी निजतपःप्रभावेण प्रभवति । अनया नीत इति भावः । संशय्याह किमयमिति । सौदामिनीनयनेर्थः प्रयोजनं कपालकुण्डलानयनेनर्थ इति भावः ।

३६९-३७४ अस्तोकेत्यादि । अस्माकं चित्तम् ॥ कर्तृ ॥ हर्षशोकाभ्यां शबलत्वं मिश्रत्वं गच्छति । कीदृशम् । अनल्पाश्चर्यम् । एकदैव नानारससंभवात् । अपस्मृतं विस्मृतं पूर्ववृत्तं मालतीहरणरूपं यत्र । अत एवानन्दः । उद्भूतं नवं भयं माधवापकारशङ्काकृतं तेन ज्वरेण जीर्णम् । अत एव शोकः । यद्वा । माधवानवलोकनेनोद्भूतनवशङ्काज्वरजर्जरतया शोकः । एकक्षण एव त्रुटितो घटितश्च प्रमोहो यत्र तत् । मालतीलाभसंभावनया त्रुटितो माधवापकारसंभावनया घटित इति भावः । अत एवात्याश्चर्यम् । स्तोकशब्दोल्पपर्यायः ।

---

३६८. तत् before किम् B.; एवम् for अयम् Bh.; A. E. om. अर्थः; संप्रमुग्धोस्मि for सं-स्मि K1. K2. O.; C. om. संप्रति; मुग्धोस्मि A. मूढोस्मि Bh. N. संमुग्धोस्मि C. for प्र-स्मि.

३६९. किं for अपि N.; विचिन्त्य after च N.; °मुप° Bh. °भावि° N. for °भव°.

३७०. भयं Bh. for भय; जर्झरं for जर्जरं N.; °रांतः for °रं नः Bh.

३७१. प्रमोद B. प्रबोध N. for प्रमोह.

३७२. सव° for शब° Bh.

तदत्र कान्तारगहने सहास्मद्वर्गेण प्रविष्टां भगवतीमन्विष्य तस्या वृत्तान्तमेनं कथयामि। इति निष्क्रान्तः।

॥ मालत्यन्वेषणं नाम नवमोऽङ्कः ॥

अस्मद्वर्गेण मदयन्तिकालवङ्गिकाभ्याम्। विप्रनष्टामिति कस्मिंश्चित्पुस्तके पाठो दृश्यते तत्रादृश्यमानामित्यर्थः। भगवतीं कामन्दकीम्। अनेनापि माङ्गावतारस्यापि सूचनादङ्कावतारोऽयम्।

प्रासूत यं रत्नधरोतिविद्यो विद्योतिविद्या दमयन्तिकापि।
जगद्धरं तत्कृतटिप्पणेङ्गोगलन्नवीने नवमोनवद्यः ॥

॥ इति नवमोऽङ्कः ॥

---

३७३. एव after अत्र A. E.; विप्रकृष्टं Bh. विप्रनष्टां O. (corrected into प्रविष्टां) noticed by Com. for प्रविष्टां; अनुसृत्य Bh. उपसृत्य N. उपेत्य O. for अन्विष्य.

३७४. मालतीमाधव B. तयोः K1. for तस्याः; Bh. N om. तस्याः; एतत् Bh. एनां K1. for एनं; कथयिष्यामि A. E. निवेदयामि B. for कथयामि; °मेति for °मि इति K1.; निष्क्रान्ताः सर्वे for निष्क्रान्तः Bh. C.; सर्वे च B. इति निष्क्रान्ताः सर्वे O. after निष्क्रान्तः

३७५. A. Bh. C. E. N. O. om. मा—नाम; इति K1. श्रीमालतीमाधवे K2. before मालत्यन्वेषणं; सौदामिनीदर्शनो for मा-र्णं B. इति मालतीमाधवे before नव° A; समाप्तिमगात् after अङ्कः C.

॥ दशमोऽङ्कः ॥

ततः प्रविशति कामन्दकी लवङ्गिका मदयन्तिका च ।

काम[1] । सकरुणं सास्रम् । हा वत्से मालति मदङ्कालंकारिणि क्वासि देहि मे प्रतिवचनम् ।

आ जन्मनः प्रतिमुहूर्तविशेषरम्या-
ण्याचेष्टितानि तव संप्रति तानि तानि ।
चाटूनि चारुमधुराणि च संस्मृतानि
देहं दहन्ति हृदयं च विदारयंति ॥

१–७ सहास्मद्गर्भेणेत्यव्यवधान एव सूचनात्तत्प्रवेशमाह । तत इति । मालतीविश्लेषं श्रुत्वा विलपति हेत्यादि । आ जन्मन इत्यादि । जन्मन आरभ्य प्रतिक्षणाधिक्यमनोज्ञानि तव तानि तानि पूर्वानुभूतान्याचेष्टितानि विनयादीनि संस्मृतानि सन्ति मेऽङ्गं दहन्ति चित्तं च दारयन्ति । अनेन बाह्या मानसी च पीडोक्ता । तथा चाटूनि वाक्कौशलानि स्मृतानि दाहादिकं कुर्वन्ति । विनयादीनामद्वेषकारितया

---

१. °शंति कामंदकीमदयंतिकालवंगिकाः for °श-च B.; मदयंतिका लवंगिका च for ल-च Bh. O.

२. A. E. om. सकरुणं; N. om. सक-स्रम्; Bh. C. K1. K2. om. सास्रम्; हे for हा Bh.; हा before मद° N.; मदलंकारकारिणि A. B. C. K1. मदंकालंकारकारिणी Bh. मदंग (marg. क.) लालिते O. for म-णि.

३. क्वापि for क्वासि K1.; N. om. प्रति.

४. आजन्म यानि सर्विशेषमुहूर्तरम्या° for आ-म्या° Bh.; प्रभृति यानि विशेष B. प्रतिविशेषमुहूर्त (corrected into प्रभृति यानि विशेष) O. for प्र-ष.

५. वचनानि च चारुनेत्रे for तव संप्रति तानि तानि E.

६. चाति for चाट N.

अपि च । पुत्रि

अनियतरुदितस्मितं विराज-
त्कतिपयकोमलदन्तकुड्मलाग्रम् । १०
वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमुग्धजल्पितं ते ॥

इतरे । सास्रम् । हा पिअसहि सुप्पसण्णमुहअन्दसुन्दरि कहिं गदासि को वा सिरीसकुसुमसुउमारस्स दे सरीरस्स देव्वदु-

---

रम्यत्वम् । चाटूनि कीदृशानि । चारूणि शोभावन्ति मधुराण्यनुल्वणानि च । यदाह ।

सर्वावस्थाविशेषेषु दीप्तेषु ललितेषु च ।
अनुल्वणत्वं चेष्टानां माधुर्यमिति संज्ञितम् ॥

९–१२ अनियतेत्यादि । बालायास्तवास्यपद्मं स्मरामि । कीदृशम् । अस्थिरे क्रन्दनहास्ये यत्र तत् । शोभमानकिंचिन्मृदुदशनकलिकाग्रम् । सम्यक्स्थानप्रयत्नाभावात्स्खलत् । तत्त्वहान्यासमञ्जसं संख्यातिक्रमादज्ञानाद्वासमञ्जसम् । मुग्धमर्थाभावात् । जल्पितं मन्दोक्तिर्यत्र तत् । सर्वत्र शैशवमेव हेतुः ॥ कमलकमित्यत्राल्पार्थे कन् ॥ सम्यगञ्जसा तत्त्वेन वर्तत इति समञ्जसमिति ॥

---

८. आकाशे before अपि च A. E.; C. N. om. पुत्रि.

९. रुचिर for रुदित N.

१०. कुट्मल° for कुड्मला° A. K1. K2. N.

१२. मञ्जु जल्पितं तत् A. मुख्यजल्पितं ते Bh. मंजु गुंजितं ते E. for मु-ते; च for ते O

१३. मैदयन्तिकालवङ्किके A. E. K2. इतरा: K1. N. for इतरे; Bh. C. K1. N. om. सास्रम्; आकाशे after सास्रम् A. E. K2.; सहि सुहि for हा-हि Bh.; प्रिय for पिअ O.; °सण for °सण्ण Bh.; चन्द for अन्द A. K2.

१४. Bh. N. om. गदा; को दे सरीरअस्स Bh. को वा दे सरीरअणस्स विहिदुव्विलास N. for को-णअ; सुकु° for सुउ° C. K1. K2.; C. om. सरीरस्स; °रसरीरस्स दे K1 °रस्स सरीरस्स दे K2. O. for °रस्स-स्स; °रीरस्साअं for °रीरस्स A.; दुइ C. इत्ति E O. उव (?explained as झागेति) K1. before देव्व; दिव्व for देव्व K2.

१५ ध्विणअपरिणामो एक्कलिआए उवणदो। महाभाअ माहव उवत्थिदत्थमिदमहूसओ दे जीअलोओ संवुत्तो। (क)

काम०। सविशेषखेदम्। हा वत्सौ।

अभिनवरागरसोयं भवतोः कृतकौतुकः परिष्वङ्गः।
लवलीलवङ्गयोरिव नियतिमहावात्यया भिहतः॥

(क) हा प्रियसखि सुप्रसन्नमुखचन्द्रसुन्दरि क्व गतासि को वा शिरीषकुसुमसुकुमारस्य ते शरीरस्य दैवदुर्विनयपरिणाम एकाकिन्या उपनतः। महाभाग माधव उपस्थितास्तमितमहोत्सवस्ते जीवलोकः संवृत्तः।

अञ्जसा तत्त्वतूर्णयोरिति विश्वः॥ मञ्जु जल्पितमिति पाठे मञ्जु मनोहरम्।

१५–२० अत्रैकाकिन्या एकमात्रस्वरूपायाः। आदावुपस्थितोथास्तमितो महोत्सवो यत्र सः। अभिनवेत्यादि। अभिनवे रागेनुरागे रस इच्छा यत्र। यद्वा। अभिनवरागो नूतनासक्ती रसः शृङ्गारो यत्र। कृतं कौतुकं हर्षो नर्मोत्सवो वा यत्र। सोयं भवतोर्युवयोः परिष्वङ्गः आलिङ्गनं नियतिर्दैवं सैव महावात्या तयाभिहतः। लवली लताभेदः। लवङ्गो वृक्षभेदः। तयोः परिष्वङ्गः संपर्क

१५. °ध्विलास for °ध्विणअ O.; अक्केलिआए A. अक्केलिआए E. एक्कलाए B. एक्कलिओए K1. for एक्कलिआए; गदो for णदो A. Bh.; हा before महा Bh. C. K1. K2. N.; °णुभाअ B. भाग E. °णुभाय O. for भाअ; माघ° for माह° O.; उप for उव A. E.; द्विअ N. द्विद O. for त्थिद.

१६. °त्थमिद Bh. त्थिमिद C. °त्तामिद K2. °थ्थमिअ N. स (marg. अस्त) मिद O. for त्थमिद; °सवो for °सओ Bh. K1. K2. N. O.; °वो जीवंतो सं° for °ओसं Bh.; जीव for जीअ N. O.

१७. B. Bh. om. सविशेषखेदम्; वत्से for वत्सौ K1.

१८. रतोयं for रसोयं B.; K1. om. °यं; भवता for भवतोः Bh.

१९. नियत for नियति Bh.; विहत; A. E. N. °भिहितः Bh. निहतः O. for °भिहतः.

लव०। सोद्वेगम्। हदास वज्जमअ सव्वहा णिसंसंसि २० हिअअ। (क) इति हृदयमाहत्य पतति।

मद०। सहि लवङ्गिए णं भणामि क्खणमेत्तअं वि दाव समस्सस) (ख)

(क) हताश वज्रमय सर्वथा नृशंसमसि हृदय।

(ख) सखि लवङ्गिके ननु भणामि क्षणमात्रमपि तावत्समाश्वसिहि।

इव। अभिनवौ लौहित्यरसौ यत्र सः। रस आर्द्रता। कृतं कौतुकं कुतूहलं द्रष्टृणां येन सः॥ रागोनुरागे लौहित्य इति विश्वः। शृङ्गारादौ द्रवे चापीच्छायामप्ययं रस इति धरणिः। कौतुकं त्वभिलाषे स्यादुत्सवे नर्महर्षयोः। कुतूहलेपि तत्प्रोक्तमिति मेदिनीकरः॥ तदिहाचेतनोपमया तयोरपि बालयोर्वृक्षविवाह इव मया विवाहोप्यकारि दैवेन स न सोढ इत्युक्तम्। देशान्तरनयनान्नियतेर्घात्यया सह रूपकम्। अत्र नृशसं नाशकम्।

---

२०. वाल for लव° Bh.; सावेगं for सोद्वेगम् B. Bh. N. O.; हा before हदास B. O.; °मय for °मअ Bh.; हिअअ before सव्व° instead of after °सि Bh.; सव्वधा for सव्वहा A. E. O.; दाणीं before णिसं° K1. K2.; णिसंसोसि A. Bh. C. K1. K2. णिरासोसि E. निसंसोसि O. for णिसंसंसि.

२१. हदे before हिअ° B. K1. K2.; हिदअ for हिअअ K1.; O. om. हिअअ; O. om. इति.

२२. सास्सं after मद° Bh. C. K1. K2. O.; Bh. N. om. सहि; °ङ्गिके for ङ्गिए A.; खण for क्खण Bh. K1.; °त्तकम्वि दा° A. E. °तं किं पि दा° B. °त्तकन्दा° K1. °त्तकम्पि दा° K2. O. for °त्तअं वि दा°; पि for वि. Bh.

२३. समस्स E. समास्सास K2. समस्सासिहि N. for समस्सस.

लव० । सहि किं करेमि दिढवज्जलेवपडिवद्धणिच्चलं विअ
२५ जीविदं ण मं परिच्चअदि (क)

काम० । वत्से मालति जन्मनः प्रभृति वल्लभा ते लवङ्गिका ।
तत्किमेनामुज्जिहानजीवितां वराकीं नानुकम्पसे । इयं हि ।

उज्ज्वलालोकया स्निग्धा त्वया त्यक्ता न राजते ।
मलीमसमुखी वर्तिः प्रदीपशिखया यथा ॥

(क) सखि किं करोमि दृढवज्रलेपप्रतिबद्धनिश्चलमिव जीवितं न मां परित्यजति ।

---

२४ अत्र प्रतिबद्धं घटितमत एव निश्चलम् ।

२७–३१ उज्जिहानमूर्ध्वं गतम् । कण्ठोपगतमिति यावत् । उज्ज्वलेत्यादि लवङ्गिकामुद्दिश्य । त्वया त्यक्तेयं न शोभते प्रदीपशिखया त्यक्ता वर्तिरिव दशेव । उज्ज्वल आलोको दर्शनं यस्यास्तया । शिखापक्ष आलोक उद्द्योतः । स्निग्धा प्रीता । स्नेहवती च तैलादियोगात् । ममीमसं म्लानं मुखमाननं यस्याः सा । मलीमसं दग्धतया श्यामं मुखमग्रं यस्याः सा च । प्रगुणीकृता-

---

२४. मदअंतिए for सहि Bh. N.; करोमि for करेमि A. Bh. K1. N. O.; दढ for दिढ C. K2.; लेप for लेव Bh. E.; पडिबद्धं B. O. पडिबंध N. णिबद्ध K1. for पडिबद्ध; B. O. om. विअ; मम A. E. इव Bh. व C. K1. for विअ.

२५. विअं for °विदं N.; मण for णमं Bh.; N. om. मं; °च्चअइ Bh. K2. °च्चअदि K1. for °च्चअदि.

२६. आ जन्मनः प्रभृति वल्लभतमा for ज-भा B.; जन्मतः for जन्मनः A. Bh.; ते वल्लभतरा for वल्लभा ते O. वल्लभतमा Bh. दुर्लभतरा N. for वल्लभा.

२७. B. N. om. एनां. एतां for एनां Bh. C. E.; अनुमन्यसे for अनुकम्पसे C.

कथं च कल्याणि कामन्दकीं परित्यजसि । नन्वकरुणे म- १०
दीयचीवरोष्मणैव ते प्रगुणीकृतान्यङ्गानि ।

स्तन्यत्यागात्प्रभृति सुमुखी दन्तपाञ्चालिकेव
क्रीडायोगं तदनु विनयं प्रापिता वर्धिता च ।
लोकश्रेष्ठे गुणवति वरे स्थापिता त्वं मयैव
स्नेहो मातुर्मयि समधिकस्तेन युक्तस्तवापि ॥ १५

न्यूजुकृतानि । उत्पत्त्यनन्तरं नाडीनां शुद्धद्रव्येणर्जुकरणात् । यद्वा । प्रगुणता पुष्टिः ।

३२–३५ स्तन्येत्यादि । तेन हेतुना मातुः सकाशादधिकः स्नेहोयं मयि तव युक्तः । यद्वा । तेन हेतुनायं वियोगस्तव युक्त इति सोल्लुण्ठम् । यतः स्तनपानत्यागादारभ्य क्रीडायोगं खेलम् । यद्वा । क्रीडा कला योगो विद्याप्रयोगस्तं प्रापिता । ततः पश्चाद्विनयमनौद्धत्यं प्रापिता । वृद्धिं प्रापिता च । दन्तपाञ्चालिकेव दन्तमयकृत्रिमपुत्रिकेव । जनेषु श्रेष्ठे शोभादिगुणयुक्ते जामातरि त्वं स्थिरीकृता । परिणयात् । मयैव न तु पित्रादिनेत्यर्थः । बाल्य एव कान्तिमत्त्वात्सुमुखीत्युक्तम् ॥ पाञ्चालिका पुत्रिकायामिति विश्वः ॥ पाञ्चालिकापि क्रीडादिकं कार्यत इति प्रसिद्धमेव । विद्याभ्यासो बाल्य एव स्त्रीणाम् । यदाह ।

बाल्येधीयीत विद्यां स्त्री कामशास्त्रादिकं पुनः ॥

---

१०. तत् before कथं Bh.; A. E. om. च; कल्याणिनि for कल्याणि Bh.; जहासि A. E. त्यजसि B. N. for परित्यजसि; नान्य° for नन्व° K1.

११. चीवरांचलो° Bh. चीरो° E. शरीरो° K2. चीरांचलो° N. for चीवरो°; °ष्मणैव for ष्मणैव Bh. अंगानि (corrected into अंगकानि) O.

१२. सुखिनी B. सुमुखे K1. for सुमुखी; पंचा° for पाञ्चा° Bh. K2.

१५. मम for मयि B. Bh.; तथा for तव Bh. E.

सवैक्लव्यम् । चन्द्रमुखि संप्रति निराशास्मि ।

अकारणस्मेरमनोहराननः
शिखाललाटार्पितगौरसर्षपः ।
तवाङ्कशायी परिवृत्तभाग्यया
मया न दृष्टस्तनयः स्तनंधयः ।

लव०। भअवदि पसीद णीसहम्हि संपदं जीविदुव्वहणेण ।

(क) भगवति प्रसीद* निःसहास्मि सांप्रतं जीवितोद्वहनेन ।

पुरुषगुणा अपि भरते ।

शोभा विलासो माधुर्यं स्थैर्यं गाम्भीर्यमेव च ।
ललितौदार्यतेजांसि पौरुषेया गुणा अपि ॥

३६–४० करुणस्नेहाद्विक्लवता । अकारणेत्यादि । विगत भाग्यया मया तव पुत्रो न दृष्टः । कीदृशः । अकारणेनालक्षितहेतुतया स्मेरमीषद्धसनं मनोज्ञं मुखं यस्य सः । शिखायां ललाटे च दत्तश्वेतसर्षपः । एतत्तु रक्षायै । क्रोडे सुप्तः । स्तनपायी च ।

४१–४६ अत्र जीवितेति । तां विना जीवनमनर्हमिति भावः ।

---

३६. हा before चन्द्र Bh. N.; °शासि for °शास्मि. E.

३७. स्नेह for स्मेर K1.; रमा° for हरा° O.

३८. शिला for शिखा C.; शेखरः for सर्षपः G.

३९. अङ्कगामी A. अंगशायी Bh. अंगगामी E.

४१. मद° for लव° N.; प्यसीद for पसीद O.; ण सहामि B. N. ण सक्कामि Bh. असमत्थामि C. असमत्थामि K1. K2. ण समत्थामि O. for णी-म्हि; जीवणुव्वहणे A. जीवितुव्वहाणसहासेण C. जीवणुव्वहणस्स E. जीवदुव्वहणसाहसेण K1. जीविदुव्वहणसाहसेण K2. O. जीविदं दुव्वहणं N. for जी-ण; °णेन for °णेण Bh.

* प्रसीद twice Com.

साहं इमादो गिरिसिहरादो अत्ताणअं अवधुणिअ णिव्वुदा भविस्सं। तहा मे भअवदी आसिसं करेदु जेण जम्मन्तरे वि पिअसहिं पेक्खिस्सं। (क)

काम०। ननु लवङ्गिके कामन्दक्यपि नातः परं वत्साविः ४५
योगेन जीविष्यति समश्वायमुत्कण्ठावेग आवयोः।

---

* साहमस्माद्गिरिशिखरादात्मानमवधुत्य† निर्वृता भविष्यामि। तथा मे भगवत्याशिषं‡ करोतु येन§ जन्मान्तरेऽपि प्रियसखीं प्रेक्षिष्ये।

निर्वृतेति। मरणे तद्वियोगदुःखापनयादिति भावः। उत्कण्ठेति। जन्मान्तरे तां द्रक्ष्यामीत्युत्कण्ठा ममापीत्यर्थः। तत्कथं मयापि स्वतोसिद्धतया त्वय्याशीर्दातव्येति भावः।

---

४२. ता before साहं K2.; ता for साहं A. K1.; गिरिवरादो Bh. E. गिरिशिखरादो C. गिरिप्यवादादो N. गिरिकंदरादो O. for गि-दो; अत्ताणं for अत्ताणअं B. Bh. N.; ववधूणिअ Bh. अवधूणिअ K1. K2. N. for अवधुणिअ; णिवुत्ता K2. णिवुदा O. for णिव्वुदा.

४३. ता before तहा Bh. C. K1. O.; N. om. तहा-स्सं and has instead प्रपातादात्मानं क्षेत्युकामा; तह Bh. तथा E. K2. for तहा; अ for मे K2.; आसिप्पसादं A. आसीसं B. O. आसिसं C. E. for आसिसं; पसादीकरेदु for करेदु B. K2.

४४. °रेण for °रे O.; पि E. दाव O. for वि; दाव before पिअ Bh. C. E. K1. K2.; सहीं for सहिं A. B. C. N.; पक्खि°K2. पिक्ख° O. for पेक्खि°.

४५. N. om. काम°। ननु—ठास्यिति; B. om. ननु; °मन्दक्यापि ना° A. E. K1. K2. O. मंदक्या ना° Bh. for °मन्दक्यपि ना°; Bh. om. परं.

४६. जीवितव्यं for जी-ति A. Bh. E. K1. K2. O.; O. om. सम-किं च (l. 47); समानश्चायमावयोरुत्कंठाप्रसंगः B. समश्चावयोरुत्कंठायोगः Bh. समानश्चायमुत्कण्ठायोग आवयोः K1. K2.; °ण्ठावियोगः for °ण्ठावेगः C.

* तदस्माद् for साहमस्माद् Com. † पातयित्वा for अवधुत्य Com. ‡ आशीः प्रसादं for आशिषं Com. § यथा for येन Com.

किं च। संगमः कर्मणां भेदाद्यदि न स्यान्न नाम सः।
प्राणानां तु परित्यागे संतापोपशमः फलम्॥

लव०। जहा तुम्हे आणवेध। (क) उत्तिष्ठति।

५० काम०। सदयं वीक्ष्य। वत्से मदयन्तिके।

(क) यथायूयमाज्ञापयथ।

४७–४८ संगम इत्यादि। कर्मणां वैचित्र्यादस्माकं मालत्या सह संगमो न स्यात्। अनागमो निर्युक्तिको यतः सः। मालत्या मम च कर्मणां साम्ये मानाभावाज्जन्मान्तरे संगमो निर्युक्तिक इति भावः। तर्हि प्राणत्यागेनालमत आह। प्राणत्यागः पुनस्तापशान्तिफलकः। तथा च तदर्थं स क्रियत इति भावः। संगमाभावे तु मानं।

मृतोपि मानुषः शक्तो नानुगन्तुं मृतं जनम्।
जायावर्जं च सर्वस्य याम्यः पन्था विभिद्यते॥

इति स्मृतिः।

---

४७. ममापि खलु for किं च K2.; योगाभाहि सः स्यादनागमः for मे–सः B.; न स्यादनागमः A. न स्यान्न सोस्तु नः Bh. न स्यात्ततोस्तु मा C. न स्यात्ततोस्तु नः K1. K2. हि स्यान्न नाम तत् O. for न स्यान्न नाम सः; तत् for सः E.; text with G.

४८. सन्तापोपरमः A. E. संगतापशमः C. for सं–मः.

४९. जह Bh. जधा O. for जहा; इत्युत्तिष्ठति B. उत्तिष्ठति Bh. for उ-ति; E. om. उत्तिष्ठति.

५०. मदयंतिकां for सदयं B.; मदयंतिकां before वीक्ष्य O.; °द्दन्ति° for °दयन्ति° K1.

मद०। किं आणवेध। अग्गेसरी होहि त्ति। अवहिदम्हि।(क)

लव०। सहि पसीद विरम एत्तो अत्तणो वावादणादो। मा एदं जणं विसुमरेसि। (ख)

मद०। सकोपमिव। अवेहि णम्हि दे वसंगदा। (ग)

काम०। हन्त निश्चितं वराक्या। ५५

(क) किमाज्ञापयथ। अग्रेसरी भवेति। *अवहितास्मि।

(ख) सखि प्रसीद† विरमैतस्मादात्मनो व्यापादनात्। ‡मैतं जनं विस्मरसि।

(ग) अपेहि नास्मि ते वशंगता§।

५१–५८ भाविवाक्यमुन्नीयाह किमिति। अत्राग्रेसरी मरणे प्रथमा। अवहिता मर्तुम्। [लव० वा०] अत्राहं प्रिय इत्याशयः। अत्र वशंवदायत्ता। ते वचो न करिष्यामीत्यर्थः। निश्चितं निश्चयः कृतः। स्वगतं गुरुसमीपे प्रियस्मरणस्यायुक्तत्वात्। अत्र जन्मान्तरेप्ययं

---

५१. E. divides the speech as follows :—मद°। किं आणवेध। काम°। अग्रेसरी भवेति। मद°। अवहिदम्हि।; Bh. om. किं; अग्रसरी होहित्ति Bh. अग्गोहित्ति (Sk. rend. अग्रेसरी भव इति) K1. अग्गे होत्ति (Sk. rend. अग्रेसरी भवेति) K2. अग्गे सकामा होमि त्ति N. for अ-त्ति; होदुत्ति ता जाव अव° for हो-व° A.; भोदु for होहि O.; ता K1. ता इयम् O. before अव;° Bh. om. अवहिदम्हि: °ताम्हि K1. °दाम्मि K2. for °दम्हि.

५२. Bh. om. सहि; प्प° for प° A. O. विरम twice Bh. N.; N. om. एत्तो; एतो for एत्तो C. E.; एत्तो अ° torn off in K2.; अत्ताणअ B. अत्ताण Bh. O. for अत्तणो; अणअप्पवाहादो N. पव्वाहा (वादण added in margin) दो O. for वावादणादो

५३. °रेदि Bh. °रेसु C. for °रेसि.

५४. B. K2. om. इव; अपे° for अवे° N.; णहि Bh. ण अम्हि K1. K2. for णम्हि; दे णात्थि for णम्हि दे E.; वदा for गदा A. E. K1. O.

५५. स्वगतं after काम° A. E.; आत्मपथे C. आत्मवधे K1. K2. before निश्चितं; विनि° for नि° B. O.; व्यवसितं वं° Bh. व्यवसितं किं वं° N. for नि-वं°.

* इयमवं° for अवं° Com. † प्रसीद twice Com. ‡ मा खल्वेनं जनं विस्मरिष्यसि Com. § वशंवदा Com.

मद० । स्वगतम् । णाह मअरन्द णमो णमो दे । (क)

लव० । भअवदि अअं जेव्व मधुमदीसोत्तसंदाणिदपवित्तमेहलो महीहरविडङ्को । (ख)

काम० । कृतमिदानीं प्रस्तुतान्तरायेण । सर्वाः पतितुमिच्छन्ति ।

६० नेपथ्ये । आश्चर्यमाश्चर्यम् ।

व्यतिकर इव भीमस्तामसो वैद्युतश्च
क्षणमुपहतचक्षुर्वृत्तिरुद्भूय शान्तः ।

काम० । विलोक्य । साद्भुतहर्षम् ।

(क) नाथ मकरंद नमो नमस्ते ।

(ख) भगवति अयमेव मधुमतीस्रोतःसंदानितपवित्रमेखलो महीधरविटङ्कः ।

प्रियः स्यादिति तत्कालेस्य स्मरणमिति भावः । अत्र मधुमती नदी । संदानितं बद्धम् । विटङ्को निर्गतोन्नतप्रदेशः ॥ विटङ्क उन्नते देश इति रत्नकोशः ॥

---

५६. णाध for णाह K1.; नाध मअरंदअ B. णाध मयरंद twice O. for णा-न्द; णमो दे twice for णमो णमोदे Bh. K1. N.

५७. °दिए स एव्व महुमदीसोअसंदानिअ for °दि-णिद Bh.; एव्व for जेव्व N.; महु for मधु B. °मती for °मदी O.; सोतः for सो-त्त K2.; संवाद for संदाणिद O.; °णिअ for °णिद A. E.

५८. महि for मही K1.; °धर Bh. °यर O.for °हर; विटङ्को A. विडओ B. विटंओ E. for विडङ्को.

५९. सुकृत° for कृत° C.; इति before सर्वाः B.; पतितुमिच्छन्ति सर्वाः for स-न्ति O.

६०. Bh. om. one आश्चर्यं.

६१. Bh. om. इव; सीमः for भीमः Bh.

६२. गत for हत N.; °द्भूत for °द्भूय K2.

६२. B. om. विलोक्य; सहर्षाद्भुतं Bh. साद्भुतं सहर्षं च N. साकूतहर्षं O. for सा-म्.

कथमिह मम वत्सस्तत्किमेतत्
प्रविश्य मकरन्दः। किमन्यत् ६९
प्रभवति हि महिम्ना स्वेन योगीश्वरीयम्॥
नेपथ्ये। कथमतिदारुणो जनसंमर्दो वर्तते।
मालत्यपायमधिगम्य विरक्तचेताः
सांसारिकेषु विषयेषु च जीवितेषु।
निश्चित्य वह्निपतनाय सुवर्णबिन्दु- ७०
मभ्येति भूरिवसुरित्यधुना हताः स्मः॥

६८-७१ सकरुणः कश्चिद्वनेचर आह। मालतीत्यादि। भूरिवसुर्निश्चित्य निश्चयं कृत्वा वह्निपतनायाग्निं प्रवेष्टुं सुवर्णबिंदुं शिवं लक्षीकृत्यागच्छति। कीदृशः। मालतीमरणं ज्ञात्वा संसारविषयेष्वैश्वर्यादिषु जीवितेषु प्राणधारणेषु च विविक्तं विवेकशालि। निर्विण्णमिति यावत्। चेतो यस्य सः। विरक्तेति पाठः सुगम एव। जीवितेष्विति बहुवचनं प्राणधारणक्रियाणां बहुत्वात्। अधुना भूरिवसुवियोगे सति हताः स्मः।

---

६४. पुनर्नेपथ्ये before कथमिह A.; न वयस्यः A. वयस्यः E. मम वत्सा O. for मम वत्सः

६६. योगे° for योगी° A. B. E. K1. K2. O.

६७. पुनर् before नेपथ्ये K2.; जनावमर्दस्संप्रति व° for ज-व° N.; सम्वर्तो for संमर्दो A. E.; °र्दैः संप्रति व° for °र्दो व° Bh.

६८. °भव for °भवि O.; °गत्य for °गम्य K1.; विविक्त for विरक्त N. Com.; चेतः for चेताः Bh. K2.

६९. °विते च Bh. N. O.; °वनेषु K2. for °वितेषु.

७१. °भुमि° for °सुरि° Bh.; हताशः E. हतोस्मि K1. for हताः स्मः.

मदयन्तिकालवङ्किके । झत्ति मालदीमाहवाणं दंसणब्भुदओ झत्ति अच्चाहिदं । (क)

कामन्दकीमकरन्दौ । दिष्ट्या । हा धिक्कष्टम् । आश्चर्यम्[७२] माश्चर्यम् ।

किमयमसिपत्रचन्दनरसच्छटासारयुगपदवपातः ।
अनलस्फुलिङ्गकलितः किमयमनभ्रः सुधावर्षः ॥

(क) झटिति मालतीमाधवयोर्दर्शनाभ्युदयो*झटित्यत्याहितम् ।

७३–७७ अत्रात्याहितं महाभीतिः । किमित्यादि । असयः खड्गाः पत्राणि यस्य वृक्षस्य । दारुकत्वात् । चन्दनरसच्छटा आश्चर्यात् । आसारो वृष्टिः । तयोरेकदावपातः पतनं किमयम् । भूरिवस्तुगतानर्थश्रवणादसिपत्रपातः । मालतीमाधवयोर्जीवनाच्चन्दनरसासार इति भावः । किमयं मेघहीनोमृतवर्षोमिस्फुलिङ्गमिश्रः ।

---

७२. अच्चहे C. K1. O. अम्महे K2. before झत्ति; A. om. झत्ति; सहि B. झति Bh. झगि K2. for झत्ति; °तां for °दी Bh. O.; माध° for माह° C. O.; °णं दणब्भु-अओ for °णं–ओ Bh.; महूसवो A. बुदओ K1. °ब्भुदयो N. for °ब्भुदओ.

७३. जादो before झत्ति E.; B. om. झत्ति; इग (?) ति K1. झगिति K2. for झत्ति; आचा° for अच्चा° Bh.; °हितं for °हिदं K2.; अ A. N. च C. after °हिदं.

७४. सहर्ष A. E. सहर्षलेर्दBh. after °रन्दौ ।; Bh. om. दिष्ट्या-र्यम् ; A. E. om. दिष्ट्या; कष्टं भोः कष्टम् for हा धिक्कष्टम् N.

७६. कथम् for किम् B.; °सितप° for °सिप° Bh.; छटा for च्छटा Bh.; छटाभिसार for च्छ-र C.; °रयोर्युग for °रयुग A. B. E.; °दापातः for °दवपातः O.

७७. दहन for अनल K2.; °लसस्फु° for लस्फु° Bh.; कलिलः Bh. कवलितः K2. कलिलं O. for कलितः; किमिदमनभ्रं सुधावर्षं for कि-र्षः O.; °मयम° for °मयम° Bh.

* महोत्सवो for अभ्युदयो Com.

संजीवनौषधिविषव्यतिकरमालोकतिमिरसंभेदम् ।
अद्य विधिरशनिशशधरमयूखसंवलनमनुकुरुते ॥

नेपथ्ये । हा ताद विरम विरम दंसणसुअम्हि दे वअणकमलस्स । ८०
पसीद संभावेहि मं । कधं मम कारणादो समत्तलोआलोअन्त-
रालविक्खादणिम्मलकुलेक्कमङ्गलप्पदीवभूदं अत्ताणअं परिच्च

[क] हा तात विरम विरम *दर्शनोत्सुकास्मि ते वदनकमलस्य ।
प्रसीद संभावय माम् । †कथं मम कारणात्समस्तलोकालोकान्तराल‡
विख्यातनिर्मलकुलैकमङ्गलप्रदीपभूतमात्मानं परित्यजसि । मया

७८–८३ समित्यादि । संजीवनौषधेर्विषस्य च व्यतिकरं मेलकं तेजसस्तिमिरस्य च मेलकं वज्रस्य चन्द्रकरस्य च मिलनं विधाताद्य सदृशीकरोतीत्यर्थः । आर्याच्छन्दः । अत्र लोको जगत् । अलोकः स्वर्गः । तयोर्मध्य इत्यर्थः । मङ्गलं श्रेयः । अनार्यया

७८. अपि च । before संजी° B. O.

७९. °लम° for °लनम° K2.; इह for अनु O.

८० A. B. om. one विरम; °द विरम ऽसुअम्हि दे वअणकमलदंसणस संभावेहि मं पसीद कहं मह कालणादो for °द-णादो N.; आस्य वदणकमलदंसणे for दं-स्स Bh.; °णुत्सुका-स्मि B. °णुस्सुअम्हि C. °णुसुअम्हि E. °णोसुअम्हि K2. °णुस्सुयम्हि O. for °णू-म्हि.

८१. पसीद twice C.; प्पसीद for पसीद O.; कहं for कधं A. Bh. E. O.; च B. Bh. K1. O. अ K2. before मम; समत्थ A. C. E. K1. समग्ग O. for समत्त; K1. om. लोआ°; लोका° for लोआ° Bh.; °लोआन्त° A. अंत° E. for °लोअन्त°.

८२. Bh. om. विक्खाद; विख्खंत B. विक्खभ C. विअम्भमाण K1. विक्खम्भ K2. विख्खिभ N. विख्खाभ O. for विक्खाद; °म्मलकुल C. °म्मलेक्क K1. N. O. (corrected in margin of O. to °म्मलकुलेक्क) for °म्मलकुलेक्क; °लेक for °लेक्क K2.; Bh. om. मङ्गल; पदीव A. E. दीव Bh. for प्पदीव; °दीभू° for °दीवभू° K2.; °तं for °दं O.; अत्ताणं for अत्ताणअं K1. K2. N.

* संदर्शनसमुत्सुकास्मि Com. † कथं च मम Com. ‡ विजृंभमाण for विख्यात Com.

असि । मए उण अणज्जाए णिरणुक्कोसा तुम्हे त्ति संभाविदं आसि । (क)

८५ काम० । हा वत्से

जन्मान्तरादिव पुनः कथमपि लब्धासि यावदयमपरः ।
उपराग इव शशिकलां कवलयितुमुपस्थितोनर्थः ॥

इतरा: । हा पिअसहि (ख)

ततः प्रविशति प्रमुग्धां मालतीं धारयन्माधवः ।

पुनरनार्यया निरनुक्रोशा यूयमिति संभावितमासीत् ।
(ख) हा प्रियसखि ।

बालया । निरनुक्रोशा निर्दयाः । नन्दनाय दानोपक्रमात् ।

८६-९२ जन्मेत्यादि । उपरागो राहुग्रहः । यथा कृष्णपक्षाज्जन्मान्तराच्चन्द्रस्यैका कलोपलभ्यते तां च कवलयितुं राहुरुपस्थितस्तथा तावकीनमिदं वृत्तान्तस्वरूपमिति भावः । प्रमुग्धां पितृशोकजनितमोहाम् । अनर्थपरंपरायोगादतिकष्टम् । एषेत्यादि । इयं मालती प्रवासमतीतापि राक्षसीहस्तमतिक्रान्तापि पुनरन्यथैव कथं संशयं प्राप्ता । पितृशोकात् । अत्रोपपत्तिमाह । फलदानाभिमुखस्य भाग्यस्य द्वाराणि सुखदुःखोपनयनानि निवारयितुं को नाम जन्तुरी-

---

८३. जाणिदं after उण C.; अल° for अण° C. N. O. (corr. in margin of O. into अण°); °क्कोसाए तुम्हे परिचत्ता for णि-आसि Bh. N.; ति for त्ति K1.

८४. आसी for आसि K1.; K2. ends with आसि.

८६. अपि for इव E.; तावद् for यावद् Bh.; भीरु यावदयं for या-रः A. C. E.

८७. विकलयि° B. N. O. च कलयि° Bh. कलयि° C. for कवलयि°; °मिच्छतो° for °मुपस्थितो° Bh.

८८. लवं° । A. E. इतरे Bh. C. O. for इतराः E. om. हा; पिअ B. अपि Bh. पिय O. for पिअ.

८९. मुग्धां for प्रमुग्धां B. Bh. K1. N. O.(with प्र added in margin of O.).

माध० । कष्टं भोः कष्टम् । ९०

एषा प्रवासं कथमप्यतीत्य याता पुनः संशयमन्यथैव ।
को नाम पाकाभिमुखस्य जन्तोर्द्वाराणि दैवस्य पिधातुमीष्टे ॥

मक० । सहसोपसृत्य माधवं प्रति । सखे अथ सा योगिनी क्व ।

माध० । श्रीपर्वतादिहाहं सत्वरमपतं तयैव सह सद्यः ।
करुणवनेचरवचनादनन्तरं तां न पश्यामि ॥ ९५

कामन्दकीमकरन्दौ । सप्रणयमाकाशे । महाभागे पुनस्त्राय-
स्व नः किमर्थमन्तर्हितासि ।

ष्टे समर्थो भवति । अपि तु न कोपीत्यर्थः ॥ प्रवासः परहस्ते च परदेशेपि कथ्यत इति नानार्थः ॥ नामानवक्लृप्तौ । द्वाराणीति बहुत्वेन निवारणेशक्यतोक्ता ।

९४–९९ श्रीपर्वतादिति । श्रीपर्वतादहमिह सत्वरमतिशीघ्रमपतमागतोस्मि । तया मालत्या सह । करुणाप्रधानवनेचरवचनादनन्तरं तां मालतीं न पश्यामि । मालत्यपायमधिगम्येत्यादि करुणवनेचर-

---

९२. का for को A.; जन्तु: for जन्तोः A. E. N.

९३. N. om. सह-ति; O. also but supplies सहसोपसृत्य in margin; उपेत्य क्व सा योगिनी for उपसृ-क्व B.; Bh. om. माधवं प्रति; अथ सा क्वयोगिनी Bh. क्व सा योगिनी N. अथ क्व सा योगिनी O. for अ-क्व.

९४. श्रीपर्वतादागतां तामनुयान्तौ सद्यः करुणवनचरवचनानांतरत्वां (नंतरन्तां?) न पश्यामि for श्री-मि Bh. श्रीपर्वतादहं सत्वरमापतितस्तयैव A. E. श्रीपर्वतादिहागममंबरपातं तयैव C. श्रीपर्वतादिहाभवदम्बर पा [त?] स्तयैव K1. श्रीपर्वतादुपगतामनुयातोनयैव N. for श्री-व.

९५. °दंतरितां for °दनन्तरं N.

९६. N. om. सम-शे; O. also but supplies it in margin; C. om. पुनः; परित्रायस्व for त्रायस्व Bh. O.; परित्रायस्वैनं किमर्थमत्रैवांतर्हितासि for त्रा-सि B.

९७. A. E. om. भः; किमित्यंतरितासि for कि-सि N.

लवङ्गिकामदयन्तिके। सहि मालदिणं भणामि सहि मालदि त्ति।
सोत्कम्पम्। भअवदि परित्ताहि चिरणिरुद्धणीसासणिप्फुरं
१०० से हिअअं। हा अमच्च हा पिअसहि दुवे वि तुम्हे परप्पराव-
साणस्स कारणं जादा। (क)
काम०। हा वत्से मालति।
माध०। हा प्रिये।
मक०। हा प्रियसखि। सर्वे मोहमुपगम्य पुनः संज्ञां लभन्ते।
१०५ काम०। ऊर्ध्वमवलोक्य। तत्किमेष झटिति पाट्यमानादिवा-
म्बुदादम्बुनिवहः परिस्खलन्नस्मान्प्रीणयति।

(क) सखि मालति ननु भणामि सखि मालति इति। भगवति परित्रायस्व चिरनिरुद्धनिश्वासनिःस्फुरमस्या हृदयम्। हा अमात्य हा प्रियसखि द्वावपि युवां परस्परावसानस्य कारणं जातौ।

वचनम्। आर्याच्छन्दः। सखि मालति ननु भणामि सखि मालति इति प्रलापक्रमोयम्। अत्र निःस्फुरं चलनशून्यम्।

१०५–११२. सौदामिनीप्रभावकृतवृष्ट्याश्वर्यमाह। किमिति।

९८. मदयंतिकालवंगिके for ल-के Bh.; Bh. om. 1st सहि मालदि; ण for णं K1.; भणामो for भणामि N.; A. C. E. K1. om. 2nd सहि; C. om. त्ति.

९९. सोत्कण्ठं for सोत्कम्पम् A. E.; परित्राअहि Bh. परित्ताहि twice C. परित्राअहि N. परित्राय O. for परित्ताहि; णिव्वणं Bh. णिफुरं K1. णिष्फुरं O. for णिप्फुरं.

१००. पिय for पिअ O.; द्वौवे for दुवे Bh.; पि for वि B.; परोप्प° Bh. C. K1. परुप्प° E. for परप्प°; °सासणस्स for °वसाणस्स N.

१०१. जादं B. जाद Bh. जाता K1. for जादा.

१०२. B. om. हा.

१०४. इति before सर्वे C. K1.; °गत्य for °गम्य B.; A. Bh. E. om. पुनः.

१०५. Bh. C. K1. N. om. ऊर्ध्वमवलोक्य; B. Bh. om. तत्; कथम् for किम् C.; किमेख लटि° for कि-टि° Bh.; तत् for एष N.; पात्यमान इवांबु° for पाबाम्बु° N.; देवुवाहः for °दि-हः B.

१०६. अंबुद for अम्बु Bh.; °स्खन्न° for °स्खलन्न° K1; परिस्खवन्नस्मान्प्रीणाति for परि-ति A. E.; प्राणयति for प्रीणयति Bh.

माध० । सोच्छ्वासम् । अये प्रत्यापन्नचेतना मालती । तथा-ह्यस्याः

भवति विततश्वासोन्नाहप्रणुन्नपयोधरं
हृदयमपि च स्निग्धं चक्षुर्निजप्रकृतौ स्थितम् । ११०
तदनु वदनं मूर्छाच्छेदात्प्रसादि विराजते
परिगतमिव प्रारम्भेन्दुः श्रिया सरसीरुहम् ॥

नेपथ्ये । अविगणय्य नृपं सहनन्दनं
चरणयोर्नतमग्निमुखे पतन्।

मेघाभावाद्वृष्टेराश्वर्यहेतुतयेवकारः संगच्छते । प्रत्यापन्नं पुनरायातम् । भवतीत्यादि । अस्य नासा दीर्घश्वासा भवति । चलनादेव । प्रसन्नस्तनं हृदयमपि भवति । चक्षुश्च स्निग्धं सन्निजप्रकृतिस्थिरं भवति । तदनु तत्पश्चान्मुखम् ॥ कर्तृ ॥ मूर्छापगमात्प्रसन्नं शोभते प्रभाते शोभया सर्वतो व्याप्तं पद्ममिव । परिणतमिति पाठे विकसितमित्यर्थः । विततश्वासोन्नाहप्रणुन्नपयोधरमिति पाठे दीर्घश्वासस्योन्नाहेनोद्गमेन प्रेरितौ स्तनौ यत्र तदित्यर्थः ।

११३–१२२ अवीत्यादि । तत्क्षणं मङ्गाण्यामात्यो निवर्तते । कीदृशः । नन्दनसहितं नृपं पादनतमपि तिरस्कृत्याग्निसमूहे पतन् ।

---

१०७. सहर्षं for सोच्छ्वासम् K1.; °स (corr. into प) श्र for °पन्न O.
१०८. त्वस्याः for ह्यस्याः K1.
१०९. विततश्वासा नासा प्रसन्न A. विदितः श्वासो नासा प्रणुन्न B. विततस्वास (?) नासप्रणु° K1. for वि-न्न.
११०. तः for च Bh.; निजे for निज C.
१११. °जतो for °जते K1.
११२. परिणतमिव for परिगतामव noticed by Com.
११३. अव for अवि C. K1. O.; ससुहन्नं for स-नं C.
११४. चये नयत् for मु-न् Bh.; चये for मुखे N. O.

११९ सपदि भूरिवसुर्विनिवर्तितो
मम गिरा गुरुसंमदविस्मयः ॥

माधवमकरन्दौ । ऊर्ध्वमवलोक्य सहर्षम् । भगवति दिष्ट्या वर्धसे ।

सा योगिन्यम्बरतो विघटितजलदाभ्युपैत्ययं यस्याः ।
१२० वागमृतजलासारो जलदजलासारमतिशेते ॥

काम० । प्रियं नः प्रियं नः ।

माल० । दिट्ठिआ पज्जुज्जीविदम्हि । (ख)

(क) दिष्ट्या* प्रत्युज्जीवितास्मि ।

गाढहर्षाधर्यश्च । सहभावस्य विकल्पात्सहनन्दनमिति । सेत्यादि । सेयं योगिनी भिन्नमेघा संप्रत्यायाति यस्या अयं वागमृतजलासारो वचनामृतजलधारा जलधरजलधारामप्यतिक्रामति । सौहित्यादिना ततोप्यधिका भवतीत्यर्थः । अत्र चिरस्य बहुकालेन ।

---

११५. विनिवारितो B. विनिवर्तते E. K1. N. for विनिवर्तितो.

११७. Bh. om. सहर्षम् ; सविस्मयं A. E. हर्षं K1. for सहर्षम् .

११९. यौगेश्वरीयं B. योगिनीयमतिरय Bh. N. O. योगीश्वरीयं C. योगिनीश्वरीयं K1. for यो-तो; °पेत्यस्याः B. °पैति नो वयस्या O. for °पै-स्याः; नो Bh. नौ N. for अयं.

१२०. जल for जला° Bh.; °मधि for °मति E.

१२१ सहर्षं before प्रियं C. K1.; C. E. K1. om. one प्रियं नः; प्रियं नः प्रियं A. प्रियं प्रियं नः B. प्रियं नो O. for प्रियं नः प्रियं नः.

१२२. मालत्यादयः for माल° A. B.; चिरस्स C. चिअस्स K1. after दिट्ठिआ; पज्जु° (Sk. rend. प्रत्यु°) for पज्जु° K1.; °दम्ह A. B. O. °अम्हि N. for °दम्हि.

* चिरस्य after दिष्ट्या Com.

काम० । सहर्षं सबाष्पं च । एह्येहि पुत्रि मालति ।

माल० । कथं भअवदी । (क) इति पादयोर्निपतति ।

काम० । उत्थाप्यालिङ्ग्य मूर्ध्न्युपाघ्राय । १२९

जीव जीवितसमाय जीवितं देहि जीवतु सुहृज्जनश्च ते ।
अङ्गकैस्तुहिनसङ्गशीतलैः पुत्रि मां प्रियसखीं च जीवय ॥

माध० । वयस्य मकरन्द संप्रस्युपादेयो माधवस्य जीवलोकः संवृत्तः ।

मक० । सहर्षम् । एवमेतत् । ११०

(क) कथं भगवती ।

१२६–१२७ जीवेत्यादि । हे पुत्रि त्वं जीव । ततो वल्लभाय जीवितं देहि । त्वज्जीवनाद्बन्धवोपि ते जीवन्तु । प्रशस्ताङ्गैः ॥ प्रशस्तार्थे कन् ॥ हिमसंबन्धशीतलैर्मां त्वदङ्गिकां च जीवय । अतिवृत्तमतिक्रान्तम् । संभावय योजय । कपालेत्यादि । अनया

---

१२६. सहर्षबाष्पं Bh. C. N. O. सहर्षं बाष्पं K1. for सह-च; E. om. स० बाष्पं च; मालतीं प्रति एह्येहि पुत्रि Bh. मालतीं प्रति । एहि पुत्रि E. for एह्ये-ति; मे before पुत्रि C. K1.; A. N. O. om. मालति.

१२४. कहं for कथं Bh. E. N. O.; A. B. Bh. O. om. इति; पतति A. E. निपत्य रोदिति B. O. for निपतति; B. breaks off here.

१२५. उत्थाय for उत्थाप्य K1.; मूर्ध्नि° K1. शिरस्या° O. for मूर्ध्न्यं°; उपाघ्राय for आघ्राय Bh. N.; च after °घ्राय Bh. G.

१२६. एहि for जीव A. C. G. E.; C. om. जीवितसमाय; °वितुं for °वितं G.

१२७. खंड for सङ्ग O.; °खीः च for °खीं च K1.

१२८. A. E. om. माधवस्य; °धस्य for °धवस्य K1.

११०. °म् for एवम् Bh.; °मेवैतत् for °मेतत् G.

मदयन्तिकालवङ्किके । पिअसहि मणोरहातिक्कन्तदंसणे संभावेहि अम्हे परिस्सङ्गेण । (क)

माल० । हा पिअसहिओ । (ख) उभे आलिङ्गति ।

काम० । वत्सौ किमेतत् ।

११५ माधवमकरन्दौ । भगवति

कपालकुण्डलाकोपदुर्जातजनितापदः ।
वयमभ्युद्धृताः कृच्छ्रान्निर्बन्धादार्ययानया ॥

काम० । कथमघोरघण्टवधविजृम्भितमेतत् ।

(क) प्रियसखि मनोरथातिक्रान्तदर्शने*संभावयावां परिष्वङ्गेन ।
(ख) हा प्रियसख्यौ ।

सौदामिन्या कपालकुण्डलारोषादुर्जातं मालत्यपहरणरूपं तज्जनित-विपत्तेः सकाशात्कृच्छ्रात्संकटान्निर्बन्धेनातिप्रयत्नेन वयमुद्धृताः ।

---

११५. इतरे Bh. O. इतराः K1. N. for म-के; प्रिय for पिअ O.; मालदि after सहि G.; मनोरहालिक्त (corr. into तिक्कांत) for मणो-न्त O.; °हांतरिद A. °हातिरिक्त Bh. E. °धातत्तरिद G. °हादिरिक्त N. for °हातिक्कन्त; कंत for क्कन्त C.

११२. अम्ह C. अम्हि G. अम्हेहि K1. अम्हो O. for अम्हे; °सङ्गे° for °सङ्गे° K1.

११३. C. G. om. हा; प्रिय for पिअ O.; सहि Bh. सहीओ K1. O. for सहिओ; आलिंगतः for आ-नि Bh.

११५. मकरंदमाधवौ for मा-न्दौ Bh. O.; K1. om. भगवति; कपालकुंडलाकोपदुर्जातमेतत् after °वति E.

११६. काय for कोप Bh.

११७. वयमलिबंधनात्कृच्छ्रादुद्धृता आ° for व-दा° Bh.; °भ्यु° for °भ्यु° A. G. N.; कृच्छ्र for कृच्छ्रात् N.; °बंन्धेन for °बंन्धाद् A.

११८. E. K1. O. om. वध; बंध Bh. वधू N. for वध.

* दर्शनेन Com.

मदयन्तिकालवङ्किके । अहो अच्चरीअं पुणरुत्तदारुणस्स परिणामरमणीज्जत्तणं विहिणो । (क) १४०

प्रविश्य सौदामिनी । उपसृत्य । भगवति कामन्दकि स एष वश्चिरन्तनोन्तेवासी जनः प्रणमति ।

काम० । अये भद्रा सौदामिनी ।

माधवमकरन्दौ । सविस्मयम् । कथमियं भगवत्याः पक्षपातस्थानमाद्यशिष्या सौदामिनी । तत्सर्वमधुना संगच्छते । १४५

काम० । एह्येहि भूरिजनजीवितदानपुण्य-

(क) अहो आश्चर्यं पुनरुक्तदारुणस्य परिणामरमणीयत्वं विधेः ।

१३९-१४९ अत्र पुनःक्लेशकारितया पुनरुक्तदारुणत्वम् । प्रतिकूलस्यैव विधेरधुनानुकूलत्वमित्याश्चर्यम् । एहीत्यादि मालतीरक्षणेन बहु जनरक्षणजन्यपुण्यनिवहधारिके हे चिरेण त्वं दृष्टासि । अतो हेतोस्त्वमेवागच्छ । हन्त हर्षे । ममाङ्गमालिङ्ग्य हर्षय ।

---

१३९. लवंगिकामदयंतिके for म-के Bh. O.; A. om. अहो; अच्चरिअं Bh. K1. अछरीयं twice G. अच्चरिअं twice N. अछरियं twice O.; पुनरु° for पुणरु° A. E. N. O.

१४०. रामणिज्जयं for र-णं O.; परमणीय° for रमणीज्ज° Bh.; °णिज्जअे for णीज्जत्तणं K1.; °णीज्जं विहिणो विलसिदं for °णी-णो A.; विहणो for विहिणो Bh.

१४१. सौदामिनी again before उप° Bh.; N. O. om. उपसृत्य; C. has lost उपसृत्य-सौदामिनी (l.143).

१४२. G. O. om. व-; °नोन्ती° K1. °नांते N. for °नोन्ते; वासि for वासी A. G.; °सिनः for °सीजनः Bh.

१४३. भद्रे सौदामिनि for भ-नी. N.

१४४. G. om. this speech; K1. om. माधव-मिनी (l. 145); N. O. om. सविस्मयम्; C. om. कथमियम्; सा after °मियं Bh. N. O.

१४५. आया A. अम्र C. for आय, यत् E. N. यतः O. for तत् ; यतः सर्वमाय for त-ना Bh.

१४६. एही° for एहे° K1.; वसु for जन A. Bh. C. N.; दारु for दान Bh.

संभारधारिणि चिरादसि हन्त दृष्टा ।
दत्तप्रमोदमपि नन्दय मे शरीर-
माश्लिष्य सौहृदनिधे विरम प्रणामात् ॥

१५० अपि च । वन्द्या त्वमेव जगतः स्पृहणीयसिद्धि-
रेवंविधैर्विलसितैरतिबोधिसत्त्वैः ।
यस्याः पुरापरिचयप्रतिबद्धबीज-
मुद्भूतभूरिफलशालि विजृम्भितं ते ॥

शरीरं कीदृशम् । दत्तानन्दमपि मालतीदर्शनेनेति भावः । हे सौहृदाभ्रये नतेर्विरम । त्वमेव नमस्या यतः ।

१५०–१५३ तदेवाह । वन्द्येत्यादि । त्वमेव संसारस्य नमस्या । एवंविधैर्विलसितैर्दिव्यक्रमाद्यैः श्लाघनीयसिद्धिस्त्वं यतः । कीदृशैः । बोधिसत्त्वा जीमूतवाहनादयः । तानप्यतिक्रामन्ति तैः । तेषामेकैकजीवनात्त्वया त्वनेकजीवनादतिशय इति भावः । यद्वा । बोधिसत्त्वो बुद्धविशेषः । तदतिक्रमवर्तिभिः । अनेकपुण्यकारित्वात् । यस्यास्तव विजृम्भितं चेष्टितं पूर्वपरिचयेन प्रतिबद्धं कलितं बीजं कारणं यत्र तत् । उद्भूतप्रचुरफलयुक्तं च भवति । तथा च त्वदुपकरणेन कृतार्थास्मीति भावः । अन्यदपि कलमाद्यङ्कुररूपं विजृम्भितं पूर्वप्रतिबद्धबीजमुद्भूतप्रचुरफलशालि भवतीति ध्वनिः ।

---

१४७ चिराय मयासि दृष्टा for चि-ष्टा A. E.

१४८. अभि for अपि K1.; जीवय for नन्दय Bh.

१५०. जगतां A. जगति C. O. for जगतः.

१५१. °विनोधि E. °विरोधि G. °पिबोधि K1. °विबोधि O. for °तिबोधि.

१५१. बंधि E. बोध G. for बद्ध.

१५२. शालि for शालि Bh.; °तेन Bh. N. °तं नः G. for °तं ते.

मदयन्तिकालवङ्गिके। इअं सा अज्जा सौदामिणी। (क)
माल०। बाढं। इमाए क्खु भअवदीसंबन्धपक्खवादिणीए १५५
णिब्भच्छिअ कवालकुण्डलं अत्तणो आवसधं उवणीअ भअ-
वदीसिणेहनिव्विसेसं समासासिदम्हि। किं च केसरावलीसा-
हिण्णाणहत्थाए इह आगत्तूण सव्वे तुम्हे संधारिदा। (ख)

(क) इयं *सार्या सौदामिनी।

(ख) बाढम्। अनया खलु भगवतीसंबन्धपक्षपातिन्या निर्भर्त्स्य कपालकुण्डलामात्मन †आवसथमुपनीय भगवती‡स्नेहनिर्विशेषं समाश्वासितास्मि§। किं च केसरावली‖ साभिज्ञानहस्तयेहागत्य**सर्वे यूयं संधारिताः।

१५७-१५९ अत्र समासादिता प्रापिता। केसरावली ब-
कुलमाला सैवाभिज्ञानं प्रत्ययचिह्नं हस्ते यस्याः। तया संधारिता रक्षिता मज्जीवनेनेति भावः। अत्र त्वज्ज्येष्ठा कामन्दकी यथास्माकं सुम-

१५४. लवंगिकामदयंतिके for म-के Bh.; मद°। लवंगिके इ° for म-इ° O.; इयं for इअं Bh.; सोदा° for सौदा° G. K1. N.; °मिनी for °मिणी Bh.

१५५. एमाए G. इमा K1. for इमाए; E. G. om. क्खु; खु Bh. खु O. for क्खु; A. E. om. संबन्ध; °दीणिब्विसेसबद्धपक्खवादाए Bh. °दीणिब्विसेसं बद्धपक्खपा-दाए N. for °दी-णीए.

१५६. त्थिअ for °च्छिअ Bh.; कपाल for कवाल Bh. O.; °ण्डलं for °ण्डलं A.; °सउछव for °सधं उव Bh.; उअणीअ G. उवणिअ N. उवणयिय O. for उवणीअ; म् after °णिअ A. C. E.; N. om. भअ-सेसं.

१५७. A. Bh. E. K1. O. om. सिणेह; णिव्वि° for निव्वि° O.; समस्सादि° for समासासि° Bh.; °सादिदम्हि for °सा-म्हि G. K1.; अ for च N.; °वलि for °वली Bh.; आहि° for साहि° A.

१५८. °भिणा Bh. °भिणाण for K1. °हिण्णाण; इहागतूण Bh. एत्थागदुअG. इहागत्तूण N. for इ-ण; संभावेदा for सं-दा Bh.; सव्वे तुम्हे संधारिदत्ति C. सावसेसं धारिदा E. सव्वे संधारिदा तुम्हेत्ति G. सव्वे सन्धारिदा तुम्हे वि K1. सव्वे एव्व धारिदे (?) मरणादो तुम्हे O. for स-दा; A. C. E. om. तुम्हे; after °रिदा A. has मरणादो सा एसा जीवि-दप्पदायिणी सौदामिणी; E. with A. but has सोदा° for सौदा;° C. has मरणादो सा एसा तादज्जीविद &c., as in A. E.

* Com. om. सा. † °मात्मनोवसथ° Com. ‡ Com. om. स्नेह. § समा-सादितास्मि Com. ‖ °वल्यभिज्ञान Com. ** सर्वे संधारिता मरणात्पूर्वं Com.

मदयन्तिकालवङ्किके। सुप्पसण्णा णो कणिट्ठा भअवदी। (क)

१६० माधवमकरन्दौ। अहो नु खलु भोः।

अपि चिन्तामणिश्चिन्तापरिश्रममपेक्षते।
इदं त्वचिन्तितं मन्ये कृतमार्श्चर्यमार्यया॥

सौदा०। स्वगतम्। हन्त लज्जयति मामत्यन्तसौजन्यमेषाम्। प्रकाशम्। भगवति एतत्प्रहृष्टनन्दनाभिनन्दितेन

१६५ राज्ञा पद्मावतीश्वरेण भूरिवसोः प्रत्यक्षमभिलिख्य पत्रमायुष्मतो माधवस्य प्रेषितम्। लेखमर्पयति।

(क) सुप्रसन्ना नः कनिष्ठा भगवती।

सन्ना तथा त्वमपि भवेत्यर्थः। सौदामिनीज्येष्ठत्वादपि भगवत्या गुरुत्वात्तस्यामत्यादरसूचनम्। यद्वा। सौदामिन्या एव भगवतीकनिष्ठत्वेनादर उक्तः।

१६१–१६४ अपीत्यादि। चिन्तामणिरपि चिन्तारूपं परिश्रममपेक्षते। अचिन्तितप्रदाने चिन्तामणित्वव्याघातादिति भावः। इदं पुनराश्चर्यं मन्ये यदार्यया सौदामिन्याचिन्तितं कृतमिति। तथा चात्रानुकारोऽपि नेति भावः। अत एवात्यन्ताश्चर्यम्। नन्दने प्रहर्षो मकरन्दमदयन्तिकानुरूपघटनात्।

१५९. इतरे Bh. O. इतरा K1. इतराः N. for म-के; सुप° for सुप्प° O.; °सणा for °सण्णा K1.; K1. om. णो; णि (?) for णो O.

१६०. माधवः for मा-न्दौ Bh.

१६१. परिग्रह [or भ्रम] for परिश्रम N.

१६२. इदं त्वकृतमन्येन कृताश्चर्यमचिन्तितं for इ-र्या A. E.; इदं त्वकृतमन्येन for इ-न्ये Bh. G.

१६३. आत्म for त्व Bh.; एवं for अत्यन्त A. E.

१६४. K1. om. एतत्.

१६५. Bh. om. भूरि; आलिख्य for अभिलिख्य Bh.; A. E. om. पत्रम्; अस्मत्तो for आयुष्मतो. E.

१६६. इति before लेख° G.; इति पत्रम् A. लेखम् Bh. लेखपत्रम् E. for लेखम्.

काम० । गृहीत्वा वाचयति । स्वस्त्यस्तु वः । परमेश्वरः समाज्ञापयति यथा

श्लाघ्यानां गुणिनां धुरि स्थितवति श्रेष्ठान्वये च त्वयि
प्रत्यस्तव्यसने महीयसि परं प्रीतोस्मि जामातरि । १७०
तेनेयं मदयन्तिकाद्य भवतः प्रीत्यै तव प्रेयसे
मित्राय प्रथमानुरागघटिताप्यस्माभिरुत्सृज्यते ॥

माधवमुद्दिश्य । वत्स श्रूयताम् ।

माध० । श्रुतम् । इदानीं सर्वतः कृतार्थोस्मि ।

१६९–१७४. वरगुणानाह । श्लाघ्यानामिति । यदिह त्वयि जामातर्यत्यर्थं प्रीतोस्मि तेनेयं मदयन्तिका तव प्रीत्यै त्वत्प्रीतिं कर्तुं भवतः प्रेयसे मित्राय प्रिय सुहृदे मकरन्दायाद्यास्माभिरपि दीयते । पूर्वमनुरागेण दत्ता । प्रीतिहेतुमाह । सच्चरितानां गुणिनां च गणनायां स्थिते प्रशस्तवंशे । पाठान्तरे ख्यातवंशे । प्रत्यस्तं क्षिप्तं व्यसनमशुभं यत्र तत्र । सातिशये । प्रत्युत्पन्नमतावितिं पाठेभिनवोत्पन्नबुद्धौ प्रतिभावतीत्यर्थः । कृतार्थता नृपनन्दनाविरोधात् ।

---

१६७. माध° for काम° Bh.; K1. om. गृहीत्वा वाचयति; N. om. स्व-यथा; O. also but in margin supplies the words up to °यति.

१६८. Bh. K1. om. यथा.

१६९. °न्वयेपि A. Bh. °न्वयाये N. for °न्वये च.

१७०. प्रत्युत्पन्नमतौ for प्र-ने noticed by Com.

१७१. भवत् for तव Bh.

१७२. °यास्मा° for °यस्मा° E.

१७३. कामंदकी । सहर्षं before माध° Bh.; सहर्षं after उद्दिश्य N. O. श्रुतं श्रुतं for श्रु-म् N.; श्रुतं for श्रूयताम् Bh. K1. O.

१७४. K1. om. माध° |; तु Bh. च K1. O. after इदानीं; इदानीमेव कृतार्थ° संवृत्तोस्मि for इ-स्मि G.

१७९ माल०। दिट्ठिआ एत्ताहे अवहदं हिअअस्स आसङ्कासल्लं।(क)

लव०। संपदं णिरवसेसं माहवसिरिणो मालदीए अ फलिदा मणोरहा। (ख)

मक०। पुरोवलोक्य। कथमवलोकितावुद्धरक्षिते कलहंसकेन सह प्रमोदनिर्भरं नृत्यन्त्यावित एवागच्छतः।

१८० ततः प्रविशतोवलोकितावुद्धरक्षिते कलहंसकश्च। विविधं नृत्यं

(क) दिष्ट्येदानीमपहृतं *हृदयस्याशङ्काशल्यम्।

(ख) सोप्रतं निरवशेषं श्रीमाधवस्य मालत्याश्च फलिता मनोरथाः।

१७९–१८५ अत्रैत्ताहे इदानीम्। आशङ्का विरोधादिविषया। मर्मभेदित्वाच्छल्यम्। अत्र श्रीमाधवस्येति प्राकृते पूर्वनिपातानियमत्वात्। फलिता मनोरथाः। एतयोरायतिशुद्धविवाहादिति भावः। [सर्वत्र०]

---

१७९. एदं वि दाव अवगअं for दा-दं N.; एत्ताहि Bh. संपदं E. एकाहेज्जेव O. दाणिं G. for एत्ताहे; C. om. एत्ताहे; अपहदं A. ववगदं Bh. G. गदं E. O. for अवहदं; णो before हिअ° A. Bh. E.; णो after °स्स O.; संका for आसङ्का G.

१७९. K1. om. लव°।; णिसेसं C. E. निरवसेसं K1. for णिरवसेसं; णिरवसेसा पूरिदा माहवस्स मणोरहा Bh. निरवसेसा माहवस्स मणोरहा पूरिदा N. for णि–ह; माह—वस्स फलिया for माह–दा O.; सर्वं before अ E.; C. K1. om. अ; सर्वं after अ A.; फुरिदा for फलिदा E.

१७९. मनो for मणो K1; °रधा for °रहा G.

१७८. N. O. om. पुरोवलोक्य; कथं बुद्धरक्षितावलोकितकलहंसाः दूरतः समुदितास्मान्वीक्ष्य तत्रैवहर्षनिर्भरं प्रनृत्ता for क—तः N.; °क्षिता कलहंसकश्च दूरतः प्रमुदितानस्मानुद्वीक्ष्य तत्रैव हर्षनिर्भरं प्रनृत्ताः (corr. in margin into नृत्यंति) for °क्षि—तः O. and adds सर्वे सस्मितं पश्यंति.

१७९. K1. om. सह—हंसकश्च (l. 180); G. om. सह; सुप्रमोदं A. सप्रमोदं G. for प्र-दं; E. om. प्र-दं; प्रमोदं नृत्यन्त्यौ for प्र-न्त्यौ Bh.

१८०. N. om. ततः—पश्यन्ति (l. 183); O. also but supplies it in the margin; ततः प्रविशंति अवलोकितावुद्धरक्षिताकलहंसाः for ततः–कश्च G.; यथानिर्दिष्टे after प्रविशतः C.; °क्षिता for °क्षिते O.; °ङ्क for °सकश्च A.; नृत्तं for नृत्यं K1.

* इतं मो हृद° Com.

कृत्वा सर्वे उपसृत्य सप्रणामं कामन्दकीं प्रति । जअ भअवदि कज्जाणिहाणे । माधवं प्रति । जअ मअरन्दणन्दण माहव पुण्णचन्द दिट्ठिआ वड्ढसि । (क) सर्वे सस्मितं पश्यन्ति ।

लव० । को वा इमस्सिं संपूरिदसव्वप्पआरमहूसवे ण परिहाससंपुण्णो होइ । (ख) १८५

काम० । एवमेतत् । अस्ति वा कुतश्चिदेवंभूतमद्भुतं विचित्ररमणीयोज्ज्वलं महाप्रकरणम् ।

(क) जय भगवति कार्यनिधाने । जय मकरन्दनन्दन माधव पूर्णचन्द्र दिष्ट्या वर्धसे ।

(ख) को वास्मिन्संपूरितसर्वप्रकारमहोत्सवे न *परिहाससंपूर्णो भवति ।

भगवति कार्यनिधाने । अत्र जयेति शेषः । [लव० वा०] अपि तु सर्वोपीत्यर्थः ।

१८६–२०१ अद्भुतमित्यादिनोपगूहनमाह । यदाह ।

अद्भुतस्य तु संप्राप्तिर्भवतादुपगूहनम् ॥ इति ।

---

१८१. E. G. om. सर्वे उपसृत्य; °र्वे सप्रणाममुपसर्प्यांति for °र्वे-मं Bh.; अवलोकिता before काम° Bh.; प्रणमन्ति for प्रति K1.; जअ twice K1.

१८२. ज्जणि° for कज्जणि° K1.; णिव्वाहणे for णिहाणे C. O.; Bh. om. माधवं; च after प्रति O.; °रंदा° for रन्द° O.; अंद for चन्द C. G. K1. O.

१८३. वड्ढसे for वड्ढसि O.; सहर्षं before सर्वे A.; इति सर्वे सविस्मयं for स-तं G.

१८४. संपूरिदे for संपूरिद O.; को वा इमस्सिं परिपुरिदसव्वमहूसवे ण णच्चदि A. इमस्सिं महूसवे णच्चदि Bh. को वा इमस्सिं सवप्पआरपरिपूरिदमहूसव [वे] ण सपरिहासंपुणो होदु E. को णाम इमस्सिं महूसवे ण णच्चदि N. for को-होइ; मूहू° for महू° K1.; णच्चादे for परि-इ O.

१८५. पुणो G. संपुणो K1. for संपुण्णो.

१८६. E. om. अस्ति वा; अपि for अस्ति वा O.; भूतं A. Bh. भूत्र K1. भूतमत्यंतं N. महाद्भुतं for भूतमद्भुतं C. G. E.; अत्यंत Bh. चित्र C. for विचित्र.

१८७. °णीय for णीयोज्ज्वलं Bh.

* नृत्यति for परि-ति Com.

सौदा० । इदमत्र रमणीयतरं यदमात्ययोर्भुरिवसुदेवरातयो-
श्चिरात्पूर्णोयमितरेतरापत्यसंबन्धात्मा मनोरथः ।

१९० माल० । स्वगतम् । कहं विअ । (क)

माधवमकरन्दौ । सकौतुकम् । भगवति अन्यथा वस्तुवृत्तम-
न्यथा वचनमार्यायाः ।

लव० । जनान्तिकम् । भअवदि किं पडिवज्जिदव्वं । (ख)

काम० । स्वगतम् । संप्रति मदयन्तिकासंबन्धान्नन्दनोपग्रहा-
१९५ त्प्रत्यस्तशङ्काः खलु वयम् । प्रकाशम् । वत्सौ न खल्वन्यथा

(क) कथमिव ।

(ख) भगवति किं प्रतिपत्तव्यम्* ।

प्रकरणं मालतीमाधवाख्यम् । कथमिव । अत्र पित्राद्यनुमत्या नाहं
दत्ता तत्कथमियमेवमाहेति भावः । अन्ययेति । चोरिकया वृत्तं वस्तु
विवाहकृत्यम् । आर्यायाः सौदामिन्या वचनमन्यथा । अमात्यागोचरे-
णेत्यर्थः । [लव० वा०] अत्र सौदामिनीवचनं किंरूपमित्याशयः ।

---

१८८. इदमत्रारामणीयकं Bh. O. इदं कुत्र रामणीयकं N. for इ-रं; °यान्तरं for °य-
तरं A. E.; अमात्य for अमात्ययोः C. G.

१८९. G. om. चिरात् ; संपूर्णो° for पूर्णो° N. सम्बन्धात्म° A. Bh. संबंधामृतम्°
G. संबंधादिपूर्णको म° N. संबधामृतम° O. for सं-म°; °रथाः for °रथः K1.; G.
ends here.

१९०. कधं for कहं O.; वि for विअ K1.

१९१. मकरंदमाधवौ for मा-न्दौ O.; प्रवृत्तम् for वृत्तम् Bh.

१९२. च before वच° K1.; आर्यया for आर्यायाः Bh.

१९३. एत्थ A. विय O. after किं; O. om. प-व्वं.

१९४ तथैव E. अपवार्य N. for स्व-म् ; Bh. om. स्वगतम् ; संबंधेन for संबन्धात्
O.; संबंधेन नंदनाबग्रहात् for सं-हात् N.

१९५. °ङ्काः for ङ्काः K1. Bh. om. प्रकाशम् ; K1. om. वत्सौ; वत्से for वत्सौ
O.; अन्यत्तु for अ-स्तु Bh.

* किमत्र प्रत्येतव्यं Com.

वस्तुवृत्तं यतः श्रावकावस्थायामस्मत्सौदामिनीप्रत्यक्षमनयोर्वृत्तेयं प्रतिज्ञावश्यमावाभ्यामपत्यसंबन्धः कर्तव्य इति । प्रधानप्रकृतिकोपस्त्वेवं परिहृतः ।

माल० । अहो संवरणम् ।

माधवमकरन्दौ । आश्चर्यम् । जयन्ति महतां संस्तुस्तापलापिन्यः कल्याणिन्यो नीतयः । २००

कामं० । वत्स

यत्प्रागेव मनोरथैर्वृतमभूत्कल्याणमायुष्मतो-
स्तत्पुण्यैर्मदुपक्रमैश्च फलितं क्लेशोपि मच्छिष्ययोः ।

श्रावकेति पाठकदशायाम् । प्रकृतिः शिष्टः । [माल० वा०] अहो संवरणम् । अत्र मन्त्रिणो मत्पितुरिति शेषः । कल्याण्यो मम संपन्ना यत इति भावः ।

२०३–२०६ यदित्यादि । यदायुष्मतोर्युवयोः कल्याणमन्योन्यलाभरूपं पूर्वं मनोरथैरेव वृतमाकाङ्क्षितमभूत्तत्पुण्यैर्मदुपक्रमैश्च निसृष्टार्थदूतीकल्पकपटैः फलितम् । मच्छिष्ययोरवलोकितासौदामिन्योः

---

१९६. तंत्रं for वृत्तं E.; अन्यथा वचनमार्यायाः after वृत्तं N.; यथा for यतः N.; अंत्यावका° for श्रावका° Bh.; समक्षं तयोः for प्र-यो N.; समक्षम् for प्रत्यक्षम् Bh. O.

१९७. C. om. प्रधान; °धानं for °धान K1.

१९८. प्रतिहतः for परिहृतः A. E.

१९९. अम्मो Bh. अम्मे N. for अहो; उपाअस्स after °णम् C.

२००. आश्चर्यं जनयंति खलु महतामविसंवादिन्यः कल्याणनीतयः N. आश्चर्यं जनयंति महतामविसंवादिन्यः प्रतापिन्यः कल्याणिनीतयः O. for आ-तयः; अविसंवादिन्यः खलु for सं-न्यो Bh.; °तां विसंष्ठुलाप्रतीपिन्यः A. °तामेव संस्तुतप्रलापिन्यः E. °तामविसंष्ठुलप्रतीपिन्यः K1. for °तां-पिन्यः.

२०२. वत्सौ for वत्स Bh.; माधव after वत्स A. E. K1. O.

२०३. °ष्मता for °ष्मतोः E.

२०४. त्वत् for तत् O.; पुण्यात् for पुण्यैः K1.; सूक्ष्मोपि मा भूक्लमः for क्ले-योः O.; क्लेशोपि A. क्लेशोपि or श्लोकोपि N. for क्लेशोपि.

२०५ निष्णातश्च समागमोपि विहितस्त्वत्प्रेयसः कान्तया
संप्रीतौ नृपनन्दनौ यदपरं प्रेयस्तदप्युच्यताम् ॥

माध० । सहर्षं प्रणमन् । भगवति अतःपरमपि प्रियमस्ति । तथापीदमस्तु भगवतीपादप्रसादात् ।

सन्तः सन्तु निरन्तरं सुकृतिनो विध्वस्तपापोदया
२१० राजानः परिपालयन्तु वसुधां धर्मे स्थिताः सर्वदा ।

क्लेशोपि फलित इति । लिङ्गविपरिणामो योग्यत्वात् । क्लेशेनेति पाठे ताभ्यामेव फलितमित्यर्थः । तथा त्वन्मित्रस्य मकरन्दस्य मदयन्तिकया सह संबन्धोपि निष्णातो निःशङ्कं विहितः । नृपनन्दनावतिप्रीतौ विहितौ । अत एव निःशङ्कता । अपरमतःपरं यत्प्रेयः प्रियं कर्तव्यमस्ति तदप्युच्यताम् । तत्करोमीत्यर्थः ।

२०९–२१२ सन्त इत्यादि । सज्जना निरन्तरं धार्मिकाः सन्तु । अत्र हेतुः । विनष्टपापोद्रेकाः । तथा च सतां पुण्यमुज्जृम्भतां पापं नश्यतामित्यर्थः । राजधर्मे रक्षणादौ सदा स्थिता नृपा भुवं रक्षन्तु । वसु धनं दधातीति वसुधेत्यनेन विपुलधनवत्त्वं भुव उक्तम् । काले वर्षादौ सस्याविरोधि सम्यक्ततं व्यापकं यथा तथा वर्षणशीला

---

२०५. निष्टातश्च Bh. संपूर्णश्च or निस्तीर्णश्च N. for निष्णातश्च; च for अपि A. E.

२०६. रघु for नृप N.; किम् for यद् A. E. O.; श्रेयः for प्रेयः A. E. O.

२०७. प्रणमति for प्र-नन् A. E.; प्राणिधानाङ्गत्राति मे प्रियमस्ति for प्र-स्ति O.; N. om. भ-वति; ज्ञानविज्ञाननिधे गुरो K1. किम् N. before अतः; अतोपि परं A. अतोपि परमं E. for अत-पिः N. om. अपि.

२०८. कामं° । before तथा° K1.; K1. om. भग-दात्; भरतवाक्यं for भ-न् N.; A. E. om. पाद.

२०९. Instead of this stanza N. has the following :—

श्रीरस्तु सर्वजगतां परहितनिरता भवंतु भूतगणाः ।
दोषाः प्रयांतु शांतिं सर्वत्र सुखी भवतु लोकः ॥

२१०. वृत्तौ for धर्मे O.

काले संततवर्षिणो जलमुचः सन्तु क्षितौ पुण्यतो
मोदन्तां घनबन्धुबान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः॥

मेघाः सन्तु । अकालवृष्ट्या सस्यनाशात्काल इत्युक्तम् । अत्र हेतुमाह । प्रजानां लोकानां पुण्यात् । प्रजा हृष्यन्ताम् । घनबन्धो निरन्तरकृतो बान्धवानां संबन्धिनां सुहृदां मित्राणां गोष्ठीषु प्रकृष्टहर्षो याभिस्ताः । तदनेन प्रशस्तिरुक्ता । काव्योपसंहारोप्यनेनैव कृतः यदाह ।

वरदानस्य उक्तिर्या सा काव्य उपसंहृतिः ॥ इति ।

लब्ध्वा दुर्लभशासनं सुरगणग्रामश्च कैवर्तिका-
द्विद्यावंशविभूषिते अपि शुभे च्छत्रे उभे धारिते ।
येनायं समभूद्द्विजातितिलकश्चण्डेश्वरः पण्डितो
मीमांसैकरहस्यवश्यहृदयो दातावदाताशयः ॥ १ ॥
देवेशं समसूत सोयममलं मीमांसकं सत्कविं
सोप्युच्चैरजनिष्ट जैमिनिमते रामेश्वरं सद्बुधम् ।
सूते स्मायमपि प्रतीपजयिनं मीमांसयालंकृतं
शुद्धं धीरगदाधरं कविवरं पुत्रं पवित्राशयम् ॥ २ ॥
विद्याधरं वरमजीजनदेष धीरं
हीरं जनेषु जयिनं गुरुणोक्तशास्त्रे ।
प्रासूत सोयममलं गुणिनं सुपुत्रं
तं रत्नपूर्वधरमेष जगद्धरं च ॥ ३ ॥
येनापाठि कठोरगोतममतं वैशेषिकं खण्डनं
येनाभ्यधि सकोषकाव्यनिवहं तत्पाणिनीयं मतम् ।

---

२११. °भुवः for भुवः K1.; स्थिराः for क्षितौ A. E.
२१२. भन for घन E.; बन्ध for बन्धु A. K1.; भोग C. प्राप्त O. for गोष्ठी.

इति निष्क्रान्ताः सर्वे । मालतीमाधवे दशमोऽङ्कः ॥

॥ इति मालतीमाधवं नाम प्रकरणं समाप्तम् ॥

छन्दोलंकरणं च भव्यभरतं येनाध्यगामि श्रुति-
स्तस्यामुष्य जगद्धरस्य कवितुष्टीकेयमुज्जृम्भताम् ॥ ४ ॥

अस्तु तं रत्नधरोतिभव्योतिभव्यरूपा दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेऽङ्कः समाप्तिमापद्दशमोनवद्यः ॥

इति श्रीमन्महोपाध्यायपण्डितराजमहाकविराजधर्माधिकारिरत्नधर-
पण्डितात्मजश्रीजगद्धरविरचितायां मालतीमाधवटीकायांदशमोऽङ्कः।

---

२१६. काम°। एवमस्तु before इति A. Bh. C. E.; परिक्रम्य after इति Bh. C. O.; E. Kl. N. om. मालतीमाधवे; इति मालतीमाधवे प्रकरणे कविरत्नभवभूति-विरचिते दशमोंकः समाप्तः for मालः-ङ्कः O.; सैपूर्णः after अङ्कः Bh.

२१४. Bh. O. om. इति-तम् ; समाप्तश्चेदं मालतीमाधवप्रकरणम् A. समाप्तं चेदं मालतीमाधवं नाम प्रकरणम् Kl. इति श्रीभवभूतिविरचितं समाप्तमिदं मालतीमाधवं नाम प्रकरणं N. for इति-तम् ; नाटकं for प्रकरणं C.; समाप्तिमगमत् for समाप्तम् E.

NOTES.

Act I.

L. 1.—सानन्दम् adv. to विशति. J.'s other constructions do not appear to be good.

L. 2.—रन्ध्रस्यार्धमधरन्ध्रम्= "the opening of the nostrils," would be the best way of taking such a compound. But since there is no authority for it, it is usual to take it as अर्धं च तद्रन्ध्रं च though the sense is the same (see Mallinâtha on Mâgha. VII. 29).

Ls. 5-8.—This stanza consists of eight grammatical forms or padas. Hence this नान्दी is अष्टपदा.

L. 7.—Comp. Vikr. Act III. धूपैर्जालाविनिःसृतैर्वलभयःसंदिग्धपारावताः. The sense is:—the resemblance between the two leads to one of them being suspected to be the other. This is an instance of what is called संशयोपमा by Daṇḍ and संदेहालंकार by more modern writers.

L. 8 Note.—Synt. con. ताडितां कूरस्त्र समूहो यस्य पक्ष्मालीपिङ्गलिम्नः कण इव यस्मिन्कालयवना.....तत्पुरारेस्तार्तीयीकं लोचनं वोवतु। अचिषा निदग्धो यद्भूता यशी तस्माद्गलितो यः सुधासारस्तेन हंकारिणौ कोणौ यस्य। "The flame proceeding from the fire in the third eye heated the crescent-crest of S'iva, and hence drops of nectar fell from it over the corners of the eye and coming in contact with the fire made a hissing noise. पुरारि so called from his having destroyed the three towns of gold, silver, and iron erected by a demon named Maya in the heavenly, ethereal, and earthly regions presided over by himself, Vidyunmâlin, and Târakâsura. (See Mâtsya P.) तार्तीयीकम् means the same thing as तृतीय (Vârt. on Pân. V. 3, 48). The fire

from the third eye of S'iva burned the god of Love. The story is common enough. (See Mâtsya P., Kum. S.). Hence the epithet मदनहोषणम्. Kâla, (time, death or destruction) is the sacrificer, the universe is the offering and the sacrificial fire that in the third eye of S'iva. This stanza is quoted by S'âr. as from Bhavabhûti.

L. 10.—उदितभूविघ्न. Comp. such expressions as अभिरूपभूविष्ठा पारिषद्, S'ak. Prologue.

L. 12.—कल्याणानां त्वमिह महसामीशिषे त्वं विधत्से is the reading of Bh. Kl. O. and gives a reason for the appropriateness of the prayer contained in L. 13.

L. 13.—धुर्यां लक्ष्मीम् "the power or resources of a leader." Stanza quoted in the K. Pr. to show that the correlative need not be repeated though the relative may be so in the previous clause.

L. 18.—The affix तव्य signifies the agent in the word वास्तव्य. (Vârt. on Pân. III. 1, 96.)

L. 27.—"Bold or adventurous deeds (lit. boldness or adventurousness) intended to assist the progress of love, or are prompted by love (lit. in which is introduced the thread of love)," such as Mak.'s killing the tiger at the end of the third Act and rescuing Mad., and Mâdh.'s encounter with Aghor. and saving Mâl., both of which strengthen the love of the ladies for the young men and give the latter a sort of claim over their hearts (see pp. 259, 261, 262, &c.). The secret marriage of Mâl. and Mak.'s going to Nand.'s house disguised as Mâl. and winning away Mad. may also be taken as such acts. This way of taking it seems preferable to J.'s. The word सूत्र which at the best can here be only taken in a metaphorical or लाक्षणिक sense is to all appearances purposely used by the poet in order to indicate or suggest, *i. e.*, bring out by the व्यञ्जनावृत्ति the sense that he has followed the principles laid down in the Kâmasûtras in the development of the incidents alluded to and as a matter of

fact he quotes a passage from Vâtsyâyana's work in Act VII. and follows the directions given therein in other places.

L. 30.—इव renders the sense of the preceding interrogative somewhat indefinite. क इव, किमिव "what like," "what sort." Comp. l. 334, p. 423, &c.; किमिव न प्रेमोचितमाचरितम्. Kâd.

L. 31.—J. is wrong in identifying Padmapura or Padmanagara with Padmâvatî the scene of the play. Bhavabhûti's native place appears from the description to have been somewhere near Chandrapura or Chândâ in the Nâgapur territories, where there are still many families of Marâṭhî Des'astha Brâhmaṇs of the Taittirîyas'âkhâ of the Black Yajurveda with Âpastamba for their Sûtra, and in the country to the south and south-east of which there are families of Tailaṅga Brâhmaṇs following the same Veda and Sûtra. The river Godâvarî must have been at or near his native place, from his description of it as by one familiar with it in the 9th Act of this play (p. 374) and in the Utt. R. Ch. In the former place it is introduced without much natural connection, thus evincing the partiality of a native.

Ls. 40—41. यत्र खल्वियं वाचोयुक्तिः where (*i. e.*, in the work made over to the actors by the Poet) the वाचोयुक्तिः is this (*i. e.* as explained in the two following stanzas). वाचोयुक्तिः is arrangement of words, speech or discourse in a manner to convey a certain sense or serve a certain purpose. The author of the Mahâbhâshya uses the word in the following case:—People use the expressions आढ्यमिदं नगरं गोमदिदं नगरम्, "this town is rich," "this is a cow-owning town." It cannot be meant that every person in the town is rich or owns cows. The expressions, therefore, are meaningless, but still they are used. "What then is this वाचोयुक्ति 'this town is rich', 'this is a cow-owning town'? This is this वाचोयुक्ति. In the first case आढ्य means 'having आढ्य persons' the final अ being like वत् or मत् a possessive termination. आढ्यमिदं नगरम् therefore means 'a town having rich persons in it'; so also गोमदिदं नगरम् mean 'town

having cow-owning persons in it,' another possessive termination affixed to गोमत् being dropped"-का तर्हीदं वाचोयुक्तिराढ्यमिदं नगरं गोमदिदमिति । एषैषा वाचोयुक्तिः । इह तावदाढ्यमिदं नगरमित्यकारो मत्वर्थीयः । आढ्या अस्मिन्सन्ति तदिमाढ्यमिति । गोमदिदमिति मत्वर्थान्मत्वर्थीयो लुप्यते । वाचोयुक्तिः is thus "an arrangement of words &c., so as to bring out the intended sense,"the adaptation of words to the sense to be conveyed. वाचोयुक्तिपटु is a skilled speaker, debater or controversialist who knows how to use words so as to produce an effect. The वाचोयुक्ति in Mâlatî-Mâdhava, *i. e.*, the design with which the play is composed, or the purpose of the composition is to please those who are of the same calling as the poet (समानधर्मा) and not others who do not care for such things; and not to use the poet's knowledge of the Vedas, Upanishads, &c., but to realize felicity and richness of expression, &c. (l. 48).

L. 43.—"They know something that is inexpressible" (cannot be described). Inexpressible it may be on account of its being very great or little or nothing. Both the senses seem to be intended, and the expression is used ironically, the poet really meaning to say they know nothing while in appearance he extols their superior knowledge. किमपि, कोपि, &c., mean "something unknowable," "indescribable," or "unknown," often on account of its greatness or excellence. Comp. Utt. R. Ch. प्रकृष्टपुण्यपरिपाकोपादानः कोपि महिमा स्यात् Act VI. कोप्यस्मिन्क्षत्रियपोतके पौरुषातिरेकः Act VI. कोप्येष संप्रति नवः पुरुषावतारो Act V. किमपि हृदये कृत्वा मन्त्रयध्वम् Śak. Act I. किमप्यन्तरात्मना स्मरन्निव Kâd. Pt. II. &c., &c. Also *infra* pp. 52, 55,62,367, &c. Stanza quoted in the K. Pr. to show that both the relative and correlative may be omitted if the context is plain (य उत्पत्स्यते तं प्रत्येष यत्नः).

L. 45.—The additional verse found in N. O. K1, gives the name of the poet's spiritual teacher Jñânanidhi. The verse occurs in the Mahâvîracharita where the first line is श्रेष्ठः परमहंसानां महर्षीणामिवा-

शिरसः. The verse is properly omitted in Mâlatî-Mâdhava, as it does not set forth the वाचोयुक्ति or design of the work.

L. 46.—Upanishads are the theosophic portions of the Âryaṇakas of the Vedas. The term has in recent times been extended to mystic compositions pretending to be ancient, but in reality very modern extolling the importance of particular popular gods such as Mallâri or Khaṇḍobâ. There is extant an Allopanishad or the Upanishad of Allâ. The *Sâṁkhya* is a very ancient system of philosophy which considers the whole universe to be a development of an inanimate principle called *Prakṛiti*. *Purusha* or the soul is however distinct from Prakṛiti and its effects, but the properties attributed to the Purusha are purity and intelligence, and all the feelings of the heart are regarded as the products of the inanimate principle. There are as many souls as individuals, and they are eternal. The system does not admit God as the creator and controller of the Universe. It is attributed to Kapila. *Yoga* is a system which borrows its theoretic portion from the Sâṁkhya with the addition of the doctrine of the existence of God as the deliverer of mankind. In its practical portion it enjoins certain mortifications and processes to which the human body should be subjected with a view to the acquisition of miraculous powers and final emancipation. Its author is Patañjali. (For further information, see notes on ls. 2-5 and 7-8 Act V.).

L. 48.—"Felicity and richness of expression and depth of meaning."

L. 55.—The caus. of पठ् governing two objects, one of them is made to agree with the pass. part. पाठिता: and the other is put in the acc. case.

L. 60.—"The assumption of the character or mask."

L. 66.—"With red garments on," नेपथ्य is "dress" here.

L. 69.—The expression अपि नाम denotes "likelihood" and is often used when the speaker wishes that the thing should take place.

It is therefore equivalent to "Is it likely ?" "How I wish it were so," "How nice it would be if—." *Infra*. pp. 63, 117, 120, 127, &c. अपि नाम कुलपतेरियमसवर्णक्षेत्रसंभवा स्यात्. S'ak. Act I अपि नाम दुरात्मा राक्षसो गृह्णेत. Mudrâ R. Act I.

L. 72.—आन्तरज्ञ is "knowing the interior or hidden secret of *things*" rather than *of Kâm.*; because the eye does not tell what passes in Kâm.'s mind but what the result will be.

L. 73.—There is a double *entente* on the word वामक, which means the "left" and "unfavourable," and on दाक्षिण्य meaning "the quality of being the right" and "favourableness," "courteousness," "kindness." There is a two-fold *virodha* (Dand. p. 298, K. Pr. 10th Uch.) or *virodhâbhâsa* (Kuv.) here;— "Though *left* the eye becomes *right*" and "though *unkind* it becomes *kind*." The inconsistency is to be removed in the first case by taking दाक्षिण्य to mean *favourable* or *kind*, and in the latter by taking वामक to mean the *left*.

